
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥अथलंग्रस्मारानुक्रमणिकेयं॥

॥श्रीगुरुविद्यागणपतिर्जयति॥अथ तंत्रसारस्य अनुक्रमणिका लिख्यते॥यथा॥

अथ गुरुलक्षणं
अथ शिष्यलक्षणं
अथ निषिद्धादिगुरवः
सद्गुरोरुपासिलपरं
अथ कुलाकुलभेदं
अथ राशिचक्रम्
अथ नक्षत्रचक्रम्
अथाकथहचक्रम्
अथाकडमचक्रम्
अथ ऋणधनचक्र
५ अथ दीक्षाकालः
अथ वारनियमः
अथ तिथिनियमः
अथ नक्षत्रनिर्णयः
अथ योगादिनिर्णयः
अथ लग्नादिनिर्णयः

अथ पक्षनिर्णयः
उपासनापरत्वेन
तिथिनिर्णयः
एतच्च गोपालवि
षोत्तरपरम्
अथ जपमालानिर्णयः
मालिनीविजयेस्तत्र नियमः
अथ मालायां मणिनियमः
अथ आसनभेदाउच्यंते
अथ मालासंस्कारः
अथ पुरश्चरणप्रकारः
अथ पुरश्चरणे भक्ष्यनियमः
अथ पुरश्चरणे वर्ज्यानि
अथ जपस्य फलमाह
एतत्स्त्रीशूद्राणामनधिकारः
अथान्यप्रकारेण पुरश्चरणं

अन्यदपि पुरश्चर
णप्रकारः
पुरश्चरणप्रयोगः
ग्रहणपुरश्चरणं
कूर्मचक्रविचारः
मंत्राणां दशसंस्का
रः
कलावतीदीक्षाप्र
कारः
कुलविद्यानंतु
अथ गंधाष्टकं
अथ्यादिपात्रनिय
मः
२१ पंचायतनदीक्षा
२१ अथ संक्षेपदीक्षा
२० अथोपदेशांतरं
२० सर्वतोभद्रमंडलं

प॰

२१ अथ सर्वतोभद्रं
२१ मंत्रितांत्रिलोहीमुद्रा
२२ सामान्यपद्धतिपूजा
२३ अथ ...

अथ पीठन्यासः
अथ ...
तितः पीठपूजा

अस्याः पुरश्चरणं
अथाष्टद्रव्याणि
त्रिमधुरम्

अथ लिथिनियमः
अथ नक्षत्रनिर्णयः
अथ योगादिनिर्णयः
अथ लग्नादिनिर्णयः

अथ पुरश्चरणवर्ज्यानि
अथ जपस्य फलमाह
एतत्स्त्रीशूद्राणामनधिकारः
अथान्यप्रकारेण पुरश्चरणं

मः
२१ पंचायतनदीक्षा
२१ अथ संक्षेपदीक्षा
२० अथोपदेशालरं
२० सर्वतोभद्रमंडलं

२१ ... सर्वतोभद्र
२१ मंत्रिणांत्रिलोहीमुद्रा
२२ सामान्यपद्धतिपूजा
२३ अथ संध्याप्रयोगः
२३ अथ स्नानविधिः
श्रीविद्याविषयेअर्घ्यदा
नेविधिः
सर्वेषां मुपासनानांगा
यत्रीमंत्राः
गायत्रीध्यानंतु
अथ भूतशुद्धिः
अथान्याभूतशुद्धिः
अन्यामपिभूतशुद्धिः
प्राणप्रतिष्ठाप्रकारः
अथ मातृकान्यासः
अथांतर्मातृकान्यासः
सामान्यन्यासेअंगुली
नियमः

अथ पीठन्यासः
अथ ऋष्यादिन्यासः
ततः पीठपूजा
पूर्वादिदिक्नियमस्तु
अभिषेके यत्रनियमस्तु
अथ षोडशोपचाराः
अथ द्वात्रिंशादुपचाराः
३१ अथाष्टादशोपचाराः
अथ दशोपचाराः
अथ पंचोपचाराः
अथ षट्त्रिंशादुपचाराः
अथ चतुःषष्ठ्युपचाराः
अथ ब्रह्मार्पणमंत्रः
अथाष्टांगनमस्कारलक्षणं।
अथोच्छिष्टभोजिनः
३१ अथ भुवनेश्वरीमंत्राः

अस्याः पुरश्चरणं
अथाष्टद्रव्याणि
त्रिमधुरम्
अथ मंत्रोद्धारम्
३१ अथान्नपूर्णामंत्राः
३४ अथ त्रिपुरामंत्राः
अथ त्वरितामंत्राः
अथ नित्यामंत्राः
प्रकारांतरेण नित्यामंत्राः
अथ दुर्गामंत्राः
३० महिषमर्दिनीमंत्राः
अस्याः बलिमंत्रस्तु
अथ जयदुर्गामंत्राः
अथ शूलिनीमंत्राः
अथ स...स्वतीमंत्राः
अथ वागीश्वरीमंत्राः
पारिजातसरस्वतीमंत्राः

४१ अथगणेशमंत्राः
अथगणेशकवचं
४४ अथलक्ष्मीमंत्राः
४६ अथसूर्यमंत्राः
४८ अथविष्णुमंत्राः
५२ अथश्रीराममंत्राः
५३ अथकृष्णमंत्राः
बालगोपालमंत्राः
६१ दधिवामनमंत्राः
अथहयग्रीवमंत्राः
अथनृसिंहमंत्राः
अथहरिहरमंत्राः
अथवाराहमंत्राः
गरुडपंचाक्षरमंत्राः
अथगरुडस्तवः
विषाग्निहरमंत्राः
वृश्चिकादिविषहरमंत्राः
सर्पकविषहरोमंत्राः

लूताविषहरमंत्रः
अथहनुमत्कल्पं
६९ अथशिवमंत्राः
७० मृत्युंजयमंत्राः
चिंतामणिमंत्राः
नीलकंठमंत्राः
अथमंत्रांतरं
क्षेत्रपालमंत्राः
बलिमंत्रस्तु
अथबटुकमंत्रः
अथास्यपूजायंत्रं
अथभैरवीमंत्राः
अस्यापूजायंत्रं
कामेश्वरीभैरवीमंत्रः
संपत्प्रदाभैरवीमंत्रः
कौलेशीभैरवीमंत्रः
चैतन्यभैरवीमंत्रः

षट्कूटाभैरवी
भोगमोक्षप्रदा
भैरवीमंत्रः
अथरुद्रभैरवी
अस्याःपीठमंत्र
स्तु
८० भुवनेश्वरीभैरवी४
८१ त्रिपुराबालामंत्रः७
अथशापोद्धारमाह
अथनवकूटा
अथमंत्रांतरं
८२ अन्नपूर्णेश्वरीभैरवी१२
अस्याःपूजायंत्रम्
८३ श्रीविद्याप्रकरणम्
परिभाषिषोडशीमाह२
अथमहाषोडशी

भेदांतरमाह
अथदीपिनी
अथश्रीचक्रं
अथास्यपादो
दकमाहात्म्यं
दर्शनफलं
१२ संक्षेपश्रीवि२
द्यापद्धतिः
श्रीविद्याविशे
षपद्धतिः
श्रीविद्याविशे
षस्तोत्रं
लक्ष्मीदीसूर्य
पूजा
करांगन्यासः
नित्यस्यादिन्या
सः
षडंगन्यासः
वशिन्यादिन्यासः

संक्षेपप्रयोगः
पीठस्सतत्वन्यासो
तत्वन्यासः
पंचेदशीन्यासः
षोडशीन्यासः
षोढान्यासः
अथनादन्यासः
वामादिन्यासः
गणेशन्यासः
ग्रहन्यासः
नक्षत्रन्यासः
योगिनीन्यासः
राशिन्यासः
पीठन्यासः
त्रिपुरान्यासः
कामरतिन्यासः
षोडशनित्यान्यास
प्रकटादियोगिना०

आयुधन्यासः
ततोध्यानम्
अर्घ्यस्थापनं
ततःक्रमः
सामान्यविशेषा
र्घ्ययोरावश्यक
त्वमाह
तर्पणेमुद्रावि
शेषस्तु
तिथिनित्यायां
शुक्लकृष्णभेदः
पूजामंत्रस्तु
मानवौघाः
दिव्यौघाः
एतेसिद्धौघाः
आवरणंकु
र्यात्

वलिदानम्
१०५ इतिश्रीविद्या
प्रकरणं
१०९ प्रचंडचंडिका
मंत्रः
अथमंत्रांतरं
१११ षोडशीविद्याप्र
कारमाह
११२ अथमहाकाली
अथास्याःपूजाप्र
योगः
ततोवर्णन्यासः
११४ अथषोढान्यासः
ततस्तत्वन्यासः
अथबीजन्यासः
अस्याःपूजायंत्रे
ततःआवरणपू०

अस्यपुरश्चरणं
अथमंत्रभेदः
अस्यपूजाप्रयो
गः
अस्याप्रकारांत
रं
एतासांपूजाप्रयो
गः
११७ पंचाक्षरीकाली
विद्या ११८
एतासांपूजाप्र
योगः
एतासांपूजायंत्रे
कालीतंत्रे
एतासांविधानं
अथगुह्यकाली
यासांबलिमंत्र
स्तु

आसनमंत्रः
ध्यानं तु
ताराप्रकर्णं
ऽतासांसाधन
स्थानं
तारार्चनं
अस्याः पूजाप्र
योगः
षंध्यादिन्यासः
कालीलंबोष्टमा
तृकान्यासः
तारा षोढान्यासः
अथ रुद्रन्यासः
लोकपालन्यासः
शिवशक्तिन्यासः
तारादिन्यासः
अथ कोटालरं
अथ कालीषोढा
अथ मंत्रभेदः
रहस्यपुरश्चर

वीरसाधनं
अस्य संकल्पः
अपरिमितस्तु
अथ शवसाध
नं
स्थाननिर्णयमा
ह
तेनास्यं क्रमः
अथास्य बलिः
पूजासामग्री
बलिमंत्रस्तु
अथ मंत्रभेदाः
अथात्र प्रयोगः
अथ मातंगीमं
त्रः
मातंगी भैरवी
उच्छिष्टचांडालि १३८
नीमंत्रः
अथास्याः मंत्रो
लरम्

धूमावतीमंत्राः॥
प्रस्तारं लरमाह
अस्याः प्रयोगः
भद्रकालीमंत्रः
अस्याः मंत्रोलरं
भद्रकालीबीजमा
ह
उच्छिष्टगणेमंत्रमा
ह
उच्छिष्टगणेशाद्भव
नं
वक्रतुंडमंत्राः
विरोधपूजामाह
अथ काम्यानि
अथ धारणयंत्रं
अथ द्रव्याण्याह
अस्य पुरश्चरणं
वक्रतुंडविधानं

अथास्य कवचम्
अथ धनदामंत्राः १४४
अस्याः पूजाप्रयोगः
अस्याः पुरश्चरणम्
अस्याः यंत्रम्
अथ मंत्रोलरम्
१४५ अथ बगलामुखी
अस्याः पूजाप्रयोगः
अस्याः ध्यानम्
अस्याः यंत्रम्
अथ प्रयोगः
१४५ कर्णपिशाचिनीमंत्राः
अथ मंजुघोषमंत्राः
अथ मंत्रोलरम्
अथ तारिणीकल्पः
अस्य पूजायंत्रम्
अथ सारस्वतकल्पः
अथ कालायनीकल्पः

अथ मंत्रोलरम्
अथ दुर्गाकल्पः
शूलकाक्षीकल्पः
अथ गौरी मंत्राः
अथ प्रलक्ष्मी मंत्राः
अथ इंद्र मंत्राः
अथ महाकाली
ध्या कामोलिनी
महाकाली मंत्रप्र
योगः
निगडबंधमोक्ष
णम्
त्र्यंबक मंत्राः
मृतसंजीविनी मंत्राः
अथाकर्षणम्
अथ विद्वेषणम्
अथोच्चाटनम्
अथ स्तंभनप्रयोगः
योगिनी साधनम्

अथ मंत्रोलरम्
अथ मंत्रोलरम्
अथ मंत्रोलरम्
अथ मंत्रोलरम्
अथ मंत्रोलरम्
योगिनी प्रकर्णस
मासं
अथ यंत्रसंस्का
रः
अथ जपविशेषः
पृजायां पंचशुद्धिः
मंत्रसिद्ध्युपायः
अन्य मंत्रसिद्धिका
रणं
मंत्रसिद्धिलक्षणं
मंत्राणां दोषाना ह
मंत्राणां दोषशांतिः
होमार्थं कुंडनिर्ण
यः
होमप्रयोगः

काम्यहोमे अंगुलीनि
यमस्त
अथ होमपद्धतिः
अथ नित्यहोमः
इति होमप्रकर्णम्
संक्षेपेण होमप्रयो
गः
भूतानामुदयः
मृतवंध्याप्रशम
पुत्रध्यानविधिः
प्रशमनविधिः
अथ स्तवकवचानि
लिख्यते
भुवनेश्वरी कवचं
भुवनेश्वरी स्तवः
अन्नपूर्णा कवचं
अन्नपूर्णा स्तवः
त्रिपुरा कवचम्
त्रिपुरा स्तवः
दुर्गा कवचम्

अथ दुर्गा स्तोत्रम्
महिषमर्दिनी कवचं
महिषमर्दिनी स्तोत्रं
अथ लक्ष्मी कवचं
अथ लक्ष्मी स्तोत्रम्
सरस्वती स्तोत्रम्
अथ गणेश स्तोत्रं
हरिद्रा गणेश कव
चं
अथ सूर्य कवचम्
अथ विष्णु स्तोत्रं
श्रीराम कवचम्
मंत्रराजात्मक स्त
वः
अथाष्टोत्तरश
तनाम
अथ रुद्र स्तोत्रम्
अथ गोपाल स्तोत्रं
अथ कृष्ण कवचं
अथ शिव स्तोत्रम्

अथ ह्रीवकवचं
अथ वटुकस्तोत्रं
अथ भैरवीस्तोत्रं
महाभैरवीकवचं
१९८ अथ श्रीविद्यास्तोत्रं
अथ किंकिणीस्तोत्रं
१९९ प्रचंडचंडिकास्तोत्रं
तस्याः कवचम्
अथ श्यामास्तोत्रम्
अथ श्यामाकवचम्
अथ तारास्तोत्रम्
अथ ताराकवचं
अथ गुह्यषोढा
बगलामुखीस्तोत्रं
चतुःषष्ठ्युपचाराः
अष्टादशोपचाराः
षोडशोपचाराः
अथ दशोपचाराः

अथ पंचोपचाराः
द्रव्याणां निर्माल्य
कालनिर्णयः
२०० रुद्राक्षमाहात्म्यं
२०१ रुद्राक्षसंस्कारः
विष्वाराधनमंत्राः
२०२ स्वप्नप्रबोधकालः
योगांगास्तनामि
२०३ अथ मुद्राप्रकर्णं
२०४ भुवनेश्वर्यधारण
यंत्रं
अथ लक्षितायाः
अथ नवदुर्गायाः
अथ त्रिपुरायंत्रं
अथ गणेशस्य यंत्रं
रामचंद्रस्य यंत्रम्
नृसिंहस्य यंत्रम्
दक्षिणेरी गोपाल

२०७ श्रीलक्ष्म्यस्य यंत्रं
गोपालस्य यंत्रं
अथ ह्रीवयंत्रं
यंत्रलिखनद्रव्यं
अथ योगांगलरंध्रा
स्कन्दकस्नानम्
वेसिष्ठसंहितो
२०८ क्ताभिषेकमंत्रः
सर्वासां देवता
नां नित्यविधिः
२०९ श्रीविद्यायाः सं
क्षेपः
नैमित्तिकविधिः
श्रीविद्यापूजनं
२११ अथ प्रयोगः
लक्षितायाः प्रयो
गः
दुर्गायाः प्रयोगः

सरस्वतीप्रयोगः
लक्ष्म्याः प्रयोगः
गणपतेः प्रयोगः
२१३ सूर्यस्य प्रयोगः
रामचंद्रस्य प्रयो
गः
२१४ गोपालस्य प्रयोगः
दधिवामनप्रयोगः
२१५ हयग्रीवप्रयोगः
नृसिंहप्रयोगः
२१६ दक्षिणामूर्तेः प्र
योगः
भैरव्याः प्रयोगः
२१७ श्रीसुंदरीप्रयो
गः
अथ तिलकम्
२१८ अथ श्यामादि
अथ कामयम्

२१९ अथ तर्पणम्
अथ बलिद्रव्यम्
अथ गृहाद्युपायः
अथ वेतालसाधनम्
बालेकसंस्कारोपाया
२२० अथ कुलपूजा
२२१ अथ समयाचारः
२२२ शिवाबलिप्रकारः
अहूलीयागः
२२३ विजयाप्रकारः
यजनप्रकारः
२२४ लक्ष्मीसाध्ये शोधनं
लक्ष्मीवे अनुकल्पविधानं
शक्तिशोधनम्
वीराणां पुरश्चरणं
निरूप्यते
योगीनां मेत्रस्नानं
निरूप्यते
कुलतर्पणं तु
अथालरपूजा
अथ होमः
अथ कुमारीपूजा
अथ योगक्रिया
प्राणायामं तु
अथ प्रकारान्तरम्
समाप्येयं लंतसारो
तु क्रमणिका ॥ ५ ॥
श्रीवकुलंडा पर्णमस्तु

॥श्रीगुरुः गणपतिर्जयति॥ नत्वा कृष्णपदद्वंद्वं ब्रह्मादिसुरवंदितं॥ गुरुंच ज्ञानदातारं कृ
ष्णानंदेन धीमता॥१॥ तत्तद्ग्रंथगताद्वाक्यात्सारार्थं प्रतिपद्य च॥ सोकर्यार्थं च संक्षेपा
त्तंत्रसारः प्रतन्यते॥२॥ उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः॥ अथ गुरुलक्षणं॥ शांतो
दांतः कुलीनश्च विनीतः शुद्धवेषवान्॥ शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्॥ आ
श्रमी ध्याननिष्ठश्च मंत्रतंत्रविशारदः॥ निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते॥ तत्र विश्वा
धराचार्यैरुक्तं॥ मध्यदेशकुरुक्षेत्रनाटकोंकणसंभवाः॥ अंतर्वेदिप्रतिष्ठानावंत्याश्चैव गु
रूत्तमाः॥ मध्यदेशआर्यावर्तः॥ गौडाः शाल्वोद्भवाः सौरा मागधाः केरलास्तथा॥ कोशलाश्च
दशार्णाश्च गुरवः सप्त मध्यमाः॥ कर्णाटनर्मदाराष्ट्रकच्छतीरोद्भवास्तथा॥ कलिंगाश्च कुलं
बाश्च कांबोजाश्च धमाधमाः॥ अन्यश्च निषिद्धा गुरवो यथा॥ वैशंपायनसंहितायां॥ अपु
त्रो मृतपुत्रश्च कुष्ठी च वामनस्तथा॥ कुनखी श्यावदंतश्च स्त्रीजितश्चाधिकांगकः॥ हीनांगः
कपटी रोगी बह्वाशी वलउस्तथा॥ एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसंमतः॥ इति गुरुलक्ष
णं॥ शांतो विनीतः शुद्धात्मा श्रद्धावान् धारणाक्षमः॥ समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो
यती॥ एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा॥ गुरुता शिष्यता वापि तयोर्वत्सरवासतः॥
तथा चोक्तं सारसंग्रहे॥ सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत्॥ तथा आचार्यैरुक्तं॥
एकाब्देन च वे योग्यो ब्राह्मणोब्दद्वयान्नृपः॥ वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरोरिति॥
ज्ञानार्णवेपि॥ गुरौ मनुष्यबुद्धिं च मंत्रे चाक्षरभावनां॥ प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्र
जेत्॥ जन्महेतू च पितरौ पूजनीयौ प्रयत्नतः॥ गुरुर्विशेषतः पूज्यो धर्माधर्मपरीक्षकः॥ गु
रुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः॥ शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन॥ गुरोर्हितं प्रक
र्तव्यं वाङ्मनः कायकर्मभिः॥ अहिताचरणाद्देवि विष्ठायां जायते कृमिः॥ मंत्रसागाद्भवेन्मृत्यु

गुरुत्यागाद्दरिद्रता ॥ गुरुमंत्रपरित्यागी रौरवं नरकं व्रजेत् ॥ स्वप्ने तु न कालनियमः ॥ स्वप्ने तु नियमो
नास्तीति नारदवचनात् ॥ तदुक्तं तत्रैव ॥ राज्ञः अमात्यजो दोषः पत्नीपापं च भर्तरि ॥ तथा शिष्यार्जि
तं पापं गुरुः प्राप्नोति निश्चितं ॥ त्यागमेवं विवाक्यं ॥ गुरोः शय्यासनं यानं पादुकोपानहौ पुनः ॥ स्ना
नोदकं तथा छायां लंघयेन्न कदाचन ॥ गुरोरग्रे पृथक्पूजामौद्धत्यं च विवर्जयेत् ॥ दीक्षां व्या
ख्यां प्रभुत्वं च गुरोरग्रे विवर्जयेत् ॥ गुरौ संनिहिते यस्तु पूजयेदन्यदेवतां ॥ न स फलमवाप्नोति प्र
जा च विपुला भवेत् ॥ तथा च श्रीक्रमे ॥ जन्मदात् ब्रह्मदाता गरीयान्ब्रह्मदः पिता ॥ तस्मान्मन्येत स
ततं पितृतोऽप्यधिकं गुरुं ॥ गुरुवत् गुरुपुत्रेषु गुरुवत्तत्सुतादिषु ॥ तथा च रुद्रयामले ॥ अविद्यो वा स
विद्यो वा गुरुरेव हि दैवतं ॥ आमार्गे मन्त्रतो गच्छन् गच्छेत्तमनुव्रजेत् ॥ तथा क्रियासारे ॥ गुरुर्माता
पिता स्वामी बांधवः सुहृदः शिवः ॥ इत्याधाय मनो नित्यं भजेत्सर्वात्मना गुरुं ॥ इति शिष्यलक्षणं ॥
अथ निषिद्धा गुरवः ॥ तथा च योगिनीतंत्रे ॥ पितुर्मंत्रं न गृण्हीयात्तथा मातामहस्य च ॥ सोदरस्य क
निष्ठस्य वैरिपक्षाश्रितस्य च ॥ गणेशविमर्शिण्यां ॥ यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ॥
विविक्ताश्रमिणो दीक्षा न सा कल्याणदायिका ॥ इत्यादिनिषेधवचनादेभ्यो मंत्रं न गृण्हीयात् ॥
इदं तु सिद्धेतरविषयं ॥ सिद्धमंत्रो न दुष्यतीति वचनात् ॥ तथा चोक्तं सिद्धयामले ॥ यदि नाग्य
हो नैव सिद्धिर्विधानं नेप्सिये ॥ तद्देवतां तु दीक्षेत यस्मात् गुरुविचारणं ॥ रुद्रयामले च ॥ न पत्नीं
दीक्षयेद्भर्ता न पिता दीक्षयेत्सुतं ॥ न पुत्रं च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥ तथा चान्यत्र ॥ प्रमा
दाच्च तथाज्ञानात्पितुर्दीक्षां समाचरेत् ॥ प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ॥ पितुरि
त्युपलक्षणं ॥ मातामहादीनामपि ॥ प्रायश्चित्तं तत्र अयुतगायत्रीजपः ॥ सर्वत्र तथा दर्शनात् ॥ तथा
चोक्तं मत्स्यसूक्ते ॥ विरुद्धं यत्तु पितुर्मंत्रं शैवशाक्ते न दुष्यति ॥ इति कौलिकमंत्रदीक्षापरं ॥ तथा
योगिनीतंत्रे शान्त्यादिविद्यामपि कुर्याद्दीक्षानिषेधात् ॥ यद्वा शाक्ते तारा विद्यायां मत्स्यसूक्ते प्र

तिपादनात्॥ तथा च निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्॥ इत्यादि महातीर्थे॥ उपरागे सति स
वित्रं न दोषः॥ तथा विष्णुमंत्रमपि कस्य॥ सा पुष्टं तथा ब्रह्मन् वक्ष्यामि सकलं तव॥ ब्रह्मणा कथि
तं पूर्वं वसिष्ठाय महात्मने॥ वसिष्ठोपि स्वपौत्राय मंत्रमेतद् दत्तवान् स्वयं॥ प्रसन्नहृदयः स्वच्छः पि
तामेकरुणानिधिः॥ कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान्॥ इत्यादि वैशंपायनसंहितायां द्रौ
णं प्रति व्यासवाक्यं॥ योगिनीतंत्रे च॥ निवेद्य चैव पितुर्मंत्रं तथा मातामहस्य च॥ स्वप्नलब्धे स्त्रि
या दत्ते संस्कारेणैव शुध्यति॥ यत्तु॥ साध्वी चैव सदाचारा गुरुभक्ता जितेंद्रिया॥ सर्वमंत्रार्थतत्त्व
ज्ञा सुशीला पूजने रता॥ गुरुयोग्या भवेत्सा हि विधवा परिवर्जिता॥ स्त्रियो दीक्षा शुभा प्रोक्ता मातु
श्चाष्टगुणा स्मृता॥ इदं च सद्गुरोरुपासितमंत्रपरं॥ तथा च भैरवीतंत्रे॥ स्वीयमंत्रोपदेशे तु
न कुर्याद्गुरुचिंतनं॥ मातुरिति॥ उपासितेष्टगुणं॥ अनुपासिते शुभं च फलदमित्यर्थः॥ सिद्ध
मंत्रविषयं वा इति केचित्॥ वस्तुतस्तु योगिनीतंत्रे॥ स्त्रीपदं विधवापरं॥ एकवाक्यत्वात्॥
योगिनीतंत्रे॥ स्वप्नलब्धे तु कलशे गुरोः प्राणान्निवेदयेत्॥ वटपत्रे कुंकुमेन लिखित्वा ग्रहेणं शु
चिः॥ ततः शुद्धिमवाप्नोति अन्यथा निष्फलं च भवेत्॥ इदं तु सद्गुरोरभावे॥ तत्संभवे तु तस्मादेव ग्र
हीयात्॥ स्वप्ने तु नियमो नास्तीति नारदवचनात्॥ तत्रे सिध्यादि नियमो नास्तीति दीक्षां विनो ज
पस्य दुष्टत्वात् प्रथमं तावन्निरूप्यते॥ दिव्यं ज्ञानं यतो दद्यात् कुर्यात्पापस्य संक्षयं॥ तस्माद्दीक्षेति सा
प्रोक्ता मुनिभिस्तंत्रवेदिभिः॥ सर्वाश्रमेषु दीक्षा या भावेस्य करं॥ तथा च॥ दीक्षा मूलं जपं सर्वं दीक्षा
भा०५ मूलं परं तपः॥ दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन्॥ अदीक्षिता ये कुर्वंति जपपूजादिकाः क्रि
याः॥ न भवंति प्रिये तेषां शिलायामुप्तबीजवत्॥ देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः॥ तस्मा
३ वै त्सर्वप्रयत्नेन दीक्षां कुर्यात्स्वतांत्रिकात्॥ अदीक्षितोपि मरणे रौरवं नरकं व्रजेत्॥ तस्माद्दीक्षां सदा
कुर्याद्गुरुणा दीक्षितो भवेत्॥ कल्पेद्धालु मंत्रं न मोक्षो न तिनराधमः॥ मन्वंतरसहस्रेषु निष्कृतिर्नै
व जायते॥ नादीक्षितस्य कार्यं स्यात्तपोभिर्नियमैर्व्रतैः॥ न तीर्थगमनेनापि न च शारीरयंत्रणैः॥

रुद्र ११ वव १ वेत्र २ मुगा ४ र्के २ रुदिस्क ९ क त स्ट ६ ॥ ८ वोड्रा १६ चतुर्द्दशा १४ ओति के कु ५ पाता ल ७
पंचदशा १५ नक्षिहि मांन्तु कोष्ठे १३ वर्णान् लिखेद्द्विपि न यान् क्रमतः सुधीमान्॥ नामाद्यक्षरमा
रभ्य यावन्मंत्रादिमाक्षरं॥ चतुर्भिः कोष्ठैरेकैकं मिलितकोष्ठचतुष्टयं॥ पुनः कोष्ठगते कोष्ठे सव्यतो
नामत आदितः॥ सिद्धः साध्यः सुसिद्धोरिः क्रमाज्ज्ञेयो विचक्षणैः॥ तथा चोक्तं विश्वसारे॥ दक्षि
णावर्त्तयोगेन कोष्ठे वर्णान् लिखेत्क्रमात्॥ येनैव लिखनं कुर्यात्तेनैव गणनं चरेत्॥ चतुरस्त्रं लि
खेत्कोष्ठं चतुरस्त्रसमन्वितं॥ पुनश्चतुष्कत्रापि लिखेद्धीमान् क्रमेण तु॥ इति विश्वसारवचना
त्॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः॥ सुसिद्धो ग्रहणादेव अरिर्मूलनिकृंतत इति॥
सिद्धार्णा बांधवाः प्रोक्ताः साध्यार्णाः सेवकाः स्मृताः॥ सुसिद्धाः पोषका ज्ञेया शत्रवो घातकाः स्मृताः॥
जपेन बंधुसिद्धिः स्यात्सेवकोपि कसेवया॥ पुष्ण्याति पोषको जीवं घातको नाशयेद्ध्रुवं॥ सिद्धः
सिद्धो यथोक्तेन द्विगुणात्सिद्धसाध्यकः॥ सिद्धः सुसिद्धोर्द्धजपात्सिद्धारि हंति बांधवान्॥ साध्य
सिद्धो द्विगुणकः साध्यः साध्यो निरर्थकः॥ तत्सुसिद्धस्त्रिगुणजपात्साध्योरि हंति गोत्रजान्॥
सुसिद्धसिद्धोर्द्धजपात्तत्साध्यो द्विगुणाज्जपात्॥ तत्सुसिद्धो ग्रहादेव सुसिद्धारिः स्वगोत्रहा॥
अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकां॥ तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हंति साधकं॥ इत्य
कथहचक्रम्॥ अथाकडमचक्रं॥ रेखाद्वयं पूर्वपरेण कुर्यात्तन्मध्यतो याम्यकुबेरचेदात्॥
महेश्वरस्योपि पति क्रमेण तिर्यक् तथा वायुहुताशनेन॥ अकारादिक्षकारांतान् कोष्ठे बहीनान्
लिखेत्क्रमात्॥ एकैकं क्रमतो लेख्यान्मेषादिपुष्टपातकान्॥ गणयेत्क्रमतो चंद्रे नामादिवर्णका
दिकान्॥ मेषादितो हि मीनांतं गणयेत्क्रमशः सुधीः॥ सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः
पुनः॥ नवैकपंचमे सिद्धः साध्यः षट्‌दशायुग्मके॥ सुसिद्धास्त्रिःसप्तके रुद्रे वेदाष्टद्वादशेरिपुः॥
एतत्ते कथितं देवि अकडमादिकमुत्तमं॥ इदं तु गोपालविषयकमेव॥ गोपाले कडमस्थल इति
वचनात्॥ इत्यकडमचक्रं॥ अथ ऋणधनचक्रं॥

टठ चित्रा राक्षसः ॥१४॥ ड स्वाती देवः ॥१५॥ ढ विशाखा राक्षसः ॥१६॥ तथद अनुराधा देवः ॥१७
ध ज्येष्ठा राक्षसः ॥१८॥ नपफ मूलं राक्षसः ॥१९॥ ब पूर्वाषाढा मानुषः ॥२०॥ भ उत्तराषाढा मानुषः
॥२१॥ म श्रवणा देवः ॥२२॥ यर धनिष्ठा राक्षसः ॥२३॥ ल शततारा राक्षसः ॥२४॥ व पूर्वाभा
द्रपदा मानुषः ॥२५॥ षसह उत्तराभाद्रपदा मानुषः ॥२६॥ अं अः रेवती देवः ॥२७॥ तत्राच पिंग
लातंत्रे श्रीक्रमे च ॥ उत्तरादक्षिणाग्रास्तु रेखाः कुर्याच्चतुष्टयी ॥ दशरेखाः पश्चिमाग्राः कुर्त्याद्वी
रवंदिते ॥ अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः ॥ वक्ष्यमाणविधानेन तन्मध्ये वर्णकान्
लिखेत् ॥ अकारादिक्षकारांताद्विः २ चंद्र १ वह्नि ३ वेद कान् ४ नमी १ नु १ नेत्र २ चंद्रांश्च १ आन्क्षेषां
तं रवगौ प्रिमे ॥ द्विः २ न्न १ नेत्र २ नेत्र २ युग्मां २ श्चंद्र १ नेत्रा २ ग्नि ३ चंद्र १ कान् ॥ मघादिकोष्ठपर्यंतं
द्वितीयं नवतारकं ॥ वह्नि ३ नमीदु १ ॥ १ चंद्रां १ अयुग्मे २ नु १ नेत्रवह्निकान् ॥ वेदेन ४ मेदितावं
लो रेवत्यंशगताः क्रमात् ॥ तथाचोक्तं निबंधे ॥ पूर्वोत्तरात्रयं चैव चरण्यार्द्रोध रोहिणी ॥ इमा
नि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥ ज्येष्ठाशततभिषा मूल धनिष्ठा श्लेष कृत्तिकाः ॥ चित्रा म
घा विशाखा स्युस्तारा राक्षसदेवताः ॥ अश्विनी रेवती पुष्य स्वाती हस्त पुनर्वसू ॥ अनुराधा मृग
शिरः श्रवणो देवतारकाः इति ॥ तथा चोक्तं तंत्रे ॥ स्वजातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु ॥ रक्षो
मानुषयोर्नाशो वैरं दानवदेवयोः ॥ जन्म संपत् २ विपत् ३ क्षेम ४ प्रत्यरिः ५ साधकौ ६ वधः ७ मित्रं ८
परममित्रं च ॥९॥ जन्मादीनि पुनः पुनः ॥१॥ जन्मतृतीयपंचमसप्तमानि वर्जनीयानि नक्षत्रा
णि ॥ तथाचोक्तं ॥ २ सा ६ ८ ८ नव ९ नक्षत्राणि युग्म २ युग्म २ गतान्यपि ॥ इतराणि नक्षत्राणि हानि
मृत्युकराणि चेति ॥ स्वनक्षत्राद्देवनक्षत्रं गणनीयं वचक्षणैः ॥ स्वनक्षत्राद्गणने स्वनामाद्यक्षर
संबंधिनक्षत्राद्देवनक्षत्रं गणनीयमिति ॥ प्रादक्षिण्येन गणये साधकाक्षरतः सुधीः ॥ इति नक्ष
त्रचक्रं ॥ अथाकथहचक्रं ॥ चतुरस्रे लिखेद्वर्णान् चतुःकोष्ठसमन्विते ॥ चतुःकोष्ठे षोडशको
ष्ठ इति यावत् ॥ तत्र षोडशकोष्ठे अकारादिवर्णान् प्रादक्षिण्येन लिखेत् ॥ तत्र क्रमः ॥ इंदुग्नि १।३

चकारादाग्नेयपार्थिवानां शत्रुः ॥ नाम सर्वमितं स्याद्धि ह्रस्वं नैव शीलयेत् ॥ इति कुलाकुलविचारः ॥
अथ राशिचक्रं ॥ यथा आगमकल्पद्रुमे ॥ सूत्रद्वयं पूर्वपरायतं स्यात्तन्मध्यतो याम्यकुबेरजे
ताल ॥ एकैकमीशाननिशाचरेतु तुलाशावायौ विलिखेत्ततोऽर्णान् ॥ वेदाग्निवह्नियुगलत्रय
वङ्गाक्षिसंख्यान्यवेषुबाणशरपंचचतुष्टयार्णान् ॥ मेषादितश्च विलिखेत्सकलांस्तव
र्णान् कन्यागतानविलिखेद्वशशादिवर्णान् ॥ अ आ इ ई मेषः ॥ उ ऊ ऋ वृषभः ॥ ॠ ऌ ॡ मि
थुनः ॥ ए ऐ कर्कटकः ॥ ओ औ सिंहः ॥ अं अः शषसहाः कन्या ॥ कवर्गस्तुला ॥ चवर्गो वृश्चिकः
टवर्गो धनुः ॥ तवर्गो मकरः ॥ पवर्गः कुंभः ॥ यवर्गो मीनः ॥ स्वराशिनामनुकूलं मंत्रं भजेत्
तथा च ॥ स्वताराराशिकोष्ठानामनुकूलान् भजेन्मनून् ॥ इति वचनात् ॥ राशीनां भेदतालेयास्य
जेष्ठत्वमतिं व्ययं ॥ स्वराशेर्मंत्रराश्यंतं गणनीयं विचक्षणैः ॥ यदा तु स्वराशेरज्ञानं तदा साधक
नामाक्षरसंबंधिनं राशिं गृहीत्वा गणयेत् ॥ साध्याक्षरराश्यंतं गणयेत्साधकाक्षरादिति ॥ तदु
क्तं रामार्चनचंद्रिकायां ॥ एकपंचनवबांधवाः स्मृताः द्वौ च षट् च दशमाश्च सेवकाः ॥ वह्निरुद्रमुन
यस्तु पोषकाः द्वादशाष्टचतुरस्रघातकाः ॥ चतुरस्रघातका इति विष्णुनिबंधे ॥ वह्निरुद्रमुन
कारधवलताल ॥ शत्रुस्थानं तु षष्ठं वर्जनीयं ॥ षष्ठाष्टमद्वादशानि वर्जनीयानीति वचनात् ॥ रामार्चनचंद्रिका
त्रराजे ॥ तेन मंत्राद्यवर्णेन नाम्नश्चाद्यक्षरेण च ॥ गणये यदि षष्ठं वाप्यष्टमं द्वादशं तु वा ॥ तथा च तं
त्राद्यवर्णः स्यात्तेन तस्याहितं भवेत् ॥ इति राशिचक्रं ॥ अथ लग्नशोधनं ॥ तनुर्धनं भ्रातृ ॥ रिपुम
पुत्रशत्रुकलत्रकाः ॥ मरणं धर्मकर्मायव्ययाद्वादशराशयः ॥ वैश्वबंधुशत्रुरिति स्थाने बंधु
बंधुस्थाने शत्रुरिति पाठः ॥ अथ नक्षत्रचक्रं ॥ अ आ अश्विनी देवगणः ॥ १ ॥ इ भरणी मानुषः ॥
॥ २ ॥ ई उ ऊ कृत्तिका राक्षसः ॥ ३ ॥ ऋ ॠ ऌ ॡ रोहिणी मानुषः ॥ ४ ॥ ए मृगशिरा देवः ॥ ५ ॥ ऐ आर्द्रा मा
नुषः ॥ ६ ॥ ओ औ पुनर्वसुर्देवः ॥ ७ ॥ कः पुष्यो देवः ॥ ८ ॥ खग आश्लेषा राक्षसः ॥ ९ ॥ घङ मघा राक्ष
सः ॥ १० ॥ चछ पूर्वाफाल्गुनी मानुषः ॥ ११ ॥ जझ उत्तराफाल्गुनी मानुषः ॥ १२ ॥ ञट हस्तो देवः ॥ १३ ॥

अतः सद्गुरोराहितदीक्षः सर्वकर्माणि साधयेत् ॥ तत्राप्यनुकूलं मंत्रं दीक्षयेत् ॥ तथा चोक्तं ॥ स्वतारा
राशिकोष्ठानामनुकूलान् जपेन्मनून् ॥ तथा चोक्तं वाराहीतंत्रे ॥ ताराचक्रं राशिचक्रं नामचक्रं तथैव
च ॥ अत्र चेत् सद्गुणो मंत्रो नान्यचक्रं विचारयेत् ॥ इति लुप्तधानतया बोद्धव्यं ॥ चेन्निमंत्रं न गृह्णीया
दनुकूलं तथैव च ॥ इत्यादिदर्शनात् ॥ तत्तच्चक्रविचारस्यावश्यकत्वात्प्रथमस्तन्निरूप्यते ॥ तथा चो
क्तं ॥ नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ॥ सपिंडाक्षरवर्णानां सिद्धादीन्नैव शोधयेत् ॥ स्वप्न
लब्धे स्त्रिया दत्ते मालामंत्रे च त्र्यक्षरे ॥ वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत् ॥ मालामेतास्तु वा
राहीतंत्रे ॥ विंशद्वर्णाधिका मंत्रा मालामंत्राः प्रकीर्त्तिताः ॥ नपुंसकस्य मंत्रस्य सिद्धादीन्नैव शोधयेत्
हंसस्याष्टाक्षरस्यापि तथा पंचाक्षरस्य च ॥ एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत् ॥ एकाक्षर
स्य मंत्रस्य मालामंत्रस्य पार्वति ॥ वैदिकस्य च मंत्रस्य सिद्धादीन्नैव शोधयेत् ॥ चामुंडातंत्रे ॥ काली
तारा महाविद्या षोडशी भुवनेश्वरी ॥ भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥ बगलासिद्धवि
द्या च मातंगी कमलात्मिका ॥ एता दश महादेवि महाविद्याः प्रकीर्त्तिताः ॥ नात्र सिद्धाद्यपेक्षास्ति न
क्षत्रादिविचारणं ॥ कालादिशोधनं नास्ति न चामित्रादिदूषणं ॥ सिद्धविद्यातया नात्र युगसेवा
परिश्रमः ॥ नास्ति किंचिन्महादेवि दुःखसाध्यं कदाचन ॥ इत्यादिना च नादेषु विचारो नास्ति ॥ वस्तुत
स्तु ॥ इदं प्रशंसापरं ॥ सर्वस्य विचारस्यावश्यकत्वे ॥ दूरदृष्टेन शास्त्रकाराभिदैरि मंत्रस्य स्वप्नादोषा स्या ॥ त
त्तद्दोषस्य दृष्टत्वादिति संप्रदायज्ञाः ॥ तत्र कुलाकुलं नेदं वक्ष्यामि मंत्रिणामिह ॥ तथा च निबंधे ॥ वा
य्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात् ॥ पंचह्रस्वाः पंचदीर्घा बिंदुताः सप्रिसंचराः ॥ कादयः
पंचशः पक्षलसहालाः समीरिताः ॥ अ आ ए क च ट त प य षाः मारुताः ॥ इ ई ऐ ख छ ठ थ फ र क्षा वा
ह्नेयाः ॥ उ ऊ ओ ग ज ड द ब ल ळाः पार्थिवाः ॥ ऋ ॠ ऌ ॡ औ घ झ ढ ध भ व सा वारुणाः ॥ लं लृ अं ङ
ञ ण न म श हाः नाभसाः ॥ साधकस्याक्षरं पूर्वं मंत्रस्यापि तदक्षरं ॥ यद्येकभूतदैवत्यं जानीयात्स्व
कुलं हितं ॥ भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतं ॥ मारुतं पार्थिवानां च आग्नेयस्यांजसं रिपुः ॥

तद्यथा॥ कोष्ठान्येकादशान्येव वेदे न परिलानि च॥ अकारादि हकारांतं लिखेत्कोष्ठेषु तलनि तत्॥ प्र-
थमे पंच कोष्ठेषु ह्रस्वदीर्घक्रमेण तु॥ द्वंद्वं द्वंद्वं लिखेत्तत्र विचारे खलु साधकैः॥ कोष्ठे षष्ठे च कञो
नणान्क्रमस्तु लिखेत्सुधीः॥ षट् ६ काल ६ काल ६ रिपु० दृग्नि ३ समुद्र ४ वेद ४ खा० काश० अन्य०
दहनाः ३ खलु साध्यवर्णाः॥ युग्म २ द्वि २ पंच ५ विय० दंबर० युक्र २ शशांक १ व्योमा० छिद्र ४ वेद ४
शशिनः १ खलु साधकार्णाः॥ नामाक्षरादकठवाक्रजे चतुष्कोष्ठे षड्गुणो नयोरधिकशेषमत्
लंघनं स्यात्॥ अस्यार्थः॥ साध्यवर्णान् स्वरव्यंजनरूपेण पृथक्कृतान् षड्कालांके गणि-
तान्॥ तथा साधकनामाक्षरान् स्वरव्यंजनरूपेण पृथक्कृतान्॥ युग्मादिकेर्गलाइताः अष्ट ८
संख्यान्विहृता॥ उभयोः साध्यसाधकयोः अधिकं कृत्वा॥ शेषं धनं शोधितं मंत्रे दद्यात्॥ यदा मंत्र
श्चेतादृक् भवति॥ तदा मंत्रः शुभदायको भवति॥ धनी चेन्ना॥ तदुक्तं तंत्रांतरे॥ मंत्रो यद्यधि-
कांकः स्यात्तदा मंत्रं जपेत्सुधीः॥ समेपि च जपेन्मंत्रं न जपेत्तु ऋणाधिके॥ अन्येष्वेकं विजानी-
यात्तस्मान्मंत्रं विवर्जयेत्॥ तथा चोक्तं॥ इंद्र १४ दर्श २० नेत्र २ रवि १२ पंचदश १५ तु ६ वेद ४ व-
ह्न्या ३ यद्या ८ ए ८ नवनि २ गुणिताश्च साध्यान्॥ दिक् १० म १ गिरि ७ कृति ४ गजा ८ ग्नि ३
मुनी ७ षु ५ वेद ४ ष ६ वह्नि ३ निस्तु गुणितान्थ साधकार्णान्॥ इंद्र दर्श इति वचनात्तु विंदुवि-
सर्गं॥ रामार्च नेत्रेचंद्रिकायां ध्रुलतात्॥ इति केचित्॥ वस्तुतस्तु पूर्वस्यैव विवरणमेतत्॥ तथाहि॥
इंद्र दर्श नेत्रे साधनं तरस्य॥ नामार्णकोष्ठांकमथाग्निहन्यादेकादिरुद्रांकगतं क्रमेण॥ तथा व्यक्तं चोक्तं
रुद्रयामले॥ साध्यांकान् साधकांकांश्च पृथगेव हसेरल्पायां॥ गुणिते तु सुलैः कालो मध्ये यं भाष्यते स्फु-
टं॥ तदेक कथयाम्यत्र एकादशांगं हास्थते॥ इह फलेलाल॥ रविकात्त काले फलं भ्रमकारांतरं॥ तथा॥
नामाद्यक्षरमारभ्य यावन्मंत्रादिमं भवेत्॥ त्रिधा कृत्वा स्वरैर्भिन्द्यात्तद्व्यद्विपरीतकं॥ अस्यार्थः॥
साधकनामाद्यक्षरतो गणनया यावन्मंत्रादिमाक्षरं॥ तत्संख्यां तु त्रिधा कृत्वा सप्तभिर्जागे हरेद्यदि
कं कृष्णं शेषं धनं स्यात्॥ तद्व्यद्विति मंत्राद्यक्षरमारभ्य यावत्साधकाक्षरमनुभवेत्॥

तावत्संख्यं समस्तमुपाकृत्यात्रिभिर्हरेत्॥ एतन्मध्ये यस्याधिकं तिष्ठति स ऋणी भवति॥ अन्यत्र॥ साध्य
नामाद्विगुणितं साधकेन समन्वितं॥ अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतकं॥ अस्य साध्यनामस्यार्थः॥
मंत्रवर्णान् स्वरव्यंजनभेदेन द्विगुणितं कृत्वा साधकनामवर्णान् स्वरव्यंजनभेदेन मेलयित्वाऽष्टभि
र्भागं हृत्वाधिकमृणं शेषं धनमिति बोद्धव्यं॥ तदन्यदिति साधकनामाक्षरं स्वरव्यंजनभेदेन द्विगुणी
कृत्य स्वरव्यंजनभेदेन साध्येन युतं कृत्वाऽष्टभिर्हरेत्॥ अधिकमृणं शेषं धनमिति॥ अथ दीक्षाका
लः॥ मंत्रारंभस्तु चैत्रे स्यात्समस्तपुरुषार्थदः॥ वैशाखे रत्नलाभः स्याज्ज्येष्ठे तु मरणं भवेत्॥ आ
षाढे बंधुनाशः स्यात्पूर्णधीः श्रावणे भवेत्॥ प्रजानाशो भाद्रपदे आश्विने रत्नसंचयः॥ कार्त्तिके मं
त्रसिद्धिः स्यान्मार्गशीर्षे तथा भवेत्॥ पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्द्धनं॥ फाल्गुने सर्वकामाः स्युः
मलमासं विवर्जयेत्॥ चैत्रेति गोपालविषयं मौलम्युक्तत्वात्॥ मधुमासे भवेद्दीक्षा दुःखायेति व
चनात्॥ वान्यत्र॥ अत्र च मासः सौर एव ग्राह्यः॥ सौरे मासि भवेद्दीक्षा न चांद्रे न च लौरके॥ इति
गौतमीवचनात्॥ अथ वारनियमः॥ रविवारे भवेद्वित्तं सोमे शांतिर्भवेत्किल॥ आयुरंगारके हंति
तत्र दीक्षां विवर्जयेत्॥ बुधे सौंदर्यमाप्नोति ज्ञानं स्याद्बृहस्पतौ॥ शुक्रे सौभाग्यमाप्नोति यशोहानिः
शनैश्चरे॥ अथ तिथिनियमः॥ तदुक्तं आगमकल्पद्रुमे॥ प्रतिपत्सु कृता दीक्षा ज्ञाननाशकरी म
ता॥ द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवेत्॥ चतुर्थ्यां वित्तनाशः स्यात्पंचम्यां बुद्धिवर्द्धनं॥ षष्ठ्यां
ज्ञानक्षयं सौख्यं लभते सप्तमीदिने॥ अष्टम्यां बुद्धिनाशः स्यान्नवम्यां वपुषः क्षयः॥ दशम्यां राजसौभा
ग्यमेकादश्यां शुचिर्भवेत्॥ द्वादश्यां सर्वसिद्धिः स्यात्त्रयोदश्यां दरिद्रता॥ तिर्यग्योनिश्चतुर्दश्यां हा
निर्मासावसानके॥ पक्षांते धर्मवृद्धिः स्यादस्वाध्यायं विवर्जयेत्॥ संध्यागर्जितनिर्घोषभूकंपोल्का
निपातनं॥ एतानन्यांश्च दिवसान्श्रुत्युक्तान्परिवर्जयेत्॥ द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा॥
इति त्रयोदशीविधानविषयं॥ रामार्चने न चैवेह प्राध्यतत्वात्॥ जयोदशी च दशमी प्रशस्ता सर्वका
मदा॥ इति सनत्कुमारीयवचनात्॥ अथ नक्षत्रनिर्णयः॥

अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवं ॥ कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् ॥ मृगशि-
रसि सुखावाप्तिरार्द्रायां बंधुनाशनं ॥ आश्लेषायां भवेन्मृत्युः समघायां दुःखमोचनं ॥ सौंदर्यं पूर्वफल्गुन्यां
प्राप्नोति च न संशयः ॥ ज्ञानं चोत्तरफल्गुन्यां हस्तायां च धनी भवेत् ॥ चित्रायां ज्ञानसिद्धिः स्या-
त्स्वात्यां शत्रुविनाशनं ॥ विशाखायां सुखं चानुराधायां बंधुवर्द्धनं ॥ ज्येष्ठायां सुतहानिः स्यान्मू-
लायां कीर्तिवर्द्धनं ॥ पूर्वाषाढोत्तराषाढे भवेतां कीर्तिदायिके ॥ श्रवणायां भवेद्दुःखी धनिष्ठायां
दरिद्रता ॥ बुद्धिः शतभिषायां स्यात्पूर्वभाद्रे सुखी भवेत् ॥ सौख्यं चोत्तरभाद्रे च रेवत्यां कीर्तिवर्द्ध-
नं ॥ अथ योगादिनिर्णयः ॥ तदुक्तं विश्वसारे ॥ शुभसिद्धश्चायुष्मान् ध्रुवयोगस्ततः परं ॥ प्रीति-
सौभाग्ययोगश्च वृद्धियोगस्ततः परं ॥ हर्षणश्च तथा योगाः सर्वे तत्र शुभावहाः ॥ बवबालवतैति-
लवणिजस्तद्वंतरं ॥ करणानि शुभान्येव सर्वतंत्रेषु चाभिनि ॥ अथ लग्नादिनिर्णयः ॥ वृषेसिं-
हे च कंन्यायां धनुमीनाख्यलग्नके ॥ चंद्रतारानुकूले च कुर्याद्दीक्षाप्रवर्त्तनं ॥ अथ पक्षनिर्णयः ॥
शुक्लपक्षे शुभा दीक्षा कृष्णेप्यापंचमादिनात् ॥ निषिद्धमासेषु तत्तद्विशेषो मुनिभेदतः ॥ तदुक्तं र-
त्नावल्यां ॥ षष्ठी चाद्रे तथा ह्नेयाद्वेषे कृष्णा चतुर्दशी ॥ कार्त्तिके नवमी शुक्ला मार्गे शुक्ला तृतीयका ॥
पौषे च नवमी शुक्ला माघे शुक्ला चतुर्थिका ॥ फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी ॥ त्रयोदशीति वा पाठः ॥ वैशा-
खे चाक्षया चैव ज्येष्ठे दशहरा तिथिः ॥ आषाढे पंचमी शुक्ला श्रावणे कृष्णपंचमी ॥ एतानि देवपर्वाणि ती-
र्थे कोटिफलं भवेत् ॥ अत्र दीक्षा प्रकर्त्तव्या न मासं च परीक्षयेत् ॥ न वारं न च नक्षत्रं न तिथ्यादिविचारणं ॥
न योगकरणं चैव वक्रां करे लग्नं च भाषितं ॥ अन्यस्य मतं ॥ चैत्रे त्रयोदशी शुक्ला वैशाखे कादशी सिता ॥ ज्येष्ठे
चतुर्दशी कृष्णा आषाढे नागपंचमी ॥ श्रावणे कादशी भाद्रे रोहिणीसंयुताष्टमी ॥ आश्विने च महापुण्या
महाष्टम्यष्टजीवदा ॥ कार्त्तिके नवमी शुक्ला मार्गशीर्षे तथासिता ॥ षष्ठी चतुर्दशी पौषे माघेप्येकादशी सि-
ता ॥ फाल्गुने च सिता षष्ठी चेति मासस्य निर्णयः ॥ योगिनीतंत्रेपि ॥ अयने विषुवे चैव ग्रहणे चंद्रसू-
र्ययोः ॥ रविसंक्रांतिदिवसे युगाद्यायां सुरेश्वरि ॥ मन्वंतरासु सर्वासु महाष्टम्यादिने तथा ॥

चतुर्थी पंचमी चैव चतुर्दश्यष्टमी तथा ॥ तिथयः शुभदाः प्रोक्ता इत्यादिवचनात् ॥ चतुर्दश्यष्टमी तिथि
निषिद्धं ॥ चतुर्थ्यंगलोक्ताविषयं ॥ तत्तत्कल्पोक्तत्वात् ॥ किंदिनेपि कालेपु दीक्षोक्ता ग्रहणे शुभा ॥
सूर्यग्रहणकालस्य समानो नास्ति भूतले ॥ तत्र यद्यत्कृतं सर्वं मनंतफलदं भवेत् ॥ रविसंक्रमणे चैव
सूर्यस्य ग्रहणे तथा ॥ तत्र लग्नादिकं किंचिन्नापि कार्यं कदाचन ॥ रविसंक्रमणे चैव नान्यदन्वेषितं भ
वेत् ॥ शिष्यस्य जन्मदिवसे दीक्षा तु शुभदा सदा ॥ न वार तिथि मासादि शोधनं सूर्यपर्वणि ॥ एवं चंद्र
ग्रहणेपि ॥ तथा चोक्तं रुद्रयामले ॥ न कुर्याद्धनिकीं दीक्षां सुपरस्वेविनावसो ॥ न कुर्याद्दैहिकीं तां तु
यदि चंद्रमसो ग्रहः ॥ एतच्च गोपालश्रीविद्योत्तरपरं ॥ अन्येषु पुष्ययोगेषु ग्रहणे चंद्रसूर्ययो
रिति गौतमीयात् ॥ सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेदिति योगिनीहृदयाच्च ॥ अमामास्या सो
मवारे भौमवारे चतुर्दशी ॥ सप्तमी रविवारे च सूर्यपर्वशतैः समाः ॥ शिष्याणां हि यगुरुणा कृपया
द्रीयते यदा ॥ तदा लग्नादिकं किंचिन्न विचार्यं कदाचन ॥ तथा चोक्तं ॥ सर्वे वाराः ग्रहाः सर्वे नक्षत्रा
णि च राशयः ॥ यस्मिन्नहनि संतुष्टो गुरुः सर्वे शुभावहाः ॥ योगिनीतंत्रे ॥ ग्रहणे च महातीर्थे ना
स्ति कालस्य निर्णयः ॥ गयायां भास्करक्षेत्रे विरजे चंद्रपर्वते ॥ चट्टले च मतंगे च तथा कन्याश्र
मे पुनः ॥ न गण्डकीयास्तु तोरे दीक्षां तीर्थेषु पार्वति ॥ अन्यच्च वाराहीतंत्रे ॥ शुक्लोस्तो यदि वा वृद्धो गु
र्वादित्यो न चेद्यदि ॥ मेषवृश्चिककुंभसिंहेषु तदा दोषो न विद्यते ॥ महाविद्यासु कालादिशोधनं नास्ति ॥
तथा चोक्तं मुंडमालातंत्रे ॥ कालादिशोधनं नास्ति नचामित्रादिशोधनं ॥ अथ जपमालादिनि
र्णयः ॥ तथा चोक्तं मुंडमालातंत्रे ॥ तर्जनीमध्यमानामाक्रमान्निष्ठा चेति ताः क्रमात् ॥ तिस्रोंगुल्य
स्त्रिपर्वा तु मध्यमा चैकपर्विका ॥ पर्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् ॥ सनत्कुमारसंहि
तायां चैव ॥ अनामामध्यमारभ्य कनिष्ठादित एव च ॥ तर्जनीमूलपर्यंतं दशपर्वसु संजपेत् ॥
अनामामूलमारभ्य कनिष्ठादित एव च ॥ तर्जनीमध्यपर्यंतं जपेदष्टसु पर्वसु ॥ एतद्वचनद्वयं
त्रयोत्तरशतविषयं ॥ एतद्भूयश्च विषयं तत्तत्कल्पोक्तत्वात् ॥

शक्तिविषये पुनः अनामिकात्रयं पर्व कनिष्ठादित्रिपर्विका ॥ मध्यमायाश्च त्रितयं तर्जनीमूलपर्वलि
तर्जन्यग्रे तथा मध्ये यो जपेत्स तु पापकृत् ॥ इति श्रीक्रमवचनात् ॥ अनामामूलमारभ्य प्रादक्षि
ण्यक्रमेण तु ॥ मध्यमामूलपर्यंतमष्टपर्वसु संजपेत् ॥ इदमपि तथैव ॥ मुंडमालातंत्रे ॥ अनामि
काद्वयं पर्व कनिष्ठादिक्रमेण तु ॥ तर्जनीमूलपर्यंतं करमाला प्रकीर्तिता ॥ इति श्रीक्रमवचनमिदमपि
तथैव ॥ हंसपारमेश्वरेपि ॥ पर्वद्वयमनामायाः परिवर्तेन वै क्रमात् ॥ पर्वत्रयं मध्यमायास्तर्जन्ये
कं समाहरेत् ॥ शक्तिमाला समाख्याता सर्वमंत्रप्रदीपिका ॥ अन्यत्रापि ॥ अंगुल्यग्रे तु यज्जप्तं य
ज्जप्तं मेरुलंघने ॥ सर्वसंधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ श्रीविद्यायां तु विशेषः ॥ अनामामा
मध्यमायामूलाग्रे च द्वये द्वयं ॥ कनिष्ठायाश्च तर्जन्यास्त्रयं पर्वस्वरेश्वरि ॥ अनामामध्यमयोश्च
मेरुस्यादित्ययं क्रमः ॥ प्रदक्षिणक्रमादेव जपेत्रिपुरसुंदरीमिति यामलवचनात् ॥ अंगुलीर्न वियुं
जीत किंचिदाकुंचिते तले ॥ अंगुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥ गणनाविधिमुल्लंघ्य यो
जपेत्तज्जपं यतः ॥ गृह्णाति राक्षसास्तेन गणयेत्सर्वथा बुधः ॥ उक्तं च तंत्रे ॥ हृदये हस्तमारोप्य
तिर्यक्कृत्वा करांगुलिः ॥ आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥ सनत्कुमारतंत्रे च ॥ क्रमोत्क्र
मगतैर्मालामातृवर्णैरमेरुकैः ॥ सबिंदुकैः साष्टवर्गैरंते तयजिनक्रमेलि ॥ आद्यकुचुटुतुपुयुशुवोष्टौ
प्रकीर्तिताः ॥ तद्यथा ॥ अकारादीनां वर्णानां कवर्गादीनां चौलिमवर्णैः सानुस्वरैः शता ॥ एवं मुख्यार्थ
पश्चान्मंत्रजपः कार्यः ॥ अनेन प्रकारेणाष्टोत्तरशतसंख्या जपो भवति ॥ अंते यजनेस्य पलक्ष
णं ॥ सबिंदुवर्णमुच्चार्य पश्चान्मंत्रं जपेद्बुधः ॥ अकारादिक्षकारांतं बिंदुयुक्तं विभीव्य च ॥ वर्णमाला स
माख्याता अनुलोमविलोमिका ॥ इति नारदवचनात् ॥ विशुद्धेश्वरतंत्रे ॥ अनुलोमविलोमेन वर्णा
ष्टकनिवेदलः ॥ मंत्रेणांतरितान्वर्णान्वर्णैर्मातरितान्मनून् ॥ नकुर्याद्दुर्लभमंमी मालो सर्वतंत्रप्र
काशिनी ॥ मालिनीविजयेस्त्र नियमः ॥ अंतर्बिंदुमनासमानभुजगीसंयोसहवर्णज्वालामारोह

३॥
७॥

प्रतिरोहतः शालमयीं न गर्भिष्ठकाष्ठोत्तरां ॥ अथ मालायां मणिनियमः ॥ पद्मबीजादिभिर्माला बहिर्योगे प्रश-
स्तुषतः ॥ रुद्राक्षशंखपद्माक्षपुत्रजीवकमौक्तिकैः ॥ स्फटिकैर्मणिरत्नैश्च सौवर्णैर्विद्रुमैस्तथा ॥ राजतैः कु-
शमूलैश्च गृहस्थस्याक्षमालिका ॥ अंगुलीगणनादेकं पर्वणाष्टगुणं जपेत् ॥ पुत्रजीवैर्दशगुणं श-
तं शंखैः सहस्रकं ॥ प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतं ॥ तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्ष-
मुच्यते ॥ पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते ॥ कुशग्रन्थ्या कोटिशतं रुद्राक्षैः स्यादनंतकं ॥
सर्वैर्विरचिता माला नृणां मुक्तिफलप्रदा ॥ कालिकापुराणेपि ॥ रुद्राक्षैर्वा यदि जपेदिंद्राक्षैः स्फाटिकैस्त-
था ॥ नान्यं मध्ये प्रयोक्तव्यं पुत्रजीवादिकं च यत् ॥ यद्यत्तु प्रतिमुंजीत मालायां जपकर्मणि ॥ तस्य कामं
च मोक्षं च न ददाति शिवंकरी ॥ इमशानाभ्युक्ते माला इयं याधूमावती विधौ ॥ नरांगुल्यस्थिभिर्माला
ग्रथिता सर्वकामदा ॥ नाड्या संग्रथनं कार्यं रक्तेन वा ससाप्रिये ॥ कामनाभेदे तु ॥ तत्र ॥ पद्माक्षैर्विहिता मा-
ला शत्रूणां हानिमता ॥ कुशग्रंथिमयी माला सर्वपापप्रणाशिनी ॥ पुत्रजीवफलैः कृता कुरुते पुत्रसंपदं ॥
निर्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा ॥ प्रवालैरेव वा कुर्यात्पुत्रजीवं विवर्जयेत् ॥ पद्माक्षं चैव रुद्राक्षं
न द्राक्षं च विशेषतः ॥ त्रिपुरामंत्रजपादौ तु रक्तचंदनबीजादिभिरिति प्रशस्ता माला बोद्धव्या ॥ तथा चो-
क्तं तंत्रे ॥ रक्तचंदनमाला तु भोगदा मोक्षदा भवेत् ॥ तथा चोक्तं ॥ वैष्णवे तु तुलसीमाला गजदंतैर्गणेश्व-
रे ॥ त्रिपुरायाजपे शस्ता रुद्राक्षै रक्तचंदनैः ॥ मुंडमालातंत्रे च ॥ महाशंखमयी माला नीलसारस्वते वि-
धौ ॥ नरललाटास्थिखंडेन रचिता जपमालिका ॥ महाशंखमयी माला ताराविद्याजपे प्रिया ॥ कलिनेत्रालना-
लास्थि महाशंखः प्रकीर्तिताः ॥ मणिनियमस्तु मुंडमालायां ॥ अन्योन्यसमरूपाणि नातिस्थूलकृशानि वै ॥
कीटादिभिरदुष्टानि नवीनानि नवानि वै ॥ तथा चोक्तं गौतमीयतंत्रे ॥ पंचाशद्भिर्मणिभिर्मालाविहिता सर्व-
कर्मसु ॥ अकारादिक्षकारांता अक्षमाला प्रकीर्तिता ॥ क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तमः ॥ अन-
या सर्वमंत्राणां जपः सर्वसमृद्धिदः ॥ तदुक्तं चामुंडातंत्रे ॥ तिसं जपं करे कुर्यान्ति तु काम्यमबोधनात् ॥

काम्यमपि भद्रे कुर्यान्मालाभावे तु सुन्दरि ॥ तेन मालायाः प्राधान्यं ॥ कामनाभेदेन तु गौतमीये ॥ समासेनाक्ष
सूत्रस्य विधानमिह कथ्यते ॥ पंचविंशतिभिर्मोक्षं त्रिंशद्भिर्धनसिद्धये ॥ सर्वार्थसप्तविंशत्या पंचदश्या
भिचारके ॥ पंचाशद्भिः काम्यसिद्धिस्यात्तथा च तु रोत्तरे ॥ अष्टोत्तरशतैः सर्वसिद्धिस्तुकामनीविभिः ॥
अथासनभेदा उच्यंते ॥ काम्यार्थं कंबलं चैव श्रेष्ठं च रक्तकंबलं ॥ कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्र
चर्मणि ॥ कुशासने मंत्रसिद्धिर्नात्र कार्या विचारणा ॥ धरण्यां दुःखसंभूतिर्दौर्भाग्यं दारुजासने ॥ वंशा
सने दरिद्रस्यात्पाषाणे व्याधिपीडनं ॥ तृणासने यशोहानिः पल्लवे चित्तविभ्रमः ॥ जपध्यानतपोहा
निर्वस्त्रासनं करोति च ॥ अत्र वस्त्रासनं केवलवस्त्रमेव निषिद्धं ॥ वसनं रोगहरमित्यादि वचनेन वि
हितस्य फलस्य जनकत्वाभिधानात् ॥ एणाजिनकुशोत्तरमिति जगद्बहुवचनास्य गौतमीये ॥ तथाम्
द्वासने मंत्री पद्मासने कुशोत्तरमिति ॥ तदुक्तं योगिनीहृदये ॥ नदीक्षितो विशेषात्तु कृष्णसाराजिने गृही ॥
विरक्तो यतिर्वनस्थश्च ब्रह्मचारी च विशेषक इति ॥ तदुक्तं आगमकल्पद्रुमे ॥ मेषव्याघ्रगजोष्ट्रश्चोर
गतं च तु षट्कर्मसु विहितो सनानि ॥ अथ मालासंस्कारनियमः ॥ तदुक्तं स्वतंत्रकुमारीये ॥ कार्पासं
जं वै सूत्रं धर्मकामार्थमोक्षदं ॥ तस्य विप्रेंद्रकन्याभिर्निर्मितं चरकतोचनं ॥ रक्तं शुक्लं तथा कृष्णं पद
सूत्रमथापि वा ॥ शांतिवश्याभिचारे च मोक्षैश्वर्यजपेषु च ॥ पद्म ॥ शुक्लं रक्तं तथा पीतं कृष्णं चैव तु च क्रमात् ॥
सर्वेषामेव वर्णानां रक्तं सर्वेप्सितप्रदं ॥ त्रिगुणं त्रिगुणीकृत्य ग्रंथयेच्छिल्पशास्त्रतः ॥ एकैकं मातृकाव
र्णं स्वतारं प्रजपन्सुधीः ॥ मणिमालायसूत्रेण ग्रंथयेन्मध्यमध्यतः ॥ ब्रह्मग्रंथिं विधायेत्थं मेरुं च ग्रं
थिसंयुतं ॥ ग्रंथयित्वा पुरो माला तत्संस्कारं समारभेत् ॥ कस्यचिन्मते स्वविधिया ग्रंथयेत् ॥
तथा चोक्तमेकवीराकल्पे ॥ मातृकामंत्रतो ग्रंथिं विधया रोधकारयेत् ॥ कृष्णैरादिगुणैर्वापि ग्रं
थयेत्साधकोत्तमः ॥ एवं निष्पाद्य देवेशि प्रतिष्ठां च समाचरेत् ॥ तथा चोक्तं गौतमीतंत्रे ॥ मुखे
मुखं तु संयोज्य पुच्छे पुच्छं नियोजयेत् ॥ गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा ॥ एवं निर्मा
य मालां वै शोधयेन्मुनिसत्तमः ॥ अश्वत्थपत्रनवकैः पद्माकारं तु कल्पयेत् ॥

तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन् ॥ क्षालयेत्पंचगव्येन सद्योजातेन सज्जलैः ॥ सद्योजातमं
त्रस्तु ॥ ॐ सद्योजातं प्रपद्यामि ॥ इति मंत्रेण शतवारं पंचगव्येन क्षालयेत् ॥ १० ॥ चंदनागरुगंधाद्यै
र्वामदेवेन घर्षयेत् ॥ वामदेवमंत्रस्तु ॥ ॐ वामदेवाय नमो ज्येष्ठाय० ॥ इति मंत्रेण चंदनादिना शतवा
रं घर्षयेत् ॥ ततो धूपयेत्तामघोरेण ॥ अघोरमंत्रस्तु ॥ ॐ अघोरेभ्योऽथ घोरेभ्यो० ॥ इति मंत्रेण
शतवारं धूपयेत् ॥ १० ॥ लेपयेत्तत्पुरुषेण तु ॥ तत्पुरुषमंत्रस्तु ॥ ॐ तत्पुरुषाय विद्महे० ॥ इति मं
त्रेण शतवारं लेपयेत् ॥ १० ॥ मंत्रयेत्पंचमेनैव प्रत्येकं तु शतं शतं ॥ मेरुं च मंत्रयेत्तद्वन्मनुना च श
तं शतं ॥ पंचममंत्रस्तु ॥ ईशानः सर्वविद्यानां० ॥ प्रत्येकं तु सकृत्सकृदिति वा ॥ तथा च ॥ प्रत्येकं मं
त्रयेन्मंत्री पंचमेन सकृत्सकृत् ॥ तथा चोक्तं गौतमीये ॥ समुदायमालामधिसत्य ॥ पंचमेनैव सकृ
त्कृन्न शतान्यनेन मंत्रयेदिति दर्शनात् ॥ मालायां वा शतजपः ॥ तत्रावाह्य यजेद्देवं यथाविभववि
स्तरैरिति ॥ मालायां प्राणप्रतिष्ठानंतरं देवतां पूजयेत् ॥ तथा चोक्तं सनत्कुमारसंहितायां ॥ एवं कृत्वा म
णिमालाय ग्रंथिं विनिर्दिशेत् ॥ अनुलोमविलोमाभ्यां मातृकां लखितान्यसेत् ॥ तेन सर्वगुणोपेता
जायंते सर्वसिद्धयः ॥ इति रहस्यमालाविधिः ॥ संस्कृत्यैवं तु यो मालां तत्प्राणांस्तत्र स्थापयेत् ॥ मूल
मंत्रेण तां मालां पूजयेद्द्विजसत्तमः ॥ वाराहीतंत्रेपि ॥ ॐ माले महामाले सर्वतत्त्वस्वरूपिणि ॥ चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ मायाबीजादिकं कृत्वा रक्तपुष्पैः समर्चयेत् ॥ शांतिविषयेत्तु ॥
चोक्तरूपया मतेः ॥ वाग्भवं लक्ष्मीबीजं च अक्षरादि मालिकां ततः ॥ ङें तां हृदयवर्णां ता मंत्रेणानेन
पूजयेत् ॥ मंत्रयेन्मूलमंत्रेण क्रमेणोत्क्रमयोगतः ॥ तथैव मातृकावर्णैर्मंत्रयेत्तां तु तत्त्ववित् ॥ तथा
चोक्तं योगिनीहृदये ॥ होमकर्म ततः कुर्याद्देवताभावसिद्धये ॥ अष्टोत्तरशतं हुत्वा संपाताज्यं विनिःक्षि
पेत् ॥ होमकर्मण्यशक्तश्चेद्द्विगुणं जपमाचरेत् ॥ नान्यमंत्रं जपेन्मंत्री कंपयेन्न विधूनयेत् ॥ कंपनो
त्सिद्धिहानिः स्याद्धूननं बहुदुःखदं ॥ शब्दे जाते च रोगः स्यात् करभ्रष्टा विनाशकृत् ॥ छिन्ने सूत्रे जवे मृत्यु
स्तस्माद्यत्नपरो जपेत् ॥ त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा मता ॥ तेन सत्येन मे सिद्धिं देहि मातर्नमो ॥ ८५ ॥

स्मृते॥ इत्थंस्वरूपपरिज्ञायाथ गोपयेच्च न लोकहा॥ गुरुं प्रकाशयेद्विद्वान् मन्त्रं यत्नेन गोपयेत्॥ अक्षमा
लाच मुद्रां च गुरोरपि न दर्शयेत्॥ अस्य नित्यतामाह रुद्रयामले॥ अप्रलिखितमालाभिर्मन्त्रं जपति
यो नरः॥ सर्वं तद्विफलं शैवं कुर्याच्च न बलिं देवता॥ कामना च देवत्वं गुलीनियमः॥ तदुक्तं गौतमीये
तथा च॥ तर्जन्यंगुष्ठयोगेन शत्रूच्चाटनकारकं॥ अंगुष्ठमध्यमायोगान्मन्त्रसिद्धिः सुनिश्चिता॥ अंगु
ष्ठानामिकयोर्योगाद्वश्याकर्षणादनेमते॥ ज्येष्ठाकनिष्ठायोगेन शत्रूणां नाशनं मतं॥ जीर्णे सूत्रे पुनः सूत्रं
ग्रथयित्वा शतं जपेत्॥ प्रमादात्पतिते हस्तात्शतमष्टोत्तरं जपेत्॥ जपेन्निषिद्धसंस्पर्शे क्षालयित्वाय
थोचितं॥ छिन्ने चाष्टोत्तरजपः करभ्रष्टे छिन्ने नयोस्तु स्य फलं तातं॥ अपुरश्चरणप्रकारः॥ तदु
क्तं योगिनीहृदये॥ गुरोराज्ञां समादाय शुद्धात्मा करणो नरः॥ ततः पुरस्क्रियां कुर्यान्मन्त्रसंसिद्धिकाम्यया॥
जीवहीनो यथा देही तथा मन्त्रः प्रकीर्तितः॥ तस्मादादौ स्वयं कुर्यात्पुरमाकारयेद्बुधः॥ गुरोरभावे विप्रं वा
सर्वप्राणिहिते रतं॥ स्निग्धं शास्त्रविदं मित्रं नानागुणसमन्वितं॥ स्त्रियं वा सत्कुलोपेतां सपुत्रीं वा विनि
योजयेत्॥ आदौ पुरस्क्रियां कुर्यात्स्थाननिर्णयमुच्यते॥ तथा च योगिनीहृदये॥ पुण्यक्षेत्रं नदीतीरं गु
हापर्वतमस्तकं॥ तीर्थप्रदेशाः सिंधूनां संगमः पावनं वनं॥ उद्यानानि विविक्तानि बिल्वमूलं गिरेस्त
टं॥ तुलसीकाननं गोष्ठं वृषशून्यं शिवालयं॥ अश्वत्थामलकीमूलं गोशाला जलमध्यतः॥ देवता
यतनं कूलं समुद्रस्य निजं गृहं॥ तथा॥ गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत्॥ कोटि देवालये पुण्य
मनंतं शिवसन्निधौ॥ म्लेच्छदुष्टमृगव्यालशंकातंकविवर्जिते॥ एकांते पावने निंदारहिते न किं संयुते॥
स्वदेशे धार्मिके देशे सुभिक्षे निरुपद्रवे॥ रम्ये भक्तजनस्थाने निवसेत्तापसप्रिये॥ गुरुणां सन्निधा
नेचोच्चैः प्रायः स्थले तथा॥ एषामन्यतमस्थानमाश्रित्य जपमाचरेत्॥ यत्रव्यामेजपे मन्त्री तत्र
कर्मविचिंतयेत्॥ तदुक्तं गौतमीये॥ पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे॥ यदि कुर्यात्पुरश्चर्यां तत्र
कर्मविचिंतयेत्॥ ग्रामे शायदि वा वास्तो गृहे तं चोविचिंतयेत्॥ तदुक्तं गौतमीये॥ पुरश्चरणे भक्ष्याभ
क्ष्ये नियमः॥ तत्रागस्त्यसंहितायां॥ दधिक्षीरघृतं गव्यं मैक्षवं गुडवर्जितं॥ तिलाश्चैव सिता मुद्गाः कंद

के मुक्तवार्जितः ॥ नारिकेलं फलं चैव कदली लवली तथा ॥ आम्रमामलकं चैव पनसं च हरीतकी ॥
व्रतान्तरे प्रशस्तं च हविष्यं मन्यते बुधैः ॥ व्रतान्तर इति हैमंतिकं सिताश्विन मित्यादि ॥ कुंजा को वा
हविष्यान्नेष्वशक्या यत्क्रमेव वा ॥ पयो मूलं फलं वापि यत्र यत्रोपलभ्यते ॥ यत्तु योगिनीतंत्रे ॥ चिं
चा च नालिकाशाकं कलायं तकुचं तथा ॥ कदंबं नालिकेरं च श्रीलेकुष्मांडकं त्यजेत् ॥ तच्च व्रतांत
रे बोद्धव्यं ॥ चिंचा तिंतिडी ॥ अथ वर्ज्यानि ॥ वर्जयेन्मधु क्षार लवणं तैलमेव च ॥ तौरलं कांस्य
पात्रं च दिवा भोजनमेव च ॥ तथा ॥ क्षारं च लवणं मांसं गंजनं कांस्यभोजनं ॥ माषादकी मसूरांश्च को
द्रवांश्च तथापि ॥ कौटिल्यं क्षौरमभ्यंगमनिवेदितभोजनं ॥ असंकल्पितकृत्यं च वर्जयेन्मर्दना
दिकं ॥ स्नायाश्च पंचगव्येन केवलामलकेन वा ॥ मंत्रेज सात्वोपानीयैः स्नाना — च मंत्र भोजनं ॥ हैमंति
कं सिताश्विन्नं धान्यं मुद्गास्तिलायवाः ॥ कलाय कंगुनीवार वास्तुकं हिलमोचिका ॥ लवणे सैंध
व सामुद्रे गव्ये च दधि सर्पिषि ॥ पयो नुद्धृतसारं च पनसाम्र हरीतकी ॥ तिंतिडी जीरकं चैव मूलकं
केमुके तु रेमु ॥ कदलीकलली धात्रीफलान्य गुड मैक्षवम् ॥ अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥
कुर्याच्च यथोक्तविधिना त्रिसंध्यं देवतार्चनं ॥ अपवित्रकरो नग्नः शिरसि प्रावृतोपि वा ॥ प्रलपन् प्रज
पेद्यावत्तावन्निष्फलमुच्यते ॥ कुलार्णवेपि ॥ यस्यान्नपानपुष्टांगः कुरुते धर्मसंचयं ॥ अन्नदातुः
फलं चार्द्धं कर्तुश्चार्द्धं न संशयः ॥ तस्मात्सर्वप्रयत्नेन परान्नं वर्जयेत्सुधीः ॥ गुरुश्चरणकोलेतु
सर्वकर्मसु कृते नवि ॥ जिह्वा दग्धा परान्नेन हस्तौ दग्धौ प्रतिग्रहात् ॥ परस्त्रीभिर्मनो दग्धं कथं सि
द्धिर्वरानने ॥ परार्थं निष्ठेतरविषयं ॥ भिक्षा यां ते स्वस्त्वोपादीनात् ॥ तथा च जपेदित्यनुवृत्तौ ॥
वैदिकाचारयुक्तानां शौचाचारमतां सतां ॥ सत्कुलस्थानजातानां भिक्षाशी चाग्रजे मया यमः ॥
स स्नेहु भार्ये ते शूद्रे प्रणवं समुदीरयेत् ॥ मोक्षे पारशावे शूद्रे प्राणायामं समाचरेत् ॥ बहु पेला
पी ओं च प्यस्यां गात्रिच ततो जपेत् ॥ धृते पेयं तं भान्य स्पष्टानां मूर्त्ति नेपि च ॥ एवमादौ श्वोनियपा
नुपुरश्चरणं कृत्वा चरेत् ॥ चिण्मश्नो सर्गश्रुं काविमुक्तः कर्म करोति यः ॥ जपाच्चे नादिकं स वे मप

चित्रं च वेष्टिये ॥ मलिनांबरकेशादिमुखदौर्गंध्यसंयुतः ॥ यो जपेत्तं दहत्याशु देवता गुप्तसंस्थिता ॥ आ-
लस्यं जृंभणं निद्रां क्षुतं निष्ठीवनं भयं ॥ नीचांगस्पर्शनं कोपं जपकाले विवर्जयेत् ॥ एवमुक्तविधानेन विलं-
बत्वरितं विना ॥ उक्तसंख्यं जपं कुर्यात्पुरश्चरणसिद्धये ॥ देवतागुरुमंत्राणामैक्यं संभावयन् धिया ॥ जपेदे-
कमनाः प्रातः प्रारभ्य मध्यंदिनावधि ॥ यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भवेन्नरः ॥ कुंडमालायां च ॥ यत्सं-
ख्यया समारब्धं तज्जप्तव्यं दिने दिने ॥ न्यूनाधिकं न कर्तव्यमासमाप्तं समाचरेत् ॥ कुलार्णवेपि ॥ न्यूनातिरि-
क्तकर्माणि न फलंति कदाचन ॥ यथाविधि कृतान्येव सत्कर्माणि फलंति हि ॥ स्त्रीशय्यावर्जनं ब्रह्मचारित्वं मौनं चाचा-
र्यसेवनं ॥ नित्यं त्रिषवणस्नानं क्षुद्रकर्मविवर्जनं ॥ नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनं ॥ नैमित्तिका-
र्चनं चैव विश्वासो गुरुदेवयोः ॥ जपनिष्ठा द्वादशैते धर्माः स्युर्मंत्रसिद्धिदाः ॥ स्त्रीशूद्रपतितव्रात्यनास्तिको-
च्छिष्टभाषणं ॥ असत्यभाषणं जिह्मभाषणं परिवर्जयेत् ॥ सत्येनाभिलपेज्जपहोमार्चनादिषु ॥
अन्यथानुष्ठितं सर्वं चैवत्येवं निरर्थकं ॥ तथा चोक्तं योगिनीहृदये ॥ शयीत कुशशय्यायां शुचिवस्त्रधरः
सदा ॥ प्रत्यहं क्षालयेच्छय्यामेकाकी निर्भयः स्वपेत् ॥ असत्यभाषणं वाचं कुटिलां परिवर्जयेत् ॥ सत्येना-
भिलपेज्जपहोमार्चनादिषु ॥ वर्जयेत्कीतनाघातहिंसावर्णनित्यदर्शनं ॥ अभ्यंगं गंधमाल्यं पुष्पधार-
णमेव च ॥ यजेद्गुरुं वेदं स्नानं मध्यदेवप्रसजनम् ॥ तदुक्तं तंत्रे ॥ नैरुक्त्यासा जपे मंत्रं बहुशास्त्रकुले-
पि वा ॥ वैशंपायनसंहितायां च ॥ विपर्यासं न कुर्वीत यद्यपि मोहितः ॥ उपर्युपरि बाहिर्वस्त्रे पुरश्च-
रणकृत्सुधीः ॥ विनियोगविधानेन तु न वेदनियमः क्वचित् ॥ पतितानां प्रजानां दर्शने चाषलिकृते ॥ स्ख-
ले धौतचिह्नगमने जपमष्टं त्यजेत् ॥ तथा तस्य च तमासौ भाषणाभामे षडंगकेम् ॥ कृत्वा सम्यक् जपे-
च्छेषं यद्वा सूर्यादिदर्शनं ॥ आदिशब्दाद्वह्निब्राह्मणदर्शनमपि प्रशस्ततरं ॥ तथा चोक्तं तंत्रोत्तरे ॥ मनः-
संहरणं शौचं मौनं मंत्रार्थचिंतनं ॥ अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः ॥ उष्णीषी कंचुकी नग्नो मुक्तके-
शो गलावृतः ॥ अपवित्रकरोऽशुद्धः प्रलपन्न जपेत्क्वचित् ॥ आमौततौक्तारो सूत्ताद्विरसाप्राप्तोपि वा ॥

चिंताव्याकुलचित्तो वा क्रुद्धो भ्रांतः क्षुधान्वितः ॥ अनासनः शयानो वा गच्छन्नुत्थित एव वा ॥ र
थ्यायामशिवे स्थाने न जपेत्तिमिरांतरे ॥ उपानद्गूढपादो वा यानशय्यागतोऽपि वा ॥ प्रसार्य न जपे
त्पादावुत्कटासन एव च ॥ मार्जारं कुक्कुटं क्रौंचं श्वानं शूद्रं कपिं खरं ॥ दृष्ट्वाचम्य जपेत्स्पृष्ट्वा
स्नात्वा विधीयते ॥ सर्वत्र जपेऽयं नियमः ॥ मानसे न तु सर्वथा च ॥ अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन्स्व
पन्नपि ॥ मंत्रैकशरणो विद्वान्मनसैव सदाभ्यसेत् ॥ न दोषो मानसे जाप्ये सर्वदेशेऽपि सर्वदा ॥ जपनिष्ठो
द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत ॥ स्यामादिविधिना जपेलुतत्तन्मंत्रे विशेषो वक्तव्यः ॥ जपस्य फलमाह ॥
तंत्रांतरे स्मृतिधर्मे च ॥ जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ॥ सर्वेषामेव यज्ञानां जायतेऽसौ महा
फलः ॥ जपेन देवता नित्यं स्तूयमाना प्रसीदति ॥ प्रसन्ना विपुलान्कामान्दद्यान्मुक्तिं च शाश्वतीं ॥
पद्मनारदीययोः ॥ यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ॥ जापिनं नोपसर्पंति भयभीताः स
मंततः ॥ यावंतः कर्मयज्ञाः स्युः प्रतिष्ठाश्च तपांसि च ॥ सर्वे ते जपयज्ञस्य कलां नार्हंति षोडशीं ॥ माहा
त्म्यं वाचिकस्यैव जपयज्ञस्य कीर्तितं ॥ तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥ मानसः सि
द्धिकामानां पुष्टिकामैरुपांशुकः ॥ वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥ गौतमीये च ॥ शस्या त्रि
षवणं स्नानं मन्यथाद्विः स रुध्य वा ॥ त्रिसंध्यं प्रजपेन्मंत्रं प्रजनं तत्समं नवेत् ॥ संध्यात्रये ह जांगला
ज्जपमष्टोत्तरं शतमित्यर्थः ॥ एकदा चान्वयेत्सहजानं जपेत्सज्जनं विना ॥ जपांते चान्वयेत्सहजा हजांते वा
जपेन्मनुं ॥ प्रातःकालं समारभ्य जपेन्मध्यंदिनावधि ॥ मध्यंदिनाद्यीतिन नियमपरं ॥ कृत्तवि
कालव्यत्ययेदपरं ॥ अन्यथा लक्षमयं जपनियमे कदाचिज्जिह्वाजाड्ये अजाड्येन वा मतिनिय
लोदिवसीय जपसंख्याया अपूर्णत्वे अधिककृते वा नियमभंगः स्यात् ॥ मनः संहृत्य विषयान्मंत्रार्थ
गतमानसः ॥ न द्रुतं न विलंबं च जपेन्मौक्तिकपंक्तिवत् ॥ जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचकैः ॥
धिया यदक्षरश्रेण्या वर्णस्वरपदात्मिकां ॥ उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥ जिह्वोष्ठौ

चालयेत्किंचिद्देवतागतमानसः ॥ किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ॥ मंत्रमुच्चार-
येद्वाचा वाचिकः स जपः स्मृतः ॥ विशुद्धेश्वरतंत्रे च ॥ निजकर्णगोचरो यो मानसः स जपः
स्मृतः ॥ उपांशुर्निजकर्णस्य गोचरः परिकीर्तितः ॥ निगदस्तु जनैर्वेद्यस्त्रिविधो जप ईरितः ॥ उच्चै-
र्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ॥ जिह्वाजपाच्छतगुणः सहस्रो मानसः स्मृतः ॥ तंत्रांतरे च ॥
उच्चैर्जपोधमः प्रोक्तः उपांशुर्मध्यमः स्मृतः ॥ उत्तमो मानसो देवि त्रिविधः कथितो जपः ॥ अतिह्रस्वो
व्याधिहेतुरतिदीर्घो वित्तक्षयः ॥ अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥ मनसा यः स्मरेत्स्तोत्रं वच-
सा वा मनुं जपेत् ॥ उभयं निष्फलं याति भिन्नभांडोदकं यथा ॥ गौतमीतंत्रे ॥ पशुभावे स्थिता मंत्राः के-
वला वर्णरूपिणः ॥ सुषुम्नाध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवंति ते ॥ मंत्राक्षराणि चिच्छक्तौ प्रोतानि परिभा-
वयेत् ॥ तामेव परमे व्योम्नि परमामृतबृंहिते ॥ दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति ॥ कुला-
र्णवेप्युक्तं ॥ मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र मारुतः ॥ न सिध्यति वरारोहे कल्पकोटिजपादपि ॥ जा-
तसूतकमादौ स्यादंते च मृतसूतकं ॥ सूतकद्वयसंयुक्तो यो मंत्रः स न सिध्यति ॥ गुरोस्तंत्रे हितं सू
सा मंत्रं मायया जपेद्धिया ॥ सूतकद्वयसंयुक्तः स मंत्रः सर्वसिद्धिदः ॥ तदुक्तं तंत्रेषु ॥ ब्रह्मबीजं मनोरादौ द-
त्वा चांते परमेश्वरि ॥ सप्तवारं जपेन्मंत्रं सूतकद्वयमुक्तये ॥ मंत्रार्थं मंत्रचैतन्यं योनिमुद्रां न वे-
त्ति यः ॥ शतकोटिजपेनापि मंत्रसिद्धिर्न जायते ॥ तु सजीवाभावये मंत्रा न दास्यंति फलं प्रिये ॥ मंत्रा-
श्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः ॥ चैतन्यरहिता मंत्राः प्रोक्ता वर्णास्तु केवलाः ॥ फलं नैव प्रय-
च्छंति लक्षकोटिजपैरपि ॥ मंत्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ॥ शते सहस्रे लक्षे वा कोटिजापे
न तत्फलं ॥ तस्य स्वरूपमाह ॥ तंत्रांतरे ॥ हृदये ग्रंथिभेदश्च सर्वावयववर्द्धनं ॥ आनंदाश्रूणि पुलको
देहावेशः कुलेश्वरि ॥ गद्गदोक्तिश्च सहसा जायते नात्र संशयः ॥ सकृदुच्चरितेप्येवं मंत्रे चैतन्यसं-
पुटे ॥ दृश्यंते प्रत्यया यत्र पारंपर्यं तदुच्यते ॥ मासमात्रं जपेन्मंत्रं भूतलिप्या तु संपुटं ॥ क्रमोत्क्रमात्सं-

हस्तेन च तस्य सिद्धो भवेन्मनुः॥ तत्र मातृलिपिः पंचाशद्वर्णाः संधि वर्णाद्यो माग्निजलं धरा॥ अंत्यमा
द्यौ द्वितीयं च चतुर्थं मध्यमं क्रमात्॥ पंचवर्णाक्षरालिस्युः चोतः स्वतेंदुभिः सह॥ एषा मातृलि
पिः प्रोक्ता द्विचत्वारिंशद्वाक्षरैः॥ अ इ उ ऋ लृ ए ऐ ओ औ ह य व र ल ङ क ख घ ग ञ च छ झ ज ण ट ठ ढ
ड न त थ ध द म प फ भ ब ष स ल ह ळ क्ष [illegible] मंत्राः सप्तशावेन भ प म द ध थ त न ड ढ ठ ट ण ज झ छ च
ञ ग घ क ख ङ ल व र य ह औ ओ ऐ ए लृ ॠ ऋ ऊ उ ई आ इति मातृलिपिप्रकारः॥ मातृलिप्यापुटीकृत्य यो मं
त्रं प्रजपेद्बुधः॥ क्रमोत्क्रमोच्छ्रुतात्स्याततः सिद्धो भवेन्मनुः॥ गौतमीये च॥ एवं जपं पुराकृत्वा तेजोरूपं
समर्पयेत्॥ देवस्य दक्षिणे हस्ते कुशपुष्पार्घ्यवारिभिः॥ सफलं तद्भजाद्येव प्राणायामं समाचरेत्॥ शा
स्त्रविषये वामहस्ते॥ तथा चोक्तं॥ एवं जपं पुराकृत्वा गंधाक्षतकुशोदकैः॥ जपं समर्पयेद्देव्या वामहस्ते
विचक्षणः॥ जपांते प्रत्यहं मंत्री होमयेत्तद्दशांशतः॥ तर्पणं चाभिषेकं च तद्दशांशं ततो मुने॥ प्रत्यहं
भोजयेद्विप्रानन्नेनाधिकप्रशांतये॥ अथवा सर्वसंपूर्णे होमादिकमथाचरेत्॥ तथा होमाद्यशक्तौ च॥
सनत्कुमारतंत्रे॥ यद्यदंगं च वैकल्यं तत्संख्याद्विगुणो जपः॥ होमाभावे जपः कार्यो होमसंख्याचतुर्गु
णः॥ विप्राणां क्षत्रियाणां च होमसंख्या गुणः स्मृतः॥ वैश्यानां वसुसंख्या क्रमेणं स्त्रीणामयं विधिः॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिं चरेत्॥ शूद्रस्य विप्रवत्तस्य तत्पत्न्या सदृशो जपः॥ इतरेषां
च वर्णानां त्रिगुणादि समीरितः॥ एतत्स्त्रीशूद्राणामनधिकारः॥ तथा चोक्तं॥ शूद्राणां च स्त्रा कुंडमि
ति॥ कुंडमंडपरत्नेशारे दायां स्त्रीणां होमाधिकारः॥ तेष्वप्रीतमनुद्वारा॥ तथा चोक्तं॥ ॐकारोच्चारणा
द्धोमाच्छालिग्रामशिलार्चनात्॥ ब्राह्मणीगमनाच्चैव शूद्रः चांडालतां व्रजेत्॥ इति साक्षान्निषेधात्॥
तथा स्त्रीणां सर्ववैदिककर्मस्वशूद्रतुल्यपालिपादनात् स्त्रीशूद्रकरसंस्पर्शो वज्रादपि सुदारुणः॥
इति भगवद्वचनाच्च॥ तथा चोक्तं नारायणकल्पे॥ अष्टाक्षरो महामंत्रः स ताः स्त्रीशूद्रयोर्नितः॥
प्रणवादिश्चयो मंत्रो न स्त्रीशूद्रे प्रशस्यते॥ इति सर्वत्र स्त्रीणां शूद्रवद्व्यवहारः॥ सर्वेषां वाद्विगुणो ज
पः॥ तथा चोक्तं तंत्रांतरे॥ यद्यदंगं विहीयेत तत्संख्याद्विगुणो जपः॥ कर्तव्यस्त्वंगसिद्ध्यर्थं तदशक्तेन ११

भक्तितः ॥ न चेदंगं विहीयेत तद्विघ्नमपरामुपात् ॥ तथा चोक्तमगस्त्यसंहितायां ॥ यदि होमे न शक्त
स्यात्सज्जापांतरेपिशो ॥ तावत्संख्याजपेनैव ब्राह्मणाराधनेन वा ॥ न वेदंगेहयेनैव पुरश्चरणमा
र्यते ॥ ततश्च ॥ गुरवे दक्षिणां दद्याद्भोजनाच्छादनादिभिः ॥ गुरोः संतोषमात्रेण मंत्रसिद्धिर्भवेध्रुवं ॥ सम्य
क्सिद्धैकमंत्रस्य पंचांगोपासनेन च ॥ सर्वे मंत्राश्च सिध्यंति तत्प्रसादात्कुलेश्वरि ॥ गुरुमूलमिदं सर्वं भि
सोहुस्तत्रवेदिनः ॥ एकस्मात्मस्थितो नित्यं गत्वा वंदेत वै गुरुं ॥ गुरुरेव परं ब्रह्म तस्मात्तदोलुमर्चयेत् ॥ मि
ष्टान्नबहुसत्कारैर्भुंजीत बंधुभिः सह ॥ एवं सिद्धमनुर्मंत्री साधयेत्सकलेप्सितान् ॥ तदंते महतीं पूजां
कुर्यात्साधकसत्तमः ॥ सुवासिनीं कुमारीं च भक्ष्यभोज्यैरपि तर्पयेत् ॥ अथवान्यप्रकारेण पुरश्चरणमिष्य
ते ॥ ग्रहणेर्कस्य चंद्रे वा शुचिः पूर्वमुपोषितः ॥ नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः ॥ स्पर्शादि
मुक्तिपर्यंतं जपेन्मंत्रमनन्यधीः ॥ नद्यभावे ॥ यद्वा पुण्योदकैः स्नात्वा शुचिः पूर्वमुपोषितः ॥ ग्रहणादि
विमोक्षांतं जपेन्मंत्रं समाहितः ॥ उपवासाशक्तावपि चोक्तं तत्रैव ॥ चंद्रसूर्यग्रहे चैव ग्रासादवधि विमु
क्तितः ॥ यावत्संख्यं मनुं जप्त्वा तावद्धोमादिकं चरेत् ॥ सूर्यग्रहणकालाद्धि नान्यः कालो विशिष्यते ॥
तत्र यद्यत्कृतं कर्म तदनंतफलं लभेत् ॥ जपांते तद्दशांशेन क्रमाद्धोमादिकं चरेत् ॥ तावदिति जपसं
ख्यातदशांशहोमादिकमित्यर्थः ॥ ग्रहणे चंद्रसूर्यस्य शुचिः पूर्वमुपोषितः ॥ नद्यां समुद्रगामिन्यां
नाभिमात्रे जले स्थितः ॥ यद्वा शुद्धोदकैः स्नात्वा शुचिर्दत्तः समाहितः ॥ स्पर्शादिमुक्तिपर्यंतं जपं कुर्या
दनन्यधीः ॥ तत्र यद्यत्कृतं कर्म तदनंतफलं लभेत् ॥ जपांते तद्दशांशेन क्रमाद्धोमादिकं चरेत् ॥ तदं
ते महतीं पूजां कुर्याद्ब्राह्मणभोजनं ॥ ततो मंत्रस्य सिध्यर्थं गुरुं संपूज्य तोषयेत् ॥ अथवान्यप्रकारेण
पौरश्चरणको विधिः ॥ चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः ॥ स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रं स
माहितः ॥ उक्तं च मुंडमालायां ॥ ह्रद्वा स्नात्वा सुसंस्कृतोपि मोक्षांतं जपं चरेत् ॥ तावद्धस्तादिकं कुर्या
द्ग्रहणांते शुचिः पुमान् ॥ इति जापान्मंत्रसिद्धिर्भवेदेव न संशयः ॥ आज्ञां देवगुरोर्येन यदि जाप्यं
त्यजेन्नरः ॥

सजवेद्देवताद्रोही पितृघ्नः स सनयत्यधः॥ इति सनत्कुमारीयवचना। जपस्यानङ्गत्वमिति केचित्
वस्तुतस्तु॥ आरब्धपुरश्चरणविषयकमिदं॥ तथाचारब्धपुरश्चरणे यदि ग्रहणं च येत्॥ तथाश्राद्धाद्यनु
रोधेन जपं न त्यजेत्॥ एवं रात्रावपि पुरश्चरणविशेषो बोद्धव्य इति सर्वत्र समंजसं॥ योगिनीहृदये॥ कुलो
क्तविधिना मंत्री कुर्याद्धोमं समाहितः॥ अथ यातदशांशेन होमादींश्च समाचरेत्॥ अथानंतरं दशांशेन
क्रमाद्धोमादिकं चरेत्॥ सामान्यगोपालमंत्रतर्पणे होमसमसंख्यत्वं॥ यथा॥ इह गोपालमंत्रस्य तर्पणे
होमसंख्यया॥ वर्णानामिह सर्वेषामित्यागमविदो विदुः॥ तदंते महतीं पूजां कुर्याद्ब्राह्मणभोजनं॥ ततो
मंत्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत्॥ एवं हि मंत्रसिद्धिः स्याद्देवता च प्रसीदति॥ यद्यपि पुरश्चरणपदं
पंचांगमात्रपरं॥ तथा चोक्तं तंत्रे॥ जपो होमस्तर्पणं चाभिषेको विप्रभोजनं॥ पंचांगोपासनं लोके पुर
श्चरणमिष्यते॥ तथापि ग्रहणादौ पुरश्चरणं जपमात्रं॥ सूर्योदयं समारभ्य यावत्सूर्योदयावधि॥ इ
त्यादौ तथा दर्शनात्॥ तत्र होमादेरसंभवात्॥ तर्हि कथं ग्रहणपुरश्चरणे होमादिरिति चेद्वचनादेव जा
यते॥ न तु पुरश्चरणांगतात्॥ सर्वेन तदेवस्यादिति वाक्यं॥ ग्रहणे पुनस्तद्विधानमनर्थकं स्यात्॥ किंच॥
ग्रहणे होमादिनियमाभावान्यत्र होमादिग्रहणपुरश्चरणे होमादिविधानं प्रकृतिभूतपुरश्चरणकृत्य
ताबोधनाय॥ अत एव पंचांगस्वरूपपुरश्चरणे कृते मुख्यप्रयोगेप्यधिकार इति प्रकटीकृतं तदकरणे
पुनः केवलजपमात्रपुरश्चरणेनाधिकार इति सर्वसंमतमिति भावः॥ पुरश्चरणकालस्तु वाराहीतं
त्रे॥ चंद्रतारानुकूले च शुक्लपक्षे शुभेहनि॥ आरभेत्तु पुरश्चर्यां हरौ सुप्ते न चाचरेत्॥ अथ पुरश्चर
णप्रयोगः॥ तत्र तावद्भूमेः परिग्रहणं कृत्वा पुरश्चरणात्प्राक् कुलतीथदिवसे क्षौरादिकं विधाय एकभ
क्तं च कुर्यात्॥ ततः पूर्वदिने स्नानादिकं विधाय शुद्धः सन् चतुर्दिक्षु अश्वत्थोदुंबरप्लक्षान्यतमस्य
वितस्तिमात्रान् दशकीलकान्॥ ॐ कोरदूर्णाय अस्त्राय फडिति मंत्रेणाष्टोत्तरशताभिमंत्रितान्
दशदिक्षु वेदिकायाः॥ ॐ ये चात्र विघ्नकर्त्तारो दिवि भुव्यंतरिक्षगाः॥ विघ्नभूतास्त्रये चान्ये मम मं
त्रस्य सिद्धिषु॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विद्रवत॥

अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥ इत्यनेन निरस्य ॥ तेषु ॥ ॐ स्कंदरुद्रनाय अस्त्राय फडिति मंत्रे
णास्त्रेण संप्रोक्ष्य पूर्वादिक्रमेण ॥ ततः इंद्रादिलोकपालान् पूजयेत् ॥ ॐ त्रैलोक्येश्वरि स्थितो इंद्रलोकपाल
इहागच्छ इह तिष्ठेत्सो वाद्यपंचोपचारैः पूजयेत् ॥ तथा चोक्तं ॥ पुण्यक्षेत्रादिकं गत्वा कुर्याद्भूमिपरिग्र
हं ॥ तथा च ॥ अमुकमंत्रस्य पुरश्चरणसिद्धये ॥ मयेयं गृह्यते भूमिर्मयो मे सिध्यतामिति ॥ ग्रामे
कौ भूमितं स्थानं नद्यादौ स्वेच्छया मितं ॥ तथा चोक्तं ॥ नगरादावपि क्रोशं क्रोशार्द्धमथापि वा ॥ आहा
रादि विहारार्थं तावतीं भूमिमाक्रमेत् ॥ क्षेत्रं वा यावदिष्टं तु विहारार्थं प्रकल्पयेत् ॥ क्षीरवृक्षोद्भवान्
कीलान् स्वमंत्राभिमंत्रितान् ॥ निखनेद्दशदिग्भागे तेषु स्वं च प्रपूजयेत् ॥ लोकपालान् पुनस्तेषु गंधा
द्यैः पूजयेत्स्वयमिति ॥ ततो मध्यस्थाने क्षेत्रपालं वास्तोष्पतिं च संपूज्य ॥ सर्वविघ्नविनाशार्थं गणपतिं
च पूजयेत् ॥ तथा ॥ अद्यादि अमुकगोत्रोऽहं अमुकदेवशर्माहं मे तत्कर्त्तव्य अमुकमंत्रपुरश्चरणकर्म
णि विघ्नविनाशार्थं गणेशपूजनमहं करिष्ये ॥ इति संकल्प्य विधाय वेदिमध्ये पंचोपचारादिना गणेशं
पूजयेत् ॥ तदुक्तं तत्रैव ॥ क्षेत्रपालादिकं तत्र पूजयेद्विधिवत्ततः ॥ क्षेत्रेशं वास्तुनामानं विघ्नराजं
समर्चयेत् ॥ दिक्पतिभ्यो बलिं दत्वा ततः क्षेत्रे समाविशेत् ॥ ततो माषभक्तादिना पूजितं देवताभ्यो
बलिं दद्यात् ॥ ते तेः ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ मातरो ह्युग्ररूपाश्च गणानामधि
पाश्च ये ॥ इत्यष्टदिक्षु बलिं दत्वेभ्यो दद्यात् ॥ माषभक्तादिना पूजितदेवताभ्यो बलिर्दद्यात् ॥ ततो
गायत्रीं जपेत् ॥ तथा चोक्तं ॥ प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो जपेत् ॥ स्नातास्नातस्य पापस्य क्ष
यार्थं प्रथमं ततः ॥ इति विद्यारण्याचार्यः ॥ प्रातः स्नात्वा तु गायत्र्या अयुतं प्रयतो जपेदिति ॥ इदं तत्सं
ते पापघ्नीं ह्यायां ॥ अद्येत्याद्यमुकगोत्रः श्री अमुकदेवशर्मा ज्ञाताज्ञातसकलपापक्षयार्थं त्रयोदशे
सहस्रमयुतं वा सावित्रीजपमहं करिष्ये ॥ ततः उपवासं हविष्यं वा कुर्यात् ॥ ततः रविदिवसे उपसिस्त्वा
नादिकं कृत्वा स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॥ तद्यथा विष्णुः ॥ ॐ अद्येत्यादि अमुकगोत्र श्री
अमुकदेवशर्माहं अमुकदेवतायाः अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकृतमन्त्र

सिद्धिकामो घारभ्य यावता कालेन सेत्स्यति तावत्कालममुकमंत्रस्य इयत्संख्यजपतद्दशांशहो
मतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये॥ इति सं
कल्प्य॥ भूतशुद्धिप्राणायामादिकं विधाय॥ स्वस्वमुद्रां बध्वा॥ स्वस्वपद्धत्युक्तक्रमेण देवतां सं
पूज्य॥ दीपं प्रज्वालितदेवतां हृदये कृत्वा प्रातःकालमारभ्य मध्यंदिनं यावत्तावज्जपं कुर्यात्॥
ततो होमस्ततस्तर्पणं॥ ततोभिषेकस्ततो ब्राह्मणभोजनं॥ तदुक्तं कुलार्णवेपि॥ तर्पणं तु ततः
कुर्यात्तीर्थोदैश्चैव दुग्धमिश्रितैः॥ जले देवं समावाह्य पाद्याद्यैरर्घकल्पितैः॥ संपूज्य विधिवद्भ
क्त्या परिवारसमन्वितं॥ एकैकमंजलिं तोयं परिवारान्प्रतर्पयेत्॥ ततो होमदशांशेन तर्प
येत्परदेवतां॥ तर्पणे राश्यं तु स्नानप्रकारेणैव कल्प्यं॥ अभिषेकराश्यं तु मूलमुच्चार्य न
मोंतममुकदेवतामभिषिंचामीति कलशमुद्रया स्वमूर्ध्नि अभिषेचयेत्॥ तथा चोक्तं॥ नमों
तमंत्रमुच्चार्य तदंते देवताभिधां॥ द्वितीयांतमहं पश्चादभिषिंचाम्यनेन तु॥ अभिषिंचे
त्स्वमूर्द्धानं तोयैः कुंभाख्यमुद्रया॥ इत्यभिषिंचयेत्॥ मंत्रांते नाम चोच्चार्य सिंचामीति न
मः पदमिति॥ तदुक्तं नीलतंत्रे॥ मूलांते नाम चोच्चार्य सिंचामीति नमः पदमिति॥ अ
भिषेकदशांशेन ब्राह्मणान्भोजयेत्ततः॥ ततो ब्राह्मणान्भोजयित्वा महतीं पूजां कृत्वा ततो दक्षिणां दद्या
त्॥ ॐ अद्येत्यादि अमुकगोत्रश्री अमुकदेवशर्माहं कृतैतदमुकदेवतायाः अमुकमंत्रस्य पुरश्चर
णकर्मणः सांगतासिद्ध्यर्थं इदं हिरण्यमग्निदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय गुरवे दक्षि
णां तुभ्यमहं संप्रददे॥ तदभावे तत्पुत्रादिभ्यो दद्यात्॥ तदुक्तं योगिनीतंत्रे॥ गुरवे गुरुपुत्राय तत्प
त्न्यै वा निवेदयेदिति॥ ततोच्छिद्रावधारणं कुर्यात्॥ अथ ग्रहणपुरश्चरणं॥ तत्र संकल्पो यथा॥ ॐ
अद्येत्यादि अमुकगोत्रोहं श्री अमुकदेवशर्माहं राहुग्रस्ते निशाकरे दिवाकरे वा अमुकमंत्रस्य सि
द्धिकामो ग्रासादिमुक्तिपर्यंतं जपरूपपुरश्चरणमहं करिष्ये॥ इति संकल्पं विधाय॥ तावत्कालं जपेत्॥

तद्दिने तत्परदिने वा स्नानादिकं विधाय ॐ अद्येत्यादि अमुकमंत्रस्य कीलकहरणपूर्वकलीनत्वसंरक्षणज
पतद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनकर्माण्यहं करिष्ये॥ इति संक
ल्प्य विधाय होमादिकं कर्म कुर्यात्॥ दक्षिणादिकं तु पूर्ववत्॥ अथ कूर्मचक्रविचारः॥ दीपस्थाने समा
श्रित्य सकलं कर्मफलप्रदं॥ दीप्यते पुरुषो येन दीपस्थानं तदुच्यते॥ चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लि
खेत्॥ पूर्वकोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात्॥ लक्ष्मीकोष्ठं मध्यकोष्ठे स्वरान् युग्मान् क्रमाल्लिखेत्
दिक्षु पूर्वादितो यत्र ह्रस्वाद्यक्षरसंस्थितिः॥ मुखं तत्तस्य जानीयाद्धस्तौ तु भयतः स्थितौ॥ कोष्ठकुक्षिद्व
ये पार्श्वे द्विष्टे पुच्छमीरितं॥ क्रमेणानेन विन्यसेन्मध्यस्थमपि जागतः॥ तदुक्तं विश्वेश्वरतंत्रे॥ म
ध्यकोष्ठे नवकला स्वरान्मुखक्रमाल्लिखेत्॥ मध्ये दीपस्वरा येऽस्मिन्नोक्तं दीपं मंत्रकं॥ मुखस्थालन्मते
सिद्धिं करस्थः सर्वजीवनः॥ उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात्॥ पुच्छस्थः पीड्यते मंत्री
बंधनोच्चाटनादिभिः॥ कूर्मचक्रमिदं प्रोक्तं मंत्रिणां सिद्धिदायकं॥ कूर्मचक्रमविज्ञाय यः कुर्या
ज्जपयज्ञकं॥ तस्य यज्ञफलं नास्ति सर्वानर्थाय कल्पते॥ अथ मंत्राणां दशसंस्काराः लिख्यंते॥
तंत्रोक्ताः गौतमीये॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा॥ अथाभिषेको विमलीकरणाप्यायने पुनः॥ तर्प
णं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः॥ स्वर्णादिपात्रे संलिख्य मातृकायंत्रमुत्तमं॥ काश्मीरचंदनेनापि भस्म
ना वा यथाक्रमे॥ काश्मीरं शाक्तिसंस्कारे चंदनं वैष्णवे मतं॥ शैवे भस्म समाख्यातं मातृकायंत्रलेखने॥ मंत्रा
णां मातृकामध्यादुद्धारो जननं स्मृतं॥ पंक्तिक्रमेण विधिना मुनिभिस्तत्र निश्चितं॥ १॥ प्रणवान्तरितान्
कृत्वा मंत्रवर्णान् जपेत् सुधीः॥ प्रत्येकं शतवारं तु जीवनं तदुदाहृतं॥ २॥ मंत्रवर्णान् समालिख्य ताडयेच्च
न्दनांभसा॥ प्रत्येकं वायुबीजेन पूर्वं वै ताडनं मतं॥ ३॥ हौवादि मंत्रचेदेन प्रोक्तं द्रव्यं च यं शुभं॥ विलिख्य मंत्र
वर्णान् प्रसूनैः करवीरजैः॥ ४॥ तन्मंत्रवर्णसंख्यातैर्हन्यात् द्वेषणाबोधनं॥ ततस्तन्मंत्रोक्तविधिनाभिषे
कः प्रकीर्तितः॥ ५॥ अश्वत्थपल्लवैः सिंचेन्मंत्रीवर्णाख्यसंख्यया॥ संचिंत्य मनसा मंत्रं स्कपुम्नाम्र(?)लमध्य
तः॥ ६॥ ज्योतिर्मंत्रेण विधिवद्दहेन्मलत्रयमिति॥ तारव्योमाग्निमनुयुक्तदंडिज्योतिर्मनुर्मतः॥ ७॥ मनु

रोकारः॥ इंडी अनुस्वरः॥ व्योम हकारः॥ अग्नी रेफः॥ तेन ॐ ह्रूं॥ ७॥ स्वर्णेन कुशतोयेन पुष्पतोयेन वा
पुनः॥ तेन मंत्रेण विधिवद् आप्यायनं विधिस्मृतः॥ ८॥ मंत्रेण वारिणा मंत्रे तर्पणं तर्पणं स्मृतं॥ मधुना
शान्तिः मंत्रे तु वैष्णवे चैंदुमज्जले॥ ९॥ शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितं॥ अभिषेके पितथैव॥ तार
मायार मायायोगो मनोदर्पन मुच्यते॥ १०॥ जप्यमानस्य मंत्रस्य गोपनं तं प्रकाशनं॥ संस्काराद् दश संप्रोक्ता
सर्वतंत्रे सुगोपिताः॥ ११॥ यान् कृत्वा संप्रदानेन मंत्री वांछितमाप्नुयात्॥ मलत्रयमिसाध्यं मायिकं वा कर्मणं॥
मायिकं ना मये ये हैं पौरुषं कार्मणमले॥ आलंब्य तद् ह्रु यंत्र यंनिषिद्धं तन्मलत्रयं॥ तार माया र मायायोग इ
ति॥ तार माया र माबीज पुटितं मंत्रमष्टोत्तरशतं जपेदित्यर्थः॥ तथा चोक्तं विश्वसारतंत्रे॥ तार माया
रमा बीजपुटितेन जपेन्मनुं॥ शतमष्टोत्तरं चैव दीपयेत् साधकोत्तमः॥ अथ कलावती दीक्षा प्रयोगः॥ तत्र
शिष्यः पूर्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचन पूर्वकं संकल्पं कुर्यात्॥ ॐ अद्येत्यादि॥ अमुकगोत्रः
अमुकदेवशर्माऽहं धर्मार्थकाममोक्ष प्राप्तिकामो अमुकदेवतायाः मंत्र दीक्षामहं करिष्ये॥ इति संकल्प्य॥
गुरुं वृणुयात्॥ तद्यथा॥ ॐ साधु भवानास्तां इति शिष्यो वदेत्॥ ॐ साधु अहमासे इति गुरुर्वदेत्॥ ॐ अ
र्चयिष्यामो भवंतं॥ ॐ अर्चय॥ ततो गंधपुष्पधूपदीपवस्त्रालंकारादि गुरुं समभ्यर्च्य॥ दक्षिणां जानुध
त्वा पठेत्॥ ॐ अद्येत्यादि॥ अमुकगोत्रः श्री अमुकदेवशर्मा अमुकदेवतायाः मंत्रदीक्षा॥ अमुक मंत्र
दीक्षाकर्मणि॥ अमुकगोत्रम् अमुकप्रवरम् अमुकदेवशर्माणं भवंतं पाद्यादिभिरभ्यर्च्य गुरुत्वेन त्वं वृते(?)
महं वृणे॥ ॐ वृतोऽस्मीति प्रतिवचनं॥ यथाविहितं कर्म कुरु॥ यथाज्ञानतः करवाणीति प्रतिवचनम्॥
ततो गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्यात्॥ तद्यथा॥ वामे त्रिकोणं वृत्तं चतुरस्रं विलिख्य॥ ॐ आधारशक्तये नमः
इति संपूज्य॥ फडिति पात्रं प्रक्षाल्य॥ सौधारं शंखं निधाय नम इति मंत्रेण संपूज्य अंकुशमुद्रया सूर्यमं
डलात् गंगे च यमुने चैवेति मंत्रेण तीर्थान्यावाह्य॥ ॐ इति गंधपुष्पाभ्यां संपूज्य॥ धेनुमुद्रां प्रदर्श्य॥
ॐ मिति दशधाऽभिमंत्र्य तज्जलेन द्वार मभ्युक्ष्य पूजां समारभेत्॥ तथा चोक्तं तंत्रे॥ त्रि
कोणवृत्त चतुर्विमंडलं रचयेत्ततः॥ आधारशक्तिं संपूज्य तत्राधारं विनिःक्षिपेत्॥ अस्त्रेण पात्रं सं

र्ण्यं हृन्मंत्रेण प्रपूजयेत्॥ निक्षिपेत्तीर्थमावाह्य गंधादीन्सलवेन तु॥ दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यमि
दं स्मृतं॥ मंत्रयेदष्टवारेण वै सामान्यार्घ्यमिदं स्मृतमिति गौतमीयवचनात्॥ अष्टधा प्रणवजपः विशेषार्घ्य
तथा दर्शनात्॥ द्वारस्याग्रे तु दद्याधारं तद्वत्तथा दर्शनात्॥ पुष्पाक्षतजलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्या
त्॥ तद्यथा॥ ऊर्ध्वे ॐ विघ्नाय॰ ॐ महालक्ष्म्यै॰ ॐ सरस्वत्यै॰ ततो दक्षिणद्वारशाखायां॥ ॐ विघ्नाय॰ वाम
द्वारशाखायां ॐ क्षेत्रपालाय॰ तयोः पार्श्वे ॐ गंगायै॰ ॐ यमुनायै॰ देहल्यां ॐ अस्त्राय॰ इति पूजयेत्॥
पुष्पवारिभिः॥ अन्यत्रोक्तौ तु द्वारदेवताभ्यो नमः॥ इत्येताः मंत्रास्त्रिपुरादिपूजादिषु॥ गणेशं क्षेत्रपालं च
बटुकं योगिनीं तथा॥ गंगां च यमुनां चैव लक्ष्मीं वाणीं ततो यजेत्॥ इति विशेषः॥ वैष्णवे तु॥ नंदः सु
नंदश्चंडप्रचंडौ बलप्रबलौ च॥ प्रबलो जयद्रनामा च सुचंद्रो विघ्नवैष्णवः॥ प्रणवादिनमोंतेन नाममं
त्रेण पूजयेत्॥ ततो दक्षिणपादपुरःसरं वामशाखां स्पृष्ट्वा च दक्षिणांगं संकोच्य मंडपांतः प्रवि
श्य॥ नैर्ऋत्यां दिशि॥ ॐ वास्तुपुरुषाय॰ ॐ ब्रह्मणे॰ इति पूजयेत्॥ ततो देवमंत्रेण दिव्यदृष्ट्यावलो
कनेन दिव्यान्विघ्नान्निवार्य॥ ॐ अस्त्राय फडिति जलेनांतरिक्षगान्विघ्नानुत्सार्य वामपार्ष्णिघा
तत्रयेण भौमान्निवारयेत्॥ फडिति सत्ताभिमंत्रितान्विकिरानादाय॥ ॐ अपसर्पंतु ते भूता ये भू
ता भुवि संस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ इति मंत्रेण चंदनानुलिप्तलाजाक्षत
श्वेतसर्षपान्विकिरेत्॥ तथा चोक्तं तंत्रे॥ लाजचंदनसिद्धार्थभस्मदूर्वांकुशाक्षताः॥ विकिरा इति
संदिष्टाः सर्वविघ्नौघनाशकाः॥ ततो ॐ ह्रीं आधारशक्तिकमलासनाय नमः॥ इत्यासनं संपूज्य॥ आस
नमंत्रस्य॥ मेरुपृष्ठ ऋषिः॥ सुतलं छंदः॥ कूर्मो देवता॥ आसनोपवेशने विनियोगः॥ पृथ्वि त्वया धृता लोका
देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं॥ इति पठित्वा स्वस्तिकादिक्रमेणोपविशेत्
तथा चोक्तं तंत्रांतरे॥ आदौ विघ्नान्समुत्सार्य पश्चादासनकल्पनं॥ अथ वाचासने स्थित्वा विघ्नानु
त्सारयेत्सुधीः॥ ततो पंचगव्येन मंडपं शोधयेत्॥ पंचगव्यप्रमाणं तु गौतमीये॥ पंचगव्येन तद्देहम
मंडपं च विशोधयेत्॥ पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते॥ घृतं तु पलमात्रं स्यात् गोमयं तोलकं

द्वयं॥ दधिप्रसृति मात्रं स्यात्तच्च गव्यमिदं स्मृतं॥ अथवा पंचगव्यानां समानो भाग इष्यते॥ मूलमंत्रे
ण संमंत्र्य तेनैव परिशोधयेत्॥ तेन सर्वं विशुद्धिः स्यात् सर्वं पापनिकृंतनं॥ ततो दक्षिणभागे तु आद्
याल्लिवामभागे सुवासितां शुभ्रपूर्णकुंभं हस्तप्रक्षालनार्थं पात्रांतरं च स्वपृष्ठदेशे संस्थापयेत्॥
सर्वदिक्षु घटदीपांश्च पुटांजलिर्न्यस्ता वामे ॐ गुरुभ्यो नमः ॐ परमगुरुभ्यो नमः ॐ परापरगुरुभ्यो नमः
ॐ परमेष्ठीगुरुभ्यो नमः दक्षिणे ॐ गं गणपतये नमः मध्ये ॐ अमुक देवतायै॥ तथा चोक्तं तंत्रे॥
कृतांजलिपुटो मूलाद्वामे गुरुचतुष्टयं॥ गुरुं च परमादिं च परापरगुरुं तथा॥ परमेष्ठीगुरुं तु
यें क्रमेणैव यजेत्ततः॥ दक्षिणे च गणेशानं मध्ये इष्टदेवं विभावयेत्॥ ततः फडिति मंत्रेण गंधपु
ष्पाभ्यां करौ संमार्ज्य ऊर्ध्वोर्ध्वतालत्रयं कृत्वा छोटिकाभिर्दशदिग्बंधं च कृत्वा॥ ततो रमिति जल
धारया वह्निप्राकारं विचिंतयेत्॥ ततो भूतशुद्धिः॥ ततो मातृकान्यासः॥ ततः प्राणायामत्रयं॥
ततः पीठन्यासः॥ ततः ऋष्यादिन्यासः॥ ततो मंत्रन्यासः॥ ततो मुद्राप्रदर्शनं॥ ततो ध्यानं॥ ततो मा
नसपूजा॥ ततोर्घ्यस्थापनं॥ तद्यथा॥ स्ववामभागे त्रिकोणं मंडलं कृत्वा तत्र त्रिपादिकामारोप्य॥
फडिति शंखं प्रक्षाल्य तदुपरि संस्थाप्य नम इति मंत्रेण गंधपुष्पाक्षतबिल्वदलदूर्वादीन्स्त
त्रनिक्षिप्य विमलजलेन सं ॐ हैं ५० इत्यनेन मूलेन च पूरयेत्॥ मं वह्निमंडलाय दशकलात्मने
इति मंत्रेण त्रिपादिकां पूजयेत्॥ ॐ अं सूर्यमंडलाय द्वादशकलात्मने॥ इति मंत्रेण शंखं पूज
येत्॥ ॐ सोममंडलाय षोडशकलात्मने॥ इति मंत्रेण जलं पूजयेत्॥ गंगे च यमुने चैव सनेनांकुशा
मुद्रया सूर्यमंडलात्तीर्थान्यावाह्य अमुकीं इहावह इहतिष्ठ स्वेहदेपादेन लीलत्रीवावाह्य ह्रमित्यवगुं
ठ्य वषडिति मालिनी मुद्रां प्रदर्श्य वौषडिति अनेनामृतीकृत्य नैनिरीक्ष्य॥ पुनः षडंगमंत्रैः सकलीकृत्य
गंधपुष्पाभ्यां नम इति मंत्रेण तत्र देवतां संपूज्य॥ मत्स्यमुद्रया संछाद्य तदुपरि मूलमंत्रमष्टधा
जपेत्॥ तथा चोक्तं गौतमीये॥ गंधपुष्पैः समभ्यर्च्य शंखार्घ्य पात्रमोजयेत्॥ अष्टकृत्वो जपेन्मं
त्रं शिरसा मालिनीं न्यसेत्॥ अत्र क्रमपदं तत्तद्देवतापरं॥

ततो वमिति मंत्रेण धेनुमुद्रां प्रदर्श्यास्त्रमंत्रेण संरक्ष्य तस्मात्किंचिज्जलं प्रोक्षणीपात्रे निक्षिप्य ते
नोदकेनात्मानं पूजोपकरणानि च मूलमंत्रेण त्रिवारमभ्युक्ष्य पीठन्यासक्रमेण स्वशरीरे धर्मादी
न् पूजयेत् ॥ तद्यथा ॥ दक्षिणस्कंधे ॥ ॐ धर्माय ॰ वामे ॐ ज्ञानाय ॰ वामोरौ ॐ वैराग्याय ॰ दक्षिणोरौ
ॐ ऐश्वर्याय ॰ मुखे ॐ अधर्माय ॰ वामपार्श्वे ॐ अज्ञानाय ॰ नाभौ ॐ अवैराग्याय ॰ दक्षिणपार्श्वे
ॐ अनैश्वर्याय ॰ हृदि ॐ अनंताय ॰ ॐ आनंदकंदाय ॰ ॐ संविन्नालाय ॰ ॐ सर्वतत्त्वात्मकपद्माय ॰
ॐ प्रकृतिमयपत्रेभ्यो ॰ ॐ विकारमयकेसरेभ्यो ॰ ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै ॰ ॐ अं अर्कमंडला
य द्वादशकलात्मने ॰ ॐ सोममंडलाय षोडशकलात्मने ॰ ॐ मं वह्निमंडलाय दशकलात्मने ॰ ॐ
सं सत्त्वाय ॰ ॐ रं रजसे ॰ ॐ तं तमसे ॰ ॐ आं आत्मने ॰ ॐ अं अंतरात्मने ॰ ॐ पं परमात्मने ॰ ॐ ह्रीं ज्ञा
नात्मने ॥ ततो हृत्पद्मस्य पूर्वादिकेसरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं जपेत् ॥ तदुक्तं शारदायाम् ॥
अंसोरुयुग्मयोर्विद्वान्न्याद्दक्षिणवामयोः ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं क्रमतः सुधीः ॥ मुखवामपार्श्वना
भिपार्श्वे धर्मादीन्व्यप्रकल्पयेत् ॥ ध्यानं च तथा प्रपंचसारे ॥ रक्तं धर्मं वृषवेषं च वनलुमग्नौ हरिं रूपाम
वर्णं ज्ञानं रक्षोदिशि महतिपीतं च वैराग्यसंज्ञं ॥ नीलाकारं हरिदरमैश्वर्यमीशे च रुक्लं प्रभवैस्तैर्यम
दिचित्रगात्रादिपिंडः ॥ मध्ये अनंतपद्मे अस्मिन्नस्त्रयैः सोमवह्निज्वालैर्विरक्तैः ॥ ततोऽश्वत्थे गु
णात्मकरूपपूर्वशक्तिभ्यो विजंतामध्ये यजेच्च ॥ हरिं सिंहतनुं चतुर्भुजं नरकेशरं मसिन्नमध्ये ॥ तार
विजलैः सूतमैः स्वात्मा स्वात्मादयः ॥ न्यासक्रमेण देहेषु धर्मादीनपि पूजयेत् ॥ पुष्पाद्येरुपचारैस्ता
नसर्वांस्तु समर्चयेत् ॥ तत्र हृदये मलदेवतां नैवेद्यं विना गंधाद्यैः पूजयेत् ॥ तथा चोक्तं निबंधे ॥ नैवे
द्यं विना लगं धाद्यैरुपचारैः समर्चयेत् ॥ ततः उत्तमांगहृदयमूलाधारपादसर्वांगेषु मूलेन पंचपु
ष्पांजलिं दत्वा यथाशक्ति मंत्रं जप्त्वा ॥ गुह्यातिगुह्येत्यादिना मंत्रसमर्पणं कुर्यात् ॥ तथा चोक्तं निबंधे ॥
पंचकृत्वास्ततो दद्यात्पुष्पांजलिमनन्यधीः ॥ उत्तमांगहृदयाधारपादसर्वांगकेक्रमात् ॥ सर्वमेतत्प्रो
क्षणीपात्रस्थेन वारिणा विदध्यात् ॥ ततः प्रोक्षणपात्रस्थतोयं विसृज्य हृदयं च संपूर्य बहिः पूजामारभेत् ॥

तत्रवक्ष्यमाणद्वारदेशस्थसर्वतोभद्रमंडलाभ्यंतरमंडले पूजयेत्॥ ॐ मंडलायनमइति मंडलं संपू
ज्यशालिभिः कर्णिकामध्यमापूर्य तदुपरि तंदुलै रास्तीर्य विष्टरं चाक्षतयुक्तं तदुपरि न्यसेत्॥ ततो
मंडले एतादेवताः पूजयेत्॥ तथाचोक्तं॥ पीठमध्ये ॐ आधारशक्त्यै॰ ॐ प्रकृत्यै॰ ॐ कूर्माय॰ ॐ
अनंताय॰ ॐ पृथिव्यै॰ इत्यादि पीठमनुं स्तत्तत्पटलोक्तपूजां कुर्यात्॥ ततो मंडले प्रादक्षिण्येन यं
धूम्रार्चिषे॰ इत्यादिवह्नेर्दशकलाः विन्यस्य संपूजयेत्॥ ततो हेमादिरचितं कुंभं फडिति संप्रोक्ष्य चं
दनागरुकर्पूरैर्धूपयित्वा त्रिगुणातंतुना संवेष्ट्य॥ ॐ कुंभाय॰ इति गंधपुष्पाभ्यां संपूज्य विष्टराक्ष
तैर्नवरत्नानि च निक्षिप्य प्रणवमुच्चरन् कुंभपीठयोरैक्यं मनसि भाव्य पीठे स्थापयेत्॥ तदुक्तं गौतमीये
कुंभविधानं तु॥ हैम्यं रौप्यं तथा ताम्रं मार्त्तिकं वा यथाशक्तितः॥ वित्तशाठ्यं न कुर्वीत कुर्वन्निष्फलतामिया
त्॥ षट्त्रिंशदंगुलं कुंभं विस्तारोन्नतिशालिनं॥ षोडशांगुलद्वारं वापितलोन्यन्नैन धारयेत्॥ ओं धूम्रार्चिरा
दिवह्नेर्दशकलानां प्राणा इह प्राणाः एवं ओं धूम्रा॰ जीव इह स्थितः॥ ओं पंच धूम्रार्चिरादि॰ सर्वेंद्रिया
णि इह स्थितानि ओं पंच धूम्रार्चिरादि वाक्पाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ कुंभे
प्रादक्षिण्येन सूर्यस्य कं भं तपिन्यै॰ इत्यादि द्वादशकलाः विन्यस्य संपूजयेत्॥ ततः क्षीरद्रुमकषायेन पोलोद्रा
त्वक्चरेण शालीधौदकैर्गंधपुष्पस्रवासितजलैर्वा आत्माचेदेन मातृकां प्रतिलोमतो मंत्रं जपन् पूर
येत्॥ कुंभे देवताधियाततश्चंद्रस्यामृतादिषोडशकलाः जपेत् प्रादक्षिण्येन विन्यस्य॥ ॐ अं अमृतायै॰
इत्यादिना संपूज्य॥ सारसंग्रहे॥ क्षीरद्रुमकषायादिद्रव्यैराशर्यगंधाष्टकं विलोड्य॥ तस्मिं जले सकलाः क
लाः आवाह्य संपूजयेत्॥ गंधाष्टकं यथा॥ तथा चोक्तं शारदायां॥ गंधाष्टकं त्रिविधं शक्तिविष्णुशिवा
त्मकं॥ चंदनागरुकर्पूरचोराकुंकुमरोचनाः॥ जटामांसी कपियुता शक्तेर्गंधाष्टकं विदुः॥१॥ चंदनागरु
ह्रीकुष्ठचोरकुंकुमसेव्यकाः॥ जटामांसीसुरमिति विष्णोर्गंधाष्टकं स्मृतं॥२॥ चंदनागरुकर्पूरतमा
लदलकुंकुमं॥ कुशीतकुष्ठसंयुक्तं शैवं गंधाष्टकं मतं॥३॥ अस्यार्थः॥ चंदनागरुकर्पूरकुष्ठंशशीकुंकु
मगोरोचनेजटामांसीगोविश्वानाइति शाक्तेगंधाष्टकं॥ चंदनागरुवालाकुष्ठकुंकुमन्वेतचोरसमस्तजटा

मांसी सूर देवदारु इति विख्यो गंधाष्टकं ॥ चंदनागरुकर्पूरतमालजलकुंकुमकुष्ठचंदनशैवं गंधाष्टकं वि
दुः ॥ तत्रादौ वह्नेर्दशकलाः पूजयेत् ॥ तद्यथा ॥ वह्नेर्धूम्रार्चिरादिदशकलाः इहागच्छत इह तिष्ठत इह सं
निधीभवत ततो मूलमंत्रं प्रतिलोमतो जपन् मंत्रस्य देवतां मनसा ध्यायन् ॥ अथ प्राणप्रतिष्ठां कुर्या
त् ॥ तद्यथा ॥ ओं ह्रीं क्रों हंसः धूम्रार्चिरादिवह्नेर्दशकलानां प्राणा इह प्राणाः ॥ ओं० धूम्रा० जीव इह
स्थितः ॥ ओं० धूम्रा० वाक्पाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ इति प्राणप्रतिष्ठा
पूर्वं गंधादिभिः पंचोपचारैः पूजयेत् ॥ ओं धूम्रार्चिरादिवह्नेर्दशकलाभ्यो एष गंधो नमः इत्यादि पंचोपचा
रैः संपूजयेत् ॥ ततः प्रत्येकं पूजयेत् तद्यथा ॥ यं धूम्रार्चिषे नमः ॥ रं ऊष्मायै० लं ज्वलिन्यै० वं ज्वालिन्यै० शं
विस्फुलिंगिन्यै० षं सुश्रियै० सं सुरूपायै० हं कपिलायै० ळं हव्यवाहायै० क्षं कव्यवाहायै० शुक्लश्वेतदामप्रत्येकमा
वाह्य पाद्यादिभिरुपचारैः पूजयेत् ॥ ततः सूर्यस्य ॥ तपिन्यादि द्वादशकलाः पूर्ववत् प्राणावाहनादिकं कृत्वा
पूजयित्वा च प्रत्येकं पूजयेत् ॥ तद्यथा ॥ कं भं तपिन्यै० खं बं तापिन्यै० गं फं धूम्रायै० घं पं मरीच्यै० ङं नं ज्व
लिन्यै० चं धं रुच्यै० छं दं सुषुम्णायै० जं थं भोगदायै० झं तं विश्वायै० ञं णं बोधिन्यै० टं ढं धारिण्यै० ठं डं क्षमा
यै० इति प्रत्येकं पूजयेत् ॥ शुक्लश्वेतदामप्रत्येकमावाह्य पूजयेत् ॥ तथा चोक्तं तंत्रे ॥ कृत्वावाहनवासो
गंधांतान् द्वादशपूरिताः ॥ ततः चंद्रस्यामृतादिषोडशकलाः पूर्ववत् प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् ॥ ततः
प्रत्येकं पूजयेत् तद्यथा ॥ अं अमृतायै० आं मानदायै० इं पूषायै० ईं तुष्ट्यै० उं पुष्ट्यै० ऊं रत्यै० ऋं धृत्यै० ॠं शशि
न्यै० लृं चंद्रिकायै० लॄं कांत्यै० एं ज्योत्स्नायै० ऐं श्रियै० ओं प्रीत्यै० औं अंगदायै० अं पूर्णायै० अः पूर्णामृ
तायै० ॥ शुक्लश्वेतदामप्रत्येकमावाह्य पाद्यादिभिरुपचारैः पूजयेत् ॥ ततः पंचाशत्कलापूजा ॥ यथा ॥
सृष्ट्यादिकं च वर्गदशकलाः पूर्ववत् प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् ॥ प्रत्येकं पूजनं तु ॥ कं सृष्ट्यै० खं
ऋद्ध्यै० गं स्मृत्यै० घं मेधायै० ङं कांत्यै० चं लक्ष्म्यै० छं द्युत्यै० जं स्थिरायै० झं स्थित्यै० ञं सिद्ध्यै० शुक्लश्वेतदाम
प्रत्येकमावाह्य पाद्यादिभिरुपचारैः पूजयेत् ॥ ओं हंसः शुचिषदिति ऋक् ॥ जपस्यावाहयित्वा खे पूजये
त् ॥ ततो जरादि टवर्गदशकलाः पूर्ववत् प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् ॥ शुक्लश्वेतदामप्रत्येकं पूजयेत् ॥

टं जरायै॰ ठं पालिन्यै॰ डं शान्तिन्यै॰ ढं ऐश्वर्यै॰ णं रत्यै॰ तं कामिन्यै॰ थं वरदायै॰ दं ह्लादिन्यै॰ धं प्रीत्यै॰ नं दी
र्घायै॰ शक्त्यै श्रीं पाद्यादि॰ ॥ ततः ॐ प्रतद्विष्णुस्तवते इति ऋचं जप्त्वा गंधादि पूजयेत् ॥ ततस्तीक्ष्णा
दि पवर्ग दशकलाः पूर्ववत् प्राणप्रतिष्ठां विधाय पूजयेत् ॥ प्रत्येकं पूजनं तु यथा ॥ पं तीक्ष्णायै॰
फं रौद्र्यै॰ बं भयायै॰ भं निद्रायै॰ मं तंद्र्यै॰ यं क्षुधायै॰ रं क्रोधिन्यै॰ लं क्रियायै॰ वं उत्कार्यै॰ शं मृत्यवे॰
शक्त्यै श्रीं पाद्यादि॰ ततः त्र्यंबकं यजामहे इति ऋचं जप्त्वा गंधपाद्यादिभिरुपचारैः पूजयेत् ॥ ततः
पीतादि षवर्ग पंचकलाः पूर्ववत् प्राणप्रतिष्ठादिकं विधाय गंधपाद्यादिभिरुपचारैः पूजयेत् ॥ प्रत्येकं
पूजनं तु यथा ॥ षं पीतायै॰ सं श्वेतायै॰ हं अरुणायै॰ ळं असितायै॰ क्षं अनंतायै॰ शक्त्यै प्रत्येकं मा
वाद्य पाद्यादि॰ ॥ ततः ॐ तद्विष्णोः परमं पदमिति ऋचं जप्त्वा गंध पूजयेत् ॥ ततो निवृत्त्यादि षोडश
कलाः पूर्ववत् प्राणप्रतिष्ठादिकं कृत्वा गंधादिभिरुपचारैः पूजयेत् ॥ ततः प्रत्येकं पूजनं तु ॥ तद्यथा ॥
अं निवृत्त्यै॰ आं प्रतिष्ठायै॰ इं विद्यायै॰ ईं शांत्यै॰ उं इंधिकायै॰ ऊं दीपिकायै॰ ऋं रेचिकायै॰ ॠं मोचिकायै॰
लृं परायै॰ ॡं सूक्ष्मायै॰ एं सूक्ष्मामृतायै॰ ऐं ज्ञानायै॰ ओं आप्यायिन्यै॰ औं व्यापिन्यै॰ अं व्योमरूपायै॰
अः अनंतायै॰ शक्त्यै श्रीं पाद्यादि॰ ॥ ॐ तद्विप्रासो विपन्यवः ऋचं ॥ विष्णुर्योनिं कल्पयतु ऋचं ॥ गर्भं धे
हि सिनीवालि ऋचं ॥ इति जप्त्वा गंध ततः पूजयेत् ॥ ततः कलशे मूलं शंखसंख्यार्थं कुंभे विनिक्षिपेत् ॥
ततोऽश्वत्थपनसचूतपल्लवैरिं दूर्वाभिर्वेष्टितैः कल्पवृक्षबुध्या कुंभवक्त्रं पिधाय ॥ तस्मिन् कुंभवक्त्रे सप
ल्लाक्षतं चषकं कल्पवृक्षफलबुध्या स्थापयेत् ॥ ततः कुंभं निर्मलेन क्षौमयुग्मेन संवेष्ट्य मूलेन मूर्तिं परि
कल्प्य यथोक्तरूपिणीं देवतां ध्यात्वा तस्यामावाहनादिकं कृत्वा पूजयेत् ॥ मूलमंत्रमुच्चार्य अमुकि इहागच्छ
इह तिष्ठ इह सन्निधेहि इह संनिरुद्ध्यस्व रक्षा वाहनादिकं कृत्वा देवतांगे अंगन्यासं कृत्वा ॥ कुंभिसेवेगुंठय ॥
वमिति धेनुमुद्रयामृतीकृत्य ॥ परमीकृत्य ॥ ततः प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः पूजयेत् ॥ अर्घ्यादि पा
त्रनियमस्तु ॥ गौतमीतंत्रे चोक्तं ॥ अर्घ्यस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं त्रयं भवेत् ॥ तथैवाचमनीयानि पा
त्राणि च विचक्षणः ॥ तथा करणदौर्बल्याद्दुक्रमेकं प्रशस्यते ॥ किंतु सामान्यविशेषार्घ्यद्वयस्यावश्यकत्वं

तथा चोक्तं नवरत्नेश्वरे ॥ एतत्पात्रे न कर्तव्यं यदि साक्षान्महेश्वरः ॥ मंत्राः पराङ्मुखा यांति आपदश्च पदे प
दे ॥ इह लोके दरिद्रः स्यात्ततश्च नरकं व्रजेत् ॥ ततः मुखार्थं ॥ इदमासनममुकदेवतायै नमः ॥ मं० एत
त्पाद्यममुक० मं० अमुकदेवतायै स्वागतं ते इति स्वागतं ॥ मं० एतत्पाद्यममुकदेवता० इति पादांबुजे ऽत्र श्या
माकदूर्वाब्जविष्णुक्रांतेति मीरितं ॥ मं० इदममुकदेवतायै स्वाहा ॥ इति गंधोऽक्षतकुशाग्रतिलसर्षपदू
र्वासमकमर्घ्यं शिरसि दद्यात् ॥ तथा चोक्तं तंत्रे ॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ॥ दूर्वाभिः स
र्वदेवानामेतदर्घ्यमुदीरितं ॥ वैष्णवेष्वप्यादिकमेव देयमिति वदंति ॥ स्वधामंत्रेणाचमनीयकं प्र
दद्याद्द्वे ॥ इयत्र स्वधापाठं कुर्वंतः स्वधाशब्दस्यात्र लवोऽच क्रतोत् ॥ इदमाचमनीयं च वदंति ॥ तंत्र ॥
तथा चोक्तं तंत्रे ॥ मधुपर्कं ततो दद्यात् जलमंत्रेण देशिकः ॥ इति वचनात् ॥ मधुपर्कविषये क्रमिदम् ॥
स्वधामनुना ततः कुर्यान्मधुपर्कं मुखांबुजे ॥ तेनैव मनुना कुर्यादद्भिराचमनीयकं ॥ तथा चोक्तं ॥ वारुणे
न च मंत्रेण दद्यादाचमनीयकमिति वचनात् ॥ स्वधेत्याचमनीयं च त्रिवारं मुखपंकजे ॥ स्वधेति मधु
पर्कं च पुनराचमनीयकमिति सोमशंभुपद्धति वचनात् ॥ वरुणेन बीजेनेत्यत्र सहार्थे तृतीयां वदंतः इद
माचमनीयकमत्र मुकदेवतायै स्वधेति मन्यंते एतद्वचनद्वयं शूद्रविषयकमिति केचित् ॥ मैथिला
स्तु स्वधापाठं कुर्वंति नतु स्वधेति वकारस्याबोधकत्वात् ॥ किंच यागार्थके स्वाहाशब्देनाप्यर्घ्यदानात्तत्स
द्भिन्नाद्विताचमनदानेपि यागार्थबोधकस्वधामंत्रेण ॥ न तु न मित्येनेन नवरुण बीजेन तथा चोक्तं तं
त्रे ॥ नमः स्वाहा स्वधा चेति वौषडिति यथाक्रमात् ॥ जलमंत्रेण वा स्यादिवचनं प्रमाणमन्यमिति तांत्रिकाः ॥ ते
नाचमनीयं स्वधेति ॥ तथा चोक्तं तंत्रे ॥ स्वधेत्याचमनीयं च त्रिवारं मुखपंकजे ॥ स्वधेति मधुपर्कं च पु
नराचमनीयकमिति सोमशंभुपद्धति वचनात् ॥ एवमेव तु न जलमंत्रेण देशिकः ॥ वारुणेन च बीजेनेत्यत्र
सहार्थे तृतीयां वदंतः ॥ इदमाचमनीयममुकदेवतायै स्वधेति वदंति एतद्वचनद्वयं शूद्रविषय
कमिति केचित् ॥ जातालवंगकंकोलान्वितमाचमनीयं वदंते दद्यात् ॥ अर्घ्यं च स्वाहेति गंधपुष्पा
क्षतकुशाग्रतिलसर्षपदूर्वासमकमर्घ्यं च शिरसि दद्यात् ॥

वेष्टेतु ॥ अर्घ्यादिक्रमेणादेयमिति ॥ ततो मधुपर्कं स्वधा ध्यात्वं दध्यिमधुमिश्रितं ॥ एतदुक्तं मनीषि
भिः ॥ एवं पुनराचमनीयं स्वधा ॥ ततः स्नानीयं निवेदयामि ॥ ततो यज्ञोपवीतान्विदद्यात् ॥ ततः
आचरणं नमः ॥ ततो मंत्रपुटितमातृकावर्णैस्तत्कृत्वा न्यासस्थानानि प्रजयेत् ॥ वस्त्रं चंदना
गरुकर्पूरकालागुर्वात्मकं गंधं दद्यात् ॥ तथा चोक्तं विधे ॥ गंधं चंदनकर्पूरकालागरुभिरीरि
तं ॥ ततः पुष्पाणि वौषडिति मंत्रेण सर्वत्र दाने मूलमंत्रमुच्चारणं ॥ ततो गुग्गुलत्वगरुक्षीरद्रुमकराम
धुचंदनघृतात्मकं धूपं दद्यात् ॥ तथा चोक्तं तंत्रे ॥ सगुग्गुलत्वगरुक्षीरद्रुमकरामधुचंदनैः ॥ धूपयेदा
ज्यसंमिश्रैर्नरुचैर्देवस्य दैशिकः ॥ विशेषस्तु तंत्रांतरे ॥ सिताज्यमधुसंमिश्रं गुग्गुलागरुचंदनं ॥ षडं
गं धूपयेत्तत्तु सर्वदेवप्रियं सदा ॥ तथा चोक्तं तंत्रे ॥ रोगरोगहररोगजकेशास्फरतलजलधुपत्रविशे
षाः ॥ वेकृतिवर्जितिचाहिजमुस्तादेपवाल्लिविहस्कंदरिशास्ता ॥ गुग्गुलं सरलं दारु पत्रं मलयसंभवं ॥
हं हीवेरमरंकुष्ठं सर्जरसं घनं ॥ हरीतकी नखं लाक्षां जटामांसी तु शैलजं ॥ षोडशांगं विदुर्धूपं दैवेपि
त्रैव कर्मणि ॥ मधुमुस्तेघृतं गंधो गुग्गुल्वगरुशैलजं ॥ सरलं सिद्धिसिद्धार्थदशांगो धूप उच्यते ॥ क
र्पूरगर्भिल्या वर्तिकया दीपं दद्यात् ॥ तथा चोक्तं शारदायां ॥ वर्त्या कर्पूरगर्भिण्या सर्पिषा तिलजेन
वा ॥ आरोपयद्दशयेद्दीपानुच्चैस्तोरचशालिना ॥ इति शारदायां ॥ गौतमीतंत्रे ॥ विशेषस्तु ॥ तत्र
तत्र जलंदद्यादुपचारांतरांतरा ॥ ततो नैवेद्यं निवेदयेत् ॥ गंधादिदाने विशेषस्तु ॥ तथा चो
क्तं तंत्रांतरे ॥ मध्यमानामिकांगुष्ठैरंगुल्यग्रेण पार्वति ॥ दद्यादर्घ्यविमलं गंधं मूलमंत्रेण साध
कः ॥ अंगुष्ठतर्जनीभ्यां तु यंत्रे पुष्पं निवेदयेत् ॥ यथा गंधं तथा देवि धूपं दद्याद्विचक्षणः ॥ म
ध्यमानामिकाभ्यां तु मध्यपर्वणि दैशिकः ॥ अंगुष्ठाग्रेण देवेशि धृतो धूपं निवेदयेत् ॥ उत्तोलनं
त्रिकं कृत्वा गायत्र्यां मूलतो गतः ॥ ततो रूप्यमुद्रया देवि नैवेद्यं निवेदयेत् ॥ मूले नाचमनीयं
दद्यात् ॥ तांबूलं तत्तन्मुद्रया मूलेन मूलमंत्रेण तस्येति विशेषः ॥ तथा चोक्तं राघवतंत्रे ॥
जलमस्त्रेण संप्रोक्ष्य अभ्यर्च्य मनुना हृदा ॥ अस्त्रेण हजितौ घंटां वादयन्गुग्गुलं दहेत् ॥

तथा च पठन्ति ॥ दीपं च घृतसंयुक्तं तैलयुक्तं च वामतः ॥ दक्षिणे चोत्सिता वर्त्तिर्वामतो रक्तवर्त्ति-
का ॥ तथा चोक्तं तंत्रे ॥ ततः समर्पयेद्धूपं घंटावाद्यजयस्वनैः ॥ एवं दीपदानेपि ॥ घंटां वादयन्निति ॥
तथा चोक्तं गौतमीये ॥ उत्थाप्य दृष्टिपर्यंतं घंटां वामदिक्संस्थितां ॥ वादयन्वामहस्तेन चार्पयेत् ॥
रुद्रयामलेप्युक्तं ॥ निवेदयेत्पुरोभागे गंधपुष्पं च भूषणं ॥ दीपं दक्षिणतो दद्यात्पुरतो वा न पृष्ठतः ॥
वामतस्तु तथा धूपं पुरतो वा न दक्षिणे ॥ नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः ॥ वामदक्षिणभा-
गस्तु देवताया एव ॥ न तु साधकस्य ॥ तथोक्तं तंत्रे ॥ स्वपरीपोत्सृजो ज्यश्च देवताग्रे निवेदयेदि-
ति दर्शनात् ॥ घृतयुक्तं दक्षि ॥ तैलयुक्तं वामे ॥ एवं सितवर्त्तिश्चैव दक्षिणे ॥ रक्तावर्त्तिश्चैव वामे ॥ सं-
प्रदायस्वेतु नियमः ॥ पूर्वं च देवतावामे आमात्ये चैव दक्षिणे ॥ दक्षिणे च सितावर्त्तिर्वामतो रक्तवर्त्तिका-
प कृपाप कुविनेदेन नैवेद्येवपि संस्थितिः ॥ पुरतो नियमो नास्ति दीपनैवेद्ययोः क्वचित् ॥ इति सांप्रदा-
यिकाः ॥ तदपि प्रमाणं स्यात् ॥ ततो वंदनं दंडवत्प्रणामादिना ॥ ततोष्टोत्तरसहस्रं अष्टोत्तरशतं दशवा-
रं वा संजप्य गुह्यातिगुह्येति मंत्रेण जपं समर्पयेत् ॥ ततो मंत्रस्य दशसंस्काराः स्वीकृताः प्रकर्त्तव्याः ॥
ततो गुरुः शिष्यं समानीय वेदिपार्श्वे नेत्रे शिष्यस्य नेत्रवस्त्रेण आच्छाद्य शिष्याञ्जलिं पुष्पैः प्रपूरयित्वा गुरुः
स्वयमेव मंत्रमुच्चरन् कलशदेवताप्रीत्यै क्षेपयेत् ॥ ततो नेत्रबंधं दूरीकृत्य दर्भासने आसीनं शिष्यं आ-
त्मयोगक्रमात् तत्र भूतशुद्ध्यादिकं विधाय तत्तन्मंत्रोक्तन्यासान् शिष्यस्य देहे कुर्यात् ॥ कुंभस्थां देवतां
पुनः पंचोपचारैः संपूज्यालंकृतं शिष्यं अनन्यमनसं तेन उपवेशयेत् ॥ ततो मंगलाचारपूर्वकं तत्कुंभं
समुद्धृत्य तन्मुखस्थाश्वत्थकरद्रुमपल्लवान् पृष्ठतो शिष्यस्य शिरसि निधाय ॥ मातृकां मनसा जपन्नमृतं
साधितैस्तोयैर्नसिंचेत् संहितोक्तेनाभिषेकमंत्रेण तमभिषिंचेत् ॥ शिष्यो वसिष्ठजलेनाचम्य धौते वाससी
परिधाय गुरोः संनिधावुपविशेत् ॥ तामेव गुरुरात्मनो देवतां शिष्यसंक्रांतां तयोरैक्यं संभावयन् ॥ गं-
धादिभिः पूजयेत् ॥ ॐ सहस्रार हुं फट् इति मंत्रेण शिष्यस्य शिखां बध्वा संरक्ष्य कलान्यासं कुर्यात् ॥ पादत-
लाज्जानुपर्यंतं ॐ निवृत्त्यै॰ जानुनो नाभिपर्यंतं ॐ प्रतिष्ठायै॰ नाभेः कंठपर्यंतं ॐ विद्यायै॰ कंठाल्ला-

टपर्यंतं ॐ शान्त्यै॰ ललाटाद्ब्रह्मरंध्रपर्यंतं ॐ शान्त्यतीतायै॥ पुनर्ब्रह्मरंध्राल्ललाटांतं ॐ शान्त्यती
तायै॰ ललाटात्कंठपर्यंतं ॐ शान्त्यै॰ कंठान्नाभिपर्यंतं ॐ विद्यायै॰ नाभेर्जानुपर्यंतं ॐ प्रतिष्ठा
यै॰ जान्वोः पादपर्यंतं ॐ निवृत्त्यै॥ अत्र सर्वत्र कलापदं ज्ञेयं॥ ततो शिष्यस्य शिरसि हस्तं दत्वाष्टो
त्तरशतं मंत्रं जप्त्वा अमुं मंत्रं दास्यामीति शिष्यहस्ते जलं दद्यात्॥ तथा चोक्तं वासिष्ठे॥ ततस्तच्छिरसि
स्वस्य हस्तं दत्वाष्टशतं जपेत्॥ अष्टोत्तरं ततो मंत्रं दद्यादुदकपूर्वकं॥ आत्मनः स्वस्य फलदो भवत्येव मु
दीरयेत्॥ ततो दद्यादिति शिष्याय ब्रूयात्॥ ततो गंधादिसंयुक्तं मंत्रं गुरुर्दक्षिणकर्णे त्रिवारं श्रावयेत्॥
तथा चोक्तं गौतमीये॥ न्यासजालं ततस्तस्य देहे गुरुः समाचरेत्॥ दक्षकर्णे वदेन्मंत्रं त्रिवारं पूर्णमा
नसः॥ दक्षेति द्विजविषयं॥ तथा चोक्तं तंत्रे॥ दक्षकर्णे वदेन्मंत्रं गंधादिकसमन्वितं॥ तदा तस्य नूक्षणे
दे विजपेन्मंत्रं शताष्टकं॥ शारदायां च॥ गुरोर्लब्ध्वा परां विद्यां अष्टकृत्वो जपेत्सुधीः॥ देवतागुरुमंत्राणा
मैक्यं संभावयन्धिया॥ इति वचनं तु तत्तद्भावनापरविषयं॥ ततो गुरुश्चरणौ दंडवत्पतितः एव तिष्ठेत्॥
उत्तिष्ठ वत्स मुक्तोऽसि सम्यगाचारवान्भव॥ कीर्तिश्रीकांतिरत्नायुर्बलारोग्यं सदास्तु ते॥ इति पठित्वोत्था
पयेत्॥ ततः शिष्यः कुशतिलजलान्यादाय ॐ अद्यैतस्यामुकमंत्रग्रहणप्रतिष्ठार्थं दक्षिणामिदं
सुवर्णमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय गुरवे तुभ्यमहं संप्रददे॥ शरीरमर्थं प्राणं
श्च सर्वं तस्मै निवेदयेत्॥ ततः प्रभृति कुर्वंस्त गुरोर्हितमनन्यधीः॥ यद्यदिष्टतमं लोके गुरवे तन्नि
वेदयेत्॥ स्वतंत्रतंत्रे दक्षिणानियमो यथा॥ गुरवे दक्षिणां दद्यात्सर्वस्वं वा शिवोत्तमे॥ सर्वस्वं वा तदर्धं
वा तदर्धं वा तदाज्ञया॥ नो चेत्संचारिणी शक्तिः कथमस्य भविष्यति॥ अन्यत्राप्युक्तं॥ सर्वस्वं दक्षिणां
दद्याद्गां वा दद्यात्पयस्विनीं॥ भूमिं दंतिकरीं दद्यात्सुवर्णं वाससमन्वितं॥ गुरोः संतोषमात्रेण दुष्टमंत्रो
पि सिध्यति॥ अन्यथा नैव सिद्धिः स्यादजिनारायकल्पते॥ दीक्षाग्रहणसामर्थ्यं गुरवे तां निवेदयेत्॥
अन्नैश्च भोजनाद्यैश्च ततः परितोषयेत्॥ तं त्रीन्नरेऽपि॥ शतं जपेत्तदग्रस्थे त्रिकालं त्रिदिने
वसेत्॥ नो चेत्संचारिणी शक्तिर्गुरुमेति न संशयः॥ ततो मिष्टान्नपानाद्यैर्ब्राह्मणान्परितोष्य वै भुंजीत:

सह भुंजीत ॥ दीक्षादिवसे गुरुशिष्ययोरुपवासे दोषमाह ॥ तदुक्तं योगिनीतंत्रे ॥ मंत्रं दत्वा गुरुः स्वे
व मुपवासं यदाचरेत् ॥ महाघोरे नरके स निमज्जति नान्यथा ॥ दीक्षां कृत्वा यथा मंत्री चोपवा
से समाचरेत् ॥ तस्य देवः सदा रुष्टः शापं दत्वा पुरं व्रजेत् ॥ यद्यत्र होमः क्रियते तदा तद्विधानं
वक्ष्यामः ॥ इति कलावतीदीक्षाप्रयोगः ॥ अथ पंचायतनदीक्षा ॥ तदुक्तं रुद्रयामले ॥ भवानी
तु यदा मध्ये ऐशान्यामच्युतं यजेत् ॥ आग्नेय्यां पंचवक्त्रं च नैर्ऋत्यां गणनायकं ॥ वायव्यां तप
नं चैव स्मरन् मोक्षप्रदायिनम् ॥ १ ॥ यदा तु मध्ये गोविंदमैशान्यां शंकरं यजेत् ॥ आग्नेय्यां गणनाथं च
नैर्ऋत्यां तपनं तथा ॥ वायव्यामंबिकां चैव भोगमोक्षैकहेतुकं ॥ २ ॥ शंकरं तु यदा मध्ये ऐशान्यामच्युतं
यजेत् ॥ आग्नेय्यां तपनं चैव नैर्ऋत्यां गणनायकं ॥ वायव्यामंबिकां चैव स्वर्गमोक्षप्रदायिनीं ॥ ३ ॥
आदित्यं च यदा मध्ये ऐशान्यां शंकरं यजेत् ॥ आग्नेय्यां गणनाथं च नैर्ऋत्यां केशवं तथा ॥ वायव्याम
बिकां देवीं स्वर्गसाधनतत्मिकां ॥ ४ ॥ गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत् ॥ आग्नेय्यामीश्व
रं चैव नैर्ऋत्यां तपनं तथा ॥ वायव्यां पार्वतीं देवीं भुक्तये मोक्षसाधिनीं ॥ ५ ॥ तथा चोक्तं गणेशवि
मर्शिनीतंत्रे ॥ शंभौ मध्यगते हरीनहरदेव्यो हरौ शंकरेभास्यनागसुतारवौ हरगणेशाजांबि
कास्स्थापिता ॥ देव्यां विष्णुहरैकदंतरवयो लंबोदरेजेश्वरेनार्याः शंकरभागतोतिसुखदा व्यस्ता
स्तु ते हानिदाः ॥ ६ ॥ रामार्चनचंद्रिकायां गौतमीये चोक्तं ॥ यदंगदेवतायाः पूजने विशेष उक्तस्तदा रामगो
पालविषयकमिति केचित् ॥ वस्तुतो वैकल्पिकमिति शिष्टसंप्रदायः ॥ एतेषां पूजनं तु गौतमीये चोक्तं ॥ गं
धादिभिरथान्यर्थ्ये षडंगार्चनमेव च ॥ विशारुतो जपेन्मंत्रं नमस्कारान्समापयेत् ॥ तत्तु प्रतिष्ठितयंत्रादि
परं ॥ रामगोपालविषयं वा ॥ यंत्रातिरिक्ताधारे पूजनं तु कुलावत्यां ॥ एकपीठे पृथक्पूजां विना यंत्रं करो
ति यः ॥ अंगागतं परित्यज्य देवताशापमाप्नुयात् ॥ सर्वेषामंगमंत्राणां विचारो नास्ति ॥ तथा चोक्तं ॥ सि
द्धादिशोधनं नास्ति अंगत्वे सेति राजवत् ॥ श्यामादौ तु पंचायतनाभावः ॥ तथा चोक्तं रुद्रयामले ॥ श्या
मायां भैरवी तारा छिन्नमस्ता स्मरे रवे ॥ मंजुघोषे तथा रौद्रे पंचांगं नेष्यते बुधैः ॥ उपविद्यासु सर्वासु

षट्कर्मादिषु साधने॥ नात्र दीक्षाद्यपेक्षास्ति नाङ्गादिप्रपूजनं॥ कुलार्णवे प्रोक्तं॥ गुरौ मनुष्यबुद्धिं च मंत्रे
चाक्षरभावनां॥ प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत्॥ तथा चोक्तं तत्रैव॥ गुरुं न मर्त्यं बुध्येत तत्
स्यपत्नी शिवप्रिया॥ कदाचिन्न भवेत्सिद्धिर्मंत्रैर्वा देवतार्चनैः॥ एकग्राममास्थितो शिष्यस्त्रिसंध्यं प्र
णमेद्गुरुं॥ कोशमात्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत्॥ अर्धयोजनतः शिष्यः प्रणमेत्पंचपर्वसु॥
एकयोजनमारभ्य योजनद्वादशावधि॥ दूरदेशस्थितो भक्त्या पुनस्तत्संनिधिं गतः॥ तत्र योजनसं
ख्यातमासेन प्रणमेद्गुरुं॥ इति पंचायतनदीक्षाप्रकारः॥ अथ संक्षेपदीक्षा॥ तथा चोक्तं निबंधे॥
मुहूर्ते सर्वतोभद्रे नवकुंभं निधाय च॥ सौरकुंभं च पुष्पाद्यैर्मर्चितं वस्त्रसंयुतं॥ सर्वौषधीनवैर
त्नैः पंचपल्लवसंयुतं॥ ततो देवार्चनं कृत्वा हुनेद्दशोत्तरं शतं॥ पनसाम्राश्वत्थवटबकुलानि इति पंचप
ल्लवानि॥ तथा चोक्तं वासिष्ठे॥ पनसाम्रं तथाश्वत्थं वटं बकुलमेव च॥ पंचपल्लवमित्युक्तं मुनिभिस्तत्
त्ववेदिभिः॥ नवरत्नान्यपि तत्रैवोक्तानि॥ मुक्तामाणिक्यवैडूर्यगोमेदान्वज्रविद्रुमौ॥ पद्मरागं मर
कतं नीलं चेति यथाक्रमात्॥ तथा चोक्तं निबंधे॥ शिष्यं स्वलंकृतं वेद्यामुपाग्न्युपवेशयेत्॥ मंत्रि
तैः प्रोक्षणीतोयैः शान्तिकुंभजलैस्तथा॥ मूलमंत्रेणाष्टशतं मंत्रितैरभिषिंचयेत्॥ अष्टशतेर
ष्टोत्तरशतैरिति संप्रदायः॥ अथ संपादयन्मंत्रं हस्तं शिरसि धारयन्॥ ग्रामस्थित्यक्षतां दधान्त
तः शिष्योर्चयेद्गुरुं॥ यद्वा दीक्षांतरं तत्र शांभवमभ्यर्च्य साक्षतं॥ तदंबुना त्रिभिश्चाष्टवारं मूल
मंत्रवित्॥ मस्तके हस्तमारोप्य जपेत्कर्णे त्रिधा गुरुः॥ तथा चोक्तं तत्रैव॥ तत्राप्यशक्तः कश्चिच्चे
च्चिरं भो भ्यर्च्य साक्षतं॥ तदंबुना त्रिभिश्चाष्टवारं मूलेन वेकरं॥ निधायास्ये जपेत्कर्णे त्रिपरेशोत
यं विधिः॥ इति संक्षेपदीक्षाप्रकारः॥ अथोपदेशान्तरमाह॥ चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये॥
मंत्रमात्रप्रकथनमुपदेशः प्रकीर्तितः॥ अथ सर्वतोभद्रमंडलं॥ चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्वि
ते॥ चतुर्दिक्षु च कोष्ठेषु कर्णसूत्रं चतुष्टयं॥ मध्यमध्ये परामत्स्यान्वेदपुः पातयेद्यथा॥ एवं परायते
द्विद्विमंत्री याम्योत्तरायते॥ पातयेषु च मत्स्येषु समं सूत्रं चतुष्टयं॥ ततो द्वे द्वे च कोष्ठेषु कर्णसूत्रं प्रपा
तयेत्॥ तद्द्वद्वेषु मत्स्येषु दश सूत्रं चतुष्टयम्॥ यावत्॥ शालद्वयोत्तरं मंत्री षट्पंचाशत्तदान्यपि॥

तावत्तेनैव विधिना तत्र सूत्राणि पातयेत् ॥ षट्त्रिंशत्पदैर्मध्ये लिखेत्पंकजलक्षणं ॥ बहिः पंक्त्या त्यजेद्वी-
थिं पंक्तियुग्मेन वीथिका ॥ द्वारं द्वाभ्यां उपद्वाभ्यां कोष्ठाभ्यां परिकल्पयेत् ॥ शास्त्रोक्तविधिना मंत्री ततः प-
दं समालिखेत् ॥ पंक्तेस्त्रयस्य संत्यज्य द्वारद्वन्द्वं बहिः स्मृतौ ॥ तन्मध्ये विरचेद्वृत्तैस्त्रिभिः समविभागतः
आद्यस्यां कर्णिकास्थानं केसराणां द्वितीयकं ॥ तृतीये तत्र पत्राणामुक्तं स्थानं दलाग्रकं ॥ बाह्यवृत्तान्तरा-
लस्य मानेन विधिना स्मृतौ ॥ विधाय केसराग्रेषु परितो ध्वनिचिह्नकरान् ॥ लिखित्वा संधिसंस्थानि तत्र
सूत्राणि पातयेत् ॥ दलाग्राणां च यन्मानं तन्मानाद्वृत्तमालिखेत् ॥ तदंतराले तन्मध्ये सूत्रं शोधयेत्ततः
स्मृतौ ॥ आलिखेद्द्वादशहस्तेन दलाग्राणि समंततः ॥ दलमूले पृथुग्राह्यः केसरालिं प्रकल्पयेत् ॥ एतत्साधा-
रणं प्रोक्तं पंकजं तंत्रवेदिभिः ॥ पंकजं शुक्लवर्णेन वेष्टयेद्यागकर्मणि ॥ शक्तियागे जवे रक्तं शैवे पीतं विनि-
र्दिशेत् ॥ प्रतिष्ठायां च सेवायां शुक्लमेव विनिर्दिशेत् ॥ ब्रह्मस्य स्थलकं प्रोक्तं ॥ पदानि त्रीणि पादार्थं पीठको-
णेषु मार्जयेत् ॥ अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत् ॥ पदानि वीथिसंस्थानि मार्जयेत्स्वकल्पतः ॥ दिक्षु
द्वाराणि रचयेद्द्विचतुष्कोष्ठकैस्ततः ॥ पदैस्त्रिभिरथैकेन शोभास्युर्द्वारपार्श्वतः ॥ उपशोभास्य रेतेन त्रिभिः
कोष्ठैरनंतरं ॥ अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयं ॥ रंजयेत्पंचभिर्वर्णैर्मंडलं तन्मनोहरं ॥ पीतं
हरिद्राचूर्णं स्यात्सितं तंदुलसंभवं ॥ कुसुंभचूर्णं रक्तं स्यात् कृष्णं दग्धपुलाककं ॥ बिल्वादिपत्रजं श्यामं मि-
श्रकं पंचवर्णकं ॥ अंगुलोत्सेधविस्ताराः सीमारेखाः सिताः शुभाः ॥ कर्णिका पीतवर्णेन केसराण्यरुणेन
च ॥ शुक्लवर्णानि पत्राणि तत्संधिः श्यामलेन च ॥ रजसा रंजयन्मंत्री यद्वा पीतेन कर्णिकां ॥ केसरा पीतरक्ताः
स्युः रसभावनिदर्शनि च ॥ संधयः कृष्णवर्णाः स्युः पीतेनाप्यसितेन वा ॥ रंजयेत्पीठगात्राणि पादाः स्युररुण-
प्रभाः ॥ गात्राणि तस्य शुक्लानि वीथिषु च ततः स्थितेषु ॥ आलिखेत्कल्पलतिकां दलपुष्पफलान्विताः ॥ वर्णै-
र्नानाविधैश्चित्रा सर्वदृष्टिमनोहराः ॥ द्वाराणि श्वेतवर्णानि शोभाश्चारक्ताः समीरिताः ॥ उपशोभाः पीतव-
र्णाः कोणान्यसितकानि च ॥ तिस्रो रेखाः बहिः कुर्यात् सितरक्तासिताः क्रमात् ॥ मंडलं सर्वतोभद्रमेतत्सा-
धारणं स्मृतं ॥ ब्रह्मस्य स्थले ॥ मंडलं सर्वतोभद्रं सर्वयज्ञेषु पूजितं ॥ चतुर्विंशत्यंगुलेन हस्तं प्रथमतो
भवेत् ॥ चतुरस्रो भवेत्त्रिंशतादिकल्पो द्वादशाधा स्मृतौ ॥ पातयेत्तेषु सूत्राणि कोष्ठानां द्व्यधिकं शतम् ॥ ॥

चतुरश्रवापीं द्वादशांशं पश्चाल्लिखेत् त्रिंशांतां भुजं ॥ कोष्ठैः प्रकल्पयेत् पीठं पंक्त्या नैवात्र वीथिका ॥ द्वारशोभा यथापूर्
वमुपशोभा न दृश्यते ॥ अवशिष्टैः पदैः कुर्यात् षट्त्रिंशत्कोष्ठानि तंत्रवित् ॥ विदध्यात् सर्वत्र पूर्वमेवं वा मंडलं स्मृ
तं ॥ इति लघुसर्वतोभद्रं ॥ चतुरस्रे चतुःषष्टिपदान्या रचयेत् सुधीः ॥ पदैश्चतुर्भिः प्रथमस्मान्मध्ये तस्य
रितः पुनः ॥ वीथीश्चतस्रः कुर्वीत मंडलांतावसायिकाः ॥ दिग्गतेषु चतुष्केषु पंकजानि समालिखेत् ॥ वि
दिग्गतेश्चतुष्कानि निजिताषोडशाथ सुधीः ॥ मार्जयेत् स्वस्तिकाकारं श्वेतरीतारुणासितैः ॥ मार्जनं माहरा
घवजं दष्टतं ॥ विदिग्गतचतुष्कानि निजिताषोडशाथ सुधीः ॥ वृक्षादिकोष्ठत्रितयमर्द्धमपि च मार्जयेत्
रजोभिः पूरयेत्तानि स्वस्तिकानि च शोभितं ॥ प्राकृप्रोक्तेनैव मार्गेण शेषमन्यत् समाचरेत् ॥ नवनाभमिदं
प्रोक्तं मंडलं सर्वसिद्धिदं ॥ यस्यालं मंडलं प्रोक्तमेतत् स्वस्तिकवर्जितं ॥ दीक्षायादेवपूजायां मंडलानां चतु
ष्टयं ॥ सर्वतंत्रानुसारेण प्रोक्तं सर्वसमृद्धिदं ॥ इति नवनाभमंडलं ॥ अथ मंत्रिणां हिताय त्रिलोहिमुद्रा
निरूप्यते ॥ सामसूर्याग्निरूपास्तु वर्णलोहत्रयं तथा ॥ रौप्यमिंदुः स्मृतो हेम सूर्यस्ताम्रो हुताशनः ॥
लोहत्रयागाः समुद्दिष्टास्वराद्यक्षरसंख्यया ॥ तैर्लोहैः कारयेन्मुद्रां समं कल्पितसंगतां ॥ एष स्वराः स्मृताः
सौम्याः स्पर्शाः सौराः शुक्रोदयः ॥ आग्नेयाव्यापकाः सर्वे सोमसूर्याग्निदेवताः ॥ स्वराः षोडश विख्याता
स्पर्शास्ते पंचविंशतिः ॥ व्यापकाः दश ते कामधनधर्मप्रदायिकाः ॥ साष्टसहस्रं संजप्य स्थापितां जुहुया
त्ततः ॥ तस्यां संपातयेन्मंत्री सर्पिषा पूर्वसंख्यया ॥ अष्टोत्तरशतं संख्यया ॥ निक्षिप्य कुंभे तां मुद्रां मंत्रिषे
कोक्तकर्मणा ॥ आवाहयेत् जयेद्देवीमुपचारैः समाहितः ॥ अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः ॥
इयं मुद्रा क्षुद्ररोगविषमज्वरनाशिनी ॥ व्यालचौरमृगादिभ्यो रक्षां कुर्याद्विशेषतः ॥ युद्धे विजयमाप्नो
ति धारयन्मनुजेश्वरः ॥ मंत्रसिद्धिकरीं पुंसां चतुर्वर्गफलप्रदां ॥ धारयन्मनुजो नित्यं देवतुल्यो भवेद्भु
वि ॥ क्ष्म द्रः श्रां क्लुः अभिषिच्येति ॥ पूर्वोक्तदीक्षापद्धत्युक्तविधिना घटं संस्थाप्य तत्र तल्लोक्तदेवतामावा
ह्य यथोपचारैः संपूज्य साध्यमभिषिच्य तस्मै दद्यादित्यर्थः ॥ ततो गुरवे दक्षिणां दत्वा महोत्सवं कु
र्यादिति ॥ गोपांगनाकेलिविलासलुब्ध संसारदावानलजैंगदक्षं ॥ प्रह्लादितं दारकवंदितांघ्रिं वंदे मु

कुंजगदेकनाथम्॥ ॥इति श्रीमन्महामहोपाध्याय श्रीकृष्णानंदवागीशभट्टाचार्यविरचिते तंत्रसारे
प्रथमपरिच्छेदः॥ ॥अथ सामान्यपूजापद्धतिः॥ प्रातरुत्थाय मुक्तस्वापः सहस्रदलकमलक
र्णिकावस्थितश्वेतवर्णं द्विभुजं वराभयकरं शुक्लश्वेतमाल्यानुलेपनं स्वप्रकाशस्वरूपं स्ववामभागे
स्थितया स्वशक्त्या स्वप्रकाशस्वरूपया सहितं विभाव्य॥ मानसोपचारैराराध्य नमस्कुर्यात्॥ अखं
डमंडलाकारं व्याप्तं येन चराचरं॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥ अज्ञानतिमिरांधस्य ज्ञानां
जनशलाकया॥ चक्षुरुन्मीलितं येन तस्मै श्री०॥ ततो मूलाधारादिब्रह्मरंध्रांतं मूलविद्यां विभावये
त्॥ उद्यद्दिनकरप्रोतां यावद्ब्रह्मसदाशनः॥ अशेषाशुभनाशार्थं समाहितमनाः शुचिः॥ तत्र चापट
लव्याप्तं शरीरमपि चिंतयेत्॥ तत्स्थानिर्णयमाह॥ गौतमीये॥ इदानीं पूर्वसंचरप्रसंगात्कथयामि
ते॥ कृताधिकारतां याति यंत्रमंत्रार्चनादिषु॥ विनायेन नसिद्धिः स्यात्तदरं कं चेत्प्रपचते॥ तद्द्यामम
लेप्युक्तं॥ प्रातःकृत्यमकृत्वा तु यो देवान्पूजितोर्च्चयेत्॥ निष्फला तस्य पूजा स्याद्बोधहीना यथा क्रि
याः॥ लक्ष्मीकुलागमेप्युक्तं॥ संध्याविरहितो यस्तु न दीक्षाफलमाप्नुयात्॥ इति वचनात्तत्संध्यावश्यक
तं॥ वैदिकीं संध्यां वितरं तांत्रिकीं संध्यां कुर्यात्॥ तदुक्तं तत्रैव॥ वैदिकीं तांत्रिकीं संध्यां यथानुक्रमयोगतः॥
अथ संध्याप्रयोगः॥ तत्र शक्तिविषये॥ ॐ आत्मतत्त्वाय स्वाहा॥ ॐ विद्यातत्त्वाय स्वाहा॥ ॐ शिवतत्त्वा
य स्वाहा॥ इत्याचामेत्॥ अन्यत्र त्वाचमनमात्रं॥ तथा चोक्तं मत्स्यसूक्ते॥ आत्मविद्याशिवैस्तत्त्वैराचामे
त्साधकाग्रणीः॥ वह्निजायांतदेतेषां शुद्धेन पयसा प्रिये॥ ततो जले॥ ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृ
ष्टानि ते रवे॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे
सिंधुकावेरि जलेस्मिन्संनिधिं कुरु॥ इति मंत्राभ्यां सूर्यमंडलात्तीर्थं स्वहृदयाद्देवतां चावाह्य॥ मूले
न कुशैस्त्रिरंकुशमोजलं निक्षिप्य॥ सप्तधातज्जलेन मूर्द्धानमभिषिंचेत्॥ ततः षडंगन्यासं कृत्वा
वामहस्ते जलं निधाय॥ दक्षिणेन तज्जलमाच्छाद्य॥ हंयंवंलंरं॥ इति त्रिरभिमंत्र्य गलितोदकबिं

दृष्टिः सप्तधा तलमुद्रया तज्जलेन मूर्द्धानमभिषिच्य ॥ शेषजलं दक्षिणहस्ते समादाय तेजोरूपं ध्या
त्वा इडयाकृष्य देहांतःस्थं पापं प्रक्षाल्य कृष्णवर्णं तदुदकं पापरूपं ध्यात्वा पिंगलया विरिच्य पुरःक
ल्पितवज्रशिलायां फडिति मंत्रेण पापपुरुषरूपं तज्जलं ताडयेदित्यघमर्षणं ॥ तथा चोक्तं गौत
मीये ॥ आचम्य विधिना मंत्री शुचौ देशे च संविशेत् ॥ जले संयोज्य तीर्थानि त्रिवारं मूलमंत्रतः ॥
क्षिपेद्व्योम्नि कुशाग्रेण सप्तधा मूर्ध्नि सेचयेत् ॥ तंत्रांतरे चोक्तं ॥ वामहस्ते जलं गृह्य गलितोदकबिं
दुभिः ॥ सप्तधा प्रोक्षणं कृत्वा मूलमंत्रं समुच्चरन् ॥ अवशिष्टोदकं दक्षहस्ते संगृह्य बुद्धिमान् ॥
इडयाकृष्य देहांतः क्षालितं पापसंचयं ॥ कृष्णवर्णं तदुदकं दक्षनाड्या विरेचनं ॥ दक्षहस्तेन तत्
मंत्री पापरूपं विचिंत्य च ॥ पुरतो वज्रपाषाणे निःक्षिपेदस्त्रमुच्चरन् ॥ अन्यत्राप्युक्तं ॥ षडंगन्यासमा
चर्य वामहस्ते जलं ततः ॥ गृहीत्वा दक्षिणेनैव संपुटं कारयेत्सुधीः ॥ शिववायुजलं पृथ्वीवह्निबीजै
स्त्रिधा पुनः ॥ अभिमंत्रितमूलेन सप्तधा तलमुद्रया ॥ निक्षिपेत्तु जलं शेषं मूर्ध्नि दक्षे निधाय च ॥
हस्तपादौ प्रक्षाल्याचम्य ॥ ह्रां ह्रीं हंसः ॐ घृणिः सूर्य आदित्य इति मंत्रेण वा सूर्याय अर्घ्यं दत्वा विशेषस्तु
स्नानप्रकरणे वक्तव्यः ॥ तत्तत्कल्पस्था वा सूर्यमंडलस्थायै अमुकदेवतायै इदमर्घ्यं नमः इत्यर्घ्यं दद्या
त् ॥ त्रिवारं जलं निक्षिप्य ॥ तत्तद्देवता गायत्रीं जपेत् ॥ तथा चार्घ्यानंतरं ज्ञानार्णवे ॥ ततश्च प्रजपेद्धी
मान् गायत्रीं परमाक्षरीं ॥ गौतमीयेपि ॥ एतत्ते कथिता मंत्राः संध्यामंत्रफलाप्तये ॥ न कुर्याद्यदि मोहे
न न दीक्षाफलमाप्नुयात् ॥ विशुद्धेश्वरतंत्रेप्युक्तं ॥ संध्याद्वयं तथा कुर्याद्ब्राह्मणो विधिपूर्वकं ॥ मंत्रो
क्तविधिपूर्वं तु शूद्रः संध्यां समाचरेत् ॥ संक्षेपसंध्यामथवा कुर्यान्मंत्री स्वशक्तितः ॥ सायंप्रातश्च
मध्याह्ने देवं ध्यात्वा मनुं जपेत् ॥ संध्यायां पातितायां वा गायत्रीं द्विगुणां जपेत् ॥ इति ॥ अथ स्नानवि
धिः ॥ तत्रैव नद्यादौ गत्वा वैदिकस्नानं कृत्वा तांत्रिकस्नानमाचरेत् ॥ तथा चोक्तं गौतमीये ॥ अथ स्ना
नं तथा कुर्याद्यथा शास्त्रविधानवित् ॥ मलप्रक्षालनं स्नानं स्वशास्त्रोक्तं समाचरेत् ॥ मंत्रस्ना

यं ततः कुर्यात्कर्मणां सिद्धिहेतवे ॥ तद्यथा ॥ ॐ अद्येत्यादि अमुकदेवताप्रीतये मंत्रस्नानमहं करिष्ये ॥
इति संकल्पयेत् ॥ तथा चोक्तं कुलचूडामणौ ॥ ताम्रपात्रे सदर्भे च सलिलं सजलं ततः ॥ गृहीत्वामुकदेवस्य प्रीत
ये स्नानमाचरेत् ॥ ततः षडंगन्यासं प्राणायामं च कृत्वा ॥ ॐ गंगे चेत्यादिनां कुशमुद्रया सूर्यमंडलात् जले ती
र्थान्यावाह्य ॥ वमिति धेनुमुद्रयामृतीकृत्य कवचेनावगुंठ्यास्त्रमंत्रेण संरक्ष्य मूलेनैकादशधाभिमंत्र्य सूर्या
भिमुखं स्थित्वा हृदग्रांजले निक्षिप्य ॥ तस्मिं जले निमज्य देवतां ध्यायन् ॥ मूलमंत्रं यथाशक्त्या जपन् ॥
उन्मज्य कर्दकेन त्रिवारं जसेन कलशमुद्रया त्रिवारमात्मानमभिषिच्य ॥ वैदिकसंध्यातर्पणं सूर्यार्घ्यं द
त्वा ॥ तांत्रिकाघमर्षणादि वारिधारां तेन मस्कुर्यात् ॥ तथा चोक्तं निबंधे ॥ ध्यात्वा जलांजलिं क्षिप्त्वा तर्प
येदिष्टदेवतां ॥ ॐ देवांस्तर्पयामि ॥ १ ॥ ॐ ऋषींस्तर्प० ॥ २ ॥ ॐ पितॄंस्तर्पयामि० ॥ ३ ॥ इति संतर्प्य ॥ ॐ गुरुं त०
ॐ परमगुरुं त० ॥ ॐ परापरगुरुं त० ॥ ॐ परमेष्ठीगुरुं त० ॥ तथा चोक्तं ॥ देवानृषीन्पितॄंश्चैव त
र्पयित्वा विधानतः ॥ गुरुपंक्तिं पुरा तर्प्य तर्पयेदिष्टदेवतां ॥ नैष्ठिके तु विशेषश्चोक्तः ॥ नारदं पर्वतं
विष्णुं निशंगेष्ठ वसारुकौ ॥ विष्वक्सेनं च शैनेयं गुरुंश्च तर्पयेद्बुधः ॥ ॐ नारदं तर्प० ॥ इत्यादिक्रमेण मूलमुच्चार्य अ
मुकदेवतां तर्प० ॥ इति विष्णुविषयं ॥ तथा चोक्तं गौतमीये ॥ आदौ मंत्रं समुच्चार्य श्रीपूर्वं सकलमित्यपि ॥
तर्पयामि पदं चोक्त्वा नमोंतं तर्पयेन्नरः ॥ अन्यत्र मूलमंत्रमुच्चार्यामुकदेवतां तर्पयामि तथा चोक्तम् ॥
तर्पयामि पदं योज्यं मंत्रांते स्वधुनामस्कृ ॥ द्वितीयांते पुनश्चैवं तर्पणस्य मनुर्मतः ॥ शक्तिविषये ॥ पुन
र्मूलमुच्चार्य अमुकदेवीं तर्पयामि स्वाहा ॥ होमतर्पणयोः तंत्रवचनात् ॥ तथा चोक्तं नीलतंत्रे ॥ मंत्रां
ते नाम चोच्चार्य तर्पयामि ततः परं ॥ स्वाहांते तर्पणं होमे चेति ॥ पंचविंशति संख्या वा दशधा वा त्रिधा ॥
मूलमंत्रं समुच्चार्य श्रीकं कलं तर्पयेत्सुधीः ॥ इति गौतमीयवचनात् ॥ पंचविंशतिवारं वा दशधा वा त्रि
धा पि वा ॥ संतर्प्यानरलदेवतां प्रसेकेन सकृत्तर्पयेत् ॥ अत्र श्रीकुलमित्यपलक्षणं ॥ तथा च कुलार्ण
वे प्युक्तं ॥ एकैकमंजलिं तोयं परिवारानतर्पयेत् ॥ तत्राप्यशक्तश्चेन्मूलमुच्चार्य इष्टदेवतामात्रं संतर्पयेत्

तथाचोक्तं॥ मूलमंत्रं समुच्चार्य देवीमात्रं प्रतर्पयेत्॥ ततो जलादुत्थाय धौतेवाससी परिधायाचम्य॥
ह्रीं हंसः इदमर्घ्यं श्रीसूर्याय स्वाहा॥ ताराबीजं॥ ह्रीं हंसः मार्तंडभैरवाय प्रकाशशक्तिसहिताय इदम
र्घ्यं स्वाहा॥ श्रीविद्याविषये तु॥ ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं ग्रहराशिनक्षत्रतिथियोगकरणपरिवारसहिताय श्री
सूर्याय इदमर्घ्यं स्वाहा॥ एवमर्घ्यत्रयं दत्वा तत्तद्गायत्रीं शतधा दशधा वा जपेत्॥ तथाचोक्तं तंत्रांत
रे॥ अष्टोत्तरशतावृत्त्या गायत्रीं प्रजपेत्सुधीः॥ महापातकयुक्तोपि प्रजपेद्दशधा यदि॥ सत्यं सत्यं महादे
वि मुक्तो भवति तत्क्षणात्॥ इति शास्त्राशास्त्रभेदेन गायत्रीजपानंतरं तर्पणं वा॥ तथाचोक्तं॥ सूर्यमं
डलवासिन्यै देवतायै ततः परं॥ अर्घ्यमंजलिमादाय गायत्र्या वा त्रिरुत्क्षिपेत्॥ यथाशक्ति जपेद्दे
वीं गायत्रीं तदनंतरं॥ तर्पणं च समाचम्य प्राणानायम्य साधकः॥ गायत्री तु॥ त्रैलोक्यमोहनाय
विद्महे स्मराय धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥ इति विष्णुगायत्री॥ अथ गोपालगायत्री॥ कृ
ष्णाय विद्महे दामोदराय धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥ अथ रामगायत्री॥ दाशरथाय विद्महे
सीतावल्लभाय धीमहि॥ तन्नो रामः प्रचोदयात्॥ अथ शिवगायत्री॥ तत्पुरुषाय विद्महे महादेवाय
धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ अथ गणेशगायत्री॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥ तं
नो दंतिः प्रचोदयात्॥ अथ दक्षिणामूर्तिगा०॥ दक्षिणामूर्तये विद्महे ध्यानस्थाय धीमहि॥ तन्नो
धीशः प्रचोदयात्॥ अथ नारायणगा०॥ नारायणाय विद्महे वासुदेवाय धीमहि॥ तन्नो विष्णुः प्र
चोदयात्॥ अथ कार्तवीर्यगा०॥ कार्तवीर्याय विद्महे महावीराय धीमहि॥ तन्नोर्जुनः प्रचोदया
अथ सूर्यगायत्री॥ आदित्याय विद्महे मार्तंडाय धीमहि॥ तन्नो सूर्यः प्रचोदयात्॥ अथ शक्तिगा०
सर्वसंमोहिन्यै विद्महे विश्वजनन्यै धीमहि॥ तन्नः शक्तिः प्रचोदयात्॥ अथ त्वरितागा०॥ त्वरिता
देवि विद्महे महानित्यायै धीमहि॥ तन्नो देवि प्रचोदयात्॥ अथ हयग्रीवगा०॥ वागीश्वराय विद्महे हय
ग्रीवाय धीमहि॥ तन्नो हंसः प्रचोदयात्॥ अथ बालाभैरवीगा०॥ ऐं त्रिपुरादेवि विद्महे क्लीं कामेश्व

री धीमहि॥ सौः तंनः शक्तिः प्रचोदयात्॥ अथ दुर्गागा०॥ महादेव्यै विद्महे दुर्गादेव्यै धीमहि॥ तंनो दे
वि प्रचोदयात्॥ महालक्ष्मीगायत्री॥ महालक्ष्म्यै विद्महे महाश्रियै धीमहि॥ तंनः श्रीः प्रचोदयात्॥
अथ सरस्वतीगायत्री॥ वाग्देव्यै विद्महे कामराजाय धीमहि॥ तन्नो देवि प्रचोदयात्॥ अथ छिन्नमस्ता
गा०॥ वज्रवैरोचिन्यै विद्महे छिन्नमस्तायै धीमहि॥ तन्नो देवि प्रचोदयात्॥ अथ दक्षिणकालीगाय०
कालिकायै विद्महे स्मशानवासिन्यै धीमहि॥ तंनो घोरे प्रचोदयात्॥ अथ लघुश्यामासुमुखीगा०॥
ऐं शुकप्रियायै विद्महे क्लीं कामेश्वरी धीमहि॥ तंनो श्यामा प्रचोदयात्॥ अथोग्रतारागा०॥ तारायै
विद्महे महोग्रतारायै धीमहि॥ तंनो देवि प्रचोदयात्॥ गायत्रीध्यानं तु॥ तन्त्रे चोक्तं॥ उद्यदादित्यसं
काशां पुस्तकाक्षकरां स्मरेत्॥ कृष्णाजिनांबरां ब्राह्मीं ध्यायेत्तारांकितेंबरे॥१॥ अथ मध्याह्ने॥ श्या
मवर्णां चतुर्बाहां शंखचक्रलसत्करां॥ गदापद्मधरां देवीं सूर्यासनकृताश्रयां॥२॥ सायाह्ने व
रदां देवीं गायत्रीं संस्मरेद्यतिः॥ शुक्लां शुक्लांबरधरां वृषासनकृताश्रयां॥३॥ त्रिनेत्रां वरदां पाशं
शूलं च नृकरोटिकां॥ सूर्यमंडलमध्यस्थां ध्यायेद्देवीं समभ्यसेत्॥४॥ त्रिपुरादौ तु ध्यानवि
शेषो यथा॥ प्रातरादारकमले संस्मरेन्मंडलोपरि॥ वाग्बीजतत्परां विद्यां यां विद्युत्पाटलभास्वरां॥ पुस्त
काक्षेक्षुकोदंडपाशांकुशलसत्करां॥ स्वच्छाग्रहीतवपुषीं गुरुनिघाक्षरात्मिकां॥ मध्याह्ने हृदयां
भोजकर्णिके सूर्यमंडले॥ कामबीजात्मिकां देवीं अलक्तचरणान्वितां॥ प्रसूनबाणपुष्पेक्षुचा
पपाशांकुशान्वितां॥ परितः स्वात्ममुख्याभिः षट्त्रिंशाचलशक्तिभिः॥ सायमाशासरोजस्थे चं
द्रे चंद्रसमद्युतिं॥ शक्तिबीजात्मिकां चापबाणपाशांकुशान्वितां॥ युगानित्याक्षराकाराघटितावर
णान्वितां॥ चिंतयित्वा भगवतीं नित्याभिः परिवारितां॥ तदादौ सूर्यायार्घ्यं ददेत्॥ ताम्रादिपात्रे चंद
नरक्तचंदनार्ककुसुमापराजितापुष्पाणि निःक्षिप्य॥ ॐ उद्यदादित्यमंडलमध्यवर्तिन्यै नित्य
चैतन्योदितायै श्रीमदेकजटायै स्वाहा॥ इसर्घ्यं दत्त्वा गायत्रीं जपेदिति विशेषः॥ अन्यत्र कालिकादिप्रयोगः

ततः सूर्यमंडले देवतां विचिन्त्य मूलमंत्रं जप्त्वा संहारमुद्रया देवतां हृदये समानीय तीर्थं नमस्कृ-
त्य यागस्थानमाविशेत् ॥ इति स्नानविधिः ॥ ततः सामान्यार्घ्यस्थापनादि आसनोपवेशनपर्यंतं क-
र्म समाप्य ॥ वामभागे ॥ ॐ गुरुभ्यो नमः ॥ दक्षिणे ॐ गणेशाय नमः ॥ मूर्ध्नि मध्ये ॐ अमुकदेवतायै नमः ॥
तथा चोक्तं गौतमीये ॥ कृतांजलिपुटो भूत्वा वामे गुरुत्रयं यजेत् ॥ गुरुं च परमादिं च परापरगुरुं
तथा ॥ दक्षिणे च गणेशानं मूर्ध्नि देवं निजोवयेत् ॥ ततः फडिति मंत्रेण गंधपुष्पाभ्यां करौ संशोध्य ॥
ऊर्ध्वोर्ध्वे तालत्रयं दत्वा ॥ छोटिकया दिग्बंधनं कृत्वा ॥ ततो रमिति जलधारयाग्निप्राकारं
विचिंत्य भूतशुद्धिं कुर्यात् ॥ तद्यथा ॥ अथ भूतशुद्धिः ॥ ॐ के उत्तानौ करौ कृत्वा सोहमिति जी-
वात्मानं हृदयस्थं प्रदीपकलिकाकारं मूलाधारस्थितकुंडलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वा-
धिष्ठानमणिपूरकानाहतविशुद्धाख्यषट्चक्राणि भित्वा शिरोवस्थिताधोमुखसहस्रदलकमल-
कर्णिकांतर्गतपरमात्मनि संयोज्य ॥ तत्रैव पृथिव्यप्तेजोवायवाकाशं गंधरसरूपस्पर्शशब्दना-
सिकाजिह्वाचक्षुस्त्वक्श्रोत्रवाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहंकारं चतुर्विंशतितत्वा-
नि लीनानि विचिंत्य ॥ यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिंत्य तस्य षोडशवारजपेन
वायुना देहमापूर्य नासापुटौ धृत्वा चतुःषष्ठिवारजपेन कुंभकं कृत्वा वामकुक्षिस्थकृष्णवर्णं पाप-
पुरुषेण सह देहं संशोष्य द्वात्रिंशद्वारजपेन दक्षनासया वायुं रेचयेत् ॥ दक्षनासापुटे रमिति व-
ह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोडशवारजपेन देहमापूर्य नासापुटौ धृत्वा चतुःषष्ठिवारजपेन कुंभकं कृत्वा
पापपुरुषेण सह देहं दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत् ॥ शाक्ति-
विषयेपि चंद्रबीजस्यावेद्यकत्वं ॥ तदुक्तं शुद्धेश्वरतंत्रे ॥ ठं बीजं रक्तवर्णं च जप्त्वा षोडशधा सुधीः ॥ नै-
मध्यस्थितं बिंदोर्लुलितेनैव च नियोजयेत् ॥ ठमिति चंद्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा षोडशवार

जपेन ललाटे चंद्रं नीत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटचंद्रात्कलितसुध
या मातृकावर्णात्मिकया समस्तं देहं विरच्य ॥ लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं
निश्चित्य दक्षनासापुटेन वायुं रेचयेत् ॥ मात्रासंख्या यथा ॥ तदुक्तं गौतमीये ॥ धूम्रवर्णं ततो वायुबीजं
षड्बिंदुलांछितं ॥ पूरयेदिडया वायुं सुधीः षोडशमात्रया ॥ मात्रया च चतुःषष्ट्या कुंभयेच्च सु
षुम्नया ॥ द्वात्रिंशन्मात्रया मंत्री रेचयेत्पिंगलाख्यया ॥ पूरयेदनयाचैव संचिंत्यालीनमाहतं ॥ रक्त
वर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितं ॥ तेनद्विरकयोगेन मात्रया षोडशाख्यया ॥ मात्रया च चतुः
षष्ट्या निर्दहेत्कुंभकेन तु ॥ वामपार्श्वे स्थितं पापपुरुषं कज्जलप्रभं ॥ ब्रह्महत्याशिरस्कं स्वर्ण
स्तेयभुजद्वयं ॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं ॥ तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं ॥
उपपातकरोमाणं रक्तश्मश्रुविलोचनं ॥ खड्गचर्मधरं क्रुद्धमेवं कुक्षौ विचिंतयेत् ॥ मूलाधा
रोत्थितेनैव वह्निना निर्दहेच्च तं ॥ एवं संदह्य परतो द्वात्रिंशन्मात्रया ततः ॥ तद्भस्मनासहितं मंत्री
रेचयेदिडया पुनः ॥ वामनाड्यां चंद्रबीजं कुर्यादिष्टफलप्रदं ॥ भालेंदुराजे संयोज्य ततः षोडश
मात्रया ॥ सुषुम्नायां चतुःषष्टिमात्रया बीजमैंदवं ॥ ध्यात्वामृतमयीं दिव्यां पंचाशद्वर्णरूपिणीं ॥ तया देहं वि
चिंत्यैवं मनसा पिंगलाध्वना ॥ द्वात्रिंशन्मात्रया मंत्री लंबीजेन दृढं नयेत् ॥ स्वस्थाने हंसमंत्रेण पुनस्ते
नैव वर्त्मना ॥ जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत्ततः ॥ इति कृत्वा मलशुद्धिं मातृकान्यासमाचरेत् ॥
अथापरप्रकारं मलशुद्धिमाह ॥ यथा ॥ ऋजुकायः सुखासनेनोपविश्य ॥ दक्षहस्तांगुष्ठेन दक्षनासा
पुटं धृत्वा षोडशमात्राकालं तदशक्तो अष्टमात्राकालं तदशक्तो षण्मात्राकालं व्याप्य वारत्रयाद्धैर्य
थासंभवं मलबीजं राजपत्रे वामनासापुटेन श्वासमाकर्षयेदेवं पूरकं ॥ तदुहस्तानामिकाकनिष्ठा
भ्यां वामनासापुटमपि निरुध्य ॥ चतुःषष्टिमात्राकालं वा ॥ अष्टचत्वारिंशन्मात्राकालं वा ॥ द्वात्रिंशन्मा
त्राकालं वा ॥ चतुर्विंशन्मात्राकालं वा ॥ व्याप्य ॥

तथैव तयोरन्यतरज्जपन्नारुद्धं वायुमंतर्बिभ्यादेवं कुंभकं दक्षनासापुटं विमुच्य॥ तेन द्वात्रिंशन्मात्रा
कालं वा॥ चतुर्विंशन्मात्राकालं वा॥ षोडशमात्राकालं वा॥ द्वादशमात्राकालं वा॥ व्याप्य॥ तथैव तयोरन्य
तरज्जपन्नुच्छ्वासवायुं उत्सृजेदेवं रेचकं कुर्यात्॥ एवमेकः प्राणायामो भवति॥ तत्र त्रयं कुर्यादिति॥ मात्रा
कालश्च यावन्मध्यमांगुलिमूलादग्रपर्यंतं झटिति अंगुष्ठेन गाढं स्पृश्यते तावन्मात्रा भवति॥ केषांचि
न्मते पूरके षोडशवारं मूलबीजयोरन्यतरज्जपः॥ कुंभके चतुःषष्ठिवारं॥ रेचके द्वात्रिंशद्वारं॥ इयमे
व च मात्रा॥ यावत्कालेन तर्जन्या झटिति जानुप्रदक्षिणं भवति तावदीयमेव मात्रा॥ इयस्य कालं गु
रुसंप्रदायः॥ अगस्त्यसंहितायां तु॥ तर्जन्या झटिति जानुप्रदक्षिणत्रयानंतरं अंगुष्ठतर्जनीभ्यां ए
कच्छोटिका यावता कालेन भवति॥ तावती अधमा॥ एतद्द्विगुणा मध्यमा॥ एतत्त्रिगुणा चोत्तमा भ
वतीत्युक्तं॥ राममंत्रे सति संभवेद्यमेव कार्यो न स्योक्तेवा तु॥ अथ भूतशुद्धिः॥ यथा॥ पादयो
जानुपर्यंतं चतुरस्रं सवज्रकं॥ पीतवर्णं पृथिव्यास्तकबीजेयुक्तं पृथ्वीमंडलं॥ जानुद्वयान्नाभिप
र्यंतं चंद्रार्धनिभं पद्मद्वयेन लांछितं श्वेतद्युतिं भुक्ववर्णं वमिति जलबीजेन युक्तं तेजस्पे मंडलं॥
नाभितः कंठपर्यंतं त्रिकोणं रक्तवर्णं स्वस्तिकं रमिति वह्निबीजेन युक्तं तेजसो मंडलं॥ कंठाद्भ्रूमध्य
पर्यंतं षट्कोणं कोणेषु षट्बिंदुभिर्लांछितं धूम्रवर्णं यमिति वायुबीजेन युक्तं वायुमंडलं॥ भ्रूम
ध्याद्ब्रह्मरंध्रपर्यंतं वृत्तं ध्वजलांछितं शुभ्रवर्णं हमिति नभोबीजेन युक्तं नभसो मंडलं॥ ततः स्था
नानि विचिंत्य॥ तत्तत्स्थानस्थितानि भूतानि स्वस्वतन्मात्राभिः सह विचिंत्य॥ तदूर्ध्वं प्रकृति॥ तदू
र्ध्वं ब्रह्मरंध्रे ब्रह्म च विचिंत्य॥ पृथ्वी जले॰ जलं तेजसि॥ तेजो वायौ॰॥ वायुं नभसि॰॥ ततश्चोर्ध्वे
स्थितायां प्रकृतौ॥ प्रकृतिं ब्रह्मरंध्रस्थसहस्रदलकमलकर्णिकास्थबिंदुरूपपरब्रह्मणि लीनां वि
भाव्य॥ हंसघकर्णिकास्थदीपशिखावन्निजं जीवात्मानं सोहमिति मंत्रेण सुषुम्नावर्त्मना तत्रैव पर
मात्मसमीपं नीत्वा॥ तत्रैव लीनं भावयेदथ कियत्क्षणं निरालंबसमाधिना तिष्ठेत्॥ ततः कुक्षिभागे
अनादिजन्मसंचितं॥

उं ऊं मध्यमाभ्यां वषट्॥ ॐ एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं॥ ॐ ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां वौषट्॥
ॐ अं यं रं लं वं शं षं सं हं क्षः अः करतलकरपृष्ठाभ्यां अस्त्राय फट्॥ एवं हृदयादि॥ ॐ अं कं ५ आं हृदयाय नमः॥
ॐ इं चं ५ ईं शिरसे स्वाहा॥ ॐ उं टं ५ ऊं शिखायै वषट्॥ ॐ एं तं ५ ऐं कवचाय हुं॥ ॐ ओं पं ५ औं नेत्रत्रयाय नमः॥
ॐ अं यं ५ अः अस्त्राय फट्॥ तथा चोक्तं ज्ञानार्णवे॥ अं आं मध्ये कवर्गं तु इं ईं मध्ये चवर्गकं॥ उं ऊं मध्ये ट
वर्गं तु एं ऐं मध्ये तवर्गकं॥ ओं औं मध्ये पवर्गं तु बिंदुयुक्तं न्यसेत्प्रिये॥ अनुस्वारविसर्गाभ्यां यशवर्गौ सिल
क्षकौ॥ हृदयं च शिरो देवि शिखा कवचकं तथा॥ नेत्रमस्त्रं न्यसेद्देवि तत्पूर्वं योजयेत्प्रिये॥ षडंगो यं मातृका
याः सर्वपापहरः स्मृतः॥ अथांतर्मातृकान्यासः॥ अकारादि षोडशस्वरान् सबिंदून् षोडशदलकमले कं
ठदेशे न्यसेत्॥ ककारादिद्वादशवर्णान् सबिंदून् द्वादशदले हृत्कमले न्यसेत्॥ डकारादिदशवर्णान्
सबिंदून् दशदलकमले दशवर्णान् नाभिदेशे न्यसेत्॥ बकारादिषड्वर्णान् सबिंदून् षड्दलकमले लिं
गमूले न्यसेत्॥ वकारादिचतुरो वर्णान् सबिंदून् चतुर्दलकमले मूलाधारे न्यसेत्॥ हक्षवर्णद्वयं द्वि
दलपद्मे सबिंदून् भ्रूमध्ये न्यसेत्॥ तथा चोक्तं ज्ञानार्णवे॥ षट्पत्राम्बुजे कंठे स्वरान् षोडश विन्यसेत्
द्वादशच्छदहृत्पद्मे कादीन् द्वादश विन्यसेत्॥ दशपत्राम्बुजे नाभौ डकारादीन्न्यसेद्दश॥ षट्पत्रे लिंगम
ध्यस्थे बकारादीन्न्यसेत्षट्॥ आधारे तु चतुर्वर्णान्न्यसेत् वादीन् चतुर्दले॥ हक्षौ भ्रूमध्यकपद्मे द्विदले
विन्यसेत्प्रिये॥ इत्यंतर्मातृकान्यासः सर्वांगन्यासमाचरेत्॥ अगस्त्यसंहितायामपि चोक्तं॥ एकैकं वर्ण
मेकैकपत्रांते विन्यसेत्प्रिये॥ एवमेनां प्रविन्यस्य मनसा लोकहिन्यसेद्दिशादिना॥ वेस्त्वेव तु विशेषः॥ एकै
कं वर्णमुच्चार्य मूलाधारादिषु रोलकं॥ नमोंतमिति वा न्यासः आंतरः परिकीर्तितः॥ तथा चोक्तं तत्रैव॥
अथांतर्मातृकान्यासे मूलाधारे चतुर्दले॥ स्वर्णाभे न्यसेद्वशषसांस्तु वर्णान् विद्रुमभिले॥ षड्दले विद्युन्नि
भे स्वाधिष्ठाने न्यसेत्प्रिये॥ बभमैर्यरलैर्युक्ते वर्णैश्च ... स्फुलिंगाले॥ मणिपूरे दशदले नीलजीमूतवति
षि॥ डादिफांतदलैर्युक्ते विद्रुमासिलमस्तके॥ अनाहते द्वादशदले प्रवालरुचिसंनिभे॥ कादिठांतदले
युक्ते योगिनां हृदयंगमे॥ विशुद्धे षोडशदले धूम्राभे स्वरभूषिते॥ आज्ञाचक्रे तु चंद्राभे द्विदले हक्षरंजिते॥

तथैव तयोरन्यतरज्जपन्नारुद्धं वायुमंतर्बिंध्यादेवं कुंभकं दक्षनासापुटं विमुच्य॥ तेन द्वात्रिंशन्मात्रा
कालं वा॥ चतुर्विंशन्मात्राकालं वा॥ षोडशमात्राकालं वा॥ द्वादशमात्राकालं वा॥ व्याप्य॥ तथैव तयोरन्य
तरज्जपन्नुत्श्वासवायुं सृजेदेवं रेचकं कुर्यात्॥ एवमेकः प्राणायामो भवति॥ तत्र त्रयं कुर्यादिति॥ मात्रा
कालश्च यावन्मध्यमांगुलिमूलादग्रपर्यंतं झटित्यंगुष्ठेन गाढं स्पृश्यते तावन्मात्रा भवति॥ केषांचि
न्मते पूरके षोडशवारं मूलबीजयोरन्यतरज्जपः॥ कुंभके चतुःषष्टिवारं॥ रेचके द्वात्रिंशद्वारं॥ इयमे
व च मात्रा॥ यावत्कालेन तर्जन्या झटिति जानुप्रदक्षिणं भवति तावदीयमेव मात्रा॥ इयस्य कालं गु
रुसंप्रदायः॥ अगस्त्यसंहितायां तु॥ तर्जन्या झटिति जानुप्रदक्षिणं त्रयानंतरं अंगुष्ठतर्जनीभ्यां ए
का छोटिका यावता कालेन भवति॥ तावती अधमा॥ एतद्द्विगुणा मध्यमा॥ एतत्त्रिगुणा चोत्तमा भ
वती स्कंदं॥ राममंत्रे सति संभवेदयमेव कार्यो विस्योत्कर्षो तु॥ अथ भूतशुद्धिः॥ यथा॥ पादयो
र्जानुपर्यंतं चतुरस्रं सवज्रकं॥ पीतवर्णं पृथिव्यास्तु बीजेयुक्तं पृथ्वीमंडलं॥ जानुद्वयान्नाभिप
र्यंतं चंद्रार्धनिभं पद्मद्वयेन लांछितं कोटिद्वयं शुक्लवर्णं वमिति जलबीजेन युक्तं तोयस्य मंडलं॥
नाभितः कंठपर्यंतं त्रिकोणं रक्तवर्णं स्वस्तिकं रमिति वह्निबीजेन युक्तं तेजसो मंडलं॥ कंठाद्भ्रूमध्य
पर्यंतं षट्कोणं कोणेषु षड्बिंदुभिर्लांछितं धूम्रवर्णं यमिति वायुबीजेन युक्तं वायुमंडलं॥ भ्रूम
ध्याद्ब्रह्मरंध्रपर्यंतं वृत्तं ध्वजलांछितं स्वच्छवर्णं हमिति नभोबीजेन युक्तं नभसो मंडलं॥ ततः स्था
नानि विचिंत्य॥ तत्तत्स्थानस्थितानि भूतानि स्वस्वतन्मात्राभिः सह विचिंत्य॥ तदूर्ध्वं प्रकृतिं॥ तदू
र्ध्वं ब्रह्मरंध्रे ब्रह्म च विचिंत्य॥ पृथ्वीं जले॰ जलं तेजसि॥ तेजो वायौ॰॥ वायुं नभसि॰॥ ततश्चोर्ध्वं
स्थितायां प्रकृतौ॥ प्रकृतिं ब्रह्मरंध्रस्थसहस्रदलकमलकर्णिकास्थबिंदुरूपपरब्रह्मणि लीनां वि
भाव्य॥ हृत्पद्मकर्णिकास्थदीपशिखाभं जीवात्मानं सोहमिति मंत्रेण सुषुम्नावर्त्मना तत्रैव पर
मात्मसमीपं नीत्वा॥ तत्रैव लीनं भावयेद्यथा कियत्क्षणं निरालंबसमाधिना तिष्ठेत्॥ ततः कुक्षिवामे
अनादिजन्मसंचितं॥

ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं ॥ एतत्स्वलुप्तकं संसर्गपदद्वयंपा
तकत्रयांप्रत्यंगं ॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनं ॥ कृष्णवर्णं क्रूराकृतिं खड्गचर्मधरं पापपुरुषं ध्यात्वा ॥
नाभौ पीतं यमिति वायुबीजं विभाव्य ॥ तदुद्भूतेन वायुना सपापपुरुषं स्वदेहं शुष्कं ध्यात्वा ॥ हृदि रक्तं रमिति व
ह्निबीजं विभाव्य तदुद्भूतेन वह्निना तं दग्धं विचिंत्य ॥ ललाटे श्वेतं वमिति जलबीजं ध्यात्वा ॥ तत्स्रवत्त्यामृत
वृष्ट्या प्लुतं सत्त्वदेहं निर्मलं निर्गुणं सर्वं यथाविनिर्मुक्तं निर्लेपं विश्वव्यापकं तोयांतरम्सतीन्द्रयः पुनरुत्प
न्नं ॥ वक्ष्यमाणश्रीविष्णुरूपेण परिणतं ध्यात्वा ॥ पुनर्बिंदुरूपपरब्रह्मणः सकाशात्प्रकृतिः तस्याः सकाशान्नभः ॥ नभ
सो वायुः ॥ वायोस्तेजः ॥ तेजसो आपः ॥ अद्भ्यः पृथ्वी ॥ चनिष्कास्य सर्वाणि तत्त्वानि पूर्वोक्तस्वस्वस्थाने स्थितानि
विभाव्य ॥ जीवात्मानमपि परब्रह्मणः सकाशात्सोहमिति मंत्रेण हृदयांबुजे पूर्ववत्स्थितं आनयेदित्यस्माकं
स्वगुरुसंसंप्रदायानुसारी भूतशुद्धिप्रकारः ॥ अथ पूर्वोक्तक्रमेण जीवात्मानं परमात्मनि संयोज्य ॥ पृथ्वीं
जले ॥ जलं तेजसि ॥ तेजो वायौ ॥ वायुं नभसि ॥ तद्घ्राणे तद्रसनायां तच्चक्षुषि तत्त्वचि तच्छ्रोत्रे ॥ तदुपस्थे ॥
तत्पायौ ॥ तत्पादे ॥ तत्पाणौ ॥ तन्मुखे ॥ तद्गंधतन्मात्रायां ॥ तद्रसतन्मात्रायां ॥ तद्रूपतन्मात्रायां ॥ तत्स्पर्शत
न्मात्रायां ॥ तच्छब्दतन्मात्रायां ॥ तदहंकारे ॥ तन्महत्तत्त्वे ॥ तत्प्रकृतौ ॥ तां च परब्रह्मणि लीनां ध्यात्वा ॥ तत्र
किंचित्कालं निरालंबसमाधिना तिष्ठेत् ॥ ततो ब्रह्मणः सकाशात्प्रकृतिः ॥ तस्याः सकाशान्महत्तत्त्वं ॥ महत्त
त्त्वादहंकारः ॥ तस्माच्छब्दतन्मात्रं ॥ तस्मात्स्पर्शतन्मात्रं ॥ तस्माद्रूपतन्मात्रं ॥ तस्माद्रसतन्मात्रं ॥ तस्माद्गंधत
न्मात्रं ॥ तस्मादुपस्थं ॥ तस्मात्पायुं ॥ तस्मात्पादौ ॥ तस्मात्पाणी ॥ तस्मान्मुखं ॥ तस्माच्छ्रोत्रं ॥ तस्मात्त्वक् ॥ तस्मा
च्चक्षुः ॥ तस्माद्रसनां ॥ तस्माद्घ्राणं ॥ तस्मादाकाशं ॥ तस्माद्वायुं ॥ तस्मात्तेजः ॥ तस्माज्जलं ॥ तस्मात्पृथ्वीं ॥
निष्कास्य ॥ स्वस्वस्थानस्थितान्येतानि तत्त्वानि विभाव्य जीवात्मानमपि पूर्वोक्तक्रमेण ब्रह्मणः सकाशान्नि
ष्कास्य हृदिस्थं आनयेदित्याग्नेयपुराणोक्तयोगिकक्रमेण भूतशुद्धिः ॥ अथवा जीवात्मानं परमात्मसंयो
ज्य ॥ आकाशवायुतेजोजलपृथ्वीश्रोत्रत्वक्चक्षूरसनाघ्राणमुखपाणिपादपायूपस्थशब्दस्पर्शरूपरसगं
धवचनादानगतिविसर्गानंदात्मकपंचविंशतितत्त्वानि परमात्मनि जीवभावेन व्य[illegible]माल्लीनानि विभा
व्य नाभिचक्रस्थवायुमंडलावस्थितवायुनाऽऽत्मसंस्थं पूरकं कृत्वा ॥ कुंभकं शुष्कशरीरं विचिंत्य दक्षना

सापुटेन वायुं रेचयेत्॥ ततो दक्षनासापुटे रमिति वह्निबीजं रक्तवर्णं वह्निमंडलस्थं लीनवायुमंडलं विचिं
सकुंभके दग्धशरीरं विचिंत्य॥ वामनासापुटेन भस्मना सह वायुं रेचयेत्॥ ततो वामनासापुटे ठमिति चंद्र
बीजं श्वेतं जलमंडलस्थं विचिंत्य सदाशिवाधिष्ठितललाटे चंद्रमंडलस्थं पूरकेनीत्वा कुंभकेनमित्यमृतत
बीजेन वर्णमयीं चंद्रामृतलटाः निपात्य दोषजालं विश्लेषयन्नूदेन ताराधनयोगं पादाद्यमस्तकपर्यंतममृ
तप्लुतं नवीनं पुनरुत्पन्नं शरीरं विभाव्य॥ ततो दक्षनासापुटेन वायुं रेचयेत्॥ ततस्तत्वानि स्वस्थाने स्थि
तानि विचिंत्य॥ जीवात्मानमपि पूर्ववन्नहृदयांबुजे समानयेदिति॥ प्राणायामत्रयेण भूतशुद्धिः॥ अत्रापि
षोडशवारं चतुःषष्टिवारं द्वात्रिंशद्वारं यथाक्रमं पूरककुंभकरेचकैः॥ मूलबीजयोः स्थाने रं जपेश्च पूर्ववि
दितिक्रमदीपिकानुसारेण तत्त्वरहस्याकृतानेन शीलानां भूतशुद्धिप्रकारः॥ अथ प्राणप्रतिष्ठाप्रकारः॥
तदुक्तं ज्ञानार्णवे॥ प्राणप्रतिष्ठया पश्चाज्जीवं देहे निधापयेत्॥ मुखवृत्तं समुच्चार्य हंसस्तु विपरीतकः॥ उद्धरेत
रमेशाग्निनिवेशं त्र्यक्षरी च भवेत्॥ प्राणप्रतिष्ठामंत्रोयं सर्वकर्माणि साधयेत्॥ तेनैव विधिना देवि स्थिरीकुर्यान्नि
जांतनुं॥ जीवं चैव निजं देहे स्वस्थाने स्थापयेत्ततः॥ इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत्॥ ततो हंस इति
बीजं स्वहृदये समानीय कुंडलिनीं पृथिव्यादीनि तत्त्वानि यथास्थानमानयेत्॥ विशेषस्तु शक्तिविषये चोक्तः॥
हंसइति जीवादिकं परमशिवे संयोज्य सोहमिति मंत्रेण स्वस्थाने समानयेत्॥ तथा चोक्तं गौतमीये॥ स्क
सुषुम्नावर्त्मना सोहमिति मंत्रेण देशिकः॥ हंसेन पुष्करस्थाने परमात्मनि योजयेत्॥ तथा चोक्तं वाराहीतं
त्रे॥ मूलाधारात्ततो जीवं ब्रह्ममार्गेण देशिकः॥ हंसेन पुष्करस्थाने परमात्मनि योजयेत्॥ सोहमेनं समा
नाय्य जीवं हृदि समानयेत्॥ अथ प्राणप्रतिष्ठाप्रकारः॥ अस्य श्री प्राणप्रतिष्ठामंत्रस्य॥ ब्रह्मविष्णुमहे
श्वराऋषयः॥ ऋग्यजुःसामानि छंदांसि॥ अस्वष्टि-छंदो रूपामयवपुः प्राणाख्या देवता॥ प्राणप्रतिष्ठापने॰
इति स्थलं॥ ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि॥ ऋग्यजुःसामानिछंदोभ्यो॰ इति मुखे॥
प्राणाख्यादेवतायै॰ इति हृदि॥ प्राणप्रतिष्ठापने वि॰॥ इति सर्वांगे॥ अथ प्राणप्रतिष्ठाषडंगन्यासः॥ ॐ
कं खं गं घं ङं ॐ पृथिव्यप्तेजोवायुराकाशात्मने आं हृदयाय॰॥ ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगंधात्मने ईं
शिरसे स्वाहा॥ ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्॥ ॐ तं थं दं धं नं एं वाक्
पाणिपादपायूपस्थात्मने ऐं कवचाय हुं॥ ॐ पं फं बं भं मं ओं वचनादानगमनविसर्गानंदात्मने औं नेत्रत्रयाय वौषट्॥

ॐ यं रं लं वं शं षं सं हं ळं क्षं अं मनोबुध्यहंकारचित्तात्मने अः अस्त्राय फट् ॥ इति पञ्चमात्राक्रमेण ॥ अंगुष्ठतर्ज
नीमध्यमानामिकाकनिष्ठाकाकरतलेपृष्ठद्वयेषु विन्यस्य ॥ एभिरेव मंत्रैः क्रमेण हृदयशिरःशिखाकवचनेत्र
त्रयेषु पञ्चभिर्मंत्रैर्विन्यस्य षष्ठेन्यतालत्रयं छोटिकाभिर्दशदिग्बंधं कुर्यात् ॥ ततः ॐ आं इति नाचेरकः ॥ ॐ
ह्रीं इति हृदयादानाभिः ॥ क्रों इति मस्तकादाहृदयं ॥ ततः ॐ यं त्वगात्मने नमः इति हृदि ॥ ॐ रं असृगात्मने०
इति शिरसि ॥ ॐ लं मांसात्मने० इति शिखायां ॥ ॐ वं मेदात्मने० इति सर्वांगे ॥ ॐ शं अस्थ्यात्मने० इति ने
त्रत्रयेविन्यस्य ॥ प्राणशक्तिं ध्यायेत् यथा ॥ रक्तांबोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशं को
दंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसितापीनवक्षोरुहाढ्या दे
वी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ १ ॥ इति ध्यात्वा ॥ पश्चात्प्राणप्रतिमंत्रं यथोक्तक्रमेण
पठेदिति ॥ ततो हृदि हस्तं दत्वा ॥ ॐ आं ह्रीं क्रों हं सः सोहं मम प्राण इह प्राणाः ॥ ॐ आं ह्रीं क्रों हं सः सोहं मम जी
व इह स्थितः ॥ ॐ आं ह्रीं क्रों हं सः सोहं श्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणिपादपायूपस्थानि सर्वेंद्रिया
णि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ इति मंत्रं ॥ आं सोहमिति वारत्रयं जपेदेवं जीवन्यासं कुर्यात् ॥ इति र
हस्याकल्पनेन प्रतिष्ठाति ॥ ततः जन्मादि षोडशक्रियासंस्कारसिद्ध्ये षोडशवारं प्रणवं जप्त्वा प्रहृतिरू
पं परां शक्तिं स्मरेदेवं पुनरुत्पन्ने शरीरे बोध्यन्यासान् कुर्यात् ॥ तत्रादौ मातृकान्यासः ॥ अस्य श्रीमातृकास
रस्वतीमंत्रस्य ॥ ब्रह्माऋषिः ॥ गायत्रीछंदः ॥ मातृकासरस्वतीदेवता ॥ हलो बीजानि ॥ स्वराः शक्तयः ॥
अव्यक्तं कीलकं ॥ लिपिन्यासे देहशुद्ध्यै विनि० ॥ तद्यथा ॥ ब्रह्मणे ऋषये नमः इति शिरसि ॥ गायत्रीछंदसे
नमः इति मुखे ॥ मातृकासरस्वतीदेवतायै नमः इति हृदि ॥ व्यंजनेभ्यो बीजेभ्यो नमः इति गुह्ये ॥ स्वरेभ्यः
शक्तिभ्यो नमः पादयोः ॥ अव्यक्तकीलकाय नमः सर्वांगे ॥ तथा चोक्तं ईशानार्णवे ॥ मातृकां शृणु देवेशि
न्यासात्सा पत्निकीर्तिता ॥ ऋषिर्ब्रह्मास्य मंत्रस्य गायत्री छंद ईरितं ॥ देवता मातृका देवी बीजं व्यंजनसंच
यः ॥ शक्तयश्च स्वरा देवि षडंगं न्यासमाचरेत् ॥ यथा ॥ अकारादि षोडशस्वरैः प्ररक्तं ॥ कादिमांतैः कुं
भकं ॥ यादिक्षांतैः रेचकं ॥ एवमेकः प्राणायामः ॥ संचवेतत्त्रयं कुर्यात् ॥ अथ मातृकायाः करांगन्या
सौ कुर्यात् ॥ ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां० ॥ ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा ॥ ॐ उं टं ठं डं

ॐ उं ऊं मध्यमाभ्यां वषट्॥ ॐ एं तं थं दं धं नं ऐं अनामिकाभ्यां हुं॥ ॐ ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां वौषट्॥
ॐ अं यं रं लं वं शं षं सं हं क्षं अः करतलकरपृष्ठाभ्यां अस्त्राय फट्॥ एवं हृदयादि॥ ॐ अं कं ५ आं हृदयाय नमः॥
ॐ इं चं ५ ईं शिरसे स्वाहा॥ ॐ उं टं ५ ऊं शिखायै वषट्॥ ॐ एं तं ५ ऐं कवचाय हुं॥ ॐ ओं पं ५ औं नेत्रत्रयाय नमः॥
ॐ अं यं ५ अः अस्त्राय फट्॥ तथा चोक्तं शारदातिलके॥ अं आं मध्ये कवर्गं तु इं ईं मध्ये चवर्गकं॥ उं ऊं मध्ये टवर्गं तु एं ऐं मध्ये तवर्गकं॥ ओं औं मध्ये पवर्गं तु बिंदुयुक्तं न्यसेत्प्रिये॥ अनुस्वारविसर्गाद्यो यशवर्गौ सिल
क्षकौ॥ हृदयं च शिरो देवि शिखा कवचं तथा॥ नेत्रमस्त्रं न्यसेद्देवि तंत्रमंत्रं योजयेत्प्रिये॥ षडंगो यं मातृकायाः सर्वपापहरः स्मृतः॥ अथांतर्मातृकान्यासः॥ अकारादि षोडशस्वरान् सबिंदून् षोडशदलकमले कं
ठदेशे न्यसेत्॥ ककारादि द्वादशवर्णान् सबिंदून् द्वादशदले हृत्कमले न्यसेत्॥ डकारादि दशवर्णान्
सबिंदून् दशदलकमले दशवर्णान् नाभिदेशे न्यसेत्॥ बकारादि षड्वर्णान् सबिंदून् षड्दलकमले लिंगमूले न्यसेत्॥ वकारादि चतुरो वर्णान् सबिंदून् चतुर्दलकमले मूलाधारे न्यसेत्॥ हक्षवर्णौ द्विदलपद्मे सबिंदून् भ्रूमध्ये न्यसेत्॥ तथा चोक्तं शारदातिलके॥ षट्पत्रांबुजे कंठे स्वरान् षोडशविन्यसेत्॥
द्वादशच्छदहृत्पद्मे कादीन्द्वादश विन्यसेत्॥ दशपत्रांबुजे नाभौ डकारादीन्न्यसेद्दश॥ षट्पत्रे लिंगमध्यस्थे बकारादीन्न्यसेत्तु षट्॥ आधारे तु चतुर्वर्णान् न्यसेद्वादीन् चतुर्दले॥ हक्षौ भ्रूमध्यकं पद्मे द्विदले
विन्यसेत्प्रिये॥ इत्यंतर्मातृकान्यस्य सर्वांगन्यासमाचरेत्॥ अगस्त्यसंहितायामपि चोक्तं॥ एकैकं वर्ण
मेकैकं पत्रांतविन्यसेत्प्रिये॥ एवमेनां प्रविन्यस्य मनसा तो बहिर्न्यसेदित्यादि ना॥ वैष्णवे तु विशेषः॥ एकैकं वर्णमुच्चार्य मूलाधारादि शीर्षकं॥ नमोंतमिति वान्यासः आंतरः परिकीर्तितः॥ तथा चोक्तं तत्रैव॥
अथांतर्मातृकान्यासे मूलाधारे चतुर्दले॥ स्ववर्णमेन शवसमंततुर्वर्णविभूषिते॥ षड्दले विष्णु
मे स्वाधिष्ठाने नलतिथि॥ बभमैर्यरलैर्युक्ते वर्णैर्षड्भिर्भास्वते॥ मणिपूरे दशदले नीलजीमूतवत्वि
षि॥ डादिफांतदले युक्ते चिह्नासिलमस्तके॥ अनाहते द्वादशदले प्रवालरत्नसंनिभे॥ कादिठांतदले
युक्ते योगिनां हृदयंगमे॥ विशुद्धे षोडशदले धूम्राभे स्वरभूषिते॥ आज्ञाचक्रे तु चंद्राभे द्विदले हक्षरंजिते॥

सहस्रारे हिमसन्निभे सर्ववर्णविभूषिते ॥ अकथादित्रिरेखात्म हलक्षत्रयभूषिते ॥ तन्मध्ये परबिंदुं च सृष्टि-
स्थितिलयात्मकं ॥ एवं समाहितमना ध्यायेन्न्यासोय मातरः ॥ तथा चोक्तं रुद्रयामले ॥ आधारे लिंगना-
भौ हृदयसरसिजे तालुमूले ललाटे ॥ द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के ॥ वासांते बालमध्ये डफ क-
ठसहिते कंठदेशे स्वराणां हं क्षौ कोदंडमध्ये न्यस्य तु विमलधीन्याससंपत्तिसिध्यै ॥ ततो बाह्यमातृका ध्यानं ॥
यथा ॥ पंचाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां भास्वन्मौलिनिबद्धचंद्रशकलामापीनतुंगस्तनीं ॥
मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥ १ ॥ एवं
ध्यात्वा न्यसेत् ॥ तथा चोक्तं गौतमीये ॥ ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः ॥ ओष्ठदंतोत्तमांगास्यपदो-
र्यत्संध्यग्रेषु च ॥ जठराननयोर्न्यस्येन्मातृकार्णान्यथाक्रमात् ॥ तद्यथा ॥ अं नमो इति ललाटे ॥ आं नमो इति
मुखवृत्ते ॥ इं ईं दक्षिणवामनेत्रयोः ॥ उं ऊं दक्षिणवामकर्णयोः ॥ ऋं ॠं दक्षिणवामनसोः ॥ एं ऐं इत्योष्ठाध-
रयोः ॥ ओं औं इत्यूर्ध्वाधोदंतपंक्त्योः ॥ अं नमो ब्रह्मरंध्रे ॥ अः नमो इति मुखे ॥ कं नमो इति दक्षिणबाहुमू-
ले ॥ खं च नमः इति कूर्परे ॥ गं० मणिबंधे ॥ घं० अंगुलिमूले ॥ ङं० अंगुल्यग्रे ॥ चं० वामबाहुमूले ॥ छं० कूर्परे
जं० मणिबंधे ॥ झं० अंगुलिमूले ॥ ञं० अंगुल्यग्रे ॥ टं० दक्षपादमूले ॥ ठं० दक्षजानुनि ॥ डं० दक्षगुल्फे ॥
ढं० अंगुलिमूले ॥ णं० अंगुल्यग्रे ॥ तं० वामपादमूले ॥ थं० वामजानुनि ॥ दं० वामगुल्फे ॥ धं० वामपादांगुलि-
मूले ॥ नं० वामपादांगुल्यग्रेषु ॥ पं० दक्षपार्श्वे ॥ फं० वामपार्श्वे ॥ बं० पृष्ठे ॥ भं० नाभौ ॥ मं० उदरे ॥ यं० हृदि ॥
रं० दक्षांसे ॥ लं० ग्रीवायां ॥ वं० वामांसे ॥ शं० हृदादिदक्षबाहौ ॥ षं० हृदादि वामबाहौ ॥ सं० हृदादिदक्षपादे ॥
हं० हृदादिवामपादांते ॥ ळं० पादादिजठरांतं ॥ क्षं नमः इति हृदयादिमुखपर्यंतं ॥ न्यसेदिति मातृकान्यासः ॥
तथा चोक्तं ॥ ओमाद्यंते नमोंतो वा सबिंदुर्बिंदुवर्जितः ॥ पंचाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः ॥ इति
नहिः परं चोक्तं तत्रैव ॥ चतुर्धा मातृका प्रोक्ता केवला बिंदुसंयुता ॥ सविसर्गा सोभया च रहस्यं शृणु क-
थ्यते ॥ विद्याकरी केवला च सोभया भुक्तिदायिनी ॥ सा च सर्गा पुत्रदा च सबिंदुर्वित्तदायिनी ॥ रुद्रयामलेप्यु-
क्तं ॥ न्तरमुद्धितलिपिन्यासो विना यस्तु प्रजपेत् ॥ विपरीतं फलं दद्यादन्तयोः सृजनं यथा ॥ सामान्यन्यासे

अंगुलीनियमस्तु॥ तथा चोक्तं गौतमीये॥ मनसा वान्यसेन्न्यासानंगुष्ठेनैवाथवा मुने॥ अंगुष्ठानामिका-
भ्यां वान्यथा विफलं भवेत्॥ विशेषन्यासे तु नायं नियमः॥ न्यासमातृविषयो विशेषमात्रन्यासो वक्त-
व्यः॥ प्राणायामांगुलीनियमस्तु॥ ज्ञानार्णवे॥ कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं॥ प्राणायामः
स विज्ञेयस्तर्जनीमध्यमे विना॥ तथा चोक्तं गौतमीये॥ प्राणायामश्च द्विविधः सगर्भो निर्गर्भश्च॥ त-
दुक्तं तत्रैव॥ सगर्भो मंत्रजापेन निर्गर्भो मात्रया भवेत्॥ मात्रा चोक्ता तत्रैव॥ वामजानुनि तद्धस्तभ्रा-
मणं यावता भवेत्॥ कालेन मात्रा सा ज्ञेया मुनिभिस्तत्त्वपारगैः॥ अथ प्राणायामः॥ मूलमंत्रस्य वी-
जस्य प्रणवस्य वा षोडशधा जपेन वामनासापुटेन वायुं पूरयेत्॥ तथा चोक्तं कालीक्रमे॥ प्राणाया-
मत्रयं कुर्यान्मूलेन प्रणवेन वा॥ अथवा मंत्रबीजेन यथोक्तविधिना सुधीः॥ तस्य चतुःषष्टिवार-
जपेन वायुं कुंभयेत्॥ द्वात्रिंशद्वारजपेन दक्षनासया वायुं रेचयेत्॥ पुनर्दक्षेण पूर्यान्याभ्यां कुंभयि-
त्वा वामेन रेचयेत्॥ पुनर्वामेनापूर्य नाभ्यां कुंभयित्वा दक्षेण रेचयेत्॥ यौगिके तु पुनर्मात्रानियमं-
स्तथा चोक्तं गौतमीये॥ मंत्रप्रमाणं संप्रोक्तं यौगिकं कथयामि ते॥ पूरयेद्वामया विद्वान् मात्रया षोड-
शाख्यया॥ इत्यादि॥ यद्वा चतुःषोडशाष्टवारजपेन पूरकादिकं कुर्यात्॥ तथा चोक्तं तंत्रांतरे॥ पूरये-
त्षोडशभिर्वायुं धारयेच्च चतुर्गुणैः॥ रेचयेत्तु तदर्द्धेन अष्टाभिस्त्वा ततुरीयतः॥ तदशक्तौ च तु-
र्यं स्यादेवं प्राणस्य संयमः॥ प्राणायामं विना मंत्रं पूजने नहि योग्यता॥ गोपालविषये विशेषो वक्त-
व्यः॥ अथ पीठन्यासः॥ हृदये उपर्युपरि॥ ॐ आधारशक्तये नमः॥ ॐ प्रकृत्यै॰॥ ॐ कूर्माय॰॥ ॐ अ-
नंताय॰॥ ॐ वराहाय॰॥ ॐ पृथिव्यै॰॥ ॐ क्षीरसागराय॰॥ ॐ श्वेतद्वीपाय॰॥ ॐ मणिमयमंडपा-
य॰॥ ॐ कल्पवृक्षाय॰॥ ॐ मणिवेदिकायै॰॥ ॐ रत्नसिंहासनाय॰॥ एतत्सर्वं तु हृदि प्रणवादिनमो-
ऽतेन न्यसेत्॥ ॐ धर्माय॰ इति दक्षिणस्कंधे॥ ॐ ज्ञानाय॰ इति वामस्कंधे॥ ॐ वैराग्याय॰ इति वामो-
रौ॥ ॐ ऐश्वर्याय॰ इति वामपार्श्वे॥ तथा चोक्तं शारदायां॥ अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन देशिकः॥
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च क्रमान्न्यसेत्॥ मुखपार्श्वनाभिपार्श्वेष्वधर्मादीन्प्रकल्पयेत्॥ इत्यादि पुनर्हृदि॥

ॐ अं अनंताय ग॥ ॐ आनंदकंदाय ग॥ ॐ संविन्नालाय ग॥ ॐ सर्वतत्त्वात्मकपद्माय ग॥ ॐ प्रकृतिमयपत्रे
भ्यो ग॥ ॐ विकारमयकेसरेभ्यो ग॥ ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै ग॥ ॐ सूर्यमंडलाय द्वादशकलात्म
ने ग॥ ॐ अं सोममंडलाय षोडशकलात्मने ग॥ ॐ मं वह्निमंडलाय दशकलात्मने ग॥ ॐ सं सत्त्वाय ग॥ ॐ र
रजसे ग॥ ॐ तं तमसे ग॥ ॐ आं आत्मने ग॥ ॐ अं अंतरात्मने ग॥ ॐ पं परमात्मने ग॥ ॐ ह्रीं ज्ञानात्मने ग॥
इस तं विन्यस्य॥ हृत्पद्मस्य पूर्वादिकेसरेषु पीठशक्तीर्विन्यस्य मध्ये पीठमनुं च न्यसेत्॥ तथा चोक्तं शार
दायां॥ अनंतं हृदये पद्मं अस्मिन्सूर्येन्दुपावकान्॥ एषु स्वस्वकलान्यस्य नामाद्यक्षरपूर्वतः॥ सत्त्वादींश्च
तथैवात्र न्यसेद्द्विदियथाक्रमात्॥ आत्मानमंतरात्मानं परमात्मानमेव च॥ ज्ञानात्मानं प्रविन्यस्य न्यसे
त्पीठमनुं ततः॥ ततो ऋष्यादिन्यासः॥ ऋषिरुक्तः॥ महेश्वरमुखाच्छ्रीलायः साक्षात्तपसा मनुं॥ संसाधय
ति शुद्धात्मा स तस्य ऋषिरीरितः॥ गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्तितः॥ सर्वेषां मंत्रतत्त्वानां छा
दयाच्छंद उच्यते॥ अक्षरत्वात्पदत्वाच्च मुखे छंदः समीरितं॥ सर्वेषामेव जंतूनां भावनात्प्रेरणात्तथा॥
हृदयांभोजमध्यस्थां देवतां तत्र तां न्यसेत्॥ ऋषिश्छंदापरिज्ञानान्न मंत्रः फलभाग्भवेत्॥ दौर्बल्यं या
ति मंत्राणां विनियोगमजानतः॥ ततस्तत्तन्मंत्रोक्तन्यासान्कुर्यात्॥ तदुक्तं कुलार्णवे॥ आगमोक्तेन विधि
ना नित्यं न्यासं करोति यः॥ देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते॥ योन्यासकवचच्छन्नो मंत्रं जपति तं प्रि
ये॥ विघ्ना दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा मृगाः॥ अकृत्वा न्यासजालं यो मूढात्मा प्रजपेन्मनुं॥ सर्वविघ्नैः स
बाध्यः स्याद्व्याघ्रैर्मृगशिशुर्यथा॥ अंगन्यासे तु अंगुलीनियमः॥ त्रिहृत्कदशाकत्रित्रिसंख्यायान्नोलसंचवे॥
अंगुलीनामिति वचनात्॥ इति सर्वसाधारणं मतं॥ वैष्णवे तु विशेषः॥ अनंगुष्ठा ऋजवो हस्तशाखा भवे
न्मुद्रा हृदये शीर्षके इति च॥ अधोंगुष्ठा खलु मुष्टिः शिखायां करदंडांगुलयोर्मिलित्वा॥ नाराचमुष्ट्युत्कृतबा
हुयुग्मकांगुष्ठतर्जन्युदितो घातिस्तु॥ विष्वग्विनिक्तः कथितास्तु मुद्राय त्राक्षिणी तर्जनिमध्यमे वा॥ तत्तत्स
ल्योक्तमुद्रां प्रदर्श्य॥ ध्यानं कृत्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ शंखस्थापनं तु दीक्षाप्रकरणे प्रोक्तं॥
तथा चोक्तं सनत्कुमारीयतंत्रे॥ अकृत्वा मानसं यागं न कुर्याद्बहिरर्चनं॥ ततः पीठपूजा॥ पीठस्योत्तरे गुरु

पंक्तिः पूजयेत्॥ वायव्यादीशानपर्यंतं॥ ॐ गुरुभ्यो० ॐ परमगुरुभ्यो०॥ ॐ परापरगुरुभ्यो०॥ ॐ परमेष्ठीगुरु
भ्यो०॥ त्रिपुरादौ तु विशेषगुरुपूजा वक्तव्या॥ पीठस्य दक्षिणे॥ गं गणेशाय०॥ ततो पीठमध्ये॥ ॐ आधारशक्त्यै०
ॐ प्रकृत्यै०॥ ॐ कूर्माय०॥ ॐ अनंताय०॥ ॐ वराहाय०॥ ॐ पृथिव्यै०॥ ॐ क्षीरसागराय०॥ ॐ श्वेतद्वीपाय०
ॐ मणिमंडपाय०॥ ॐ कल्पवृक्षाय०॥ ॐ रत्नवेदिकायै०॥ ॐ रत्नसिंहासनाय०॥ ततो आग्नेयादिकोणेषु
ॐ धर्माय०॥ ॐ ज्ञानाय०॥ ॐ वैराग्याय०॥ ॐ ऐश्वर्याय०॥ ततः पूर्वादिचतुर्दिक्षु॥ ॐ अधर्माय०॥ ॐ अ
ज्ञानाय०॥ ॐ अनैश्वर्याय०॥ मध्ये॥ ॐ अनंताय०॥ ॐ आनंदकंदाय०॥ ॐ संविन्नालाय०॥ ॐ सर्वतत्त्वा
त्मकपद्माय०॥ ॐ प्रकृतिमयपत्रेभ्यो०॥ ॐ विकारमयकेसरेभ्यो०॥ ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै०॥
ॐ सूर्यमंडलाय द्वादशकलात्मने०॥ ॐ चंद्रमंडलाय षोडशकलात्मने०॥ ॐ वह्निमंडलाय दशकलात्म
ने०॥ ॐ सं सत्त्वाय०॥ ॐ रं रजसे०॥ ॐ तं तमसे०॥ ॐ आं आत्मने०॥ ॐ अं अंतरात्मने०॥ ॐ पं परमात्म
ने०॥ ॐ ह्रीं ज्ञानात्मने०॥ इत्येतं संपूज्य॥ पूर्वादिकेसरेषु॥ मध्ये च ततस्तत्पीठशक्तीः संपूज्य मध्ये पीठ
मनुं यजेत्॥ तदुक्तं क्रमदीपिकायां॥ वायव्यादीईशानपर्यंतमभ्यर्च्यः पीठस्याथ दकु गोरवीपंक्तिरादौ पूज्योन्य
त्पायां विकेयः करीब्जैः पाशांदलं स्फटिममचीतिदं ध्यानः॥ आरभ्याधारशक्त्याधर्मेश्चरणापानव्यथो मध्ये नागे
धर्मादीन् वह्निरक्षःपवननभ्रिवगतान् दिक्षु चैवमादि कांश्च॥ मध्ये शेषाजबिंबन्वितयगुणगणात्मअजं केसरा
णमध्ये मध्ये च शक्तीर्नव समभियजेत्सीठमंत्रेण न्यः॥ तारादिविधादौ तु विशेषो वक्तव्यः॥ पूर्वादिदिक्षु यम
स्तु॥ पूज्यपूजकयोर्मध्ये प्राचीति कीर्त्यते बुधैः॥ तद्दक्षिणं दक्षिणं स्यादुत्तरं चोत्तरं मतं॥ पृष्ठं तु पश्चिमं मंडले
यसर्वत्रैवं प्रयोजयेत्॥ तदुक्तं शारदाटीकायां॥ यत्रैव जानुस्तु विपर्यस्यदेंति प्राचीदिशं तं विदुर्बावदंति॥ अ
थां परां पूजकपूज्ययोश्च सदांगैयज्ञाः प्रवदंति तास्तु॥ अन्यच्च॥ देवसाधकयोरंतरं पूर्वाशादिग्जिहोच्यते॥ अभि
षेकयंत्रनियमस्तु॥ तदुक्तं मत्स्यसूक्ते॥ अनुक्तकल्पे यंत्रं तु लिखेत्पद्मं दलाष्टकं॥ षट्कोणकर्णिकं तत्र यंत्रं वेदद्वा
रोपशोभितं॥ ततः ध्यात्वा आवाहनादि प्राणप्रतिष्ठापनांतं कर्म कुर्यात्॥ ततो सति संभवे उपचारान् कुर्यात्॥
प्रथमस्तु षोडशोपचाराः॥ आसनं१ स्वागतं२ पाद्यं३ मर्घ्यं४ माचमनीयं५ मधुपर्कं६ चमनं७ स्नानं८
वसनानि९ भरणानि१० च॥ सुगंधिः११ सुमनोहारं१२ धूप१३ दीप१४ नैवेद्य१५ चंदनं१६ प्रयोजयेदर्चना
यउपचारांस्तु षोडश॥ अथ मंत्ररत्नावल्युक्तषोडशोपचाराः॥ पाद्यं१ र्घ्यं२ चमनीयानि३ स्नानं४ वसनं५
भूषणं६ गंध७ पुष्पं८ धूपं९ दीप१० नैवेद्या११ चमनं ततः१२ तांबूल१३ मर्चनं१४
स्तोत्रं१५ तर्पणं च नमस्क्रिया॥

प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥ अथाष्टादशोपचाराः ॥ तदुक्तं फेत्कारिणीतंत्रे ॥ आसनावाहनं चार्घ्यं
पाद्यमाचमनीयकं ॥ स्नानं वासोपवीतं च भूषणानि च सर्वशः ॥ गंधपुष्पे तथा धूपं दीपं मंत्रं च तर्पणं ॥ मा
ल्यानुलेपनं चैव नमस्कारविसर्जने ॥ अष्टादशोपचारैश्च मंत्री पूजां समाचरेत् ॥ अथ दशोपचारास्त
दुक्तं तत्रैव ॥ अर्घ्यपाद्ये निवेद्याथ तथैवाचमनीयकं ॥ मधुपर्काचमनीयं गंधप्रस्तरनकं ततः ॥ धूपदीपौ
च नैवेद्यं दशोपचारकं स्मृतं ॥ अथ पंचोपचाराः ॥ गंधाद्यो निवेद्यांता पूजाः पंचोपचारिकाः ॥ अथ द्वात्रिंश
दुपचाराः ॥ आसनं स्वागतं पाद्यं अर्घ्यमाचमनीयकं ॥ मधुपर्कं च मध्यंगमुहूर्त्तं न मतः परं ॥ पादुकास्नान
वस्त्राणि तस्यादुपवीतकं ॥ अलंकारणकं गंधो यवाश्चैव तिलास्तथा ॥ पुष्पधूपौ तु दीपश्च नैवेद्यं च ततः
परं ॥ आपोशानं प्रत्यपोशानो गंडूषं तदनंतरं ॥ दंतकाष्ठं च तांबूलं स्तुतिस्तर्पणमेव च ॥ नतिरास्तरणीयं
चावगुंठनमेव च ॥ आरार्त्तिकं च द्वात्रिंशदुपचाराः प्रकीर्तिताः ॥ अथ षट्त्रिंशदुपचाराः ॥ अभ्युत्थानो
द्गमनकौ आसनं स्वागतं तथा ॥ कुशलप्रश्नकं चैव पाद्यार्घ्याचमनीयकं ॥ मधुपर्काचमाभ्यंगमुहूर्त्तं न म
तःपरं ॥ पादुकास्नानवस्त्राणि तथा चैवोपवीतकं ॥ अलंकरणगंधो यवाश्चैव तिलास्तथा ॥ पुष्पधूपौ
च दीपश्च नैवेद्यं च ततः परं ॥ आपोशानमिति ज्ञेयं प्रत्यपोशानमेव च ॥ गंडूषं दंतकाष्ठानि तांबूलं स्तुति
तर्पणं ॥ नतिरास्तरणं चैव मवगुंठनमेव च ॥ आरात्रिकाप्रकरणं षट्त्रिंशदुपचारकाः ॥ अथ चतुःषष्ठ्यु
पचाराः ॥ आवाहनं प्रथमतोऽभ्युत्थानमतः परं ॥ प्रत्युद्गमनकं तद्दासने संस्थापनं तथा ॥ सन्निधाप
नकं चैव सम्मुखीकरणं तथा ॥ स्वागतप्रश्नमस्मात्तु कुशलप्रश्नमेव च ॥ अवगुंठनकं चैव सकलीकरणं
तथा ॥ अमृतीकरणं चैव परमीकरणं ततः ॥ प्राणप्रतिष्ठा पाद्यं च अर्घ्यमाचमनीयकं ॥ मधुपर्कं विमाभ्यंग
मुहूर्त्तं न मतः परं ॥ पादुकास्नानको देहसंमार्जनमतः परं ॥ अधरीयं तथा वस्त्रमुपवीतमतः परं ॥ उत्तरीय
मथोष्णीषमुकुटं हारमेव च ॥ कुंडलं चैव केयूरकटकं कंकणं तथा ॥ किंकिण्युपानहौ छत्रं चामरं गंधमेव
च ॥ यवाश्चैव तिलाश्चैव पुष्पाण्यथ मालिका ॥ धूपदीपौ च नैवेद्यमापोशानमतः परं ॥ पंचाहुतिश्च पा
नीयं प्रत्यपोशानमेव च ॥ हस्तप्रक्षालनं चैव गंडूषं दंतकाष्ठकं ॥ मुखवासनिमित्तं च कर्पूरादि ततः परम् ॥
पर्यंकमोस्तरणकमवगुंठनमेव च ॥ पादसंवाहनं कुर्यादारात्रिकं
तांबूलं च स्तुतिश्चैव तर्पणं नतिरेव च ॥

मतः परं॥ प्रदक्षिणं च विशेषाच्चतुःषष्ट्युपचारकाः॥ इति चतुःषष्ट्युपचाराः॥ पुष्पपर्यंतमुपचारं त
त्तन्मंत्रेण पंचपुष्पांजलिं दत्वा तत्तत्कल्पोक्तमार्गं कुर्यात्॥ तद्यथा॥ ॐ जयध्वनिमये मातर्घंटायै
नमः स्वाहा॥ इति गंधपुष्पाक्षतैर्घंटां संपूज्य वामहस्तेन घंटां वादयन्॥ तत्तन्मंत्रेण नीचैर्धूपं द
द्यात्॥ एवं दृष्टिपर्यंतं दीपं दद्यात्॥ तथा चोक्तं क्रमदीपिकायां॥ संविश्लोषैर्घृतविलुलितै रुत्सवैः
संचितैर्लैर्गुग्गुल्वाद्यैर्धूपं नपरिमलैर्धूपमापाद्य मंत्री॥ दद्यान्नीचैर्दनुजदमनाथापरेणाथ दोष्णा
घंटां गंधाक्षतकुसुमकैरर्चितां वादयानः॥ तद्वद्दीपं स्फुरदभिघृतं संसितं कर्पूरखंडदीपं दृष्ट्याति तिवि
द्राद्धीः पादपर्यंतमुच्चैः॥ दत्वा पुष्पांजलिमथ शिरःस्पर्शयित्वा च पाद्यं तत्राचामं कल्पयित्वाथ विपुलतरे
च स्वर्णपात्रे निवेद्यं॥ ततो मूलेन पुष्पांजलित्रयं दत्वा नैवेद्यमानीय फट् इति संप्रोक्ष्य चक्रमुद्रया
भिरक्ष्य तदमृतमुद्रां प्रदर्श्य॥ धेनुमुद्रयामृतीकृत्य॥ तदुपरि मूलमंत्रमष्टधा जपित्वा मूलमंत्रमु
च्चार्य नैवेद्यं दद्यात्॥ ततः पुनराचमनीयं दत्वा तांबूलादीन् दद्यात्॥ नैवेद्ये तु नैवेविशेषो वक्तव्यः
ततः सपरिवारां देवतां गंधादिभिरभ्यर्च्य न्यग्गीतैः संतोष्य जय२ इत्युक्त्वाभिनतो भाष्य दत्वा पुष्पां
जलिं दद्यात्॥ दानेतु॥ आदौ मूलं ततो द्रव्योल्लेख ततः संप्रदानं ततः स्वाभार्थकं पदं सर्वत्रेति॥ तथा
चोक्तं कुलसारे॥ आदौ मूलं समुच्चार्य पश्चाद्देयं समाचरेत्॥ संप्रदानं ततः देते च स्वाभार्थकपदं ततः
एवं क्रमेण देवेभ्यो उपचारान्प्रकल्पयेत्॥ मंत्रौ ते कर्मसंनिपात इति न्यायात्॥ ततश्चुलुकोदकमादाय॥
इतः पूर्वं प्राणबुद्धिशरीरधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां
पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा॥ मां मदीयं सकलं सम्यगमु
कदेवतायै समर्पयेत्॥ ॐ तत्सदिति॥ नतिनमस्कारौ तु वा॥ ततोष्टोत्तरसहस्रं शतं वा दशवारं वा ज
पं कुर्यात्॥ तद्यथा॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥
इति विषयेत्॥ गोप्त्रीति देवीति विशेषः॥ तथा चोक्तं निबंधे॥ करे रंकुरसोन्मिश्रं तोयं कुंचानिवेदयेत्॥
ज्ञातार्थस्तावत् संजप्य मूलमंत्रमनन्यधीः॥ तज्जपं सर्वसंपन्नं देवतायै निवेदयेत्॥ इति जपं समर्प्य स्तुत्वा

अष्टांगप्रणामं कुर्यात्॥ तथा चोक्तं॥ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा॥ मनसा वचसा चेति प्रणामो
ऽष्टांग ईरितः॥ बाहुभ्यां च सजानुभ्यां शिरसा वचसा दृशा॥ पंचांगोयं प्रणामस्यात् पूजासु प्रवराविमौ॥ न
मो निपत्य यः कुर्यात्कृष्णे ऽष्टांगनतिं सुधीः॥ सहस्रजन्मजं पापं त्यक्त्वा वैकुंठमाप्नुयात्॥ तथा चोक्तं॥ वेदविप्रो
घरादलोयत्कृतं लभते नरः॥ तत्फलं लभते जंतुस्त्याकेशे कृत्वा प्रदक्षिणां॥ कृष्णमितस्कपलक्षणं॥ तथा चो
क्तं विश्वसारे॥ शंखहस्तेन सर्वत्र प्रदक्षिणं प्रकीर्त्तितं॥ नतिर्विष्णोः पुस्तकरद्रयामले॥ त्रिकोणाकारसर्वत्र न
तिः सोक्तेः समीरिता॥ अर्द्धचंद्रं महेशस्य एकलक्ष्म समीरिता॥ शिवप्रदक्षिणे मंत्री अर्द्धचंद्रक्रमेण च॥ सव्या
सव्यक्रमेणैव सोमसूत्रं न लंघयेत्॥ इति वचनात्॥ सोमसूत्रं जलनिःसरणमार्गं॥ प्रसार्य दक्षिणं हस्तं
स्वयं नम्रशिराः पुनः॥ दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः॥ त्रिधा च वेष्टयेत्सम्यक् देवतायाः प्रदक्षि
णे॥ एकहस्तप्रणामं च एकं वापि प्रदक्षिणं॥ अकाले दर्शनं विष्णोर्हंति पुण्यं पुराकृतं॥ ततो देवतांगे आव
रणदेवतां विसृज्य क्षमस्वेति विसृज्य॥ संहारमुद्रया तत्तेजः पुष्पैः सार्द्धं स्वहृदयमानयेत्॥ तथा चोक्तं
तत्रैव॥ निधाय देवतां पश्चात्स्वीयहृत्सरसीरुहे॥ सुषुम्णावर्त्मना पुष्पमाघ्रायोद्वासयेत्ततः॥ ततः ऐशा
न्यां मंडलं निर्माल्यधारिणे प्रदद्यात्॥ वैष्णवे तु॥ ॐ विष्वक्सेनाय नमः॥ शाक्ते विसर्जयेत्॥ ॐ उच्छिष्टचां
डालिन्यै निर्माल्यधारिण्यै नमः॥ शैवे तु॥ ॐ चंडेश्वराय नमः॥ सूर्ये तु॥ तेजश्चंडाय नमः॥ गणेशे तु॥ ॐ उच्छिष्टगणे
शाय नमः॥ तदुक्तं तंत्रांतरे॥ विष्वक्सेनो वटो विष्णोस्तेजश्चंडो विवस्वतः॥ शाक्ते तूच्छिष्टचांडाली चंडेशः
शंकरस्य च॥ लंबोदरे गणपतिरमी उच्छिष्टभोजिनः॥ ततः पादोदकं पीत्वा निर्माल्यं शिरसा विधृत्य नैवे
द्यं किंचित्स्वीकृत्य॥ अन्यद्यथायोग्याय दत्त्वा यथासुखं विहरेदिति॥ तथा चोक्तं तंत्रांतरे॥ निर्माल्यं शिर
सा धार्यं सर्वांगे चानुलेपनं॥ देवतायाश्चावशिष्टं सलिलं शंखमध्यगं॥ अंगे लग्नं मनुष्याणां ब्रह्महत्यां
व्यपोहति॥ तथा चोक्तं मत्स्यसूक्ते॥ अनिवेद्य न भुंजीत मत्स्यमांसादिकं च यत्॥ अन्नं विष्ठा पयो मूत्रं यद्वि
ष्णोरनिवेदितं॥ तथोक्तं भैरवतंत्रे॥ हृदये च बहिर्देवीं संतर्प्य विधिवत्ततः॥ निर्माल्यं च भुवो देशे नैवेद्यं
भक्षयेत्सुधीरिति॥ अत्र तत्तद्देवतोपलक्षणमिति॥ इति सर्वदेवानां सामान्यपूजापद्धतिः समाप्ता॥ ६८

यामाकुंरा घांप्र रूतिं मुनीन्द्रैः प्रथाभिर्गुसिक्तैर्गिर मन्त्रपूरणं ॥ नित्यां च दुर्गां त्वरितां तथान्ये भजामि नित्यं भुवने
श्वरीतां ॥ ॥ अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीं ॥ ब्रह्माद्योपि यां ध्यात्वा लेभिरे श्रियमुत्तमां ॥२॥ अथ
भुवनेश्वरीमंत्राः ॥ नकुलीशोग्निमारूढो वामनेत्रार्द्धचंद्रवान् ॥ बीजं तस्याः समाख्यातं सेवितं सिद्धिकांक्षि
भिः ॥ ह्रीं ॥ नकुलीशो हकारः ॥ अस्याः प्रजाप्रयोगः सामान्यप्रजापद्धत्युक्तक्रमेण प्रातःकृत्यादिपीठन्यासां
तं कर्म विधाय ॥ केसरेषु पूर्वादिक्रमेण मध्ये च पीठशक्तीर्न्यसेत्तद्यथा ॥ तदुक्तं तंत्रे ॥ जया च विजया चै
व अजिता चापराजिता ॥ नित्या विलासिनी दोग्ध्री अघोरा मंगला इमाः ॥ ॐ जयायै० ॐ विजयायै० ॐ
अजि ॥ ये० ॐ अपराजितायै० ॐ नित्यायै० ॐ विलासिन्यै० ॐ दोग्ध्र्यै० ॐ अघोरायै० ॐ मंगलायै० ॥ इति प्रणवादि
नमोंतेन ॥ ॐ ह्रीं सर्वपद्मासनाय० ॥ ततो ऋष्यादिन्यासः ॥ ॐ अस्य श्रीभुवनेश्वरीमंत्रस्य ॥ शक्तिऋषिः ॥ गा
यत्री छंदः ॥ हकारो बीजं ॥ ईकारः शक्तिः ॥ रेफः कीलकं ॥ भुवनेश्वरी देवता ॥ चतुर्वर्गसिध्यर्थे जपे विनियो
ग यथा ॥ शिरसि शक्तये ऋषये० ॥ मुखे गायत्री छंदसे० ॥ हृदि भुवनेश्वर्यै देवतायै० ॥ गुह्ये हं बीजाय० ॥
पादयोः ईं शक्तये० ॥ सर्वांगे कीलकाय० ॥ ततो मंत्रन्यासं कुर्यात् ॥ शिरसि हृल्लेखायै० ॥ वदने गगनायै०
हृदये रक्तायै० ॥ गुह्ये करालिन्यै० ॥ पदद्वये अं महोच्छुष्मायै० ॥ एवं तु ऊर्ध्वप्राग्याम्योदीच्यपश्चिमेषु मुखे
षु तान्न्यसेत् ॥ तथा चोक्तं निबंधे ॥ हृल्लेखां मूर्ध्नि वदने गगनां हृदयांबुजे ॥ रक्तां करालिनीं गुह्ये महोच्छुष्मां पद
द्वये ॥ ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु ताः ॥ सत्यादि ह्रस्वपंचाढ्या न्यस्तव्यास्तत्संप्रभाः ॥ ततः
करांगन्यासं कुर्यात् ॥ ह्रां अंगुष्ठाभ्यां० ह्रीं तर्जनीभ्यां० ह्रूं मध्यमाभ्यां० ह्रैं अनामिकाभ्यां० ह्रौं कनिष्ठाभ्यां० ह्रः
करतलपृष्ठाभ्यां० ॥ एवं हृदयादिष्वपि ॥ ह्रां हृदयाय० इति हृदि ॥ ह्रीं शिरसे० इति शिरसि ॥ ह्रूं शिखायै वष
ट् इति शिखायां ॥ ह्रैं कवचाय हुं इति सर्वांगे ॥ ह्रौं नेत्रत्रयाय वौषट् इति नेत्रयोः ॥ ह्रः अस्त्राय फट् इति
सर्वदिक्षु ॥ तथा चोक्तं निबंधे ॥ षड्दीर्घभाजा बीजेन कुर्यादंगक्रियां मनोः ॥ स्वच्छंदसंग्रहेप्युक्तं ॥ स्वरैर्विहा
य बीजं तद्दीर्घषट्कं नियोजयेत् ॥ षडंगानि विधेयानि सर्वत्रायं विधिः स्मृतः ॥ अंगुलीनियमस्तत्र सर्व एवो
क्तः ॥ सर्वत्र करांगन्यासे अयमेव क्रमः ॥ ततो बालरेखा ॥ ॐ गायत्रीसहिताय ब्रह्मणे० ॥ दक्षिणकर्णे ले

ॐ सावित्रीसहिताय विष्णवे०॥ वामकपोले ॐ वागीश्वरीसहिताय महेश्वराय०॥ वामकर्णोपरि ॐ श्रीसहिताय धन-
पतये०॥ मुखे रतिसहिताय स्मराय०॥ सव्यकर्णोपरि पुष्टिसहिताय गणपतये०॥ दक्षिणगंडकर्णांतराले ॐ शं-
खनिधये०॥ वामगंडकर्णांतराले ॐ पद्मनिधये०॥ मुखे भुवनेश्वर्यै देवतायै०॥ एवं कंठमूले॥ दक्षिणस्तन
दक्षिणांस॥ वामांस॥ हृदय॥ पार्श्वद्वय॥ नाभिपृष्ठान्येव न्यसेत्॥ तथा च॥ वर्णभिन्नन्यासे तु॥ विश्वसारतंत्रे
ॐकाराद्यं ङे नामयुक्तं च नमोंतं च यथास्थितिः॥ विधिना विन्यसेत्सर्वं शंकरस्य मतेन च॥ एवं सर्वत्र॥ ललो
न्नाले॥ ॐ ब्राह्म्यै० वामांसे ॐ माहेश्वर्यै० वामपार्श्वे ॐ कौमार्यै० जठरे ॐ वैष्णव्यै० दक्षिणपार्श्वे॥ ॐ वारा-
ह्यै० दक्षिणांसे ॐ इंद्राण्यै० अपरगले ॐ चामुंडायै० हृदि ॐ महालक्ष्म्यै० इति विन्यस्य॥ मूलमंत्रेण व्या-
पकत्रयं कुर्यात्॥ ततो ध्यानं॥ उद्यद्दिनद्युतिमिंदुकिरीटां तुंगकुचां नयनत्रययुक्तां॥ स्मेरमुखीं वरदांकु-
शपाशाभीतिकरां प्रभजे भुवनेशीं॥ १॥ एवं ध्यात्वा मानसैरुपचारैः संपूज्य॥ बहिः पूजामारभेत्॥ अथा-
स्याः पूजायंत्रं॥ पद्ममष्टदलं बाह्ये वृत्तं षोडशभिर्दलैः॥ विलिखेत्कर्णिकामध्ये षट्कोणमतिसुंदरं॥
चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत्॥ ततो दीक्षापद्धत्युक्तक्रमेण शंखस्थापनं कुर्यात्॥ ततः
सामान्यपद्धत्युक्तक्रमेण पीठपूजां कृत्वा पीठशक्तीः पूजयेत्॥ तद्यथा॥ पूर्वादिकेसरेषु॥ ॐ जयायै०
एवं विजयायै० ॐ अजितायै० ॐ अपराजितायै० ॐ नित्यायै० ॐ विलासिन्यै० ॐ दोग्ध्र्यै० ॐ अ-
घोरायै० मध्ये ॐ कमलायै०॥ सर्वत्र प्रणवादिनमोंतेन पूजयेत्॥ तदुपरि ह्रीं सर्वशक्तिकमलास-
नाय०॥ ततः पूर्ववद्ध्यात्वा॥ आवाहनादि पंचपुष्पांजलिं विधाय॥ ततो ह्रां हृदयाय० ह्रीं शिरसे स्वाहा
ह्रूं शिखायै वषट्॥ ह्रैं कवचाय हुं॥ ह्रौं नेत्रत्रयाय वौषट्॥ ह्रः अस्त्राय फट्॥ इत्यादिना षडंगेन षट्-
कोणं पूजयित्वा॥ पंचपुष्पांजलिं दद्यात्॥ ततो आवरणपूजा॥ कर्णिकामध्ये॥ ॐ हृल्लेखायै नमः॥
पूर्वे ऐं गगनायै दक्षिणे ॐ रक्तायै० उत्तरे ॐ करात्यै० पश्चिमे ॐ महोच्छुष्मायै०॥ षट्कोणेषु पूर्वे॥
ॐ गायत्र्यै० ॐ ब्रह्मणे० नैर्ऋते ॐ सावित्र्यै० ॐ विष्णवे० वायव्ये॥ ॐ वागीश्वर्यै० ॐ रुद्राय० अग्निको-
णे॥ ॐ श्रियै० ॐ धनपतये० पश्चिमे रत्यै० ॐ स्मराय० ऐशान्ये ॐ पुष्ट्यै० ॐ गणपतये०॥ ततोऽष्ट-

कोणस्योभयपार्श्वयोः॥ ॐ रत्ननिधये। ततो केसरेषु॥ अग्निनिर्ऋतिवायुईशानमभ्यर्चयेत्॥ चतुर्दिक्षु च॥
ह्रां हृदयाय। ह्रीं शिरसे। ह्रूं शिखायै। ह्रैं कवचाय हुं॥ ह्रौं नेत्रत्रयाय वौषट्॥ ह्रः अस्त्राय फट्॥ तथा
चोक्तं निबंधे॥ केसरेष्वग्निकोणादि हृदादीनि प्रपूजयेत्॥ नेत्रमग्ने दिक्षु चास्त्रं ख्यातव्या चांगदेवताः॥
एवं सर्वत्र॥ भैरवादौ विशेषो वक्तव्यः॥ अष्टदलेषु पूर्वादि॥ ॐ अनंगकुसुमायै। ॐ अनंगकुसुमातु-
रायै। ॐ अनंगमदनायै। ॐ अनंगमदनातुरायै। ॐ भुवनपालिन्यै। ॐ गगनरेखायै। ॐ शशि-
रेखायै। ॐ गगनवेगायै। अथ षोडशदलेषु॥ तत्रापि पूर्वादि॥ ॐ कराल्यै। ॐ विकराल्यै। ॐ
उमायै। ॐ सरस्वत्यै। ॐ श्रियै। ॐ दुर्गायै। ॐ उषायै। ॐ लक्ष्म्यै। ॐ श्रुत्यै। ॐ स्मृत्यै। ॐ धृत्यै। ॐ
श्रद्धायै। ॐ मेधायै। ॐ मत्यै। ॐ कांत्यै। ॐ आर्यायै। तद्बहिः पूर्वादि॥ ॐ अनंगरूपायै। ॐ अनंगमद-
नायै। ॐ अनंगमदनातुरायै। ॐ भुवनवेगायै। ॐ भुवनपालायै। ॐ भुवनपालिकायै। ॐ सर्वशि-
शिरायै। ॐ अनंगवेदनायै। ॐ अनंगमेखलायै॥ तद्बहिः दशदिक्षु पूर्वादि॥ ॐ लं इंद्राय वज्रहस्ताय
सुराधिपतये ऐरावतवाहनाय सांगाय सायुधाय सवाहनाय सपरिवाराय॥ ॐ रं अग्नये शक्ति-
हस्ताय तेजोधिपतये मेषवाहनाय सांगाय॥ ॐ यं यमाय दंडहस्ताय प्रेताधिपतये महिषवाह-
नाय सांगाय॥ ॐ क्षं निर्ऋतये खड्गहस्ताय रक्षोधिपतये प्रेतवाहनाय सांगाय॥ ॐ वं वरुणाय
पाशहस्ताय जलाधिपतये मकरवाहनाय सांगाय। ॐ यं वायवे अंकुशहस्ताय प्राणाधिपतये मृग-
वाहनाय सांगाय॥ ॐ कुं कुबेराय गदाहस्ताय। वित्ताधिपतये नरवाहनाय सांगाय॥ ॐ हां ईशा-
नाय त्रिशूलहस्ताय विद्याधिपतये वृषभवाहनाय सांगाय॥ ततो इंद्रेशानयोर्मध्ये। ॐ आं ब्रह्म-
णे पद्महस्ताय लोकाधिपतये हंसवाहनाय सांगाय॥ ततो निर्ऋतिवरुणयोर्मध्ये ॐ ह्रीं अनंताय चक्र-
हस्ताय नागाधिपतये कूर्मवाहनाय सांगाय॥ तथा चोक्तं तंत्रांतरे॥ लोकपालास्ततः पूज्याः समस्ता-
श्चतुरस्रके॥ पुरुहूतेशयोर्मध्ये रक्षोवरुणयोस्तथा॥ ब्रह्मा विष्णुस्तथा पूज्यो दिगीशानां विदुर्बुधाः॥ ई

इन्द्रादिलोकपालानां ये मंत्रास्ते निरूपिताः ॥ स्वस्वबीजान्विताः सर्वे चतुर्थ्यंतान्नमोंतकाः ॥ इति वचना
त्सर्वत्र प्रणवादि ॥ तथा चोक्तं तत्रैव ॥ अंते यजेल्लोकपालान् स्वपारिषदान्वितान् ॥ हेतिजात्यधिपो
पेतान् दिक्षु पूर्वादितो यजेत् ॥ सवाहनायेति क्रमदीपिकायां ॥ तद्बहिः ॥ ॐ वज्राय ॐ शक्त्यै ॐ दंडा
य ॐ खड्गाय ॐ पाशाय ॐ अंकुशाय ॐ गदायै ॐ त्रिशूलाय ॐ पद्माय ॐ चक्राय ॥ सर्वत्र
णवादिनमोंतेन पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वात्रिंशल्लक्ष
जपः ॥ तथा चोक्तं ॥ प्रजपेन्मंत्रविन्मंत्रं द्वात्रिंशल्लक्षमानतः ॥ त्रिस्वादुयुक्तैर्जुहुयादष्टद्रव्यैर्दशांशतः
अष्टद्रव्याणि यथा ॥ अश्वत्थोदुंबरप्लक्षन्यग्रोधसमिधास्तिलाः ॥ सिद्धार्थपायसाज्यानि द्रव्याण्यष्टौ
विदुर्बुधाः ॥ त्रिमधुर इति घृतं मधु शर्करा इति ॥ मंत्रांतरं च ॥ वाग्भवं शंभुवनितारमाबीजत्रयात्मकं
मंत्रमूसमुद्धरेन्मंत्री त्रिवर्गफलसाधनं ॥ सामान्यपूजादिकं सर्वं एकाक्षरीवत्कार्यं ॥ षडंगन्यासे तु विशे
षः ॥ ऐं क्लीं श्रीं अंगु० ऐं क्लीं श्रीं तर्ज० ॥ ऐं क्लीं श्रीं मध्यमाभ्यां वषट् ॥ ऐं क्लीं श्रीं अनामिकाभ्यां हुं ॥ ऐं क्लीं श्रीं कनि
ष्ठिकाभ्यां वौषट् ॥ ऐं क्लीं श्रीः करतलपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासः ॥ तथा चोक्तं तत्रैव ॥ षड्दीर्घभा
जा बीजेन वाग्भवाद्येन कल्पयेत् ॥ षडंगानि विधेयानि सतियुक्तानि मंत्रवित् ॥ अथ ध्यानं ॥ सिंदूरा
रुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां ॥ पाणि
भ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामंबिकां ॥१॥ इति
ध्यानं ॥ अस्याः पूजादिकं तु सर्वं पूर्ववत्कार्यं ॥ अस्याः पुरश्चरणं द्वादशलक्षं जपः ॥ तथा चोक्तं ॥ रवि
लक्षं जपेन्मंत्रं पायसैर्मधुरान्वितैः ॥ तद्दशांशेन जुहुयान्मंत्री मंत्रस्य सिद्धये ॥ इत्यादिवचनात् ॥ वाग्बी
जपुटिता या विधेयं त्र्यक्षरी मता ॥ अस्य मंत्रस्यापि एकाक्षरीवन्न्यासादिकं कुर्यात् ॥ करन्यासे तु ॥ ऐं क्लीं
ऐं अंगुष्ठाभ्यां नमः ॥ ऐं क्लीं ऐं तर्जनीभ्यां स्वाहा ॥ ऐं क्लीं ऐं मध्यमाभ्यां वषट् ॥ ऐं क्लीं ऐं अनामिकाभ्यां हुं ॥ ऐं
क्लीं ऐं कनिष्ठाभ्यां वौषट् ॥ ऐं क्लीं ऐं करतलपृष्ठाभ्यां अस्त्राय फट् ॥ एवं हृदयादिष्वपि न्यसेत् ॥ ऐं क्लीं ऐं हृद
याय नमः इत्यादि ॥ तथा चोक्तं निबंधे ॥

मध्येन दीर्घयुक्तेन वामकर्णपुटेन प्रकल्पयेत्॥ षडङ्गानीत्यादि॥ अस्याः ध्यानं॥ श्यामाङ्गीं शशिशेखरां
निजकरैर्दानं च रक्तोत्पलं रत्नाढ्यं चषकं परं भयहरं संबिभ्रतीं शाश्वतीं॥ मुक्ताहारलसत्पयोधर
नतां नेत्रत्रयोल्लासिनीं वन्देहं सुरपूजितां हरवधूं रक्तारविन्दस्थितां॥ ॥ एवं ध्यात्वाष्टदलेन यजे
त्॥ अष्टपत्रेषु विशेषः॥ आं ब्राह्म्यै। ईं माहेश्वर्यै। ऊं कौमार्यै। ॠं वैष्णव्यै। लॄं वाराह्यै। ऐं इन्द्राण्यै। औं चामु
ण्डायै। अः महालक्ष्म्यै। अं असिताङ्गाय। इं रुरवे। उं चण्डाय। ऋं क्रोधाय। लृं उन्मत्ताय। एं कपालिने। ओं भी
षणाय। अं संहाराय॥ यद्वा॥ अं आं असिताङ्गभैरवसहितायै ब्राह्मीदेव्यै। इं ईं रुरुभैरवसहिता
यै माहेश्वरीदेव्यै। उं ऊं चण्डभैरवसहितायै कौमारीदेव्यै॥ ऋं ॠं क्रोधभैरवसहितायै वैष्णवीदेव्यै॥
लृं लॄं उन्मत्तभैरवसहितायै चामुण्डादेव्यै॥ अं अः संहारभैरवसहितायै महालक्ष्मीदेव्यै नमः॥
तथा चोक्तं॥ दीर्घाद्या मातरः प्रोक्ता ह्रस्वाद्या भैरवाः स्मृताः॥ अन्यत्सर्वं पूर्ववद्बोद्धव्यं॥ अस्य पुरश्चर
णं जपो दशलक्षाणि मधुराक्तैः पलाशपुष्पैर्दशांशहोमः॥ तथा चोक्तं॥ तत्त्वलक्षं जपेन्मन्त्रं जुहुयात्त
द्दशांशतः॥ पलाशपुष्पैः स्वाद्वक्तैः पुष्पैर्वा राजवृक्षजैः॥ तत्त्वलक्षं दशलक्षं॥ तत्त्वं गतत्वादिति गुरवः॥ चतु
र्विंशतिलक्षमिति केचित्॥ अनेनोबिन्दुसंयुक्तो मायाब्रह्माग्नितारवान्॥ पाशादित्र्यक्षरो मन्त्रः सर्वका
मफलप्रदः॥ अस्यैकाक्षरीवदृषिश्छन्दो देवतान्यासः॥ अंगमन्त्रस्तु॥ क्रां अंगुष्ठाभ्यां नमः॥ क्रीं तर्जनीभ्यां
स्वाहा॥ क्रूं मध्यमाभ्यां वषट्॥ क्रैं अनामिकाभ्यां हुं॥ क्रौं कनिष्ठिकाभ्यां वौषट्॥ क्रः करतलपृष्ठाभ्यां फट्॥ क्रां
हृदयाय नमः इत्यादिना हृदयादिन्यासमपि कुर्यात्॥ तथा चोक्तं निबन्धे॥ षड्दीर्घाद्याः पूर्वमुक्ताः स्युः वेदजे
नाङ्गक्रियामता॥ ध्यानं तु॥ वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थां॥ बालार्ककोटिप्रति
भां त्रिनेत्रां भजेमहाद्यां भुवनेश्वरीं तां॥ इति ध्यात्वास्य पूजादिकं एकाक्षरीवत्कुर्यात्॥ अष्टदलेषु ब्राह्म्या
दिपूगन्तं पूर्ववत्तज्जयेत्॥ षोडशदलेषु स्वजातानुक्ता षोडशार्णा भावः॥ तथा चोक्तं निबन्धे॥ अंगा
नि केसरेष्वथ्यापत्रस्था मातरः क्रमात् इति॥ अस्य पुरश्चरणं जपो दशलक्षाणि॥ दधिमधुघृताक्ता
भिरश्वत्थोदुम्बरप्लक्षाणां समिद्भिस्तिलैर्दुग्धान्नैर्दशांशहोमः॥ तथा चोक्तं॥ रविलक्षं जपेन्मन्त्रं त

सलक्षं जितेंद्रियः॥ तत्सहस्रं प्रजुहुयाज्जपांते मंत्रवित्तमः॥ दधिक्षीरघृताक्ताभिः समिद्भिः क्षीरवृक्षसहां
ते त्संख्यया तिलैर्मधुरैः पयोक्तैर्जुहुयात्ततः॥ अत्र च तत्तत्रावृत्तेन दशलक्षाण्युच्यंते॥ द्वात्रिंशातल
मिव च नात्॥ अन्ये तु भुवनेश्वरीमंत्रा नोक्ताः॥ अप्रसिद्धत्वात्॥ ५॥ अथान्नपूर्णामंत्राः॥ मायाहृद्ग
वयं ते माहेश्वरि पदं ततः॥ अन्नपूर्णे द्वयुगलं मनुः सप्तदशाक्षरः॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्या
दि पीठन्यासांतं कर्म विधाय॥ हृत्पद्मस्य केसरेषु मध्ये च॥ भुवनेश्वरीपीठमन्वंते पीठशक्तीर्विन्यस्य
ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ ॐ ब्रह्मणे ऋषये नमः इति शिरसि॥ पंक्तिश्छंदसे नमः इति मुखे॥ अन्नपूर्णा
यै देवतायै नमः इति हृदि॥ तदुक्तं तत्रैव॥ एतेषां मंत्रराशीनां ऋषिर्ब्रह्मा उदाहृतः॥ पंक्तिश्छंदः समाख्यातं
देवता चान्नपूर्णिका॥ ततः षडंगन्यासं कुर्यात्॥ तथा चोक्तं निबंधे॥ अंगानि मायया कुर्यात्ततो देवीं विचिं
तयेत्॥ कल्पे पुनः॥ यद्बीजाद्या च वै॥ हि द्यात बीजे वांग कल्पना॥ ततो ध्यानं॥ रक्तां विचित्रवसनां नवचंद्रचू
डामन्नप्रदाननिरतां स्तनभारनम्रां॥ नृत्यंतमिंदुशकलाभरणं विलोक्य हृष्टां भजे भगवतीं भवदुःखहंत्रीं॥
इति ध्यात्वा मानसैः संपूज्य॥ शंखस्थापनं कुर्यात्॥ ततः सामान्यपूजापद्धत्युक्तक्रमेण पीठपूजां विधाय॥ भुवनेश्व
रीपटलोक्तजयादिपीठमन्वंतं पीठपूजां विधाय॥ पुनर्ध्यात्वा॥ आवाहनादिपंचपुष्पांजलिदानपर्यंतं कर्म विधाय
आवरणपूजामारभेत्॥ तद्यथा॥ केसरेष्वाग्नेयकोणे ह्रां हृदयाय नमः॥ नैरृत्यकोणे ह्रीं शिरसे स्वाहा॥ वायव्य
कोणे ह्रूं शिखायै वषट्॥ ईशान्यकोणे ह्रैं कवचाय हुं॥ ततो मध्ये ह्रौं नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु ह्रः अस्त्राय फट्॥
अथ पूर्वादितो दलेषु॥ ॐ ब्राह्म्यै॰ ॐ माहेश्वर्यै॰ ॐ कौमार्यै॰ ॐ वैष्णव्यै॰ ॐ वाराह्यै॰ ॐ इंद्राण्यै॰ ॐ चामुंडा
यै॰ ॐ महालक्ष्म्यै॥ सर्वत्र प्रणवादिनमोंतेन पूजयेत्॥ तथा चोक्तं॥ एते पूजयेद्देवीं ब्राह्म्याद्याः क्रमतः सुधीः॥
मंत्रस्य प्रणवः चतुर्दशस्वरः बिंदुयुक्तः॥ तथा चोक्तं कालिकापुराणे॥ मंत्रस्यास्य तु प्रकारेणोक्तत्वात्॥ ततो
इंद्रादीन्वज्रादींश्च पूर्ववत्संपूज्य धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं षोडशसहस्रं ज
पः॥ तथा चोक्तं तत्रैव॥ यथाविधि जपेन्मंत्रं वस्वक्षसहस्रकं॥ साज्येनान्नेन जुहुयात् दशांशमनंतरं॥
अयं मंत्रः प्रणवादिरष्टादशाक्षरः॥ श्रीबीजादिर्वा॥ तथा मायां विना प्रणवादिः॥ कामादिः॥ श्रीबीजादिर्वा॥

शाकुंभ्यादिश्च॥ समदशाक्षर कल्पे कवचेच तथाप्रतिपादनात्॥ विशेषस्तु॥ यद्वीजाद्यो भवेन्मंत्रस्तेनैवांग
प्रकल्पना॥ तत्कल्पेच॥ प्रणवाद्याय दादेवि तदा समदशाक्षरी॥ अन्नदा मोक्षदा चैव सदा विजयवर्द्धिनी
मायाद्याचेयदा देवि तदा सा सकलेष्टदा॥ श्रीबीजाद्याय दा देवि तदा सा सुखवर्द्धिनी॥ शाकुंभ्युग्माद्याय
दा विद्या वागीशत्वप्रदायिनी॥ कामाद्याचेयदा विद्या तदा सा सुखवर्द्धिनी॥ तारमायादिरूपविद्या भोगमो
क्षप्रदायिनी॥ मायाश्रीबीजयुग्माद्या तदा विजयदायिनी॥ श्रीमायाबीजयुग्माद्या तदा संपत्तिरूपि
णी॥ अथ त्रिपुरामंत्रः॥ श्रीमायामनदः प्रोक्ता मंत्रो बीजत्रयात्मकः॥ अस्य हृज्जापप्रयोगः॥ प्रातः कृत्या
दि सामान्यपद्धत्युक्तपीठन्यासांतं कर्म विधाय॥ भुवनेश्वरीमंत्रोक्तजयादिपीठमन्वंतं विन्यस्य च स्व
ष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि संमोहनाय ऋषये नमः॥ मुखे गायत्री छंदसे॥ हृदि त्रिपुरायै देव
तायै॥ तथाचोक्तं॥ ऋषिः संमोहनश्छंदो गायत्री देवतास्मृता॥ त्रिपुराख्या महादेवी सर्वसिद्धिविधायि
नी॥ ततः करांगन्यासौ कुर्यात्॥ श्रीं अंगुष्ठ॰ ह्रीं तर्ज॰ क्लीं मध्य॰ श्रीं अना॰ ह्रीं कनि॰ क्लीं करतल॰ अस्त्राय फट्॥
श्रीं हृदयाय॰ ह्रीं शिरसे स्वाहा॥ क्लीं शिखायै॰ श्रीं कवचाय हुं॥ ह्रीं नेत्रत्रयाय॰ क्लीं अस्त्राय फट्॥ तथाचोक्तं
विबंधे॥ त्रिपुराख्यादिहृत्स्तैस्तैर्बीजैरंगानि षट् क्रमात्॥ ततो ध्यानं॥ पारिजातवने रम्ये मंडपे मणिकु
ट्टिमे॥ रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते॥ अधस्स्थात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत्॥ चापं
पाशांकुशं सरसिजान्यं कुशं पुष्पबाणान् संबिभ्राणां करसरसिजे रत्नमौलिं त्रिनेत्रां॥ हेमाभांगीं कुचभ
रनतां रत्नमंजीरकांचीं ग्रैवेयाद्यैर्विलसिततनुं चिंतये शक्तिमाद्यां॥१॥ चामरादर्शतांबूलकरंडकसमुद्
गान्॥ वहंतीभिः कुब्जाभिः वृतभिः परिवारितां॥ करुणामृतलवर्षिण्या पश्यंती साधकं दृशा॥ अंकुशं पद्मं॥
नतु शंखगदं धत्तौ पद्मयुग्मं त्वमिलितदक्षिणाभूर्मिवचनात्॥ एवं ध्यात्वा मानसैरुपचारैः संपूज्य शंखस्थापनं
कुर्यात्॥ ततः सामान्यपद्धत्युक्तपीठर्जा विधाय॥ आवरणपूजां कुर्यात्॥ केसरेषु भुवनेश्वरीमंत्रोक्तजयादि
पीठमन्वंतं संपूज्य॥ पुनर्ध्यात्वा आवाहनादिपंचपुष्पांजलिदानपर्यंतं कर्म विधाय॥ तद्यथा॥ आग्नेयादिषट्
कोणेषु॥ अनंतहृदये॰ ॐ रत्यै॰ ॐ गोत्रै॰ ॐ हराय॰ ॐ रसे॰ ॐ कामाय॰॥ अथ षट्कोणस्योभयपार्श्वयोः॥ ॐ शं
खनिधये॰॥ ॐ पद्मनिधये॰ सर्वजनपालनादिनमांतेपूजयेत्॥

पत्रेषु ब्राह्म्याद्या मातरः पूर्ववदर्च्याः॥ ॐ ब्राह्म्यै॰ ॐ माहेश्वर्यै॰ ॐ कौमार्यै॰ ॐ वैष्णव्यै॰ ॐ वाराह्यै॰ ॐ इंद्राण्यै॰
ॐ चामुंडायै॰ ॐ महालक्ष्म्यै॥ तथा चोक्तं निबंधे॥ हृद्ब्जे खाविह ते पीठे पूजयेत्तां विधानवित्॥ अग्न्यादिषट्सु
कोणेषु लक्ष्म्यंगानि प्रति पूजयेत्॥ लक्ष्मीं हेमप्रभां लक्ष्मीवरां भुजयुगार्चयां॥ ईरत्नचक्रगदांभोजधरं मेघानि
भं हरिं॥ पाशांकुशाब्जयाचीष्टबोलधरां जवारुणां॥ ध्वगष्टं ब्जयाचीष्टधरं कुंदनिभं हरं॥ नीलोत्पलधरां सौ
म्यां रतिं कांचनसंनिभां॥ इष्टतूणीचापांकुशौ पाशपुष्पेषु रमणं स्मरं॥ एवं वन्हिविधियुग्मेन यजेद्दुच यपार्श्वयोः
बहिरंगानि संपूज्य पूज्याः पत्रेषु मातरः॥ तद्बहिरिंद्रादीन् वनिताल्पान् पूजयेत्॥ तथा चोक्तं निबंधे॥ लो
कपालांस्तद्वनिताल्पसंयुक्तान् विन्महान्॥ स्वस्वायुधैः समायुक्तानर्चयेत्साधकोत्तमः॥ ततो धूपादिविसर्जनां
तं कर्म समापयेत्॥ अस्य पुरश्चरणे द्वादशलक्षं जपः॥ तथा चोक्तं तंत्रे॥ भानुलक्षं जपेदेनं मनुं तावत्सहस्र
कं॥ बिल्वारग्वधसंस्थलैर्मधुरात्तैः समिद्वरैः॥ जपापुष्पाश्व जुहुयात्तोषयेद्धुत्नागुरुं॥ आरग्वधः सद्भुणः॥
अयं मंत्रस्त्रिधा॥ तथा चोक्तं॥ तारादिर्वा जवेदेवि मायादिर्वा जपेदयं॥ इति दक्षिणामूर्तिवचनात्॥ अथ त्वरि
ता मंत्राः॥ अथापि धास्ये त्वरितां त्वरितं फलदायिनी॥ तारमाया रमावर्म हुं क्रोधिरीशास्वरान्विता॥ कूर्मस्तदं
शोभनगवान्क्षस्त्रीदीर्घतनुघट्टं॥ संवर्त्तो जगवान्मायाफडंतो द्वादशाक्षरः॥ तारः प्रणवः॥ माया भुवनेश्वरी॥
रमाबीजं श्रीं॥ क्रोधिः खकारः॥ ईश्वरहकारः॥ कूर्मश्चकारः॥ लदंतयश्चकारः॥ जगएकारः॥ लद्युक्तः॥ क्षस्त्री
स्वतपं॥ दीर्घतनुर्घद्रः सकारः॥ संवर्त्तकः क्षकारः॥ जगएकारे स्तद्युक्तः॥ भुवनेश्वरी॥ फट्॥ अस्यार्जु
नो मुनिर्विराट्छंदः॥ त्वरितादेवता॥ पुरुषार्थसिद्धये विं॰॥ तथा चोक्तं निबंधे॥ मुनिरर्जुनमाख्यातो विरा
ट्छंदः समीरितं॥ देवता त्वरिता प्रोक्ता पुरुषार्थप्रदा परा॥ अस्य प्रजाप्रयोगः॥ प्रातःकृत्यादिपीठन्यासांतं
कृत्वैवं धायकेसरे पूजयादि पीठशक्तीर्विन्यस्य॥ मध्ये॥ ह्रांहुं हं वज्रदेह फूरघुरा हं गुल्लुरगेजे र हे हुं क्षां पंचा
नना पनमः॥ इति पीठमंत्रं हृदि विन्यसेत्॥ तथा चोक्तं निबंधे॥ संवर्त्तो विंदुयुतः कूर्मत्वं सरलीनयुत्॥
वज्रदेहघरुद्वंद्व माचाप्य ह्रीं रुते हयं॥ गजेषु मंथिय दुवनीं दीर्घबिंदुमान्॥ पंचाननाय हृदयं पी
ठमंत्रः प्रकीर्तितः॥

अथ ऋष्यादिन्यासः॥ शिरसि अर्जुनाय ऋषये॰ मुखे विराट् छंदसे॰ हृदि हरितायै देवतायै॰ ततो मंत्रन्यासः॥ मू
र्ध्नि ॐ नमः॥ भाले हुं नमः॥ गले खें नमः॥ हृदि चें नमः॥ नाभौ छें नमः॥ गुह्ये क्षं नमः॥ ऊर्वोः स्त्रीं नमः॥ जानु
नोः हुं नमः॥ जंघयोः क्षें नमः॥ पादयोः फ्रीं फट् नमः॥ तथा चोक्तं निबंधे॥ मायाविवर्जितावर्णान् मूर्ध्नि भाले गले
हृदि॥ नाभिगुह्योरुयुग्मेषु जानुजंघापदेषु च॥ विन्यस्य व्यापकं कुर्यात् समस्तेनैव साधकः॥ तथा चोक्तं निबंधे
कुमार्योः समस्तिवर्णैः षट्वर्णैर्वर्गविवर्जितैः॥ ह्रां ह्रीं ह्रूं षडंगानि कुर्यात् साधकसत्तमः॥ ततो मूलेन वारत्रयं
व्यापकं कुर्यात्॥ ततो करांगन्यासो॥ हुं च च्छे अंगुष्ठाभ्यां नमः॥ च्छे क्ष तर्जनीभ्यां स्वाहा॥ क्ष स्त्रीं मध्यमा
भ्यां वषट्॥ स्त्रीं हुं अनामाभ्यां हुं॥ हुं क्षे कनिष्ठिकाभ्यां वौषट्॥ फ्रीं फट् करतलपृष्ठाभ्यां अस्त्राय फट्॥ अथ
ध्यानं॥ श्यामां बाहूरुचापशोरस्वरे खुतां मावद्धवर्णां शुभां गुंजाहारलसत्पयोधरभरानम्रां हि पान्तु वि ... तीं॥
ताटंकां गरदमेखलां गुणचलन्मंजीरतां प्रापिताम् कैराती वरदाभयोघतकरां देवीं त्रिनेत्रां च जे॥ एवं ध्यात्वा
मानसैः संपूज्य॥ शंखस्थापनं कुर्यात्॥ ततः सामान्यपद्धत्युक्तपीठपूजां विधाय पद्मकेसरेषु पूर्वादिक्रमेण॥
ॐ जयायै॰ ॐ विजयायै॰ ॐ अजितायै॰ ॐ अपराजितायै॰ ॐ नित्यायै॰ ॐ विलासिन्यै॰ ॐ दोग्ध्र्यै॰ ॐ घो
रायै॰ मध्ये ॐ मंगलायै॥ सर्वत्र प्रणवादिनमोंतेन प्रजयेत्॥ तथा चोक्तं निबंधे॥ हृदये त्वाकल्पिते पीठे न
वशक्तिसमन्विते॥ प्रजयेत् हरितां देवीं पंचवाणविधानतः॥ मध्ये॥ हुं क्षं हुं वज्रदेहधरे रहि हुंहुं रगर्जर हुं
हुं क्षां पंचाननाय॥ ततो देवीं पुनः ध्यात्वा॥ आवाहनादिपंचपुष्पांजलिदानपर्यंतं विधाय॥ आवरणपूजां कु
र्यात्॥ केसरेषु अग्निवित्र्य्दिति वायुईशानकोणेषु॥ च च्छे गायत्र्यै हृदयाय॰ च्छे क्ष गायत्र्यै शिरसे॰ क्ष स्त्री
गायत्र्यै शिखायै॰ स्त्रीं हुं गायत्र्यै कवचाय हुं॥ हुं क्षे गायत्र्यै नेत्रत्रयाय॰ इति मध्ये॥ फ्रीं फट् गायत्र्यै अस्त्राय
फट्॥ इति चतुर्दिक्षु॥ तथा चोक्तं निबंधे॥ अंगैः प्रणीतां गायत्रीं केसरेषु चर्चयेत् क्रमात्॥ दलेषु प्रजयेद्देवताः
भीबीजाद्याः स्वनामितः॥ हुंकारी खेचरी चंडी छेदनी क्षेपणी स्त्रियं॥ हुंकारी क्षेमकारी चेफट्कारी मग्न
पजेत्॥ पश्चात् प्रवीच्यष्टदलेषु॥ श्रीं हुंकार्यै॰ श्रीं खेचर्यै॰ श्रीं चंडायै॰ श्रीं छेदिन्यै॰ श्रीं क्षेपण्यै॰ श्रीं स्त्रियै॰ श्रीं
हुंकार्यै॰ श्रीं क्षेमंकर्यै॥ लेह्याहोअग्नतः फट्कारिण्यै॥ ततो द्वारस्योभयपार्श्वयोः॥ ॐ जयाय॰ ॐ विजयायै॥

तद्बाह्ये ॥ क्लीं करालयरक्षरत्वरिताशास्थिरोमवहं फट् इति मंत्रेण किंकरं पूजयेत् ॥ अत्र इंद्रादि पूजनं नास्ति ॥ नि
बंधे त्वनुक्तत्वात् ॥ ततो पुष्पादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तद्दशांशं बिल्व
स्य च समिद्भिः रक्तित्रिमध्वक्तैर्होमादिकं कुर्यात् ॥ तथा चोक्तं तंत्रे ॥ लक्षं संजप्य मंत्रज्ञो मंत्रमेनं जितेंद्रियः ॥ द
शांशं जुहुयाद्बिल्वैस्त्रिमध्वक्तैः समिद्वरैरिति ॥ अथ नित्या मंत्राः ॥ वाक्कूर्चं कामबीजं च नित्यक्लिन्ने मदद्रवे पुनः
द्रवे रद्विंव पूर्वमंत्रो द्वादशार्णोयमीरितः ॥ तंत्रचूडामणावप्युक्तं ॥ वाङ्मायानित्यक्लिन्ने च मदद्रवे तदोयुतं ॥
वह्निकांता समायुक्ता वागीश्वरकुलार्चिता ॥ अथ प्रकारांतरेणापि नित्या मंत्राः ॥ तारो माया वाक्कूर्चं वा नित्य
क्लिन्ने मदद्रवे ॥ वाङ्मायावह्निजायांतो नित्यामंत्रः प्रकीर्तितः ॥ अथास्याः पूजाप्रयोगः ॥ प्रातः कृत्यादि पीठन्या
सांतं कर्म विधाय ॥ केसरेषु ॥ मध्ये च पूर्वादिक्रमेण जयादि पीठशक्तीर्न्यसेत् ॥ क्लीं आसनाय नमः इयं तं न्यस्य
ऋष्यादिन्यासमाचरेत् ॥ तद्यथा ॥ शिरसि संमोहनाय ऋषये ॥ मुखे विच्छंदसे ॥ हृदि नित्यायै देवतायै ॥
ततः षडंगन्यासं कुर्यात् ॥ ऐं अंगुष्ठाभ्यां नमः ॥ ऐं तर्जनीभ्यां स्वाहा ॥ ऐं मध्यमाभ्यां वषट् ॥ ऐं अनामिकाभ्यां हुं ॥
ऐं कनिष्ठाभ्यां वौषट् ॥ ऐं करतलपृष्ठाभ्यां फट् ॥ एवं हृदयादि ॥ तथा चोक्तं निबंधे ॥ वाग्बीजेन षडंगानि विन्यसेत्
ध्यायेद्यथाविधिः ॥ ततो ध्यानं ॥ अर्द्धेन्दुमौलिममलाममराभिवंद्यामंभोजपाशसृणिपूर्णकपालहस्तां ॥
रक्तांगरागरसनाभरणां त्रिनेत्रां ध्यायेच्छिवस्य वनितां मदविह्वलांगीं ॥१॥ एवं ध्यात्वा मानसैरुपचारैः संपू
ज्य शंखस्थापनं कुर्यात् ॥ ततः पीठपूजां विधाय ॥ केसरेषु जयादि पीठशक्तीः संपूज्य मध्ये क्लीं आसनाय न
मः ॥ इति च संपूज्य ॥ पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजां कुर्यात् ॥ त
द्यथा ॥ अग्निनिर्ऋतिवायुईशानकोणेषु ॥ ऐं हृदयाय ॥ ऐं शिरसे स्वाहा ॥ ऐं शिखायै ॥ ऐं कवचाय ॥ ततो म
ध्ये ॥ ऐं नेत्रत्रयाय ॥ ततो चतुर्दिक्षु ॥ ऐं अस्त्राय फट् ॥ अष्टपत्रेषु ॥ ॐ नित्यायै ॐ निरंजनायै ॐ क्लि
दिन्यै ॐ क्लिन्नायै ॐ मदनातुरायै ॐ मदद्रवायै ॐ द्राविण्यै ॐ द्रविण्यै ॥ सर्वत्र प्रणवादि नमोंते पू
जयेत् ॥ तद्बाह्ये ॥ इंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो पुष्पादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुर
श्चरणं चतुर्लक्षं जपः ॥ तथा चोक्तं तंत्रे ॥ चतुर्लक्षं जपित्वा तु मधुराक्तैर्मीपत्रजैः ॥ कुसुमैरयुतं हुत्वा तोष
येत्पुरमालिनः ॥

अथ वज्रप्रस्तारिणी मंत्राः॥ वाग्भवमायानंतरं नित्यक्लिन्ने मदद्रवे॥ स्वाहांतो रविसंख्यार्णो मंत्रो वश्य
प्रदायकः॥ अस्य पूजायंत्रं॥ षट्कोणं द्वादशारं तच्चतुर्द्वारं चतुरस्रं च॥ अथास्य पूजाप्रयोगः॥ प्रातः कृ
त्यादि पीठन्यासांतं कर्म विधाय॥ केसरेषु जयादि पीठमनुं तन्नित्यस्य॥ ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥
ब्रह्मर्षये शिरसि गायत्र्यै? ऋषये· मुखे त्रिष्टुप् छंदसे· हृदि वज्रप्रस्तारिण्यै देवतायै· ततः करांगन्यासौ कुर्यात्॥ ऐं अं
गुष्ठाभ्यां नमः॥ ऐं तर्जनीभ्यां स्वाहा॥ ऐं मध्यमाभ्यां वषट्॥ ऐं अनामिकाभ्यां हुं॥ ऐं कनिष्ठिकाभ्यां वौषट्॥ ऐं
करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादि॥ ऐं हृदयाय नमः इत्यादि॥ तथा चोक्तं निबंधे॥ बाहू च वेन षडंगानि
विदध्यान्मंत्रवित्तमः॥ ततो ध्यानं॥ रत्नाम्भोरत्नशैले रविदलकमलान्तरे सन्निषण्णां रक्तांगीं रत्नमौलिं
स्फुरितनवशिखाकुंडलां स्मेरवक्त्रां त्रिनेत्रां॥ बीजापूरेषु पाशांकुशसशरधनुः सत्कपालानि हस्तैर्बिभ्राणामा
र्द्रांगीं स्तनभरनमितां मैथिलीकां भावयामः॥ एवं ध्यात्वा मानसैरुपचारैः संपूज्य॥ शंखस्थापनं विधाय
पीठपूजां कुर्यात्॥ पुनर्ध्यात्वा पीठे आवाहयेत्॥ ततः पंचपुष्पांजलिं विधाय॥ आवरणपूजां कुर्यात्॥
आग्नेयादिकोणेषु॥ मध्ये दिक्षु च॥ ऐं हृदयाय नमः॥ ऐं शिरसे स्वाहा॥ ऐं शिखायै वषट्॥ ऐं कवचाय हुं॥ ऐं
नेत्रत्रयाय वौषट्॥ ऐं अस्त्राय फट्॥ इति षडंगं संपूज्य॥ द्वादशदलेषु पूर्वादि॥ ॐ ह्रीं रक्तायै नमः॥ एवं
क्लिन्नायै॥ क्षोभिण्यै॥ मदनातुरायै नमः॥ निरंजनायै॥ वश्यमत्यै॥ मदनावत्यै॥ मेखलायै॥ द्राविण्यै वेग
वत्यै स्मरायै॥ तद्बहिः ब्राह्म्यादि मातृः पूजयेत्॥ तद्बहिरिंद्रादि लोकपालान् पूजयेत्॥ तथा च निबंधे॥ मा
तरो दिग्विदिक्षु चैः पुनः पूज्यादिगीश्वराः॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ तथा च निबंधे॥
अस्य पुरश्चरणं लक्षजपः॥ तथा च॥ मंत्रमंत्री जपेल्लक्षं जपांते जुहुयात्ततः॥ अयुतं राजवृक्षोत्थै
र्घृतसिक्तैः समिद्वरैः॥ राजवृक्षः॥ सोणारु॥ अथ दुर्गामंत्राः॥ अथ दुर्गामनुं वक्ष्ये ह्यष्टाष्टफल
प्रदं॥ मायोत्रिः कर्णबिंद्वाढ्यो भौ सो सर्गवान् च वेत्॥ पंचालकः प्रतिष्ठावान् मारुतो भौतिकासनः॥
तारादि हृदयांतो यं मंत्रो वस्वक्षरात्मकः॥ अत्रिर्दकारः॥ कर्णो उकारः॥ पंचांतको गकारः प्रतिष्ठा आका
रः॥ मारुतो यकारः॥ भौतिक ऐकारः॥ तारमायास्वबीजेन च दुर्गायै हृदयांतत इति भेदः॥

अस्य पूजाप्रयोगः ॥ प्रातः कृत्यादि पीठन्यासांतं विधाय केशरेषु मध्ये च ॥ पीठशक्तिर्विन्यसेत् ॥ तद्यथा ॥
ओं प्रभायै नमः ॥ ईं मायायै नमः ॥ ऊं जयायै ॥ एं सूक्ष्मायै ॥ ऐं विशुद्धायै नमः ॥ ओं नंदिन्यै नमः ॥ औं सुप्रभा
यै नमः ॥ अं विजयायै नमः ॥ अः सर्वसिद्धिदायै नमः ॥ तदुपरि ॥ ओं वज्रनख दंष्ट्रायुधाय महासिंहा
य हुं फट् ॥ नमः इति न्यसेत् ॥ तथा ॥ प्रभा मायाजयासूक्ष्माविशुद्धानंदिनीपुनः ॥ सुप्रभा विजया सर्व
सिद्धिदा नवशक्तयः ॥ ततः ऋष्यादिन्यासः ॥ शिरसि नारद ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदि दु
र्गायै देवतायै नमः ॥ ततः करांगन्यासौ ॥ ह्रां ओं ह्रीं दुं दुर्गायै अंगुष्ठाभ्यां नमः ॥ ह्रीं ओं ह्रीं दुं दुर्गायै तर्जनीभ्यां
स्वाहा ॥ ह्रूं ओं ह्रीं दुं दुर्गायै मध्यमाभ्यां वषट् ॥ ह्रैं ओं ह्रीं दुं दुर्गायै अनामिकाभ्यां हुं ॥ ह्रौं ओं ह्रीं दुं दुर्गायै कनि
ष्ठिकाभ्यां वौषट् ॥ ह्रः ओं ह्रीं दुं दुर्गायै करतलपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ तथा च निबंधे ॥ नमस्कार
विपुत्केन मरल मंत्रेल साधकः ॥ ह्रूमाद्यैः सहकुर्वरल षडंगानि यथाविधिः ॥ ततो ध्यानं ॥ सिंहस्था शशि
शेखरा मरकतप्रख्या चतुर्भिर्भुजैः शंखं चक्र धनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता ॥ आमुक्तांगदहा
रकंकणरणत्कांचीक्वणन्नूपुरा दुर्गा दुर्गतिहारिणी भवतु वो रत्नोल्लसत्कुंडला ॥ एवं ध्यात्वा मानसैः संपूज्य
शंखस्थापनं कुर्यात् ॥ ततः पीठ पूजां कृत्वा केसरेषु मध्ये च पूर्वादि ॥ ओं प्रभायै ॥ ईं मायायै ॥ ऊं जयायै ॥
एं सूक्ष्मायै ॥ ऐं विशुद्धायै ॥ ओं नंदिन्यै ॥ औं सुप्रभायै ॥ अं विजयायै ॥ अः सर्वसिद्धिदायै ॥ तदुपरि ॥
ओं वज्रनखदंष्ट्रायुधाय महासिंहाय हुं फट् नमः इति पूजयेत् ॥ तथा च निबंधे ॥ आदिक्षस्वत्रयक्लीं बेरहि
तैः पूजयेदिमाः ॥ प्रणवानंतरं वज्रनखदंष्ट्रायुधाय च ॥ महासिंहाय वर्मास्त्रांते नतिः सिंहमनुर्मतः ॥ ततः पु
नर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥ आग्नेयनैरृत्यवायव्येशानको
णेषु मध्ये दिक्षु च ॥ ह्रां ओं ह्रीं दुं दुर्गायै हृदयाय नमः ॥ इत्यादिना पूजयेत् ॥ ततः पत्रेषु पूर्वादि ॥ जं जया
यै ॥ विं विजयायै ॥ पं प्रीत्यै ॥ कीं कीर्त्यै ॥ पं पद्मनाभायै ॥ शं श्रद्धायै ॥ मं मेधायै ॥ शं शंकरायै ॥ पत्राग्रेषु ॥

ॐ शंखाय॥ चक्राय॥ गदायै॥ खड्गाय॥ पाशाय॥ अंकुशाय॥ शराय॥ चापाय॥ तद्बुद्धो॥ इंद्रादी
न्वज्रादींश्च प्रजयेत्॥ ततो प्रपाद्य विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं॥ अष्टलक्षं जपः॥
तथा च॥ वसुलक्षं जपेन्मंत्रं तिलैर्मधुरलोडितैः॥ पयसा वा प्रजुहुयात्तत्सवज्ञो जितेंद्रियः॥ तेन वाचामि
कोष्टसहस्रहोमः॥ अथ महिषमर्दिनी मंत्राः॥ तां तं विसर्ग नयानंश्चेतो मर्दिनिम्हृये॥ अष्टाक्षरी स
माख्याता विद्या महिषमर्दिनी॥ नारायणीतंत्रे॥ विषं हि मन्त्रा कालाग्निरुद्र रस्यानि हृदयं॥ विषमं शख
च नादिकार युक्तोदकारः॥ अयं मंत्रः॥ तारादिमायादिः कामादिर्वाग्भवादिवप्र बीजादि पिवक्त्रादिश्चेत्॥ न
वाक्षरो भवति॥ तथा च विश्वसारे॥ प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत्सुधीः॥ वप्र बीजादिकां वापि कव
चाद्यां जपेत्तथा॥ सर्वकालेषु सर्वत्र कामाद्यां प्रजपेत्सुधीः॥ वाग्भवाद्यां जपेत्तां तु देवीं वाक्य विशुद्धये॥ वि
ना बीजेर्महाविद्या नवार्यां परिकीर्तिता॥ पुटिता बीजयुग्मेन मुखे युग्मक्रमेण तु॥ दशाक्षरी समो नास्ति
विद्या त्रिभुवनेश्वरी॥ प्रणवं च तथा माया नवेद्विद्या दशाक्षरी॥ कामं प्रणवमिथ्यत्वं नवे हि द्या पुनर्दश॥
अस्य पूजा॥ प्रातःकृत्यादि पीठन्यासांतं कर्म समाप्य केशरेषु॥ मध्ये च॥ दुर्गाम्बुजोक्तपीठशक्तिः पीठमनुं वि
न्यसेत्॥ ततः प्रवेशक्रमे ष्यादिन्यासं कृत्वा करांगन्यासौ कुर्यात्॥ तद्यथा॥ महिषाहिंसके हुं फट् अंगुष्ठाभ्यां
नमः॥ महिषशत्रोशारि हुं फट् तर्जनीभ्यां स्वाहा॥ महिषं हेषय हेषय हुं फट् मध्यमाभ्यां वषट्॥ महिषं हनदे
वि हुं फट् अनामाभ्यां हुं॥ महिषसूदनि हुं फट् कनिष्ठाभ्यां वौषट्॥ ॐ महिषाहिंसके हुं फट् हृदयाय॥ ॐ
महिषशत्रोशारि हुं फट् शिरसे स्वाहा॥ ॐ महिषं हेषय हेषय हुं फट् शिखायै वषट्॥ ॐ महिषं हन हन देवि हुं फट्
कवचाय हुं॥ ॐ महिषसूदिनी हुं फट् अस्त्राय फट्॥ तथा च तंत्रे॥ ॐ महिषाहिंसिके हुं फट् हृदयाय नमो हृ
दि॥ ॐ महिषशत्रोशारि हुं फट् शिर उदारितं॥ ॐ महिषं हेषय हेषय हुं फट् इति॥ शिखायै मनुः॥ ॐ महिषं ह
न हन देवि हुं फट् कवच इष्यपि॥ ॐ महिषसूदिनि हुं फट् अस्त्रांग प्रेषणु भैरवं॥ एतेन सर्वत्र प्रणवादिः॥
ततो ध्यानं॥ गारुडोपलमालिसंनिभां मौलिकुंडलमंडितां॥

नौमि भास्वद्विलोचनां महिषोत्तमांगनिषेदुषीं॥ शंखचक्रकृपाणखेटकबाणकार्मुकशूलकं तर्जनीम
पि बिभ्रतीं निजबाहुभिः शशिशेखरां॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां
विधाय॥ केसरेषु मध्ये च॥ प्रवेत्क्रुपीठशक्तीः पीठमनुं च यजेत्॥ अस्याः पूजायंत्रं विश्वसारे॥ अथ यंत्रं
प्रवक्ष्यामि सर्वसंपत्प्रदं शुभं॥ त्रिकोणं विन्यसेत्पूर्वं षट्कोणं च ततः परं॥ रजसत्वतमो रेखा योनिमं
डलमंडितं॥ अष्टपत्रं महापत्रं सकिंजल्कसमन्वितं॥ मेखलां गुणरेखां च भूपुरं भूतसंयुतं॥ त्रिर्दु
चं दूर्धनुः भूतलं शारं च विधिना जपेत्॥ नानास्त्रायुतं यंत्रं यः कुर्यात् विधिनात्मना॥ ततः पुनर्ध्यात्वावाह
नादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ अग्निनिर्ऋतिवायुईशानकोणेषु॥ मध्ये दिक्षु
च षडंगं पूजयेत्॥ ततः पत्रेषु पूर्वादि॥ ओं दुर्गायै॥ ईं वरवर्णिन्यै॥ कुं आर्यायै॥ ह्रीं कनकप्रभायै॥
लं कृत्तिकायै॥ ऐं अभयप्रदायै॥ औं कन्यायै॥ अः स्वरूपायै॥ पत्राग्रेषु॥ यं चक्राय॥ रं शंखाय॥
लं खड्गाय॥ वं खेटकाय॥ शं बाणाय॥ षं धनुषे॥ सं शूलाय॥ हं तर्जन्यै॥ ततो हि इंद्रादीन्वज्रादींश्च
पूजयेत्॥ तथा च कुलचूडामणौ॥ अष्टपत्रे यजेद्देवीं दुर्गाद्यां दीर्घ [illegible]॥ आयुधानि दलाग्रे च यादि
भिः क्रमशो यजेत्॥ ब्राह्म्याद्या वा ततः पश्चाल्लोकपालौ मूर्त्तितो वहिः॥ ततस्तानि सिद्धमंत्रो प्रयोगं च समा
चरेत्॥ अस्या बलिमंत्रः स्कंदे॥ उत्तरस्यां दिशि त्रिकोणं मंडलं विलिख्य॥ एहि २ दुर्गे २ मदीयं बलिं देवि लु
लापक २ साधय २ खादय २ सर्वसिद्धिं देहि स्वाहा॥ तथा च॥ एहि २ पदं हुं हुं दुर्गे २ षट्पदद्वयं॥ मदीयं च बलिं
देवि लुलापक पदद्वयं॥ साधयद्वितयं कुर्यात् खादयद्वितयं पुनः सर्वसिद्धिपदं देहि ततः स्वाहापदं वदेत्॥
बलिदानस्य मन्त्रोयं मद्दिव्या परिकीर्तितः॥ ततो [illegible] विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणे अष्टलक्षज
पः॥ अष्टसहस्रं तिलैर्होमः तथा च॥ अष्टलक्षं जपेन्मंत्रं तत्सहस्रं तिलैः [illegible] इति॥ कोडपत्रमिदं॥ अथ जयदु
र्गामंत्रोद्धारः॥ तारो दुर्गे युगं रक्ष॥ मंत्रो [illegible]॥ [illegible] जयदुर्गे यं विधावेदादशाक्षरी॥ अस्य पूजा
जप्रयोगः॥ प्रातः कृत्यादि दुर्गामंत्रोक्त ध्यादि न्यासकर्म सर्वा॥ [illegible] कुर्यात्॥ यथा॥ दुर्गे [illegible] नमः
दुर्गे तर्जनीभ्यां स्वाहा॥ दुर्गायै मध्यमाभ्यां वषट्॥ रक्षिणी अनामिकाभ्यां हुं॥

ॐ दुर्गे दुर्गे रक्षणि कनिष्ठाभ्यां वौषट् ॥ दुर्गे दुर्गे रक्षणी अस्त्राय फट् ॥ एवं हृदयादिषु ॥ यथा निबंधे ॥
तारादि दुर्गे हृदय ॥ दुर्गे शिवउदीरितं ॥ ॐ दुर्गायै स्यात् शिखा वर्म ॥ न्ते रक्षणि कीर्तितं ॥ तारादि दुर्गे
द्वितयं ॥ रक्षिण्यक्षि समीरितं ॥ तारादि दुर्गे युगलं ॥ रक्षेण्यस्त्रमुदीरितं ॥ ततो ध्यानं ॥ कालाभ्राभां क
टाक्षैररिकुलभयदां मौलिबद्धेंदुरेखां शंखं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्रां ॥ सिंहस्कं
धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयंतीं ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिका
मैः ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्यात् ॥ ततः पूर्वोक्त पीठपूजां विधाय पूर्ववत् पूजां कुर्या
त् ॥ अस्य पुरश्चरणं पंचलक्षजपः ॥ घृतेन दशांशहोमः ॥ निबंधे ॥ बाणलक्षं जपेन्मंत्रं घृतेन जुहुयात्त
तः ॥ दशांशं संस्कृते वह्नौ ॥ ब्राह्मणानपि भोजयेत् ॥ अष्टाक्षरादि ले पीठे पूजयेत् पूर्ववत् सुधीः ॥ मंत्रं जपन्
निशीथकं दशान्तु हन्याद्धिंस्रोपतः ॥ पूजयेद्धा वहारादौ तत्रापि विजयी भवेत् ॥ अर्चयेद्दश शस्त्राणि जपाथु
विधयानया ॥ अथ शूलिनीमंत्रः ॥ निबंधे ॥ ज्वल ज्वल पदं स्यात्ते शूलिनीति पदं ततः ॥ दुष्टग्रह हुमस्त्रां
ते वह्निजायावधिर्मनुः ॥ अस्य प्रजापतिः ऋष्यादि दुर्गामंत्रोक्त पीठ मासां ले कृता ॥ ऋष्यादिन्यासं कुर्यात्
यथा ॥ शिरसि दीर्घतपसे ऋषये ॥ मुखे ककुप् छंदसे ॥ हृदि शूलिन्यै देवतायै ॥ ततः षडंगन्यासो ॥ शूलि
नि दुर्गे हुं फट् अंगुष्ठाभ्यां नमः ॥ शूलिनि वरदे हुं फट् तर्जनीभ्यां स्वाहा ॥ शूलिनि विंध्यवासिनि मध्यमा
भ्यां वषट् ॥ शूलिनि असुरमर्दिनि युद्धप्रिये त्रासय २ हुं फट् अनामाभ्यां हुं ॥ शूलिनी देवसिद्धसुपूजिते
नंदिनि रक्ष २ महायोगेश्वरि हुं फट् कनिष्ठिकाभ्यां वौषट् ॥ एवं हृदयादि ॥ यथा निबंधे ॥ दुर्गेहि हृद्वरदे
शीर्षे विंध्यवासिनि तच्छिरः ॥ असुरांते मर्दिनि स्यात् युद्धपूर्वं प्रिये पुनः ॥ त्रासयद्वितयं त्रसिद्धेवसिद्धसु
पूजिते ॥ नंदिनि स्याद्रक्षयुग्मं महायोगीश्वरी क्रमात् ॥ शूलिन्याद्या हुं फडंताः पंचांगमनवः क्रमात् ॥
ततो ध्यानं ॥ ध्यायेद्धाम्नगेंद्र सज्जलजलभरश्यामलां हस्तपद्मैः शूलं बाणं कृपाणं अरिजलजगदां चा
पपाशान्वहंतीं ॥ चंद्रोत्तंसां त्रिनेत्रां चतसृभिरसिमत्खेटकं बिभ्रतीभिः कन्याभिः सेव्यमानां प्रतिभट
भयदां शूलिनीं चानमामि ॥

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्यात्॥ ततः सर्वतःपीठपूजां विधाय पुनरावाहनादि पंचपु
ष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात्॥ अग्निनिर्ऋतिवाय्वीशानेषु दिक्षु च॥ शूलिनि दुर्गे हुं फट्
हृदयाय॥ इत्यादिना पूजयेत्॥ ततः पत्रेषु पूर्वादि॥ दुर्गायै॰ एवं वरदायै॰ विंध्यवासिन्यै॰ असुरमर्दिन्यै॰
युद्धप्रियायै॰ देवसिद्धसुपूजितायै॰ नंदिन्यै॰ महायोगेश्वर्यै॰॥ ततः पत्राग्रेषु लदस्त्राणि शंखचक्रमोहं
पुनः॥ गदेषुचापमूलानि पाशं पश्चादिशोचियान्॥ अस्य पुरश्चरणं पंचदशलक्षजपः॥ यथाविधे
मनुमेनं जपेन्मंत्री वर्णलक्षं विचक्षणः॥ सर्पिषान्नेन वा होमस्तद्दशांशान्विलोचयेत्॥ अथ वर्णितं तुव
स्ये विश्वबोधविधायिनी॥ यस्या मनुपलब्ध्यापि सर्वमेतज्जगज्जडं॥ अथ सरस्वतीमंत्राः॥ क्रोडपत्रे स्ये
ये॥ वागीश्वरीमंत्रौ॥ वद २ वाग्वादिनि वह्निवल्लभेति दशाक्षरः॥ तथा च निबंधे॥ अर्धवरेण संरुद्ध
वाग्वादिनि ठद्वयं॥ सरस्वत्या दशार्णोयं वागैश्वर्यप्रदायकः॥ तथा भुवनेश्वरीसंपुटोयं महासारस्व
तप्रदः॥ अस्य यंत्रं॥ ओंमध्ये रसनार्णकर्णिकमध्ये हंहंस्फुरत्केसरं वर्गाढ्यासितबस्य छदवसुमतीगेहेन
संवेष्टितं॥ आशास्वस्त्रिपुलोंगलोंगलिमुजाक्षोणीपुरे लाल्वलेयंत्रं वर्णगतं परं जिगदितं सर्वार्थसिद्धि
प्रदं॥ अस्य पूजा॥ प्रातःकृत्यादि पीठन्यासांतं विधाय केसरेषु मध्ये च॥ ओं मेधायै॥ ओं प्रज्ञायै॰ ओं प्रभा
यै॰ ओं विद्यायै॰ ओं धियै॰ ओं स्मृत्यै॰ ओं बुद्ध्यै॰ ओं विद्येश्वर्यै॰ मण्डवर्णपद्मासनाय॥ सर्वत्र प्रणवादिनमों
तेन पूजयेत्॥ ततः ऋष्यादिन्यासः॥ तद्यथा॥ शिरसि कण्वऋषये॰॥ मायापुटितश्वेत॥ हृत्स्थलये॥ मु
खे विराट्छंदसे नमः॥ हृदि वागीश्वर्यै देवतायै॰॥ अथ मंत्रन्यासः॥ शिरसि वं नमः॥ श्रवणयोः दं नमः॥ वं
नमः॥ चक्षुषोः दं नमः॥ वाङ्नमः॥ नासिकयोः वां नमः॥ दिं नमः॥ वदने निं नमः॥ लिंगे स्वां नमः॥ गुह्ये हां नमः॥
मातृकयांगन्यासो रुता ध्यायेत्॥ तथा च निबंधे॥ यस्य वर्णानि षडंगानि मातृकोक्तानि कल्पयेत्॥ त
तो ध्यानं॥ तरुणसकलमिंदोर्बिभ्रती शुभ्रकांतिः कुचभरनमितांगी सन्निषण्णा सिताब्जे॥ निजकरकम
लोद्यल्लेखनीपुस्तकश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता नः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थाप
नं कुर्यात्॥ ततः पीठपूजां कृत्वा केसरेषु मध्ये च॥ मेधादिपीठमन्वंतं संपूज्य॥ पुनरावाहनादि पंचपुष्पां

जलिदानपर्यंतंकृत्सावरणपूजां कुर्यात्॥ अग्निकोणे अं कं ५ ओं हृदयाय नमः॥ नैऋते इं चं ५ ईं शिरसे स्वा
हा॥ वायुकोणे उं टं ५ ऊं शिखायै वषट्॥ ईशाने एं तं ५ ऐं कवचाय हुं॥ मध्ये ओं पं ५ औं नेत्रत्रयाय वौषट्॥ दिक्षु
अं यं ९ अः अस्त्राय फट्॥ पत्रेषु हरवीदि॥ ओं योगायै॥ ऐं वंससायै॥ विमलायै॥ ज्ञानायै॥ बुद्ध्यै॥ स्मृत्यै॥ मेधा
यै॥ प्रज्ञायै॥ दलाग्रेषु॥ ब्राह्म्याद्या मातरः पूज्याः॥ तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादिविस
र्जनांते कर्म समापयेत्॥ अस्य पुरश्चरणं दशलक्षं जपः॥ तथा च॥ दशलक्षं जपेन्मंत्रं दशांशं जुहुयात्त
तः॥ पुंडरीकैः पयोयुक्तैस्तिलैर्वा मधुराप्लुतैः॥ हरयांते जगरलिवदशाद्युगे ततः॥ वाग्देवि वद्धू जायांतं
वाग्भवेना घंसमुद्धरेत्॥ अस्य पूजा प्रातः कृत्यादि पीठन्यासांते कर्मीव धामकेशरेषु मध्ये च॥ प्रवेक्तपीठश
क्तीः पीठमनुं च न्यसेत्॥ प्रवक्तेक्तष्यादिन्यासादि कुर्यात्॥ ततः करांगन्यासौ यथा॥ ऐं अंगुष्ठाभ्यां नमः
नमस्तर्जनीभ्यां स्वाहा॥ भगवति मध्यमाभ्यां वषट्॥ वद वद अनामिकाभ्यां हुं॥ वाग्देवि कनिष्ठिकाभ्यां वौषट्
स्वाहा करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा नेत्रिवेंद्ये॥ मनोः षड्भिः पदैः कुर्यात् जातियुक्तं षडंगकं॥
ततो ध्यानं॥ भ्रुवांस्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्वलां व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां
च हस्तांबुजैः॥ बिभ्राणां कमलासनां कुचनतां वाग्देवतां सस्मितां वंदे वाग्विभवप्रदां त्रिनयनां सौभाग्य
संपत्करीं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ शंखस्थापनं तु दक्षिणामूर्तिप्रकरणोक्तं सर्वत्र स
माबोध्यं॥ ततः पूर्वोक्तक्रमेण पूजयेत्॥ तत्र गमंत्रे विशेषः॥ अस्य पुरश्चरणं अष्टलक्षं जपः॥ तथा च
हविष्याशी जपेन्मंत्रं जसंलक्षमतंन्यधीः॥ दशांशं जुहुयाद्दंते तिलै राज्यपरिप्लुतैः॥ तारो माया घरो बिंदुः
शांतिस्तारः सरस्वती॥ उत्तानयंति कोमंत्रः प्रोक्त एकादशाक्षरः॥ अस्य पूजा प्रातः कृत्यादि प्रवेक्तपीठ
मत्रंतं विन्यस्य पूर्वोक्तत्र्यष्यादिन्यासं कुर्यात्॥ ततो मंत्रन्यासः॥ ओं नमो ब्रह्मरंध्रे॥ ह्रीं नमो भ्रूवोर्मध्ये॥
चक्षुषोः एं नमः क्लीं नमः कर्णयोः॥ ओं नमः संनमः नासिकयोः॥ रं नमः स्वं नमः मुखे सेन नमः॥ लिंगे नमः गुह्ये
नमः॥ ततः करांगन्यासौ॥ ऐं अंगुष्ठाभ्यां नमः॥ ऐं तर्जनीभ्यां स्वाहा॥ ऐं मध्यमाभ्यां वषट्॥ ऐं अनामिकाभ्यां
हुं॥ ऐं कनिष्ठिकाभ्यां वौषट्॥ ऐं करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादि॥

तथा च निबंधे ॥ मंत्रवर्णान्यसेन्मंत्री वागर्चने नागकल्पनेत्यादि ॥ ततो ध्यानं ॥ वाणीं पूर्णनिशाकरोज्वल
मुखीं कर्पूरकुंदप्रभां चंद्रार्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात् ॥ वीणामक्षगुणं सुधाढ्यक
लसं विद्यां च तुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यं
स्थापनं कुर्यात् ॥ ततः पीठपूजां विधाय केशरेषु मध्ये च ॥ पूर्वोक्तपीठशक्तीः पीठमनुं यजेत् ॥ पुन
र्मूर्तिमावाहनादि पंचपुष्पांजलिदानपर्यंतं कर्म समाप्यावरणपूजामारभेत् ॥ देव्या दक्षिणे ॥ ॐ संस्कृ
तायै॰ वाङ्मय्यै॰ वामे प्राकृतायै॰ वाङ्मय्यै ॥ ततः केसरेषु ॥ अग्निकोणे ॥ ऐं हृदयाय॰ नैर्ऋते ऐं शिर
से स्वाहा ॥ वायव्ये ऐं शिखायै वषट् ॥ ईशाने ऐं कवचाय हुं ॥ मध्ये ऐं नेत्रत्रयाय वौषट् ॥ दिक्षु ऐं अ
स्त्राय फट् ॥ ततः पत्रेषु पूर्वादि ॥ ॐ प्रज्ञायै॰ मेधायै॰ श्रद्धायै॰ ॐ स्वधायै॰ ॐ शान्त्यै॰ ॐ स्मृत्यै॰ ॐ मत्यै न॰ ॥
ॐ स्वस्त्यै॰ ॥ ततः पत्राग्रेषु ॥ ब्राह्म्याद्या मातरः पूजयेत् ॥ तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत् ॥ त
तो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणे द्वादशलक्षं जपः ॥ तथा च ॥ जपेद्द्वादशलक्षा
णि तत्सहस्रं सिताब्जैः ॥ नागचंपकपुष्पैर्वा जुहुयात्सा च वौसमः ॥ वाचस्पते अमृते प्लुवः प्लुवः पुरि
ति कीर्त्तयेत् ॥ वागाद्यो मनुराख्यातो रुद्रसंख्याक्षरो मनुः ॥ अस्य प्रजादिकं पूर्ववत् ॥ करांगन्यासं स्त
ऐं अंगुष्ठाभ्यां नमः ॥ वाचस्पते तर्जनीभ्यां स्वाहा ॥ अमृते मध्यमाभ्यां वषट् ॥ प्लुवः अनामिकाभ्यां हुं ॥ प्लुः
कनिष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ तथा च निबंधे ॥ कुर्यादंगानि विधिवद्वागाद्यैः पंचभिः पदैः ॥ ध्यानम्
आसीना कमले करैर्जपवटीं पद्मद्वयं पुस्तकं बिभ्राणा तरुणेंदुबद्धमुकुटा मुक्तेंदुकुंदप्रभा ॥ भालोन्मी
लितलोचना कुचभरक्लांता भवद्भूतये भूयाद्वागधिदेवता मुनिगणैरासेव्यमानानिशं ॥ अस्य पूजा
दिकं पूर्ववत् ॥ अस्य पुरश्चरणं एकादशलक्षं जपः ॥ तथा च ॥ रुद्रलक्षं जपेन्मंत्रं दशांशं जुहुयाद्घृ
तैः ॥ तोयस्थं ब्रह्मायनं विष्णोः सदैवतच्चतुर्मुखं ॥ अधरः सेंदुयुतो वह्निबिंदुसंयो बुमान् भृगुः ॥ तोयं व
कारः विष्णुर्नारायण मकारः ॥

केवलेन अकाररहितेन ककारेणाते नंबाग्भवं केचित्तु लक्षितलक्षणया यादवेनदंति॥ आकारयुक्तोव
कारः॥ केमस्तकेवलते अकेवलोनुस्वारः॥ तद्युक्तेन ककारे वर्त्तते॥ तेन क्लामिति तत्र निरूढलक्षणयाः
शक्तितुल्यत्वात्॥ वाक्वाग्भवमिति पर्यायः॥ वस्कतस्क॥ द्वादशस्वरमुद्धृत्य सबिंदुनादविभूषितं॥ बिंदु
नादसमायुक्तं वह्निबीजं समुद्धरेत्॥ षष्ठस्वरसमायुक्तं द्वितीयं बीजमुद्धरेत्॥ चंद्रबीजं समुद्धृत्य स्वरे
णैयोजयेत्ततः॥ त्रयोदशस्वरारूढं बिंदुनादविभूषितं॥ इति विश्वसारवचनात्॥ वाग्भवबीजमेव॥
अस्य पूजा पूर्ववत्॥ करांगन्यासस्तु हृदिहस्तैस्त्रिभिर्बीजैर्विधेयः॥ तथा च निबंधे॥ अंगानि कुर्यात्ये
नैत्रीहस्तैर्जातिसंयुतैः॥ ध्यानं॥ मुक्ताहारावदातां शिरसि शशिकलालंकृतां बाहुभिः स्वैर्व्याख्या
वर्णाक्षमालां मणिमयकलशं पुस्तकं चोद्वहंतीं॥ आपीनोत्तुंगवक्षोरुहभरविलसन्मध्यदेशामधी
शां वाचामीडे चिराय त्रिभुवननमितां पुंडरीके निषण्णां॥ अस्य पुरश्चरणं त्रिलक्षं जपः॥ तथा च॥ त्रि
लक्षं प्रजपेन्मंत्रं जुहुयात्सदशांशतः॥ पायसैराज्यसंसिद्धैः संस्कृते हव्यवाहने॥ अथ पारिजातसरस्व
ती मंत्राः॥ मंत्रदेवप्रकाशिकायां॥ सच प्रणवहल्लेखासंघटितहकारसकारौ बिंदुयुक्त सरस्वती उ-त्ता
नलिश्वेति नमपरं॥ अस्य पूजा प्रातःकृत्यादिपीठमंत्रांतं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि कण्वऋ
षये॥ मुखे त्रिष्टुप्छंदसे॥ हृदि पारिजातसरस्वत्यै देवतायै॥ ततो मातृकां कृत्वा करांगन्यासं कुर्यात्॥
मर्भिभ्रूमध्यनेत्रकर्णनासापुटहृदयवदनगुह्यपादेषु॥ एकादशाक्षरन्यासः॥ ततो हसांत्रं गुह्या॥
इसादिना करांगन्यासो कुर्यात्॥ अनलस्वेत् पूर्ववत्॥ दक्षिणामूर्तिसंहितायां॥ सप्तमद्वीयांचे रव्यां वाग्भ
व बीजमालिखेत्॥ तारेण परमो देवि संपुटीकृत्य मंत्रवित्॥ सरस्वत्यै हृदंतोयं रुद्राणमिनुरीरितः॥
दक्षिणामूर्तिऋषिः प्रोक्तो गायत्रीछंद ईरितं॥ पारिजातेश्वरीवाणी देवतापरिकीर्तिता॥ तृतीयं चद्विती
यं च बीजं शक्तिश्च तारकं॥ कीलकं परमेशानी मोहसारस्वतप्रदं॥ षडदीर्घस्वरसंभिन्नबीजेनांगानि
विन्यसेत्॥ ततो ध्यानं॥

हंसारूढा विहसित मुखी हार कुंदावदाता वाणी मंदस्मित तर मुखी मौलि बद्धेंदु रेखा ॥ विद्या वीणामृ
तमय घटाक्षस्रजा दीप्त हस्ता शुभ्राब्जस्था भवदभिमत प्राप्तये भारती स्यात् ॥ अस्य पूजादिकं प्र
वक्ति एकादशाक्षरीवत् ॥ अस्य पुरश्चरणं लक्ष्मद्वादश लक्ष जपः ॥ अर्क पुष्पैर्नागचंपक पुष्पैर्वा जु
हुयात् ॥ द्वादश सहस्रकं ॥ इति सरस्वती मंत्राः ॥ पादांबुज ध्यान नवद्योनयस्य विघ्नांधकारो विलयं
प्रयाति ॥ सिंदूर कांतिं गजराज वक्त्रं तं नौमि लंबोदर मौक्तिकेयं ॥ अथ वक्ष्ये गणपते मंत्रान्सर्वार्थ
सिद्धिदान् ॥ यान् ज्ञात्वा मानवा नित्यं साधयंति मनोरथान् ॥ अथ गणेश मंत्राः ॥ पंचांतकं शक्ति
धरं बीजं गणपते बिंदुः पंचांतकं गकारः ॥ अस्य पूजाप्रयोगः ॥ प्रातः स्मरणादि पीठन्यासांतं विधाय के
सरेषु मध्ये च ॥ ॐ तीव्रायै ॐ ज्वालिन्यै ॐ नंदायै ॐ भोगदायै ॐ कामरूपिण्यै ॐ उग्रायै ॐ
तेजोवत्यै ॐ सत्यायै ॐ विघ्ननाशिन्यै ॥ तदुपरि सर्वशक्ति कमलासनाय ॥ तथा च ॥ तीव्रा स्या
ज्वालिनी नंदा भोगदा कामरूपिणी ॥ उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ॥ सर्वशक्ति कम
लासनाय हृदयावधि ॥ पीठ मंत्रोयमेतेन प्रदद्यादासनं विभोः ॥ ततः ऋष्यादिन्यासः ॥ यथा ॥ शि
रसि गणक ऋषये ॥ मुखे निचृद्गायत्री छंदसे ॥ हृदि गणेशाय देवतायै ॥ ततः करांगन्यासौ ॥
गां अंगुष्ठाभ्यां नमः ॥ गीं तर्जनीभ्यां स्वाहा ॥ गूं मध्यमाभ्यां वषट् ॥ गैं अनामिकाभ्यां हुं ॥ गौं कनि
ष्ठिकाभ्यां वौषट् ॥ गः करतल करपृष्ठाभ्यां फट् ॥ अंगन्यासः ॥ गां हृदयाय ॥ गीं शिरसे स्वाहा ॥ गूं
शिखायै वषट् ॥ गैं कवचाय हुं ॥ गौं नेत्रत्रयाय वौषट् ॥ गः अस्त्राय फट् ॥ तथा च निबंधे ॥
षड्दीर्घभाजा बीजेन कुर्यादंगानि षट् क्रमात् ॥ ततो ध्याने ॥ सिंदूराभं त्रिनेत्रं पृथुलतरजठ
रं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभिरामं ॥

बालेंदुधोलमौलिं करिपतिवदनं दानपूर्णार्द्रगंडं ॥ भोगींद्राबद्धमौलिं जयत गणपतिं रक्तवस्त्रांगरा
गं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततः पीठपूजां विधाय केसरेषु ॥ मध्ये च ॥ ती
व्रादीपीठमंत्रं तं पूजयेत् ॥ मूलेन मूर्तिं संकल्प्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानं विधायावर
णपूजां कुर्यात् ॥ कर्णिकायां पूर्वादिदिक्षु ॥ ॐ गणाधिपतये ॐ गणेशाय ॐ गणनायकाय ॐ गण
क्रीडाय ॥ ततः केशरेषु ॥ अग्निनिर्ऋतिवायुईशाने मध्ये दिक्षु च ॥ गां हृदयाय ॥ इत्यादिना पूजयेत् ॥
नाक्यंतु ॥ ॐ वक्रतुंडाय ॥ इत्यादिक्रमेण पूजयेत् ॥ दलाग्रेषु ॥ ब्राह्म्याद्या मातरः पूर्वादिक्रमेण पूज्याः ॥
तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं च
तुर्लक्षं जपः ॥ तथा च ये दलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः ॥ मोदकैः पृथुकैर्लाजैः सक्तुभिरिक्षु
पर्वभिः ॥ नारिकेलैः तिलैः शुद्धैः स्वपक्वैः कदलीफलैः ॥ अष्टद्रव्याणि विप्रास्य पृथितानि मनीषिभिः ॥
श्रीशक्तिस्मरभूविष्णवीजानि प्रथमं वदेत् ॥ ङें तं गणपतिं पश्चात् वरवरदं पदं ॥ उक्त्वा सर्वजनं मे ते
वशमानय पदद्वयं ॥ अष्टाविंशाक्षरो यं ताराद्यो मनुरीरितः ॥ स्मृतिस्थं मांसमौर्विंदुयुक्तं च बीजमीरि
तं ॥ स्मृतिर्गकारः ॥ मांसं लकारः ॥ अस्य पूजाप्रयोगः ॥ प्रातः कृत्यादि पीठन्यासांतं विधाय पूर्वोक्तपीठ
मंत्रं तं पीठशक्तीर्विन्यस्य ऋष्यादिन्यासमाचरेत् ॥ शिरसि गणकऋषये ॥ मुखे निचृद्गायत्रीछंद
से ॥ हृदि महागणपतये देवतायै ॥ ततः करांगन्यासौ ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गां अंगुष्ठाभ्यां नमः ॥ ॐ ५ गीं
तर्जनीभ्यां स्वाहा ॥ ॐ ५ गूं मध्यमाभ्यां वषट् ॥ ॐ ५ गैं अनामिकाभ्यां हुं ॥ ॐ ५ गौं कनिष्ठिकाभ्यां वौषट्
ॐ ५ गः करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादि ॥ केचित्तु ॥ ॐ गां हृदयाय ॐ गीं शिरसे स्वाहा ॥ इत्यादि

क्रांसाक्रान्चनसंनिभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां

तत्र॥ षट्बीजस्य स्वबीजेनेति वचनाद्विशिष्टस्यैव ग्रहणात्॥ ततो ध्यायेत्॥ नवरत्नमयं द्वीपं स्म
रेदिक्षुरसांबुधौ॥ तद्वीचिधौतपर्यंतं मंदमारुतसेवितं॥१॥ मंदारपारिजातादिकल्पवृक्षलताकुलं॥
उद्भूतरत्नधाराभिररुणीकृतभूतलं॥२॥ उद्यद्दिनकरेंदुभ्यामुद्भासितदिगंतरं॥ तस्य मध्ये पारिजातं नवर
त्नमयं स्मरेत्॥३॥ ऋतुभिः सेवितं षड्भिरनिशं प्रीतिवर्द्धनैः॥ तस्याधस्तान्महापीठे रचिते मातृकांबुजे
॥४॥ षट्कोणांतस्त्रिकोणस्थं महागणपतिं स्मरेत्॥५॥ हस्तींद्राननमिंदुचूडमरुणच्छायं त्रिनेत्रं रसा
दाश्लिष्टं प्रियया सपद्मकरया स्वांकस्थया संततं॥ बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलं
व्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहंतं भजे॥६॥ गंडमध्यगलद्दानपूरलोलसमानसान्॥ द्विरे
फान्कर्णतालाभ्यां वारयंतं मुहुर्मुहुः॥७॥ कराग्रधृतमाणिक्यकुंभवक्त्रविनिःसृतैः॥ रत्नवर्षैः प्रीणयं
तं साधकान्मदविह्वलं॥ माणिक्यमुकुटोपेतं रत्नाभरणभूषितं॥८॥ एवं ध्यात्वा मानसैः संपूजयेत्
अस्य पूजायंत्रं॥ त्रिकोणं षट्कोणं च॥ अन्यत्सर्वं मातृकायंत्रवत्॥ ततः शंखस्थापनं कृत्वा पीठपूजां
विधाय॥ पूर्वोक्तपीठशक्तीः पीठमनुं च संपूज्य पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधा
यावरणपूजामारभेत्॥ त्रिकोणबाह्ये पूर्वादिचतुर्दिक्षु पूर्वे बिल्ववृक्षाधः श्रियं श्रीपतिं॥ दक्षिणे
वटवृक्षाधः॥ गौरीं गौरीपतिं॥ पश्चिमे पिप्पलवृक्षाधः॥ रतिं रतिपतिं॥ उत्तरे प्रियंगुवृक्षाधः॥
महीं वराहं देवताग्रे लक्ष्मीगणनायकं॥ षट्कोणेषु॥ अग्निकोणे सिद्धिसहितमामोदं॥ अग्नि
कोणे समृद्धिसहितं प्रमोदं॥ ईशानकोणे कांतिसहितं सुमुखं॥ पश्चिमे मदनावतीसहितं दुर्मुखं॥ नैर्ऋ
ते मदद्रवासहितं विघ्नं॥ वायव्ये द्राविणीसहितं विघ्नहर्तारं पूजयेत्॥ षट्कोणस्य उभयपार्श्वयोः
वसुधारासहितं शंखनिधये॥ वसुमतीसहितं पद्मनिधये॥ ततः केसरेषु॥ अग्न्यादिकोणे
षु मध्ये दिक्षु च॥ षट्बीजस्य गां हृदयादि नमः स्वाहादिना पूजयेत्॥

पत्रमध्ये ब्राह्म्याद्याः संपूज्य च गृहे हं इंद्रादीनू वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापये
त् ॥ अस्य पुरश्चरणं चतुश्चत्वारिंशत्सहस्राधिकचतुर्लक्षं जपः ॥ तथा च ॥ ध्यायेन्मंत्रं जपेन्मंत्री चतु
र्लक्षं समाहितः ॥ चतुःसहस्रसंयुक्तं चत्वारिंशत्सहस्रकं ॥ दशांशं जुहुयाद्द्रव्यैरष्टभिर्मोदकादिभिः
शक्तिस्तु निजं बीजं महागणपतिं वदेत् ॥ ङेंतमग्निवधूः प्रोक्तो मंत्रोयं द्वादशाक्षरः ॥ अस्य पूजाप्रयो
गः ॥ प्रातः कृत्यादि तीर्थादि पीठशक्ती पीठमनुसहित पीठन्यासं कुर्यात् ॥ यथा ॥ शिरसि गणकऋषये ॥
मुखे निचृत् गायत्री छंदसे ॥ हृदि गणाधिपतये देवतायै ॥ गणकस्या ऋषिश्छंदो गायत्री निचृदीरितं ॥
उदिता देवता मंत्रे नाम्ना शक्तिगणाधिपः ॥ ततः अंगन्यासो ॥ ह्रीं अंगुष्ठाभ्यां नमः ॥ गं तर्जनीभ्यां स्वाहा ॥ ह्रीं म
ध्यमाभ्यां वषट् ॥ महागणपतये अनामाभ्यां हुं ॥ स्वाहा कनिष्ठिकाभ्यां वौषट् ॥ समुदायमुच्चार्य करतलकर
पृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ तथा च निबंधे ॥ न्यस्तैः समस्तैर्मंत्रस्य पदैरंगानि कल्पयेत् ॥ मुक्तागौरं स
दगजमुखं चंद्रचूडं त्रिनेत्रं हस्तैः स्वीयैर्दधतमरविंदांकुशौ रत्नकुंभं ॥ अंकस्थायाः सरसिजरुचं
स्तध्वजालं विपाणेर्द्व्यायानौ विनिहितकरं रक्तमौलिं नजोमः ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं
कुर्यात् ॥ ततः पीठपूजां विधाय ॥ तीर्थादिपीठमनं तं पूजयेत् ॥ ततः पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलि
दानपर्यंतं विधायावरणपूजामारभेत् ॥ रवौ त्रिकोणे लाशिमिथुनानि ॥ षट्कोणे आमोदादीन् केसरेषु ॥ अ
ग्न्यादिकोणेषु मध्ये दिक्षु च ॥ ह्रीं हृदयाय नमः ॥ गं शिरसे स्वाहा ॥ ह्रीं शिखायै वषट् ॥ महागणपतये कवचा
य हुं ॥ स्वाहा नेत्रत्रयाय वौषट् ॥ समुदायमुच्चार्य अस्त्राय फट् ॥ पत्रेषु ब्राह्म्याद्या मातरः ॥ तद्बहिरिंद्रादी
न्वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ यंत्रं स्थलं ॥ महागणपतियंत्रं वदेत् ॥ अ
स्य पुरश्चरणं लक्षं जपः ॥ तथा च ॥ लक्षमेकं जपेन्मंत्रं प्रजपेत्तद्दशांशतः ॥ जुहुयादर्चिते वह्नौ दिनशो देवम
र्चयेत् ॥

सांकांचनसंनिभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिंच्यमानां
श्रियं ॥ बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितंबबिंबललितां वंदेरविं

शक्तिः रुद्रं निजं बीजं वशमानय ठद्वयं ॥ तारो व्योममनुराख्यातो रुद्रसंख्याक्षरान्वितः ॥ अस्य पूजा पूर्ववत्
अंगमंत्रस्तु ॥ एकेन त्रिभिर्द्वाभ्यां समस्तेन कल्पयेत् ॥ तथा च निबंधे ॥ एकेनाद्यो त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यां
मनंतरं ॥ समस्तेनास्त्रमाख्यातं अंगक्लृप्तिरियं मता ॥ एतानि अंगुष्ठादिषु हृदयादिषु न्यसेत् ॥ ध्यानं तथा
हस्तैर्बिभ्रतमिक्षुदंडवराभौ पाशांकुशौ पुष्करस्पृष्टस्वप्रमदावरांगमलया श्लिष्टं ध्वजाग्रस्पृशा ॥ श्यामांग्या वि
धृतालयात्रिनयनं चंद्रार्धचूडं जवारक्तं हस्तिमुखं स्मरामि सततं भोगाभिलाषे विभुं ॥ अस्य पुरश्चरणं
लक्षत्रयं जपः ॥ तथा च ॥ लक्षत्रयं जपेन्मंत्रं ईक्षुदंडैर्दशांशतः ॥ अष्टप्रैराज्ययुक्तैर्जुहुयान्मंत्रसिद्ध
ये ॥ अथ हेरंबमंत्रः ॥ सव्यकर्णोंकारयुक्तो गकारः सबिंदुः प्रणवादिः नमोंतश्चतुरक्षरः ॥ चतुर्वर्गफलप्र
दः ॥ पंचांतको बिंदुयुक्तो वामकर्णेन संयुतः ॥ तारादिहृदयांतोयं हेरंबमनुरीरितः ॥ चतुर्वर्णात्मकोन्त
र्णांचतुर्वर्गफलप्रदः ॥ अस्य पूजाप्रयोगः ॥ प्रातः कृत्यादि पीठन्यासांतं कर्म विधाय पूर्वोक्तपीठन्यासं कु
र्यात् ॥ मूर्ध्नि गणकऋषये ॥ मुखे गायत्रीछंदसे ॥ हृदि हेरंबाय देवतायै ॥ गुह्ये गकाराय बीजाय ॥
पादयोर्बिंदवे शक्तये ॥ गां हृदयाय ॥ इत्यादिना षडंगानि कुर्यात् ॥ षड्दीर्घभाजा बीजेन षडंगानि प्रक
ल्पयेत् ॥ अस्य गणकऋषिर्गायत्री छंदः ॥ हेरंबो देवता गकारो बीजं बिंदुः शक्तिः गां गीं गूं गैं गौं गः ॥ इत्यं
तैः षडंगानि ॥ ध्यानं ॥ मुक्ताकांचननीलकुंदघुसृणच्छायैस्त्रिनेत्रान्वितैर्नागास्यैर्हरिवाहनं शशिधरं बालार्ककी
टिप्रभं ॥ दृप्तं दानमभीतिमोदकरवरान् टंकं शिरोक्षात्मिकां मालामुद्गरमंकुशं त्रिशिखकं दोर्भिर्दधानं भजे ॥ ए
वं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ गणेशोक्तपीठशक्त्यंतं संपूज्य ॥ ॐ हुं हुं महासिंहाय गां
हेरंबासनाय ॥ इति पूजयेत् ॥ प्रणवं कवचद्वंद्वं महासिंहाय गांततः ॥ हेरंबेति पदं पश्चादासनाय हृदंति
नः ॥

अयमासम मंत्रः स्यात्प्रद्घाद् मुनासने ॥ तारादिनिजबीजेन मूर्तिं तस्य प्रकल्पयेत् ॥ न्यासेपि त्र्यं मंत्रः
ततः ॐ गं इति मंत्रेण मूर्तिं प्रकल्प्यावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥ यथा
अग्न्यादिकोणेषु मध्ये दिक्षु च गां हृदयाय ॥ इत्यादि पूजयेत् ॥ पत्रेषु विघ्नं विनायकं शूरं वीरं वरदं संज्ञकम्
इभवक्त्रं चैकदंतं लंबोदरं प्रपूजयेत् ॥ पत्राग्रे ब्राह्म्यादि तद्बाह्ये लोकपालान् ॥ तद्बहिः इंद्रादीन् वज्रादींश्च प्र
जयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणे त्रिलक्षजपः ॥ तथा च ॥ लक्षत्रयं जपे
न्मंत्रं द्वांशं जुहुयात्तिलैः ॥ गं क्षिप्रप्रसादनाय हृदयं ॥ तथा च ॥ संवर्तकोनेत्रयुक्तः पार्श्वेन ध्यासनेस्थि
तः ॥ प्रसादनाय हृन्मंत्रः स्वबीजाद्योर्णाक्षरः ॥ अस्य पूजा प्रातः कृत्यादि गणेशपीठन्यासांतं कर्म समा
प्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि गणकऋषये ॥ मुखे विराट् छंदसे ॥ हृदि क्षिप्रप्रसादनाय ॥ तथा च ॥
गणको मुनिरस्य स्याद्विराट् छंद उदाहृतं ॥ क्षिप्रप्रसादनो विघ्नो देवतास्य समीरिता ॥ दीर्घयुक्तेन बीजे
न षडंगानि प्रकल्पयेत् ॥ ततः एकाक्षरवत् कृतांगन्यासो रूपं ध्यायेत् ॥ पाशांकुशौ कल्पलतां विषाणं दध
त्स्वशुंडाहितबीजपूरः ॥ रक्तस्त्रिनेत्रस्तरुणेंदुमौलिर्हारोज्ज्वलो हस्तिमुखो वताद्वः ॥ इति ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात् ॥ अग्न्यादिषु गां हृदयाय ॥ ततः सर्वं पीठपूजां विधाय पुनर्ध्यात्वावाहनादि
पंच पुष्पांजलिदानं विधायावरणपूजां कुर्यात् ॥ अग्न्यादिषु गां हृदयाय ॥ इत्यादि पूजयेत् ॥ पत्रेषु ॥ विघ्नं
विनायकं शूरं वीरं वरदं संज्ञकं ॥ इभवक्त्रं चैकदंतं लंबोदरं संप्रपूजयेत् ॥ तथा च ॥ अंगानि पूर्वमभ्यर्च्य विघ्ना
न्येष्टौ यजेत्ततः ॥ विघ्नं विनायकं शूरं वीरं वरदसंज्ञकं ॥ इभवक्त्रं चैकदंतं लंबोदरमनंतरं ॥ पत्राग्रे चर्चयेद्दे
ताः ब्राह्म्याद्यास्तदनंतरं ॥ पत्राग्रेषु ॥ ब्राह्म्याद्याः वहिरिंद्रादीन् तद्बहिर्वज्रादींश्च पूजयेत् ॥

ततोऽष्टपादिविसर्जनान्तं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः तथा च॥ लक्षं जपेज्जपेस्यान्ते जुहुयात्स्फुल
तिलैः॥ मधुरत्रिलयैर्द्रव्यैरथवाष्टभिरीरितैः॥ अथ हरिद्रागणेशमन्त्राः॥ पंचान्तकोपरासंस्थो बिंदुभूषितम
स्तकः॥ एकाक्षरो महामन्त्रः सर्वकामफलप्रदः॥ अस्य ब्रह्मा ऋषिः गायत्री छंदः हरिद्रागणपतिर्देवता ग
कारो बीजं लकारः शक्तिः स्वबीजेनैव षडंगकं॥ ध्यानं तु॥ हरिद्राभं चतुर्बाहुं हरिद्रावसनं विभुं॥ पाशांकु
शधरं देवं मोदकं दंतमेव च॥ एवं ध्यात्वा गणपतिं पूजयेत्॥ आवरणपूजादिकं॥ एकाक्षरगणपति
वत्॥ अस्य पुरश्चरणं च लक्षजपः॥ त्रिमधुरयुक्तहरिद्राचूर्णमिश्रितैस्तंडुलैर्होमः॥ तन्त्रांतरे
मन्त्रोद्धारं महं वक्ष्ये शृणुष्व कमलानने॥ इंद्रबीजं समुद्धृत्य निजबीजं समुद्धरेत्॥ चतुर्दशस्वरेणा
ढ्यं बिंदुभूषितमस्तकं॥ एकाक्षरी महाविद्या कथिता पद्मयोगिना॥ अस्य पूजादिकं सर्वं महागण
पतिवत्॥ करांगन्यासस्तु स्वबीजेन षड्दीर्घयुक्तेन॥ अस्य मंत्रांतरं॥ लक्ष्म्याद्यां वा कलाद्यां
वामायाद्यां वा जपेत्सुधीः॥ कामाद्यां वा वधूबीजाद्यां वा च प्रजपेत्सदा॥ ॐकाराद्यां महाविद्यां निज
बीजादिकां तथा॥ एकाक्षरी महाविद्या त्र्यक्षरी चास्त्रसंयुता॥ चतुर्वर्णात्मिका विद्या वेद्विजायाव
धिप्रिये॥ एषा विद्या महाविद्या त्रैलोक्ये चैव दुर्लभा॥ चतुर्वर्गप्रदा साक्षान्महापातकनाशिनी॥
एतासां पूजादिकं महागणपतिमंत्रवत्॥ अथास्य कवचं॥ ईश्वर उवाच॥ शृणु वक्ष्यामि कवचं सर्वसि
द्धिकरं प्रिये॥ पठित्वा धारयित्वा च मुच्यते सर्वसंकटात्॥१॥ अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत्॥
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि॥२॥ ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि॥ संमोदो
भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः॥३॥ गणक्रीडश्चक्षुर्युग्मं नासायां गणनायकः॥ गणक्रीडान्वितः

पातु वदने सर्वसिद्धये ॥४॥ जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा ॥ विघ्नेशो हृदये पातु विघ्नना
शश्च वक्षसि ॥५॥ गणानां नायकः पातु बाहुयुग्मं सदा मम ॥ विघ्नकर्त्ता च उदरे विघ्नहर्त्ता च लिंगके ॥
॥६॥ गजवक्त्रः कटीदेशे एकदंतो नितंबके ॥ लंबोदरः सदा पातु गुह्यदेशे ममारुणः ॥७॥ व्यालयज्ञोप
वीती मां पातु पादयुगे तदा ॥ जापकः सर्वदा पातु जानुजंघे गणाधिपः ॥८॥ हारिद्रः सर्वदा पातु सर्वांगं
गणनायकः ॥ य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि ॥ कवचं सर्वसिद्ध्यर्थं सर्वविघ्नविनाशकं ॥ सर्व
सिद्धिकरं साक्षात् सर्वपापविमोचनम् ॥१०॥ सर्वसंपत्प्रदं साक्षात् सर्वशत्रुक्षयंकरं ॥ ग्रहपीडाज्वरारो
गाद्यैश्चोपसर्गसमुद्भवः ॥११॥ पठनाच्छ्रवणादेव नाशमायांति तत्क्षणात् ॥ धनधान्यकरं देवि कवचं सुर
पूजितं ॥१२॥ समो नास्ति महेशानि त्रैलोक्ये कवचस्य च ॥ हारिद्रस्य महेशानि कवचस्य च भूतले ॥१३
किमन्यैरसदालापैर्यत्रायुर्व्ययतामियात् ॥ इति विश्वसारतंत्रे हारिद्रगणेशस्य कवचं समाप्तं ॥ छ ॥
अथ वक्ष्ये प्रियो मंत्रान् श्रीसौभाग्यफलप्रदान् ॥ यस्याः कटाक्षमात्रेण त्रैलोक्यमपि वर्त्तते ॥ अथ ल
क्ष्मीमंत्राः ॥ वालं वह्निसमारूढं वामनेत्रेंदुसंयुतं ॥ बीजमेतत् प्रिये प्रोक्तं सर्वकामफलप्रदं ॥ अस्य प्र
जापप्रयोगः ॥ प्रातः कृत्यादि पीठन्यासांतं कर्म विधाय ऋष्यादिन्यासांतं कुर्यात् ॥ शिरसि भृगुऋषये
नमः ॥ मुखे त्रिष्टुप् छंदसे ॥ हृदि श्रियै देवतायै ॥ केसरेषु मध्ये च ॥ ॐ विभूत्यै ॐ उन्नत्यै ॐ वृ
त्यै ॐ स्मृत्यै ॐ कीर्त्यै ॐ सरस्वत्यै ॐ पुष्ट्यै ॐ तुष्ट्यै ॐ ऋध्यै श्रीं आसनाय ॥ ततः करांगन्या
सौ ॥ श्रां अंगुष्ठाभ्यां नमः ॥ श्रीं तर्जनीभ्यां स्वाहा ॥ श्रूं मध्यमाभ्यां वषट् ॥ श्रैं अनामिकाभ्यां हुं ॥ श्रौं कनिष्ठाभ्यां वौ
षट् ॥ श्रः करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादि ॥ अंगानि दीर्घयुक्तेन रमाबीजेन कल्पयेत् ॥ ततो ध्यानं ॥

कांसा कांचनसंनिभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां
श्रियं ॥ बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितंबबिंबललितां वंदेरविं
दस्थितां ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ अस्याः पूजायंत्रं दक्षिणामूर्तिसंहिता
यां ॥ अष्टपत्रं लिखेत्पद्मं त्र्यावहिर्बिंबमालिखेत् ॥ मध्ये पुष्पं विनिःक्षिप्य पीठशक्तीः समर्चये
त् ॥ ततः पीठपूजां विधाय ॥ पूर्वादिकेसरेषु मध्ये च विमलादिपीठमन्त्रैः संपूज्य पुनर्ध्याना
वाहनादि पंचपुष्पांजलिदानपर्यंतं कर्म निधाय आवरणपूजामारभेत ॥ तद्यथा ॥ अग्न्यादिके
शरेषु ॥ मध्ये दिक्षु च ॥ श्रीहृदयाय नमः ॥ इत्यादिना संपूज्य ॥ दिग्दलेषु पूर्वादि ॥ ॐ वासुदेवाय ॥
एवं संकर्षणाय ॥ प्रद्युम्नाय ॥ अनिरुद्धाय ॥ विदिग्दलेषु ॥ ॐ दमकाय ॥ एवं सलिलाय ॥ गु
ग्गुलवे ॥ कुरुंटकाय ॥ ततो देव्या दक्षिणे ॥ ॐ शंखनिधये ॥ ॐ वसुधारायै ॥ वामे ॥ ॐ पद्मनि
धये ॥ ॐ वसुमत्येन ॥ पत्राग्रेषु पूर्वादि ॥ ॐ बलाक्यै ॥ एवं विमलायै ॥ कमलायै ॥ वनमालिका
यै ॥ विभीषिकायै ॥ मालिकायै ॥ शांकर्यै ॥ वसुमालिकायै ॥ तद्बहिश्चारिंद्रादीन् वज्रादींश्च पूजयेत् ॥
ततो धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तथा च ॥ भानुलक्षं जपे
न्मंत्रं दीक्षितो विजितेंद्रियः ॥ तत्सहस्रं प्रजुहुयात् कमलैर्मधुरोक्षितैः ॥ जपांते जुहुयान्मंत्री तिलैर्वा
मधुरांप्लुतैः ॥ बिल्वैः फलैर्वा जुहुयात् त्रिभिर्वा साधकोत्तमः ॥ नागरमेवं वनिता विद्धोर्माया मकरः कृतनः
चतुर्वर्णात्मको मंत्रश्चतुर्वर्गप्रदायकः ॥ अस्य प्रजादिकं पूर्ववद्बोद्धव्यं ॥ ध्याने तु विशेषः ॥ माणिक्य
प्रतिमप्रभां हिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरासिच्यमानां सदा ॥ हस्ता
ब्जैर्वरदानमंबुजयुगाभीतिर्दधानां करैः कांतां कांक्षितपारिजातलतिकां वंदे सरोजासनां ॥ अस्य पुरश्च
रणं द्वादशलक्षजपः ॥ तथा च ॥ भानुलक्षं जपेन्मंत्रं हविष्याशी सरोरुहैः ॥ जुहुयाद्दशांशैः पुष्पैस्तत्स
हस्रं जितेंद्रियः ॥ इति वचनात् ॥ नमः कमलांते वासिन्यै ठद्वयमिति प्रोक्तो दशाक्षरः पूर्ववत्पीठमन्त्रं
ते विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि ब्रह्मणे ऋषये ॥ मुखे विराट् छंदसे ॥ हृदि श्रियै देवतायै ॥

ततः करांगन्यासो॥ यथा॥ ॐ देव्यै नमः अंगुष्ठा०॥ ॐ पद्मिन्यै नमः तर्जनी०॥ ॐ विष्णुपत्न्यै नमः मध्य०
ॐ वरदायै नमः अनामिका०॥ ॐ कमलरूपायै नमः कनिष्ठा०॥ एवं ॐ देव्यै नमः हृदयाय नमः॥ ॐ
पद्मिन्यै नमः शिरसे स्वाहा॥ ॐ विष्णुपत्न्यै नमः शिखायै०॥ ॐ वरदायै नमः कवचा०॥ ॐ कमलरूपा
यै नमोऽस्त्राय फट्॥ तथा च॥ निबंधे॥ देव्यै हृदयमाख्यातं पद्मिन्यै शिर ईरितं॥ विष्णुपत्न्यै शिखा
प्रोक्ता वरदायै तनुच्छदं॥ अस्त्रं कमलरूपायै नमोंताः प्रणवादिकाः॥ ततो ध्यानं॥ आसीना सरसीरु
हस्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभयेन वपुषा सौदामिनी सन्निभा॥ मुक्ताहारवि
राजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वः कमला कटाक्षविभवैरानंदयंती हरिं॥ एवं ध्यात्वा
मानसैः संपूज्य बहिः पूजामारभेत्॥ ततः शंखस्थापनं कृत्वा पूर्वोक्तपीठशक्तिसहितपीठमन्वंतं पीठ
पूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ अग्न्यादि
कोणचतुष्के षु दिक्षु च॥ ॐ देव्यै नमो हृदयाय०॥ ॐ पद्मिन्यै नमो शिरसे०॥ ॐ विष्णुपत्न्यै नमो शिखा०
ॐ वरदायै नमः कवचा०॥ ॐ कमलरूपायै नमोऽस्त्राय फट्॥ ततः पूर्वादिदलेषु पूर्ववत्॥ बला
ध्यादि पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥
अस्य पुरश्चरणं द्वादशलक्षं जपः॥ तथा च॥ द्वादशलक्षं जपेन्मंत्रं मंत्रविद्विजितेंद्रियः॥ दशांशं जु
हुयान्मंत्री मधुराक्तैः सरोरुहैः॥ तारो वाग्भवं माया रमा कामस्ततो जगत्प्रसूत्यै नमः॥ तथा॥ वाग्भ
वं शंभुवनिता रमा मकरकेतनः॥ तारादि पंचजगत्प्रसूत्यै बिंदु बीजसमुज्वलः॥ अयं दशाक्षरो
मंत्रो मंत्रोयं द्वादशाक्षरः॥ महालक्ष्म्याः समुद्दिष्टस्तारापाशः सर्वसिद्धिदः॥ अस्य पूजामा
तः रूपादि श्रीबीजोक्तपीठन्यासं विधाय॥ ऋष्यादिन्यासं कुर्यात्॥ शिरसि भृगुऋषये०॥ मुखे
गायत्रीछंदसे०॥ हृदि महालक्ष्म्यै देवतायै०॥ मूलेन करौ संशोध्य॥ अंगुष्ठादिक्रमेण तारादि
नमोंतानि प्रसेकं पंचबीजानि विन्यसेत्॥ यथा॥ ॐ ऐं नमः ॐ ह्रीं नमः ॐ श्रीं नमः ॐ क्लीं नमः ॐ सौं
नमः ॐ जगत्प्रसूत्यै नमः करतले॥ ततो मस्तकादिचरणांतं॥ मूलेन व्यापकं न्यसेत्॥

ततो मूलस्य हृदयगुह्यपादेषु पंचबीजानि विन्यसेत् ॥ शेषाक्षराणि हृदये सप्तधातुषु ॥ तथाच निबंधे
हस्तौ संशोध्य मूलेन तारादि हृदयांतकं ॥ बीजानां पंचकं न्यस्येदंगुलीषु यथाक्रमं ॥ मंत्रशेषं न्यसे
न्मंत्री तलयोरुभयोरपि ॥ मूर्धादि चरणं यावन् मंत्रेण व्यापकं न्यसेत् ॥ मूर्धास्यवक्षोगुह्यांघ्रौ पं
चबीजानि विन्यसेत् ॥ शेषान्न्यसेत् सप्तवर्णान् हृदये सप्तधातुषु ॥ ततः करांगन्यासो ॥ ऐं ज्ञाना
य अंगुष्ठाभ्यां ॥ ह्रीं ऐश्वर्याय तर्जनीभ्यां ॥ श्रीं शक्त्यै मध्यमाभ्यां ॥ क्लीं बलाय अनामिकाभ्यां ॥ वीर्याय कनि
ष्ठाभ्यां ॥ जगत्प्रसूत्यै ॥ तेजसे करतल ॥ एवं हृदयादि ॥ तथाच निबंधे ॥ अंगानि पंचभिर्बीजैः रत्ना
शेषाक्षरैः कवचं ॥ ज्ञानैश्वर्यादिभिर्युक्तैश्चतुर्थ्यंतैः सजातिभिः ॥ ज्ञानमैश्वर्यं शक्तिश्च बलं वीर्यं
स तेजसी ॥ ज्ञानैश्वर्यादयः प्रोक्ताः षट् क्रमादंगयोजिता ॥ ततो ध्यानं ॥ बालार्कद्युतिमिंदुखंडवि
लसत्कोटीरहारोज्वलां रत्नाकल्पविभूषितां कुचनतां शालेः करे मंजरीं ॥ पद्मं कौस्तुभरत्नमप्य
विरतं संबिभ्रतीं सस्मितां स्फुल्लांभोजविलोचनत्रययुतां ध्याये परामंबिकां ॥ इति ध्यात्वा ॥ नि
स्तरेल शारदायां नष्टदृश्यं ॥ इति ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ श्रीबीजोक्तपीठपू
जां विधाय पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत ॥ यथा ॥ दे
व्या दक्षिणे ॥ शंकरनंदनाय ॥ एवं वामे पुष्पधन्विने नमः ॥ अग्न्यादिकोणे ॥ मध्ये दिक्षु च ॥ ऐं ज्ञा
नाय ॥ इत्यादि पूजयेत् ॥ पत्रे रत्यादि ॥ अं उमायै ॥ एवं श्रियै सरस्वत्यै दुर्गायै धरण्यै गायत्र्यै दे
व्यै उषायै जह्नुसुतायै नामेश्वर्यसुतायै ॥ तथा शंखनिधये पद्मनिधये ॥ पश्चिमे च तालपत्रं वर
लं पूजयेत् ॥ तद्बाह्ये द्वादशराशीन् ॥ नवग्रहान् प्रत्येकेन पूजयेत् ॥ तद्बाह्ये गजान् ॥ ऐरावतपुंडरी
कवामनपुष्पदंतकुमुदअंजनसार्वभौमसुप्रतीकान् ॥ इंद्रादीन् वज्रादींश्च संपूज्य धूपादिविस
र्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षं जपः ॥ तथाच ॥ जानुलक्षं जपेन्मंत्रं दशांशं जु
हुयात् घृतैः ॥ जुहुयात् श्रीफलैः पद्मैः प्रत्येकं मधुरत्रयं ॥ तर्पयेत् सलिलैः शुद्धैः सुगंधैरयुतं द्वयम् ॥

अयुतद्वयमित्यत्र वाचनिकव्यवस्था॥ इति श्रुतिपद्धतौ श्रियाख्या कमोभगवतिमही॥ ॐ ह्मादित्योधरादीर्घाल्ल
क्षादिर्जगवान्नमरुत्॥ प्रसीदयुगलं त्र्ययः श्रीरुद्रा भुवनेश्वरी॥ महालक्ष्मी नमोंतः प्रणवादिरयं मनुः
महीलेकारः भगवत्सैएकारवती॥ ॐ ह्मा ककारः॥ आदित्यो मकारः धरा लकारः॥ दीर्घ आकारयुक्तो लः
क्षादि ळकारः॥ मरुत् यकार एकार युक्तः॥ अस्य प्रजोप्रातः स्यादि प्रवर्तिततः ष्यादिन्यासं विधाय क
रांगन्यासो कुर्यात्॥ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं अंगुष्ठाभ्यां नमः॥ कमलालये तर्जनीभ्यां स्वाहा॥
प्रसीद मध्यमाभ्यां वषट्॥ प्रसीद अनामिकाभ्यां हुं॥ महालक्ष्मी कनिष्ठाभ्यां हुं॥ एवं हृद
यादि षुनिवेशये॥ कमले हृदयेप्रोक्तं शिरः स्यात्कमलालये॥ शिखा प्रसीदेतेनैव कवचं च लरक्षैरैः
अस्त्रमेतैः परैः कुर्यात् त्रिबीजपुटितैः कमाले॥ ततो ध्यानं॥ यथा॥ सिंदूरारुणकांतिमब्जवस
तीं सौंदर्यवारांनिधिं कोटीरांगदहारकुंडलकटिसूत्रादिभिर्भूषितां हस्ताब्जैर्वसुपत्रमब्जयुगलाद
र्शौ वहंती परा भावीतां परिचारिकाभिरनिशं ध्यायेत्प्रियां शार्ङ्गिनः॥ एवं ध्यात्वा मानसैः संपूज्य शंख
स्थापनं कुर्यात्॥ पूर्ववत्तु पीठपूजां निधाय॥ पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधा
यावरणपूजामारभेत॥ केशरेषु॥ आग्नेयादिकोणे दिक्षु च॥ श्रीं ह्रीं श्रीं कमले हृदयाय नमः॥ इत्या
दि पूजयेत्॥ दलाग्रे ऊर्ध्वीदि॥ ॐ श्रीधराय॰ एवं हृषीकेशाय॰॥ वैकुंठाय विश्वरूपिणे वासुदेवाय
संकर्षणाय प्रद्युम्नाय अनिरुद्धाय॥ दलमध्येषु॥ पूर्वादि भारत्यै पार्वत्यै चांद्र्यै शच्यै दमकाय
लि महालक्ष्मी बाणान्पूजयेत्॥ अनुरागाय महालक्ष्मीबाणाय॥ इति क्रमेण लक्षाहिरिद्रादीन्नवत्रा
दीश्वरपूजयेत्॥ ततो पादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणे लक्षं जपः॥ तथा च॥
लक्षं जपेत्फलैर्बिल्वैर्जुहुयान्मधुरोक्षितैः॥ दशांशं संस्कृते वह्नौ प्राकृप्रोक्ते न च वर्त्मना॥ इति ल
क्ष्मी मंत्राः॥ अथ सूर्य मंत्राः॥ तारो घृणिः सूर्य पश्चात् नामकर्णविभूषितः॥ वह्न्यासनो मरुद्वेषः
सनेत्रो रदिरित्युपचमः॥

अष्टार्णोऽसौ मनुः प्रोक्तो भानो रविमलप्रदः ॥ अस्य पूजाप्रयोगः ॥ प्रातः कृत्यादि प्राणायामांतं कर्म वि
धाय पीठन्यासं कुर्यात् ॥ तत्र विशेषः हृदयस्य पूर्वादिदिक्षु मध्ये च ॥ प्रभूतं विमलं सारं समाराध्यं
परमं सुखं विन्यस्य ॥ आधारशक्त्यादि ॥ ॐ सूर्यमंडलाद्यात्मने नमः इत्यंतं विन्यसेत्
तथा च निबंधे ॥ पीठस्य कर्णेः प्रथमं दिक्षु मध्ये च संप्रजयेत् ॥ प्रभूतं विमलं सारं समारा
ध्यमनंतरं ॥ परमादि सुखं पीठस्वावितां तत्प्रकल्पयेत् ॥ ततः केसरेषु मध्ये पूर्व ॥ रां दीप्तायै न॰
रीं सूक्ष्मायै ॥ रूं जयायै ॥ रें भद्रायै ॥ रैं विभूत्यै ॥ रों विमलायै ॥ रौं अमोघायै ॥ रं विद्युता
यै ॥ रः सर्वतोमुख्यै ॥ तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः ॥ तथा च ॥
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः ॥ अमोघा विद्युता सर्वतोमुखी पीठशक्तयः ॥
दीप्तादीपांकुरकारा बीजन्यासं बिंदुः क्रमात् ॥ क्लीबकृत्स्वरनिलयस्वरान्बिंदुग्निसंयुतान्
वदेत्संदं च तुर्थ्यंतं ब्रह्मविष्णुशिवात्मकं ॥ सौराय योगपीठाय नमः पदमनंतरं ॥ पीठमंत्रोयमा
ख्यातो दिनेशस्य जगत्पतेः ॥ ततः ऋष्यादिन्यासः ॥ शिरसि देवभागऋषये ॥ मुखे गायत्री
छंदसे ॥ हृदि आदित्याय देवतायै ॥ तथा च ॥ देवभागमनुः प्रोक्तो गायत्री छंद ईरितं ॥ आदि
त्यो देवता प्रोक्तो न्यसेद्देव मतं द्वितः ॥ ततः करांगन्यासौ ॥ सत्याय तेजो ज्वालामणे हुं फट् स्वाहा अंगु
ष्ठाभ्यां एवं ब्रह्मणे ९० तर्जनीभ्यां स्वाहा विष्णवे ९० मध्यमाभ्यां वषट् रुद्राय ९० अनामिकाभ्यां हुं
अग्नये ९० कनिष्ठाभ्यां वौषट् सर्वाय ९० करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ तथा च ॥ स
त्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितं ॥ विष्णवे स्याच्छिखा वर्म तद्रुद्राय परिकीर्तितं ॥ अग्नये नेत्रमा
ख्यातं सर्वायास्त्रमुदाहृतं ॥ तेजोज्वालामणे हुं फट् स्वाहांताः पृथगीरिताः ॥ ततो मूर्तिन्यासः यथा
शिरसि आदित्याय ॥ मुखे एं रवये ॥ हृदये ऊं भानवे ॥ गुह्ये ईं भास्कराय ॥ चरणयोः अं सूर्याय ॥

आदित्यं विन्यसेन्मूर्ध्नि रविं च मुखतो न्यसेत् ॥ हृदये भानुनामानं भास्करं गुह्यदेशतः ॥ सूर्यं चरणयोर्न्यस्ये
त् एवं षैः स्वषांग पंचभिः ॥ ततो मंत्रन्यासः ॥ मूर्ध्नि ॐ नमः ॥ आस्ये घृं नमः ॥ कंठे णिः नमः ॥ हृदि सूं नमः ॥
कुक्षौ र्यं नमः ॥ नाभौ आं नमः ॥ लिंगे रिं नमः ॥ पादयोः त्यं नमः ॥ तथा च ॥ मूर्धास्य कंठहृदये कुक्षिना
भिध्वजांघ्रिषु ॥ मंत्रवर्णान् न्यसेदष्टौ मध्ये कं प्रणवादिकान् ॥ ततो ध्यानं ॥ रक्ताब्जयुग्माभयदानहस्तं
केयूरहारांगदकुंडलाढ्यं ॥ माणिक्यमौलिं दिननाथमीडे बंधूककांतिं विलसत्त्रिनेत्रं ॥ एवं ध्या
त्वा मानसैः संपूज्य एतन्मंत्रोक्तपीठपूजां कुर्यात् ॥ ॐ खं खखोल्काय नमः ॥ इति मंत्रेण मूर्त्तिं संकल्पये
त् ॥ तथा च निबंधे ॥ तारादि खं खखोल्काय मनुना मूर्त्तिकल्पना ॥ साक्षिणं सर्वलोकानां तस्यामावाह्य
पूजयेदिति ॥ ततः पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत ॥ केसरे
षु ॥ अग्न्यादिकोणमध्ये दिक्षु च ॥ सत्याय तेजोज्वालामणे हुं फट् स्वाहा ॥ हृदयाय नमः ॥ एवं ब्रह्मणे ०
शिरसे स्वाहा विष्णवे ० शिखायै वषट् रुद्राय ० कवचाय हुं अग्नये ० नेत्रत्रयाय वौषट् सर्वा
य ० अस्त्राय फट् ॥ दिक्पत्रेषु ॥ ॐ आदित्याय ० ॥ एवं एं रविं उं भानुं ईं भास्करं विदिक्पत्रेषु ॥
अग्न्यादि ॥ ऊं उषायै ० ॥ एवं प्रभायै ० ॥ संसिद्ध्यै ० ॥ अंगानि पूजयेदादौ दिक्पत्रेषु च मूर्त्तयः ॥
आदित्याश्च चतस्रोऽर्च्याः शक्तयः कोणपत्रगाः ॥ स्वस्वनामादिवर्णाः स्युस्तासां बीजान्यनुक्रमात् ॥
उषा प्रज्ञा प्रभा संध्या शक्तयः परिकीर्त्तिताः ॥ ततः पत्राग्रेषु ॥ आस्याद्याः संपूज्य पुरतोऽरुणमर्च
येत् ॥ तद्बाह्ये पूर्वादि चंद्रादींश्च पूजयेत् ॥ ॐ चंद्राय एवं मंगलाय बुधाय बृहस्पतये ॥ शुक्राय शनि
श्चराय राहवे केतवे ॥ तथा च ॥ पत्रासंस्थांस्तु आस्याद्याः पुरतोरुणमर्चयेत् ॥ चंद्रादीन् पूजयेत्पश्चा
त् महान् प्रौढ लतो बहिः ॥ ततः इंद्रादीन् वज्रादींश्च संपूज्य धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य
पुरश्चरणं अष्टलक्षं जपः ॥ तथा च ॥ वसुलक्षं जपेन्मंत्रं समिद्भिः क्षीरशाखिनां ॥ तत्सहस्रं च जुहु
यात्सौ रक्ताभिर्जितेंद्रियः ॥ वा च निकुं एवाष्टसहस्रं होमः ॥ आकाशमग्निदीर्घं दुंमाया च गुः सावि
सर्गः ॥ तथा च ॥ आकाशमग्निदीर्घंदु संयुतं भुवनेश्वरी ॥

सर्गान्वितोऽच्युतानोऽस्यक्षरो मनुरीरितः ॥ अस्य प्रजापप्रयोगः प्रातः कृत्यादि पूर्वमंत्रोक्तपीठन्यासं
विधाय पूर्वोक्तऋष्यादिन्यासं कुर्यात् ॥ ततो मंत्रन्यासः आधारादिपादपर्यंतं ॥ क्लीं नमः कंठादा
धारपर्यंतं ॥ क्लीं नमः मूर्ध्यादि कंठपर्यंतं सः नमः ॥ ततः करांगन्यासो ॥ क्लां अंगुष्ठाभ्यां नमः ॥
क्लीं तर्जनीभ्यां स्वाहा ॥ क्लूं मध्यमाभ्यां वषट् ॥ क्लैं अनामिकाभ्यां हुं ॥ क्लौं कनिष्ठाभ्यां वौषट् ॥ क्लः करत
लकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ यथानिबंधे ॥ आधारादिपदाग्रांतं कंठादाधारकावधि
मूर्ध्यादि कंठपर्यंतं क्रमाद्बीजत्रयं न्यसेत् ॥ ततो ध्यानं ॥ रत्नांबुजोसनमरुणपगुणैककसिंधुभा
नुं समस्तजगतामधिपं च जानि ॥ पद्मद्वयाभयवराननूदधतं कराब्जैर्मौलिक्यमौलिमरुणांगरुचिं
त्रिनेत्रं ॥ इति ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय पूर्वोक्तमंत्रक्रमेण मूर्तिं संकल्प्य पुन
र्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ अग्निनिर्ऋतिवायुईशान
कोणेषु मध्ये दिक्षु च ॥ क्लूं हृदयाय ॥ इत्यादि पूजयेत् ॥ पत्रेषु चंद्रादीन् ईंद्रादीन् वज्रादीन् प्रपूजयेत् ॥ ततो
धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तथा च ॥ भानुलक्षं जपेन्मंत्रं
आज्येन च दशांशतः ॥ तिलैर्वा मधुराभ्यक्तैर्जुहुयाद्विजितेंद्रियः ॥ क्रीडार - तं गोपकुमारसंघैर्नंदांग
ने धूलिविलेपितांगं ॥ गृहे गृहे यं नवनीतचौरं तमादिदेवं पुरुषं प्रपद्ये ॥ अथ वक्ष्ये महामंत्रान्नृवि
लाः सर्वार्थसाधकान् ॥ यस्य संस्मरणात्संतो भवाब्धेः पारमाश्रिताः ॥ अथ विष्णुमंत्राः ॥ तत्र वैष्ण
वाचमनं ॥ ॐ तमीये ॥ केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ॥ द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यामु
ज्यान्मुखं ततः ॥ एकेन हस्तं प्रक्षाल्य पादावपि तथैव तु ॥ संप्रोक्ष्यैकेन मूर्धानं ततः संकर्षणादिभिः ॥
आस्यनासाक्षिकर्णांश्च नाभ्युरसि च कं भुजौ ॥ स्पृशेद्देवं न वेदांश्च मनंत्वेवैष्णवान्वये ॥ एवमाचमनं
कृत्वा साक्षान्नारायणो भवेत् ॥ केशवादयस्तु ॥ केशव नारायण माधव गोविंद विष्णु मधुसूदन
त्रिविक्रम वामन श्रीधर हृषीकेश पद्मनाभ दामोदर संकर्षण वासुदेव प्रद्युम्न अनिरुद्ध
पुरुषोत्तम ॥

अथोक्ष जनारसिंहाच्युतजनार्द्दनउपेंद्रहरि लक्ष्माः॥ वास्यंतु॥ केशवायनमः॥ इत्यादि॥ तथान्च॥
सचतुर्थ्यंतनमोन्तैश्च नामभिर्विन्यसेत्सुधीः॥ तारोनमोनारायणायेन्च॥ तथान्च॥ तारोनमःपदंश्च
यालुनरौदीर्घसमन्वितौ॥ पवनेशाय मंत्रोयं प्रोक्तोवस्वक्षरान्वितः॥ अस्यपूजाप्रयोगः॥ प्रातःकृ
त्यादि मातृकांतं विन्यस्य केशवकीर्त्यादिन्यासं कुर्यात्॥ तस्य ध्यानं॥ उद्यत्प्रोद्यत्कनककमलरुन्वितमद्र
मोवद्दांतंपार्श्वद्वंद्वे जलधिसुतया विश्वधात्र्या च जुष्टं॥ नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं वि
ष्णुं वंदे दरकमलकौमोदकीचक्रपाणिं॥ एवं ध्यात्वा न्यसेत्॥ अं केशवाय कीर्त्यै नमो ललाटे॥ आं नारा
यणाय कांत्यै नमो मुखे॥ इं माधवाय तुष्ट्यै नमो दक्षनेत्रे॥ ईं गोविंदाय पुष्ट्यै नमो वामनेत्रे॥ नमःस
र्व॥ उं विष्णवे धृत्यै दक्षकर्णे॥ ऊं मधुसूदनाय शांत्यै वामकर्णे॥ ऋं त्रिविक्रमाय क्रियायै दक्षनासापु
टे॥ ॠं वामनाय दयायै वामनासापुटे॥ लृं श्रीधराय मेधायै दक्षगंडे॥ ॡं हृषीकेशाय हर्षायै वामगंडे
एं पद्मनाभाय श्रद्धायै ओष्ठे॥ ऐं दामोदराय लज्जायै अधरे॥ ओं वासुदेवाय लक्ष्म्यै ऊर्ध्वदंतपंक्तौ॥
औं संकर्षणाय सरस्वत्यै अधोदंतपंक्तौ॥ अं प्रद्युम्नाय प्रीत्यै मस्तके॥ अः अनिरुद्धाय रत्यै मुखे॥ कं च
क्रिणे जयायै खं गदिने दुर्गायै गं शार्ङ्गिणे प्रभायै घं खड्गिने सत्यायै ङं शंखिने चंडायै दक्षकरमूल
संध्यग्रकेषु॥ चं हलिने वाण्यै छं मुसलिने विलासिन्यै जं शूलिने विजयायै झं पाशिने विरजायै ञं अं
कुशिने विश्वायै वामकरमूलसंध्यग्रकेषु॥ टं मुकुंदाय विनदायै ठं नंदजाय सुनंदायै डं नंदिने स्मृत्यै ढं
नराय ऋद्ध्यै णं नरकजिते समृद्ध्यै दक्षिणपादमूलसंध्यग्रकेषु॥ तं हरये शुद्ध्यै थं कृष्णाय बुद्ध्यै दं
सत्याय मुक्त्यै धं सात्वताय मत्यै नं शौरये क्षमायै वामपादमूलसंध्यग्रकेषु॥ पं शूराय रमायै दक्षपा
र्श्वे॥ फं जनार्दनाय उमायै वामपार्श्वे॥ बं भूधराय क्लेदिन्यै पृष्ठे॥ भं विश्वमूर्तये नाभौ॥ मं वैकुंठाय व
सुदायै उदरे॥ यं त्वगात्मने पुरुषोत्तमाय वसुधायै हृदि॥ रं असृगात्मने बलिने परायै दक्षांसे॥ लं मांसा
त्मने बलानुजाय परायणायै ककुदि॥ वं मेदात्मने वाराहाय सूक्ष्मायै वामांसे॥ शं अस्थ्यात्मने वृषघ्ना
य संध्यायै हृदादि दक्षकरे॥

षं मध्यात्मने वृषाय प्रज्ञायै हृदादि वामकरे॥ सं शुद्धात्मने हंसाय प्रभायै हृदादि दक्षपादे॥ हं प्राणात्म
ने वराहाय निशायै हृदादि वामपादे॥ ळं जीवात्मने विमलाय अमोघायै हृदाद्युदरे॥ क्षं क्रोधात्मने नृसिं
हाय विद्युतायै हृदादि मुखे॥ गौतमीये॥ केशवादिरयं न्यासः कृतमात्रेण देहिनां॥ अच्युतत्वं ददात्येव सत्यं
सत्यं न संशयः॥ मातृकार्णं समभ्यर्च्य केशवाय इति स्मरेत्॥ क्लीं ऐं श्रीमनसा युज्यं इत्यादि न्यासमाचरेत्॥
केशवाय ततः क्लीं ऐं श्रीं नारायणाय च॥ इत्यगस्त्यसंहितावचनात् न्यायं क्रमः॥ न तु केशव क्लीं श्रीं नम
इति॥ तथा भुक्तिमुक्तिमिच्छता अयं न्यासः॥ श्रीबीजादिः कर्त्तव्यः॥ यथा॥ श्रीं केशवाय नमः इति॥ तथा च
एवं प्रविन्यसेन्न्यासं लक्ष्मीबीजपुरःसरं॥ स्थितिर्ध्रुतिर्महालक्ष्मीः प्राप्यते हरितोषणेन॥ ततस्तत्त्वन्यासः
मादिकान्तांस्तथा लोमाद्ये बीजान्ये केशवादेशो वदेत्॥ नमः परायेत्युच्चार्य तत्तत्तत्त्वात्मने नमः॥ इति गौतमव
चनात्॥ सर्वत्र तत्त्वपदप्रयोगः॥ मं नमः परायजीवतत्त्वात्मने नमः॥ भं नमः॥ परायप्राणतत्त्वात्मने नमः
एतद्द्वयं सर्वगात्रे॥ बं नमः॥ परायमतितत्त्वात्मने॥ फं नमः॥ परायाहंकारतत्त्वात्मने॥ पं नमः॥ परायमनस्त
त्त्वात्मने॥ एतत्त्रितयं हृदि॥ नं नमः॥ परायशब्दतत्त्वात्मने॥ मस्तके॥ धं नमः॥ परायस्पर्शतत्त्वात्मने॥ मुखे॥ दं नमः
परायरूपतत्त्वात्मने नमो हृदि॥ थं नमः॥ परायरसतत्त्वात्मने नमो गुह्ये॥ तं नमः॥ परायगंधतत्त्वात्मने नमः
पादयोः॥ णं नमः परायश्रोत्रतत्त्वात्मने नमो नेत्रयोः॥ कर्णयोः॥ ढं नमः परायत्वक्तत्त्वात्मने नमस्त्वचि॥ डं न
मः॥ परायनेत्रतत्त्वात्मने नमो नेत्रयोः॥ ठं नमः परायजिह्वातत्त्वात्मने नमो जिह्वायां॥ टं नमः परायघ्राण
तत्त्वात्मने नमः घ्राणयोः॥ ञं नमः परायवाक्तत्त्वात्मने नमो वाचि॥ झं नमः परायपाणितत्त्वात्मने नमः पाण्योः॥
जं नमः परायपादतत्त्वात्मने नमः पादयोः॥ छं नमः परायपायुतत्त्वात्मने नमो गुदे॥ चं नमः परायउपस्थ
तत्त्वात्मने नमो लिंगे॥ ङं नमः परायाकाशतत्त्वात्मने नमो मूर्ध्नि॥ घं नमः परायवायुतत्त्वात्मने नमो मु
खे॥ गं नमः परायतेजस्तत्त्वात्मने नमो हृदि॥ खं नमः परायजलतत्त्वात्मने नमो लिंगे॥ कं नमः परायपृ
थ्वीतत्त्वात्मने नमः पादयोः॥ गौतमीये॥ ह्रीं बीजं हृत्पुंडरीकतत्त्वं हृदि प्रविन्यसेत्॥ हं बीजं सूर्यमंडलत
त्त्वं हृदि प्रविन्यसेत्॥ सं बीजं चंद्रमंडलतत्त्वं तत्र प्रविन्यसेत्॥ रं बीजं वह्निमंडलतत्त्वं तत्र प्रविन्यसेत्॥

ह्रां नमः पराय हृत्पुंडरीकतत्त्वात्मने नमो हृदि ॥ हं नमः पराय द्वादशकलाव्याप्तसूर्यमंडलतत्त्वात्मने नमो हृ
दि ॥ सं नमः पराय षोडशकलाव्याप्तसोममंडलतत्त्वात्मने नमो हृदि ॥ रं नमः पराय दशकलाव्याप्तवह्निमंड
लतत्त्वात्मने नमो हृदि ॥ षं नमः पराय परमेष्ठितत्त्वात्मने वासुदेवाय नमो मस्तके ॥ तथा च ॥ गौतमीये ॥
षं बीजं परमेष्ठितत्त्वं वासुदेवं च मूर्ध्नि ॥ यं बीजमथ पुंस्तत्त्वं संकर्षणमथो मुखे ॥ लं बीजं विश्वतत्त्वं च पादे
नारायणं न्यसेत् ॥ क्ष्रौं बीजं कोपतत्त्वं च नृसिंहं सर्वगात्रके ॥ एवं तत्त्वानि विन्यस्य प्राणायामं समाचरेद्
इत्यादि ॥ यं नमः पराय पुरुषतत्त्वात्मने संकर्षणाय नमो मुखे ॥ लं नमः पराय विश्वतत्त्वात्मने प्रद्युम्नाय नमो हृ
दि ॥ वं नमः पराय निवृत्तितत्त्वात्मने अनिरुद्धाय नमो लिंगे ॥ लं नमः पराय सर्वतत्त्वात्मने नारायणाय नमः
पादयोः ॥ क्ष्रौं नमः पराय कोपतत्त्वात्मने नृसिंहाय नमः सर्वगात्रे फलं तु तत्रैव तत्त्वन्यासं ततः कुर्यात्
साधकः सिद्धिहेतवे ॥ कृतेन येन देवस्य रूपतामेव यात्यसौ ॥ ततो यथाविधि प्राणायामं कृत्वा पीठन्या
सं विधाय केशरेषु मध्ये च पूर्वादि ॥ ॐ विमलायै नमः ॥ एवं उत्कर्षिण्यै ज्ञानायै क्रियायै योगायै प्रह्व्यै
सत्यायै ईशानायै अनुग्रहायै ॥ तदुपरि ॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसं
योगपीठात्मने नमः ॥ तत्र ऋष्यादिन्यासः ॥ तथा शिरसि साध्यनारायणाय ऋषये ॥ मुखे दैवी गायत्री
छंदसे ॥ हृदि श्रीविष्णवे देवतायै ॥ तथा च निबंधे ॥ साध्यनारायणः प्रोक्तो मुनिश्छंद उदाहृतं ॥
मंत्रस्य दैवी गायत्री देवता विष्णुरव्ययः ॥ ततः करांगन्यासो तद्यथा ॥ क्रुद्धोल्काय अंगुष्ठाभ्यां नमः ॥ महो
ल्काय तर्जनीभ्यां स्वाहा ॥ वीरोल्काय मध्यमाभ्यां वषट् ॥ अत्युल्काय अनामिकाभ्यां हुं ॥ सहस्रोल्काय
अस्त्राय फट् ॥ एवं हृदयादिषु ॥ तथा च निबंधे ॥ क्रुद्धोल्काय हृदयाख्यातं महोल्काय शिरः स्मृतं वीरोल्का
य शिखा प्रोक्ता अत्युल्काय कवचं मतं ॥ सहस्रोल्काय स्त्रयुक्तं अंगकॢप्तिरियं मता ॥ ततो मंत्रेण षडंगं
कुर्यात् ॥ ॐ हृदयाय नमः ॥ नं शिरसे स्वाहा ॥ मों शिखायै वषट् ॥ नां कवचाय हुं ॥ रां नेत्राभ्यां वौषट् ॥
यं अस्त्राय फट् ॥ णां नमः कुक्षौ ॥ यं नमः पृष्ठे ॥ तथा च निबंधे ॥ भयोर्वर्णैर्मनोरेवं षडंगानि
समाचरेत् ॥ वर्णद्वयैः पुनर्वर्णौ विन्यसेत् कुक्षिपृष्ठयोः ॥ ॐ नमः सुदर्शनाय अस्त्राय
फट् इति मंत्रेण दिग्बंधनं कृत्वा मंत्रन्यासं कुर्यात् ॥

तथाच॥ कृत्वा मंत्रन्यासं ततः कुर्यात्सर्वकामफलप्रदं॥ यं विना तोसम्यगाकुशास्त्रं निष्फलं तथा॥
तद्यथा॥ आधारे ॐ नमः॥ हृदये नं नमः॥ वक्त्रे मों नमः॥ दोर्युगले नां नमः॥ रां नमः पादयोः॥ यं न
मः एणां नमः नासिके यं नमः ८ एवं कंठनाभौ हृदि कुचयोः पार्श्वयोः पृष्ठे च ८ मूर्ध्नि आस्ये नेत्रयोः॥ श्र
वणयोः घ्राणयोः ८ हस्तयोः संध्यंगुलीषु च ८ तथा पादयोः संध्यंगुलीषु च ८ हृदये सप्त धातुप्राणे
षु ८ मूर्ध्नि नेत्रे आस्ये हृदि कुक्षौ उरोजंघयोः ८ पादयोः ८ गंडयोः॥ अंसयोः ऊर्वोः पादयोः चक्रं शंखग
दायां पद्मे च॥ ८ विन्यसेत्॥ तथा च निबंधे॥ बद्धाद्वे कूर्चकं मंत्रेण मंत्रवर्णास्ततो न्यसेत्॥ आधारे हृ
दये वक्त्रे दोःपन्मूलेषु नासिके॥ कंठनाभौ हृदि कुचे पार्श्वे पृष्ठे तु अपरं॥ ८ मूर्ध्न्यास्ये नेत्रश्रवणघ्राणेषु त
दनंतरं ८ दोःपादसंध्यंगुलीषु ८ धातुप्राणेषु हृत्स्थले ८ मूर्धेक्षणास्यहृत्कुक्षिसोरुजंघापदद्वये ८
एकैकशो न्यसेद्वर्णान् गंडांशोरुपदेषु च॥ चक्रं शंखं गदां भोजपदे धनहितो न्यसेत्॥ धातुप्राणान्या
सो हृत्स्थले॥ अथ मूर्त्तिपंजरन्यासः॥ ललाटे ॐ अं केशवाय धात्रे नमः॥ नाभौ नं आं नारायणा
य अर्यम्णे नमः॥ हृदि मों इं माधवाय मित्राय॥ कंठदेशे नं ईं गोविंदाय वरुणाय॥ दक्षिणपार्श्वे गं उं
विष्णवे अंशवे नमः॥ दक्षिणांसे भं ऊं मधुसूदनाय भगाय॥ गलदक्षिणभागे तं ऋं त्रिविक्रमाय विवस्वते
नमः॥ वामपार्श्वे वां एं वामनाय इंद्राय॥ वामांसे सुं ऐं श्रीधराय पूष्णे॥ गलवामभागे दें ओं हृषीकेशाय
पर्जन्याय॥ पृष्ठे वां औं पद्मनाभाय त्वष्ट्रे नमः॥ ककुदि यं अः दामोदराय विष्णवे॥ ॐ नमो भगवते वासु
देवाय इति शिरसि द्वादशाक्षरं न्यसेत्॥ द्वादशाक्षरन्यासफलमाह॥ चेतन्यां मूर्त्तिवपुरके कोटिले जाम्र
ध्रिं स्यां वपुरखिलैः सवासुदेवः कुक्षस्थं सविमलपायसीनसितं त्यावाप्नोति प्रकटित मंत्रवर्णकीर्णः॥
मूर्त्तिपंजरन्यासमंत्रस्तु॥ वासुदेवमनोरेकं वर्णं कीवविवर्जितं॥ स्वरैकं बिंदुयुक्तं च चष्यादिकेशवा
दिकं॥ तथा धात्रादिकं चोक्त्वा नमो न्यासउदाहृतः॥ इति नारदीयतंत्रादुक्तमत्र॥ ननु केशवधा
त्र्यां धात्री सहित केशवाय नम इत्यादि॥ ततः ॐ किरीट केयूर हार मकर कुंडल शंख चक्र गदांभो

जहस्तपीतांबरधरश्रीवत्सांकितवक्षःस्थललक्ष्मीभूमिसहितात्मज्योतिर्मयदीप्तकरायसहस्रादित्यते
जसे नमः ॥ इति मंत्रेण व्यापकं विन्यस्य मुद्राः प्रदर्श्य ध्यानं कुर्यात् ॥ उद्यत्कोटिदिवाकराभमनिशं शंखं
गदां पंकजं चक्रं बिभ्रतमिंदिरावसुमतीसंशोभिपार्श्वद्वयम् ॥ कोटीरांगदहारकुंडलधरं पीतांबरं
कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसत्श्रीवत्सचिह्नं भजे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं
कुर्यात् ॥ तत्र नैवेद्यपात्रं तु गौतमीये ॥ ताम्रपात्रं तु विप्रर्षे विष्णोरतिप्रियं मतं ॥ तथैव सर्वपात्रा
णां मुख्यं शंखं प्रकीर्तितं ॥ स्कांदे च तथा प्रोक्तं सुवर्णं वाथ राजतं ॥ पंचपात्रं हरेः श्रेष्ठं नान्यत्तत्र
नियोजयेत् ॥ नैवेद्यदाने तत्रैव सुवर्णे वा ताम्रपात्रे वा शोभे वा पंकजेदले ॥ कृत्यद्रुमे ॥ हिरण्यं राज
तं कांस्यं ताम्रं मृन्मयमेव वा ॥ पाषाणं श्रीहरेः पात्रं नैवेद्ये कल्पयेद्बुधैः ॥ किंतु मृन्मयपात्रे न शास्त
मिति तत्र सर्वत्र ॥ इत्यादि ॥ ततो विमलादिशक्तिसहितपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादिपंच
पुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् ॥ तद्यथा ॥ अग्निकोणे ॥ क्रुद्धोल्काय हृदयाय
नैर्ऋते ॥ महोल्काय शिरसे स्वाहा ॥ वायुकोणे ॥ वीरोल्काय शिखायै वषट् ॥ ईशाने ॥ अस्त्रोल्काय क
वचाय हुं ॥ दिक्षु ॥ सहस्रोल्काय अस्त्राय फट् ॥ ततः केसरेषु पूर्वादि ॥ ॐ नमः नें नमः मों नमः
नां नमः रां नमः यं नमः णां नमः यं नमः ॥ ततो दलेषु पूर्वादिदिक्षु ॥ ॐ वासुदेवाय ॥ एवं संकर्ष
णाय प्रद्युम्नाय अनिरुद्धाय ॥ आग्नेयादिकोणेषु ॥ ॐ शांत्यै नमः ॥ एवं श्रियै सरस्वत्यै रत्यै ॥ ततः प
त्राग्रेषु ॥ ॐ चक्राय नमः ॥ एवं शंखाय गदायै पद्माय कौस्तुभाय मुसलाय खड्गाय वनमालायै बहि
रग्रे ॐ गरुडाय नमः ॥ दक्षिणे ॐ शंखनिधये ॥ वामे पद्मनिधये ॥ पश्चिमे ॐ ध्वजाय ॥ अग्नि
कोणे ॥ ॐ विघ्नाय ॥ नैर्ऋते ॐ आर्याय ॥ वायुकोणे ॥ ॐ दुर्गायै ॥ ईशान्ये ॥ ॐ सेनान्याय ॥ तद्ब
हिरिंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपदीपौ दत्वा नैवेद्यानि दद्यात् ॥ तद्यथा ॥ नैवेद्यमानीय
देवाग्रमंडले न्यस्याचमनीयं दत्वा ॥ फडिति मंत्रेण नैवेद्यं संप्रोक्ष्य चक्रमुद्रयाभिरक्षयमिति

मंत्रेण दोषसमूहं संशोष्य रमिति संदह्य वामकरस्योपरसाभिप्लवं वमित्यमृतीकृतं विचाल्य मूल
मंत्रमष्टधा जप्त्वा धेनुमुद्रयामृतीकृत्य गंधपुष्पैर्नैवेद्यं संपूज्य कृतांजलिः सन् हरिं प्रार्थयेत्
अस्य मुखतो महः प्रसरेदिति विचार्य स्वाहांतं मंत्रमुच्चार्य नैवेद्यं जलं दद्यात्॥ ततो मूलमुच्चार्य एतन्नैवेद्यं
अमुकदेवतायै नमः॥ ततो नैवेद्यं हस्ताभ्यामुद्धृत्य ॐ निवेदयामि भवते गृहाणेदं हविर्हरे इति नैवेद्यं
समर्प्य॥ अमुकदेवतायै एतज्जलं॥ अमृतोपस्तरणमसीति जलं दत्वा वामहस्ते ग्रासमुद्रां प्रदर्शयन् दक्षि
ण हस्ते प्राणादिमुद्रां प्रदर्शयेत्॥ यथा॥ ॐ प्राणाय स्वाहा इति कनिष्ठानामिके॥ अंगुष्ठेन स्पर्शयेत्॥
ॐ उदानाय स्वाहा तर्जनीमध्यमानामा अंगुष्ठेन स्पर्शयेत्॥ ॐ समानाय स्वाहा सर्वांगुलीरंगुष्ठेन स्प
र्शयेत्॥ ततोंऽगुष्ठाभ्यामनामिकाग्रं स्पृशन् ध्यौं नमः पराय अंतरात्मने अनिरुद्धाय नैवेद्यं कल्पया
मि इति॥ नैवेद्यमुद्रां प्रदर्श्य मूलमंत्रमुच्चार्य अमुकदेवं तर्पयामि इति चतुर्धा संतर्प्य॥ ॐ अमु
कदेवतायै एतज्जलं॥ अमृतापिधानमसीति जलं दत्वा आचमनीयादिकं दद्यात्॥ वैष्णवेषु सर्वत्र नै
वेद्यदाने अयमेव विधिः॥ ततः सामान्यपद्धत्युक्तक्रमेण विसर्जनांतं कर्म समापयेत्॥ अस्य पुर
श्चरणं षोडशलक्षजपः॥ तथा च त्रिकार लक्षं प्रजपेन्मनुमेनं समाहितः॥ तद्दशांशं सरसिजैर्जुहु
यान्मधुराप्लुतैः॥ अथ श्रीराममंत्राः॥ अनंतोग्न्यासनः सेंदुर्बीजं रामाय हृन्मनुः षडक्षरोयमादि
ष्टो भजतां कामदो मनुः॥ रां रामाय नमः॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादि वैष्णवोक्तपीठन्यासांतं वि
धाय ऋष्यादिन्यासं कुर्यात्॥ तथा॥ शिरसि ब्रह्मणे ऋषये नमः॥ मुखे गायत्री छंदसे नमः॥ हृदि
श्रीरामाय देवतायै नमः॥ ततः करांगन्यासौ॥ रां अंगुष्ठाभ्यां नमः॥ रीं तर्जनीभ्यां स्वाहा॥ रूं म
ध्यमाभ्यां वषट्॥ रैं अनामिकाभ्यां हुं॥ रौं कनिष्ठाभ्यां वौषट्॥ रः करतलपृष्ठाभ्यां फट्॥ एवं हृदया
दिषु॥ ततो मंत्रन्यासः ब्रह्मरंध्रे रां नमः भ्रुवोर्मध्ये रां नमः हृदि मां नमः नाभौ यनमः लिंगे ननमः
पादयोः मःनमः॥ ततो मूर्तिपंजरादिविधिं विधाय ध्यायेत्॥

कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं जानुनि॥ सी
तां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतीं मुकुटांगदादिविविधाकल्पोज्ज्वलांगं भजे॥ ए
वं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां विधाय वैष्णवोक्तपीठशक्तिपीठ
मनुं च संपूज्य पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ य
था॥ देववामपार्श्वे श्रीसीतायै॥ अग्रे शार्ङ्गाय॥ वामदक्षिणपार्श्वे शरेभ्यो नमः चापाय नमः॥
तद्बहिः केशरेषु॥ आग्नेयादिकोणेषु॥ मध्ये दिक्षु च॥ रां हृदयाय नमः इत्यादिना षडंगं पूजयेत्॥
ततो दलेषु पूर्वादि॥ ॐ हनुमते नमः एवं सुग्रीवाय नमः भरताय विभीषणाय लक्ष्मणाय
अंगदाय शत्रुघ्नाय जांबवते नमः॥ दलाग्रेषु॥ ॐ सृष्टये नमः एवं जयंताय विजयाय सुरा
ष्ट्राय राष्ट्रवर्धनाय अशोकाय धर्मपालाय सुमंत्राय ततः इंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धू
पादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं षड्लक्षजपः॥ तथा च॥ षट्लक्षं जपे
न्मंत्रं दशांशं कमलैः शुभैः॥ जुहुयाद् दर्चिते वन्हौ ब्राह्मणान् भोजयेत्ततः॥ अयं षड्विधः॥ त
था च॥ षट्लक्षं जपेन्मंत्रं॥ तथा च॥ स्वकामशक्तिवाक् लक्ष्मीताराद्यः पंचवर्णकः षडक्षरः
षड्विधः स्याच्चतुर्वर्गफलप्रदः॥ अंत्यासंमोहनः शक्तिर्दक्षिणामूर्तिरुच्यते॥ अगस्तीश्री
शिवः प्रोक्तो मुनयोनुक्रमादिमे॥ अथवा कामबीजादेर्विश्वामित्रमुनिर्मतो॥ छंदो गायत्री
संज्ञं च श्रीराममस्य देवता॥ ध्यानपूजादिकं पूर्ववत्॥ जानकीवल्लभायाथ चतुर्थ्यंतेयावक्षवल्लभा
कुमारादेर्विकथितो रामे मंत्रो दशाक्षरः॥ तथा च॥ जानकीवल्लभं ङेंतं वह्निजायांकुमारिकम्॥
रां रामाय॰ क्लीं रामाय॰ ह्रीं रामाय॰ ऐं रामाय॰ श्रीं रामाय॰ ॐ रामाय॰ हुं जानकीवल्लभाय
स्वाहा॥ दशाक्षरोयं मंत्रः स्याद्वसिष्ठः स्याद् ऋषिर्विराट्॥ छंदस्तु देवता रामः सीतापाणिप

रित्न हः आद्यं बीजं द्विठः शक्तिः क्रां मे नांगन्क्रियामतां शिरो ललाटभ्रूमध्ये तालुकंठेषु हृदपि
नाभिलिंगेजानुपादेषु शाणंश्च मनोन्यसेत्॥ ध्यानं॥ अयोध्यानगरे चित्ररत्नसौवर्णमंड
पे॥ मंदारपुष्पैराबद्धवितानेतोरणान्विते॥ सिंहासनसमारूढं पुष्पकोपरि राघवं॥ रक्षोभिर्ह
रिभिर्देवैर्दिव्ययानगतैः शुभैः॥ संस्तूयमानं मुनिभिर्गंधर्वैः परिसेवितं॥ सीतालंकृतवामांगं ल
क्ष्मणेनोपशोभितं॥ श्यामं प्रसन्नवदनं सर्वाभरणभूषितं॥ ध्यायन्नेवं जपेन्मंत्रं नरो लक्ष्मनन्य
धीः॥ वह्निर्नारायणो नाद्यो जठरः केवलेपि च॥ द्व्यक्षरो मंत्रराजोयं सर्वाभीष्टफलप्रदः॥ राम
ॐ राम॥ क्रूं राम॥ श्रीं राम॥ क्लीं राम॥ ऐं राम॥ रां राम॥ रामभद्र॥ रामचंद्र॥ रामाय नमः
तारमायारमानंगवाग्भूस्वबीजैस्तु षड्विधः॥ त्र्यक्षरो मंत्रराजः स्यात्सर्वाभीष्टफलप्रदः
द्व्यक्षरश्चंद्रभद्रांतो मंत्रोयं चतुरक्षरः॥ रामाय हृन्मनुः प्रोक्तो मंत्रः पंचाक्षरः परः॥
वह्निस्थशयनं विस्तोरर्धचंद्रविभूषितं॥ एकाक्षरो मनुः प्रोक्तो मंत्रराजः सुरद्रुमः
ब्रह्मा मुनिः स्याद्गायत्री छंदो रामश्च देवता॥ एकाक्षरे तु द्वादश लक्षजपः पुरश्च
रणे॥ तथा च॥ नोनु लक्षं जपेन्मंत्रं इति वचनात्॥ अन्येषां षट् लक्षं जप इति वि
शेषः॥ अथ श्रीकृष्ण मंत्राः॥ गोपिजनपदं स्याद्वल्लभाय द्विठावधिः॥ अयं दशाक्षरो मंत्रो दृष्टाद
ष्टफलप्रदः॥ अयं मंत्रः॥ कामबीजादि॥ क्लीं गोपीजनवल्लभाय स्वाहा॥ राशिनक्षत्रादिविचारे पुनर्बीजर
हितेन विचारः बीजपूर्वं जपस्यास्य रहस्यं कथितं मुने॥ लुप्तबीजस्वभावत्वात् दशाक्षर मिहोच्यते॥ इति
गौतमीयात्॥ तथा च॥ बृहद्गौतमीये॥ भोगमोक्षैककलितयोः सबीजो दशाक्षरः॥ उद्धरेत्तु पृथक्
तेन कामबीजं महामुने॥ तेषां गात्फलदो मंत्रा नान्यथा कल्पकोटिभिः॥ अस्य पूजाप्रयोगः॥
प्रातः कृत्यादि तत्वन्यासांतं विधाय प्राणायामं कुर्यात्॥ तथा च॥ गौतमीये॥ एवं तत्वानि विन्यस्य

प्राणायाममाचरेत्॥ यथा॥ कामबीजस्य एकवारजपेन दक्षिणनासया वायुं रेचयेत्॥ पुनः
सप्तवारजपेन वामनासया वायुं पूरयेत्॥ ततश्च नासापुटौ धृत्वा विंशतिवारजपेन वायुं कुंभ
येत्॥ पुनर्वामेन रेचयेत्॥ दक्षयापूरयेत्॥ नासाभ्यां कुंभयेत्॥ पुनर्दक्षेण रेचयेत्॥ वामेना
पूर्व नासाभ्यां कुंभयेत्॥ तथा एकेन रेचयेत्॥ कामबीजेनैव पृथक् पृथक्॥ पूरयेत् सप्तजप्ते
न विंशत्यालेन धारयेत्॥ सर्वेषु स्थलेषु मंत्रेषु बीजेनानेन रेचयेत्॥ यद्वा॥ पवनेन संयमनं तमुना
चरेद्धर्मि हृज्जपुमसो मनुमिच्छति यदि द्व्यक्षरं जपति तदा द्वादशवारं रेचयेत्॥ द्वादशाक्षर
जपेत्तत्र अष्टाविंशतिरेचयेत्॥ पूरयेद्वामलस्त्वहृद्धारयेत्तत्ता मालतः प्राणायामोऽत्र वेदे कारे
च पूरकुंभके॥ अष्टादशाक्षरेणाचेत् द्वादशैवं समापयेत्॥ अन्यमनुर्निर्वर्णानुरूपमिति
उक्तत्वात्॥ तत्तन्मंत्रवर्णसंख्याकैरेचकादिकत्रयं कुर्यात्॥ रेचयेन्मारुतं दक्षयादक्षिणं पूरयेत्॥
वामया मध्यनाड्या पुनर्धारयेत्यादि॥ एतत्तु स्त्रीकृष्णविषयं॥ नान्यत्॥ ततः पीठन्यासं विधाय केश
रेषु मध्ये च॥ विमलादिपीठमन्त्रं तं विन्यस्य॥ ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि नारदऋषये
नमः मुखे विराट्छंदसे नमः॥ हृदि श्रीकृष्णाय देवतायै नमः॥ गुह्ये कामबीजाय नमः॥ पादयोः
स्वाहाशक्तये नमः॥ मंत्राधिष्ठात्रे दुर्गायै नमः॥ इति दुर्गां नमस्कुर्यात्॥ ततः प्रणवपुटितं मू
लमंत्रं करयोरंतर्मध्ये पार्श्वे च॥ तिस्रो विन्यस्य॥ प्रणवपुटितान्मंत्रवर्णान् सबिंदून् अंगुली
पर्वसु क्रमेणोऽतायसेत्॥ तद्यथा॥ दक्षांगुष्ठत्रिपर्वसु॥ ॐ गों ॐ नमः दक्षतर्जन्यां॥ ॐ पीं ॐ
नमः दक्षमध्यमायां॥ ॐ जं ॐ नमः दक्षणानामिकायां॥ ॐ नं ॐ नमः दक्षिणकनिष्ठायां॥
ॐ वं ॐ नमः वामहस्तकनिष्ठायां॥ ॐ ल्लं ॐ नमः वामनासिकायां॥ ॐ भं ॐ नमः वाममध्य
मायां॥ ॐ यं ॐ नमः वामतर्जन्यां॥ ॐ स्वां ॐ नमः वामांगुष्ठे॥ ॐ हां ॐ नमः॥ अयं तु स्ट
ष्टिन्यासः॥

एवं दक्षिणांगुष्ठपूर्वं वामकनिष्ठांतास्थितिः ॥ संहृतिश्च वामांगुष्ठादि दक्षिणांगुष्ठांता ॥ पुनः सृष्टि
स्थितिरिति पंचधा कुर्यात् ॥ अशक्तश्चेत् ॥ एकमात्रं कुर्यात् ॥ न्यासत्रयं सदा कार्यमशक्तोऽपि कमे
वहि ॥ इति गौतमीयवचनात् ॥ ततः स्थितिक्रमेणांगुलीपुटद्वयं भानि विन्यसेत् ॥ तद्यथा ॥ ॐ न
मो दक्षांगुष्ठे पीं नमस्तर्जन्यां जं नमो मध्यमायां नं नमोऽनामिकायां वं नमः कनिष्ठायां वामांगु
ष्ठे लं नमः वामतर्जन्यां मं नमः वाममध्यमायां यं नमः वामानामिकायां स्वां नमः वामकनिष्ठा
यां हां नमः ततः करयोः पंचांगन्यासः ॥ आचक्राय स्वाहा अंगु० ॥ विचक्राय स्वाहा ॥ तर्जनीभ्यां
स्वाहा सुचक्राय स्वाहा मध्यमाभ्यां वषट् ॥ त्रैलोक्यरक्षणचक्राय स्वाहा ॥ अनामिकाभ्यां हुं ॥ अ
सुरांतकचक्राय स्वाहा कनिष्ठाभ्यां वौषट् ॥ ततो मूलमंत्रपुटितान् मातृकार्णान् सबिंदून् मातृ
कास्थलेषु न्यसेत् ॥ ततः प्रणवपुटितं मूलमंत्रं ॥ आकेशादापादं ॥ आपादादाकेशांतं त्रिवारं न्यसेत् ॥
संहारसृष्टिभेदेन दशतत्त्वानि विन्यसेत् ॥ संहृतानेनु गतो मनुर्बुधैः सृष्टिस्तत्त्वानि चेत् ॥ प्रतिपा
तः ॥ तद्यथा ॥ पादयोः ॐ नमः परायपृथिवीतत्त्वात्मने नमः लिंगे पीं नमः परायजलतत्त्वात्मने
नमः ॥ हृदि जं नमः परायतेजस्तत्त्वात्मने नमः ॥ मुखे नं नमः परायवायुतत्त्वात्मने नमः ॥ शि
रसि वं नमः परायआकाशतत्त्वात्मने नमः ॥ हृदि लं नमः परायअहंकारतत्त्वात्मने नमः ॥ मं नमः
परायमहत्तत्त्वात्मने नमः सर्वांगे यं नमः परायप्रकृतितत्त्वात्मने नमः ॥ स्वां नमः परायपुरुषत
त्त्वात्मने नमः ॥ हां नमः परायपरतत्त्वात्मने नमः ॥ एतत्त्रयं सर्वांगे ॥ इति संहारक्रमः ॥ सर्वांगे ॥
हां नमः परायपरतत्त्वात्मने नमः ॥ स्वां नमः परायपुरुषतत्त्वात्मने नमः ॥ यं नमः परायप्रकृति
तत्त्वात्मने नमः ॥ हृदि मं नमः परायमहत्तत्त्वात्मने नमः ॥ लं नमः परायअहंकारतत्त्वात्मने नमः
शिरसि वं नमः परायआकाशतत्त्वात्मने नमः ॥ मुखे नं नमः परायवायुतत्त्वात्मने नमः ॥ हृदि

जं नमः परायतेजस्तत्वात्मने नमः ॥ लिंगे पीं नमः परायजलतत्वात्मने नमः ॥ पादयोः गं नमः प
रायपृथ्वीतत्वात्मने नमः ॥ इति सृष्टिन्यासः ॥ ततः स्थित्यादिन्यासः ॥ तत्रांगुलीनियमो नि
बंधे ॥ शिरसि विहिता मध्या सेवाक्षि तर्जनिकान्विता ॥ श्रवसि रहितांगुष्ठज्येष्ठान्विता पकृनि
ष्ठा ॥ नसि च वदने सर्वाः संजायसी हृदि तर्जनी प्रथमयुता मध्या ॥ नाभ्नो श्रवौ निहिता शिरे ॥
ता एवांगुलयोः जान्वोः स्वांगुष्ठास्तु परद्वये ॥ तद्यथा ॥ शिरसि गं नमो मध्यमांगुल्या नेत्रयोः
पीं नमस्तर्जनीमध्यमाभ्यां कर्णयोः जं नमो अंगुष्ठरहिताभिरंगुलीभिः घ्राणे नं नमो ऽगुष्ठाना
मिकाभ्यां मुखे ॥ वं नमः सर्वाभिः हृदि लुं नमः ॥ अंगुष्ठतर्जनीभ्यां उदरे यं नमो ऽगुष्ठमध्य
माभ्यां लिंगे यं नमो गुष्ठरहितारंगुलीभिः जानुनोः स्वां नमो ऽगुष्ठरहिताभिरंगुलीभिः पादयोः
हां नमो सर्वांगुलिभिः ॥ अयं तु स्थितिः ॥ अथास्थितिक्रमः ॥ हृदि गं नमः अंगुष्ठतर्जनीभ्यां ॥ उदरे
पीं नमः अंगुष्ठमध्यमाभ्यां ॥ लिंगे जं नमो ऽगुष्ठरहिताभिरंगुलीभिः ॥ जानुनि नं नमः अंगुष्ठरहिता
भिरंगुलिः ॥ पादयोः वं नमः सर्वांगुलीभिः ॥ शिरसि लुं नमः मध्यमांगुल्या ॥ नेत्रयोः भं नमः तर्ज
नीमध्यमाभ्यां ॥ कर्णयोः यं नमः अंगुष्ठरहितांगुलीभिः ॥ घ्राणे स्वां नमो ऽगुष्ठानामिकाभ्यां ॥ मुखे
हां नमः सर्वांगुलीभिः ॥ अथ संहारक्रमः ॥ पादयोः गं नमः सर्वांगुलीभिः ॥ जानुनोः पीं नमः अं
गुष्ठरहिताभिरंगुलिभिः ॥ लिंगे जं नमो ऽगुष्ठरहिताभिरंगुलीभिः ॥ उदरे नं नमो ऽगुष्ठमध्य
माभ्यां ॥ हृदि वं नमः अंगुष्ठतर्जनीभ्यां ॥ मुखे लुं नमः सर्वांगुलिभिः ॥ घ्राणयोः मां नमः अं
गुष्ठानामिकाभ्यां ॥ कर्णयोः यं नमः अंगुष्ठरहिताभिः अंगुलीभिः ॥ नेत्रयोः स्वां नमः तर्जनी
मध्यमाभ्यां ॥ मूर्ध्नि हां नमः मध्यमांगुल्या ॥ पुनः सृष्टिस्थिती च विन्यसेत् ॥ विद्यार्थी ब्रह्मचा
रि च पुनः सृष्टिं समाचरेत् ॥ गृहस्थश्च पुनः सृष्टिस्थिती च कुर्यात् ॥ यतिर्वैराग्ययुक्तश्च
संहारांतं प्रविन्यसेत् ॥ एतेन ॥

विद्याथ ब्रह्मचारिणो चतुर्था ॥ गृहस्थानां च पंचधा ॥ यतिव्यतिक्तानां च त्रिधा न्यासः ॥ तथा च
निबंधे ॥ न्यासः ॥ संहारांतो यमस्करिः संन्यासी ॥ वैखानसो वानप्रस्थः स्करिः ॥ वैखानसेषु विहि
तो यं स्थ्यलो गृहमेधिषु ॥ सृष्ट्यंतो वर्णिनामिति ॥ प्राहुः ॥ वैराग्ययुजि गृहस्थे संहारं केचि
दाहुराचार्याः सह जामो न नवासि निःस्थितिं चाविधायि नां सृष्टिं ॥ केचित्तु ॥ न्यासत्रयमेव प
रीयमाण मंतिलेन सवै रैव पंचधा न्यासः कर्त्तव्यः ॥ अथ विभूति पंजर न्यासः ॥ तत्र निबं
धे ॥ वक्ष्यपर न्यासे सर्वं भूसमि ये भूति करं ॥ मंत्र दृशाव्दत्तिमर्थ गुप्त तमं त्रितमे ॥ तद्यथा
ओं धारे गों नमः लिंगे पीं नमः नाभौ जं नमः हृदि नं नमः गले वं नमः मुखे लुं नमः अंसयोः
भों नमः यं नमः ऊर्वोः स्वां नमः हां नमः ॥ कं धेरा यांगों नमः नाभौ पीं नमः कुक्षौ जं हृदि नं स्त
नयोः वं लुं पार्श्वयोः भों यं श्रोण्योः ॥ स्वां हां ॥ १० ॥ शिरसि ॥ गों मुखे ॥ पीं नेत्रयोः ॥ जं नं कर्ण
योः ॥ वं लुं नासापुटयोः ॥ भों यं कपोलयोः स्वां हां ॥ ९ ॥ एवं दक्षिण करस्य मूल संध्यग्रकेषु ॥ पं
च दक्षिण हस्तांगुलीषु पंच ॥ ३० ॥ एवं वाम कर मूल संध्य ग्र केषु पंच पंच ॥ ३० ॥ वाम हस्तांगु
लीषु ॥ एवं दक्षिण वाम पादयोः मूल संध्यग्रकेषु ॥ पंचांगुलीषु च ॥ ६० ॥ मूर्ध्नि गों ॥ तत्पूर्व
पीं ॥ तद्दक्षिणे जं ॥ तत्पश्चिमे ॥ लं उत्तरे ॥ वं मूर्ध्नि सकले ॥ लुं भुजयोः ॥ भों यं ऊर्वोः ॥ स्वां हां
शिरसि गों नेत्रयोः ॥ पीं मुखे ॥ जं कंठे ॥ नं हृदि ॥ वं उदरे ॥ लुं मूलाधारे ॥ भों लिंगे ॥ यं
जानुनोः ॥ स्वां पादयोः ॥ हां श्रोत्रयोः ॥ गों गंडयोः ॥ पीं अंसयोः ॥ जं स्तनयोः ॥ नं पार्श्वयोः ॥
वं कक्ष्योः ॥ लुं ऊर्वोः ॥ भों जानुनोः ॥ यं जंघयोः ॥ स्वां पादयोः ॥ हां सर्वांगे ॥ नमो ला निवि
न्यसेत् ॥ ततः सर्वं वत् ॥ मूर्त्तिपंजर न्यासः ॥ पुनः सृष्टिस्थिती च ॥ ततो दशांगपंचांग
न्यासौ ॥ तद्यथा ॥ हृदि गों शिरसि ॥ पीं शिखायां ॥ जं सर्वांगे ॥ नं दिक्षु ॥ वं दक्षिणपा

र्भे॥ गां कटिदेशे॥ यं पृष्ठे॥ स्वां मूर्ध्नि हां॥ २०॥ आचक्राय स्वाहा हृदयाय नमः॥ विचक्राय स्वाहा शिरसे स्वाहा॥ सुचक्राय स्वाहा शिखायै वषट्॥ त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुं॥ असुरांतकचक्राय स्वाहा अस्त्राय फट्॥ ततः किरीट मंत्रेण व्यापकं विधाय॥ वेणु बिल्वादि मुद्राः प्रदर्श्य॥ ॐ नमः सुदर्शनाय अस्त्राय फट्॥ इति मंत्रेण दिग्बंधनं कुर्यात्॥ किरीटादिकं तु सर्वत्र॥ ततो ध्यायेत्॥ स्मरेद्वृंदावने रम्ये मोहयंतमनारतं॥ गोविंदं पुंडरीकाक्षं गोपकन्याः सहस्रशः॥ आत्मनो वदनांभोजप्रेरिताक्षिमधुव्रताः॥ पीडिताः कामबाणेन चिरमाश्लेषणोत्सुकाः॥ मुक्ताहारलसत्पीनतुंगस्तनभरानताः॥ स्रस्तधम्मिल्लवसना मदस्खलितभाषणाः॥ दंतपंक्तिप्रभोद्भासिस्पंदमानाधरांचिताः॥ विलोचयंती विविधैर्विभ्रमैर्भावगर्वितैः॥ फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरं॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततो वेणुवीणारूपी रमन्वेत पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय देवशरीरे सृष्टिस्थितिर्दूंगपंचांगन्यासक्रमेण पूजयेत्॥ ततो मुखे॥ ॐ वेणवे नमः॥ हृदि ॐ वनमालायै नमः॥ ॐ कौस्तुभाय नमः॥ ॐ श्रीवत्साय नमः॥ ततः परं पंचपुष्पांजलिं दद्यात्॥ शुक्लचंदनपंकिलां श्वेततुलसीं रक्तचंदनपंकिलां रक्ततुलसीं मूलेन दक्षिणवामपार्श्वयोर्दद्यात्॥ एवं हृदये करवीरद्वयेन मूर्ध्नि पद्मद्वयेन तथा तुलसीद्वयं करवीरद्वयं पद्मद्वयं शिरसि दद्यात्॥ तथा च॥ गौतमीये॥ दक्षिणे वासुदेवाख्यं स्वच्छं चैतन्यमव्ययं॥ वामे च रुक्मिणी नित्या रक्ताकारजो गुणान्विता॥ ततः सर्वाणि पुष्पाणि सर्वतो नो दद्यात्॥ ततः आवरणपूजा॥ पूर्वे ॐ दामाय नमः दक्षिणे सुदामाय पश्चिमे वसुदामाय॥ उत्तरे किंकिण्यै केशरेषु॥ आग्नेयकोणे॥ आचक्राय स्वा

हा॥ हृदयाय नमः॥ नैर्ऋते॥ विचक्राय स्वाहा॥ शिरसे स्वाहा॥ वायव्ये सुचक्राय स्वाहा॥ शिखायै वषट्
ईशाने त्रैलोक्यरक्षणचक्राय स्वाहा॥ कवचाय हुं॥ चतुर्दिक्षु॥ असुरांतकचक्राय स्वाहा॥ अस्त्राय
फट्॥ ततः पत्रेषु पूर्वादि॥ ॐ रुक्मिण्यै नमः॥ एवं सत्यभामायै॥ नाग्नजित्यै॥ मित्रविंदायै नमः
सुनंदायै॥ सुलक्ष्मणायै॥ जांबवत्यै॥ सुशीलायै॥ पत्राग्रेषु पूर्वादि॥ ॐ वसुदेवाय॥ एवं देव
क्यै॥ नंदाय॥ यशोदायै॥ बलभद्राय॥ सुभद्रायै॥ गोपान् गोपींश्च पूजयेत्॥ तद्बाह्ये मध्ये पू
र्वादिक्रमेण॥ ॐ मंदाराय॥ एवं संतानाय॥ पारिजाताय॥ कल्पवृक्षाय॥ हरिचंदनाय॥ तद्बाह्ये
इंद्रादीन् वज्रादींश्च पूजयेत्॥ ततः षट्कोणके न पूजयेत्॥ ॐ श्रीकृष्णाय॥ एवं वासुदेवाय देवकी
नंदनाय॥ नारायणाय यदुश्रेष्ठाय वार्ष्णेयाय॥ धर्मसंस्थापनाय॥ असुराक्रांतभारहारिणे॥
यद्वा॥ अथेंद्रादीन् वज्रादींश्च पूजयेत्॥ तथा च गौतमीये॥ अथ वा भद्रिकपतिभिस्तद्बहिर
पिचार्चयेत्॥ एवं वाभ्यर्चयन् कृष्णं काममुक्त्वोः सभाजनं॥ एतद्यजनान्ते श्वेतं कृष्णमेवं पुनः पू
जयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं दशलक्षं जपः॥ दशलक्षम
क्षयफलप्रदं मनुं प्रतिजप्य निर्मलमतिर्दशाक्षरं॥ जुहुयात् समिदाज्यमधुप्लुतैर्नवैररुणांबुजैर्हुतवहे
दशायुतं॥ अथ शुचिरयुगलवर्णं चेन्मनुं पंचलक्षं प्रजपेत् जुहुयाच्च प्रोत्फुल्लपद्मैर्लक्षं॥ अमल
मतिररुणैः पायसैरंबुजानां ससिलघृतसुसिक्तैरारजेद्धोमकर्म॥ दशाक्षरोयं॥ श्री माया कामः
माया श्रीः कामः काममाया श्रीः स्त्रिविधयो दशाक्षरो जवलि॥ श्रीं ह्रीं क्लीं गोपीजनवल्लभाय स्वाहा
ह्रीं श्रीं क्लीं गोपीजनवल्लभाय स्वाहा॥ क्लीं ह्रीं श्रीं गोपीजनवल्लभाय स्वाहा॥ तथा च॥ श्रीशक्तिमारपू
र्वश्च शक्तिः श्रीमारपूर्वकः॥ कामशक्तिरमापूर्वो दशार्णो मनवस्त्रयं॥ इति सनत्कुमारकल्पोक्तेः॥
एतेषां प्रजाप्रयोगः॥ प्रातःकृत्यादि नैत्यनोक्तपीठन्यासं विधाय॥ ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥

शिरसि नारदऋषये ॥ मुखे गायत्रीछंदसे ॥ हृदि श्रीकृष्णाय देवतायै ॥ ततः करांगन्यासौ ॥ आ
चक्राय स्वाहा ॥ अंगुष्ठाभ्यां नमः ॥ इत्यादि दशाक्षरवत् ॥ ततः कृतार्थश्चेत् दशतत्त्व मूर्तिपंज
रौ न्यसेत् ॥ ततः किरीटमंत्रेण व्यापकं कृत्वा यथाशक्ति मुद्रां बध्वा ॥ ॐ नमः सुदर्शनाय अ
स्त्राय फट् ॥ इति मंत्रेण दिग्बंधनं विधाय ध्यानं कुर्यात् ॥ आद्यमनौ दशाक्षरवत् ध्यानं ॥ द्विति
येष्टादशाक्षरवत् ॥ तृतीये तु ध्यानं ॥ शंखचक्रधनुर्बाणपाशांकुशधरोरुणः ॥ वेणुं धमन् धृतं दो
र्भ्यां ध्येयः कृष्णो दिवाकरे ॥ गौतमीये ॥ अत्रापि दशाक्षरवत् ध्यानं ॥ रमादिकामादि मंत्रद्वयमधिकृ
त्य अनयोर्मंत्रयोर्मंत्रो आचक्राद्यैः षडंगं कुर्यात् ॥ दशाक्षरवत्सर्वं ध्यानपूजादिकं सुधीः ॥ ए
वं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि
पंचपुष्पांजलिदानपर्यंतं विधाय पूर्वोक्तवेण्वादिपूजां कृत्वा आवरणपूजामारभेत् ॥ अस्या
वरणानि ॥ अंगइंद्रवज्रादीनि ॥ ततः शंखोदकेन संपूज्य धूपादि विसर्जनांतं कर्म समापयेत् ॥
एतेषां पुरश्चरणं पंचलक्षं जपः ॥ तथा च ॥ पंचलक्षं जपेत्तावद्धुतं पायसेन तु ॥ तंत्रांतरे मंत्रां
तरं ॥ कृष्णाय पदमाभाष्य गोविंदाय ततः परं ॥ गोपीजनपदस्यांते वल्लभाय द्विठावधि ॥ कामबी
जादिराख्यातो मनुरष्टादशाक्षरः ॥ क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा ॥ अस्य पूजा
प्रयोगः ॥ प्रातः कृत्यादि वैष्णवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शिरसि
नारदऋषये ॥ मुखे गायत्रीछंदसे ॥ हृदि श्रीकृष्णाय देवतायै ॥ गुह्ये क्लीं बीजाय ॥ पादयोः
स्वाहा शक्तये ॥ ततः प्रणवपुटितं मंत्रं त्रिशः मूर्ध्नो व्यापय्य करांगन्यासौ कुर्यात् ॥ क्लीं कृष्णाय
अंगुष्ठाभ्यां नमः ॥ गोविंदाय तर्जनीभ्यां स्वाहा ॥ गोपीजन मध्यमाभ्यां वषट् ॥ वल्लभाय अना
मिकाभ्यां हुं ॥ स्वाहा कनिष्ठाभ्यां फट् ॥ ततो मूलेन मूर्धादिपादपर्यंतं त्रिशो व्यापय्य प्रणवेन
संपुटं व्यापय्य मंत्रन्यासं कुर्यात् ॥ मूर्ध्नि ललाटे ॥ भ्रूमध्ये नेत्रयोः ॥ कर्णयोः ॥

घ्राणयोर्वदने चिबुके ग्रीवायां दोर्मूले हृदि उदरे नाभौ कटौ लिंगे आधारे जानुनोः पदयोः एषु
स्थानेषु प्रत्येकेन मंत्रवर्णान् नमोंतान् विन्यस्य शिरसि प्रणवं च न्यसेत्॥ ततो नयन मुख
हृदय गुह्यांघ्रिषु मंत्रस्य पंचकं न मौलं न्यसेत्॥ पद पंचकं च॥ चतुर्थ्यंतु स्तथा हृदयं॥ ततोंग
न्यासः॥ क्लीं कृष्णाय हृदयाय॥ गोविंदाय शिरसे॥ गोपीजन शिखायै॥ वल्लभाय कवचाय॥
स्वाहा अस्त्राय॥ ततो दशांतत मूर्त्ति पंजरन्यासो विधाय॥ किरीट मंत्रेण व्यापकं कृत्वा॥ यथा
शक्ति मुद्रां बध्वा॥ ॐ नमः सुदर्शनाय अस्त्राय फट्॥ इति मंत्रेण दिग्बंधनं कृत्वा॥ दशाक्षरो
क्तवत् ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठ मन्वंतं पीठपूजां विधाय॥
पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिं विधाय॥ क्लीं इत्याद्यक्षरैस्तत्तदंगेषु न्यासक्रमेण संपूज्यां
ग मंत्रेण संपूज्य पंचपुष्पांजलिं दत्वा॥ ततो नैवेद्यादि दर्पजनं कृत्वा दशाक्षरोक्तावरण पू
जां कृत्वा धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं तु दशाक्षर पटले उक्तं॥ शक्ति श्री
पूर्व कोण ष्टादशाक्षरो विंशार्णकः॥ क्लीं श्रीं क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा॥
अस्य पूजा प्रयोगः॥ प्रातः कृत्यादि वैष्णवोक्तपीठ मन्वंतं पीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात्॥
शिरसि ब्रह्मणे ऋषये॥ मुखे गायत्री छंदसे॥ हृदि श्रीकृष्णाय देवतायै॥ गुह्ये क्लीं बीजाय॥ पाद
योः स्वाहा शक्तये॥ ततः करांगन्यासो॥ क्लीं श्रीं क्लीं अंगुष्ठाभ्यां नमः॥ कृष्णाय तर्जनीभ्यां स्वाहा॥
गोविंदाय मध्यमाभ्यां वषट्॥ गोपीजन अनामिकाभ्यां हुं॥ वल्लभाय कनिष्ठाभ्यां वौषट्॥ स्वाहा कर
तल करपृष्ठाभ्यां फट्॥ ततो मूलेन व्यापकं मंत्रपुटितान् मातृकार्णांलिततस्थानेषु न्यसेत्॥ ततो द
शांततानि विन्यस्य पुनर्मूलेन व्यापकं कुर्यात्॥ ततो मंत्रन्यासः॥ मूर्ध्नि क्लीं नमः॥ कपोले श्रीं॥ भ्रु
वोर्मध्ये क्लीं॥ नेत्रयोः कृं॥ कर्णयोः ष्णां॥ नसोः यं॥ वदने गों॥ चिबुके विं॥ कंठे दां॥ दोर्मूले यं॥
हृदि गों॥ उदरे पीं॥ नाभौ जं॥ लिंगे नं॥ आधारे वं॥ कट्यां ल्लं॥ जान्वोः भां॥ जंघयोः यं॥

गुल्फयोः स्वा ॥ पादयोः हां ॥ सर्वत्र नमोंतेन न्यसेत् ॥ इति सृष्टिः ॥ हृदि क्लीं ॥ उदरे श्रीं ॥ नाभौ क्लीं ॥ लिंगे कृं
आधारे ष्णा ॥ ऊर्व्वोः यं ॥ जान्वोः गों ॥ जंघयोः विं ॥ गुल्फयोः दं ॥ पादयोः यं ॥ मूर्ध्नि गों ॥ कपोले पीं ॥
ग्रीवामध्ये जं ॥ नेत्रयोः नं ॥ कर्णयोः वं ॥ नसोः ल्लं ॥ वदने भां ॥ चिबुके यं ॥ कंठे स्वां ॥ दोर्मूले हां ॥ न
मोंतान्न्यसेत् ॥ इति स्थितिः ॥ पादयोः क्लीं ॥ गुल्फयोः श्रीं ॥ जंघयोः क्लीं ॥ जान्वोः कृं ॥ ऊर्व्वोः ष्णां ॥ आ
धारे यं ॥ लिंगे गों ॥ नाभौ विं ॥ गुदके दं ॥ हृदि यं ॥ दोर्मूले गों ॥ कंठे पीं ॥ चिबुके जं ॥ वदने नं ॥ नसोः
वं ॥ कर्णयोः लं ॥ नेत्रयोः भां ॥ ग्रीवामध्ये यं ॥ भाले स्वां ॥ मस्तके हां ॥ इति संहारः ॥ पुनः सृष्टिस्थिती च कृ
त्वा मूर्त्तिपंजरं विन्यस्य षडंगानि समाचरेत् ॥ क्लीं श्रीं क्लीं हृदयाय ॥ कृष्णाय शिरसे ॥ गोविंदाय शिखायै ॥
गोपीजनकवचाय ॥ वल्लभाय नेत्रत्रय ॥ स्वाहा अस्त्राय ॥ ततः पूर्ववन्मुद्रादिग्बंधनं च कृत्वा किरीटमुद्रां
बध्वा ध्यायेत् ॥ तद्यथा ॥ द्वारवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः ॥ अनल्पैः कल्पवृक्षैश्च परीते म
णिमंडपे ॥ ज्वलद्रत्नमयस्तंभद्वारतोरणकुड्यके ॥ फुल्लस्रग्गुल्लसच्चित्रवितानालंबिमौक्तिके ॥ प
द्मरागस्थलीराजद्रत्नभूमौ च मध्यतः ॥ अनारतगलद्रत्नधारं कल्पतरोरधः ॥ रत्नप्रदीपावलिभिः प्रदीपि
तदिगंतरे ॥ उद्यदादित्यसंकाशममिसिंहासनांबुजे ॥ समासीनोऽच्युतो ध्येयो द्रुतहाटकसन्निभः ॥ स
मानोदीतचंद्रार्कतडित्कोटिसमद्युतिः ॥ सर्वांगसुंदरः सौम्यः सर्वाभरणभूषितः ॥ पीतवासाश्चक्रशं
खगदापद्मोज्वलद्भुजः ॥ अनारतोच्छलद्रत्नधारौघकलशं स्पृशन् ॥ वामपादांबुजाग्रेण मुष्णता प
ल्लवच्छविं ॥ रुक्मिणीसत्यभामे स्य मूर्ध्नि रत्नौघधारया ॥ सिंचत्यौ दक्षवामस्थे स्वदोःस्थकलशोत्थ
या ॥ नाग्नजिती सुनंदा च दिशंत्यौ कलशौ तयोः ॥ ताभ्यां च दक्षवामस्थे मित्रविंदा सुलक्षणे ॥ रत्ननं
द्योः समुद्धृत्य रत्नपूर्णौ घटौ तयोः ॥ जांबवती सुशीला च दिशंत्यौ दक्षवामके ॥ बहिः षोडशसाहस्रसं
ख्याताः परितः स्त्रियः ॥ ध्येयाः कनककुंभौघधाराफुल्लशोज्वलाः ॥ तद्बहिश्चाष्टनिधयः पूरयंतो धनै
र्धरां ॥ तद्बहिर्वृष्णयः सर्वे पुरो वन्च्च सुरादयः ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ तस्य
पूजामंत्रं लिख्यते ॥

षट्कोणमध्ये दलपत्रं विलिख्य षट्कोणमध्ये तु ससाध्यं ॥ कामबीजं विलिख्य तं त्रिकोणैः सप्तदशाभिर्वे
ष्टयेत् ॥ ततः षट्कोणस्य प्रागुक्तरक्षोनिलकोणेषु ॥ श्रीबीजं त्रिकोणेषु भुवनेशीं लिखेत्ततः ॥ षट्सु संधिषु
क्लीं कृष्णाय नमः ॥ इति षट्वर्णान् लिखेत् ॥ ततः केसरेषु ॥ कामदेवाय विद्महे पुष्पबाणाय धीम
हि ॥ तन्नोऽनंगः प्रचोदयात् ॥ इति गायत्र्याः त्रीणि त्रिंशदक्षराणि द्विर्वीदिक्रमेण विलिखेत् ॥ ततः पत्रे
षु पूर्वादि ॥ नमः कामदेवाय सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वलज्वल प्रज्वल सर्वजनस्य
हृदयं मम वशं कुरु स्वाहा ॥ इति मालामंत्रस्य षट् षडक्षराणि दलेषु विलिखेत् ॥ तद्बाह्ये मातृकया
संवेष्टयेत् ॥ ततो भूबिंबे दिक्षु ॥ श्रीबीजं विदिक्षु मायाबीजं विलिखेत् ॥ बाह्ये अष्टवज्राणि तथान्त ॥
विलिख्य गंधपंकेन लिखेद् दृष्टरलांबुजं ॥ कर्णिकायां तु षट्कोणे ससाध्यं तत्र मन्मथं ॥ त्रिकोणेषु ससप्तदशाभि
रक्षरैर्वेष्टयेत्स्मरं ॥ प्राग्रक्षोऽनिलकोणेषु श्रियं त्रिकोणेषु संविदं ॥ षडक्षरं षट्सु संधिषु केसरेषु त्रिशस्त्रि
शः ॥ विलिखेत्स्मरगायत्रीं मालामंत्रं दलाष्टके ॥ षट्शः संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ॥
भूबिंबे चालिखेद्बाह्ये श्रीमाये दिग्विदिक्ष्वपि ॥ नगरं चतुरस्रं स्यात् अष्टवज्रविभूषितं ॥ एतद्यं
त्रं अष्टादशाक्षरं विंशत्यक्षरं दशाक्षरं चतुर्दशाक्षरं विंशत्यक्षरं एकाक्षराणामिति ॥ गौतमीये ॥
पद्ममष्टपत्रं शालु चतुरस्रं सुलक्षणं ॥ चतुर्द्वारसमायुक्तं कामगर्भितकर्णिकं ॥ सामान्ययंत्रमु
द्दिष्टं अष्टदशाक्षरे शृणु ॥ चतुरस्रं चतुर्द्वारं पद्ममष्टदलान्वितं ॥ षट्कोणगर्भं कामाख्यं सप्तद
शार्णवेष्टितं ॥ षडक्षरं मनुवरं षट्कोणे विलिखेत्ततः ॥ अष्टादशाक्षरे दशाक्षरयोर्यद्द्विशेषं यं
त्रमुक्तं तद् शास्त्रविषये ॥ अन्यथा तोपि सापि विशेषः स्यात् ॥ ततः पीठमंत्रेण पीठपूजां विधा
य ॥ पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय ॥ सृष्टिस्थितिं षडंगं च संपूज्य ॥ ॐ
किरीटाय नमः एवं कुंडलाय चक्राय शंखाय गदायै पद्माय वनमालायै श्रीवत्साय कौस्तुभाय
एतत्सर्वं प्रणवादि नमोंतेन पूजयेत् ॥ पुनः पुष्पांजलिं दत्वा वरणपूजामारभेत् ॥ षट्कोणेषु ॥

अग्न्यादि॥ क्लीं श्रीं क्लीं हृदयाय नमः॥ कृष्णाय शिरसे स्वाहा॥ इत्यादिना पूजयेत्॥ ततो दिक्पत्रे॥ ॐ वा
सुदेवाय नमः॥ संकर्षणाय॰ प्रद्युम्नाय॰ अनिरुद्धाय॰॥ प्रणवादिनमोंतेन पूजयेत्॥ एवं विदिक्प
त्रेषु॥ ॐ शांत्यै नमः॥ एवं श्रियै॰ सरस्वत्यै॰ रत्यै॰॥ पूर्वे पुष्पवीदि पूर्ववत्॥ रुक्मिण्याद्याः पूजयेत्॥
अग्रे षोडशसहस्रमहिषीभ्यो नमः॥ तद्बहिः पूर्वादि॥ ॐ इंद्रनिधये नमः॥ एवं नीलनिधये॥
मुकुंदनिधये॰ मकरनिधये॰ आनंदनिधये॰ कच्छपनिधये॰ शंखनिधये॰ पद्मनिधये नमः॥
तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्च
रणं चतुर्लक्षं जपः॥ तथा च॥ ध्यात्वैवं परमात्मानं विंशत्यर्णमनुं जपेत्॥ चतुर्लक्षं हुनेदाज्यैश्चत्वा
रिंशत्सहस्रकं॥ वाग्भवं कामबीजं च कृष्णाय भुवनेश्वरी॥ गोविंदाय रमा गोपीजनवल्लभ ङे शि
रः॥ चतुर्दशस्वरोपेतः शुक्रः सर्गी तदूर्ध्वतः॥ द्वाविंशत्यक्षरो मंत्रो वागीशत्वप्रदायकः॥ इति गोविं
दवृंदावने॥ गौतमीतंत्रेपि॥ कृष्णगोविंदौ ङेंतौ तथा गोपीजनं ततः॥ वल्लभोग्निप्रिया सर्गिरह
पूर्वः सानुस्वरः॥ नाम्नामादौ कामात्कामं मायां लक्ष्मीं निवेशयेत्॥ द्वाविंशत्यक्षरो मंत्रो वाग्भवो
घः प्रकीर्तितः॥ अस्यार्थः॥ गोविंदनाम्नादौ कामात् कामं मायां लक्ष्मीं विनियोजयेत्॥ एतस्याय
मर्थः॥ नाम्नामिति षष्ठी वनन च चेनेन सहैकवाक्यानुसारतः गौतमीयवचनार्थो यथा॥ बहुवच
नेन कृष्णपदस्य आदौ कामबीजं देयं॥ गोविंदपदादौ मायाबीजं दत्वा गोपीजनवल्लभपदादौ श्रीबी
जं दत्वा अग्निप्रिया स्वाहा तदनु हसर्गः हकारस्य सर्गः॥ एतादृशः सकारः सकारादृशः समनुस्वरः
मनुस्वरेण ओकारेण सह वर्तते समनुः स्वरः॥ पुनः किं लक्षणः हसर्गः सर्गो विसर्गवान्॥ तथा
सति सौः॥ इति सिद्धं॥ अयं वेणसमुदायः एकविंशत्यक्षरको जातस्तदादौ वाग्भवं दत्तं चेद्द्वाविंश
त्यक्षरो मंत्रो जायते॥ मंत्रो यथा॥ ऐं क्लीं कृष्णाय ह्रीं गोविंदाय श्रीं गोपीजनवल्लभाय स्वाहा सौः॥
अस्य पूजाप्रयोगः॥ प्रातः कृत्यादिने कृत्वोक्त पीठमन्वंते पीठं न्यासं विधाय अष्टादशाक्षरवत्॥

ऋष्यादिन्यासं कृत्वांगन्यासौ विधाय ॥ मुद्रादिग्बंधनं कृत्वा ध्यायेत् ॥ तद्यथा ॥ वामोर्द्ध्वलसितं हस्ते
विद्यासर्वस्वपुस्तकं ॥ अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीं ॥ शब्दब्रह्ममयं वेणुमधःपाणि
द्वयेरितं ॥ गायंतं पीतवसनं श्यामलं कोमलच्छविं ॥ बर्हिबर्हाकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः ॥ उ
पासितं मुनिगणैरुपतिष्ठेद्धरिं सदा ॥ एवं ध्यात्वार्चयित्वा सैर्नवत् पूजयेत् ॥ विशेषस्तु ॥ सृष्टि
स्थित्योः पूजनं नास्ति ॥ अस्य पुरश्चरणं चतुर्लक्षं जपः ॥ तथा च ॥ चतुर्लक्षं जपेन्मंत्रं अमुं मंत्री
रुः संयतः ॥ पलाशपुष्पैः स्वादुक्तैश्चत्वारिंशत्सहस्रकं ॥ जुहुयात्तु मर्पणालेन मंत्रः सिद्धिर्जनेष्टनं ॥
वाग्भवं कामबीजं च मायालक्ष्मीमनंतरं ॥ दशार्णो मनुवर्यश्च चवेच्छताक्षरो मनुः ॥ ऐं क्लीं ह्रीं श्रीं
गोपीजनवल्लभाय स्वाहा ॥ ब्रह्मसंहितायां तु ॥ वाग्भवं भुवनेशानी श्रीबीजं कामराजकं ॥ दशार्णो
मंत्रराजश्च चवेच्छताक्षरः परः ॥ ऐं ह्रीं श्रीं क्लीं गोपीजनवल्लभाय स्वाहा ॥ अस्य पूजाप्रयोगः ॥
प्रातःकृत्यादि वैष्णवोक्तपीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ त्रिरस्य ब्रह्मणे ऋषये ॥
मुखे गायत्रीछंदसे ॥ हृदि श्रीकृष्णाय देवताय ॥ श्रीसरस्वती जपहोमादि सर्वदुःखापहरतु ॥ ध्यानं तु वि
शेषः ॥ ध्यायेद्हृदयवेरमध्ये कांचनीभूमिमध्यगे ॥ नानापुष्पलताकीर्णे वृक्षखंडैश्च मंडिते ॥ क
ल्पाटवीलते सम्यकुः श्रीमन्माणिक्यमंडपे ॥ नारदाद्यैर्मुनिश्रेष्ठैः स्तूयमानैः परिवारिते ॥ रत्नसिंहा
सने ध्यायेदुपविष्टं कजोपरि ॥ सजलजलदश्यामं रक्तपद्मनिभेक्षणं ॥ रक्तपद्मनिभाभ्यां पादपा
णिभ्यां परिमंडितं ॥ नवरत्नसमारब्धभूषणैः परिभूषितं ॥ श्रीवत्सवक्षसि भ्राजत्कौस्तुभोद्भा
सितांबरं ॥ हारहारावलीरम्यं श्रीवत्सांकितवक्षसं ॥ गोरोचनातिलकप्रांतकुंतलभ्रमरार्चितं ॥ कंद
र्पचापगर्व्वघ्नचिल्लिमालाविराजितं ॥ अनेकरत्नसंबद्धस्फुरन्मकरकुंडलं ॥ बर्हिबर्हाकृतोत्तं
सं सर्वज्ञं सर्ववेदिभिः ॥ उपासितं मुनिगणैरुपातिष्ठेद्धरिं सदा ॥ क्ष्माक्षरं चरासेस्वच्छशांति
बिंदुविभूषितं ॥ त्रैलोक्यमोहनं विष्णुकथितं तत्र यत्नतः ॥ क्लीं अस्य पूजाप्रयोगः ॥ प्रातःकृ
त्यादि वैष्णवोक्तपीठशक्तिपर्यंतं विन्यस्य तदुपरि यक्षराजाय स्वाहेति पीठमनुं न्यसेत् ॥ ततः

ऋष्यादिन्यासः ॥ तद्यथा ॥ शिरसि संमोहन नारदाय ऋषये ॥ मुखे गायत्री छंदसे ॥ हृदि त्रैलोक्य
मोहन विष्णवे ॥ ततः क्लीं अंगन्यासो ॥ क्लीं अंगुष्ठाभ्यां नमः ॥ इत्यादि ॥ क्लीं हृदयाय नम इत्यादिनाच ॥
ततो बाणन्यासः ॥ द्रां द्रों घबाणाय नमः ॥ अंगुष्ठयोः ॥ एवं तर्जन्यादिषु ॥ ह्रीं मोहनं ॥ क्लीं संदी
पनं ॥ क्लूं तापनं सन्यासेतु ॥ सर्वत्र वादयत्प्रयोगः ॥ तथा ॥ मस्तक मुख हृदय लिंगपादेषु न्यसे
त् ॥ ततो ध्यायेत् ॥ भग्नविद्रुमसंकाशं सर्वतेजोमयं वपुः ॥ किरीटिनं कुंडलिनं केयूर वलयान्वि
तं ॥ मुक्तासद्दलसच्चारु तुलसीकोटि समुज्वलं ॥ नानालंकारसंयुक्तं पीतांबरयुगावृतं ॥ गरुडोप
रि संस्थं च उत्तरे पंकजमध्यगं ॥ उत्तरे हेमसंकाशां लक्ष्मी वामोरसंस्थितां ॥ सर्वालंकार संयुगां
शुक्लवासोयुगावृतां ॥ सकामां लीलया देवीं मोहयंतं पुनःपुनः ॥ शंखचक्र गदा पद्म पाशांकुश
धनुःशरान् ॥ धारयंतं जगन्नाथं स्वरूपधारणेक्षणं ॥ एवं ध्यात्वा मानसोपचारैः संपूज्य शंख
स्थापनं विधाय न्यासक्रमेण पीठपूजां कृत्वा पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिं दत्वा न्यासक्रमे
ण ॥ ॐ किरीटाय नमः ॥ एवं कुंडलाभ्यां नमः ॥ मृ[illegible] केयूरयोः ॥ शंखाय चक्राय गदायै पद्माय
पाशाय अंकुशाय धनुषे शराय हस्तेषु पूजयेत् ॥ स्तनोर्द्धे ॥ श्रीवत्साय कौस्तुभाय गले वन
मालायै नितंबे ॥ पीतवसनाय वामांके ॥ श्री लक्ष्म्यै नमः ॥ ततः केशरेषु ॥ अग्न्यादि कोणे ॥ मध्ये
दिक्षु च ॥ क्लीं हृदयाय नमः ॥ इत्यादिना पूजयेत् ॥ ततः पूर्वादि दिक्षु ॥ बाणान् पूजयेत् ॥ कोणेषु ॥
पंचमं बाणं पूजयेत् ॥ पत्रेषु पूर्वादि ॥ ॐ लक्ष्म्यै नमः ॥ एवं सरस्वत्यै रत्यै प्रीत्यै कीर्त्यै कांत्यै तुष्ट्यै
पुष्ट्यै ॥ तद्बहिः लोकपालान् पूजयेत् ॥ नात्र वज्रादि पूजा अनुक्तत्वात् ॥ ततो धूपादि विसर्जनांतं
कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षं जपः ॥ तथा च ॥ रविलक्षं जपन्मंत्रं जुहुयात्तद्
दशांशतः ॥ अथ तत्र यसिक्तेन पायसेन विधानवित् ॥ अथवा रविसाहस्रं हुनेत्तावत्तर्पयेत् ॥

कामबीजं हृषीकेशाय हृन्मंत्रोऽष्टाक्षरः स्मृतः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वं
तं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि नारदऋषये॥ मुखे अनुष्टुप्छंदसे॥ हृदि श्री
कृष्णाय देवतायै॥ ततः षडंगन्यासो॥ तद्यथा॥ क्लां अंगुष्ठाभ्यां नमः॥ इत्यादि॥ क्लां हृदयाय नमः
इत्यादिना च॥ ततो ध्यानं॥ कलापकुसुमश्यामं वृंदावनगतं हरिं॥ गोपगोपीगवावीतं पीतवस्त्रयु
गावृतं॥ नानालंकारसंयुक्तं कौस्तुभोद्भासवक्षसं॥ सनकादिमुनिश्रेष्ठैः संस्तुतं परया मुदा॥
शंखचक्रलसद्बाहुं वेणुहस्तं हृदयेरितं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततो
वैष्णवोक्तपीठमन्वंतं पीठं संपूज्य पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं निधाय॥ आ
वरणपूजामारभेत्॥ तद्यथा केशरेषु॥ आग्नेयनैरृत्यवायवीशानकोणेषु मध्ये दिक्षु च॥ क्लां हृ
दयाय नमः॥ इत्यादिना पूजयेत्॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जे
नांतं कर्म समापयेत्॥ अस्य पुरश्चरणं चतुर्लक्षं जपः॥ ध्यात्वैवं परमात्मानं चतुर्लक्षं मनुं
जपेत्॥ दशांशं जुहुयान्मंत्री कुसुमैर्ब्रह्मवृक्षजैरिति॥ श्री हृत्क्लिं स्मरकृष्णाय गोविंदाय
द्विठो मनुः॥ श्रीं ह्रीं क्लीं कृष्णाय गोविंदाय स्वाहा॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पूर्वोक्तपी
ठमन्वंतं पीठन्यासं विधाय राजाभिषेकवत्॥ ऋष्यादिन्यासं विधाय षडंगन्यासो कुर्यात्॥ तद्यथा॥
श्रीं अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां स्वाहा॥ क्लीं मध्यमाभ्यां वषट्॥ कृष्णाय अनामिकाभ्यां हुं
गोविंदाय कनिष्ठिकाभ्यां वौषट्॥ स्वाहा करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो मूर्तिपं
जरन्यासं विधाय॥ मुद्रादिदिग्बंधनं विधाय विन्यासपर्यंते ध्यात्वा तद्विधानेन पूजयेत्॥
विशेषस्तु॥ सृष्टिस्थितिक्रमेण पूजयेत्॥ तद्वर्णासिंहवत्॥ अस्य पुरश्चरणं जपहोमश्च तत
था॥ ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा॥ तारं हृद्भगवते रुक्मिणीवल्लभाय ठद्वयं॥
अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतं पीठन्यासं विधाय॥ ऋष्यादिन्यासं
कुर्यात्॥

शिरसि नारदऋषये ॥ मुखे अनुष्टुप्छंदसे ॥ हृदि रुक्मिणीवल्लभाय देवतायै ॥ ततः करांग
न्यासौ ॥ ॐ अंगुष्ठाभ्यां नमः ॥ नमस्तर्जनीभ्यां स्वाहा ॥ भगवते मध्यमाभ्यां वषट् ॥ रुक्मि
णीवल्लभाय अनामिकाभ्यां हुं ॥ स्वाहा करतलपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ततो ध्या
नं ॥ तापिंछछविरंकगां प्रियतमां स्वर्णप्रभामंबुजप्रोद्यद्वामभुजां स्ववामभुजया श्लि
ष्यन् समंचिंतयन् ॥ श्लिष्यंतीं स्वयमन्यहस्तविलसत् सौवर्णवेत्रश्चिरं पायाद्वृ विल
सत्स्रक्पीतवसनो नानाविधो माधवः ॥ पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं
विधायावरणपूजामारभेत ॥ अग्निनिर्ऋतिवायुईशानकोणेषु दिक्षु च ॥ ॐ हृदयाय
नमः ॥ नमः शिरसे स्वाहा ॥ भगवते शिखायै वषट् ॥ रुक्मिणीवल्लभाय कवचाय हुं ॥
स्वाहा अस्त्राय फट् ॥ ततोऽष्टदलेषु रुक्मिण्यादि ॥ ॐ नारदाय नमः ॥ एवं पर्वते विष्णु विषं
उद्धवं ॥ दारुकं ॥ शैलेयं ॥ विष्वक्सेनं च पूजयेत् ॥ तद्बहिरिंद्रादीन् वज्रादींश्च संपूज्य
धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं जपो लक्षसंख्यः ॥ तथा च ॥
ध्यात्वैवं रुक्मिणीनाथं जपेल्लक्षं मनुं मनुं ॥ अयुतं जुहुयात्पद्मैररुणैर्मधुराप्लुतैः ॥
अथ बालगोपालमंत्राः ॥ क्लीं ॥ कृष्ण ॥ क्लीं कृष्ण ॥ क्लीं कृष्णाय ॥ कृष्णाय नमः ॥ गोपाला
य स्वाहा ॥ क्लीं कृष्णाय स्वाहा ॥ क्लीं कृष्णाय क्लीं ॥ बालवपुषे कृष्णाय स्वाहा ॥ बालवपुषे
क्लीं कृष्णाय स्वाहा ॥ क्लीं क्लीं क्लीं श्यामलांगाय नमः ॥ दधिभक्षणाय स्वाहा ॥ सुप्रसन्ना
त्मने नमः ॥ क्लीं कृष्णाय गोविंदाय ॥ श्रीं ह्रीं क्लीं कृष्णाय क्लीं ॥ चक्री वस्त्रस्वेराखिलः सर्वे
कामेभिमुर्मतः ॥ कृष्णेति द्व्यक्षरः कामः सहर्व स्यमणः स एव तु ॥ स एव चतुर्वर्णः स्या
तुङेंतोऽन्यश्चतुरक्षरः ॥ वक्ष्यते पंचवर्णः स्यात् कृष्णायनम इत्यपि ॥

स एव कामपूर्वः स्याच्चेत् षडक्षरमनुः स्मृतः॥ कृष्णायेति स्मरद्वंद्वमध्ये पंचाक्षरः परः॥ गो
पालायाग्निजायाभ्यां षडक्षर उदाहृतः॥ कृष्णाय कामबीजाद्यो वह्निजायांतकः परः॥
कामकृष्ण॥ कामकृष्णाय नमोंतः क्लीं कृष्णाय स्वाहा॥ गोपालाय स्वाहा॥ कामबीज कृष्णा
य॥ कामकृष्णाय कामं॥ बालवपुषे कृष्णाय द्वयं॥ बालवपुषे कामबीजं कृष्णाय स्वाहा
कामबीज कृष्ण कामबीजं स्यात् मतो गायनमः॥ दधिचक्षणाय द्वयं स्वप्रसन्नात्मने हृदं
यं॥ कृष्ण गोविंद कौ ङें तो ए तौ कामाद्यो॥ श्रीशान्ति मार कृष्णाय मारे॥ एतेषां यंत्रं॥ वृत्त
मष्टदलं पद्मं स्मरं तद्वृत्तमध्यस्थं॥ कामबीजं तथा च॥ मोतमीय॥ पद्म पष्ट पत्रान्तु
चतुरस्रं सुलक्षणं॥ चतुर्द्वारं समायुक्तं कामगर्भितकर्णिकं॥ अस्य पूजाप्रयोगः॥ प्रातः
कृत्यादि नैत्यको पीठमन्वं तं पीठन्यासं विधाय॥ ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि
नारद ऋषये॥ मुखे गायत्री छंदसे॥ हृदि श्रीकृष्णाय देवतायै॥ ततः करांगन्यासौ॥
तद्यथा॥ क्लां अंगुष्ठा॥ क्लीं तर्जनी॥ क्लूं मध्यमा॥ क्लैं अनामि॥ क्लौं कनिष्ठा॥ क्लः करतल॥
क्लां हृदया॥ क्लीं शिरसे॥ क्लूं शिखायै॥ क्लैं कवचा॥ क्लौं नेत्र॥ क्लः अस्त्राय॥ इति ष
डंगन्यासं कृत्वा हृदयादिन्यासं कुर्यात्॥ पूर्वं नत्वा मुद्राः प्रदर्श्य ध्यानं कुर्यात्॥ अव्याद्व्या
कोशनीलालकुजरुचिरदृणां भोजनेत्रांबुजस्थो बालो जंघाकटीरस्थलकलितरणत्
किंकिणीको मुकुंदः॥ दोर्भ्यां हैयंगवीनं दधदतिविमलं पायसं विश्ववंद्यो गोगोपी
गोपवीतो रुरुनखविलसत्कंठभूषश्चिरं वः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्था
पनं कुर्यात्॥ ततो वैष्णवोक्तपीठमन्वं तं पीठपूजां विधाय॥ पुनर्ध्यात्वावाहनादि पंच
पुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ अग्न्यादिकोणेषु चतुष्टयेषु मध्ये दि
क्षु च॥

क्लीं हृदयाय नमः ॥ इत्यादिना संपूज्य ॥ इंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म स-
मापयेत् ॥ एतेषां पुरश्चरणं लक्षं जपः ॥ तथा च ॥ ध्यात्वैवमेकमेतेषां लक्षं जप्यान्मनुं ततः ॥ सर्पिःसि-
तासक्तैः पायसैर्युतं हुनेत् ॥ कामयोरंतः कृष्णपदं मंत्रोऽयं सर्वफलप्रदः ॥ क्लीं कृष्ण क्लीं ॥ अस्य
पूजाप्रयोगः ॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतं विधाय पूर्ववत् ॥ ऋष्यादिन्यासांश्च कृत्वा ध्याये-
त् ॥ श्रीमत्कल्पद्रुमूलोद्दलकमललसत्कर्णिकासंस्थितो यस्तस्याखालं विपचोदरविसरदसं-
ख्यातरत्नोतिचित्रः ॥ हेमाभः स्वप्रभाभिस्त्रिभुवनमखिलं भासयन्वासुदेवः पायाद्वः पायसा-
द्योऽनवरतनवनीतामृतेनाशनीनवाच्चः ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय वैष्ण-
वोक्तपीठमन्वंतं पीठं संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानांतं विधायावरणपूजामारभेत्
पूर्ववद् अग्न्यादिकोणेषु इंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पु-
रश्चरणं चतुर्लक्षं जपः ॥ तथा च ॥ ध्यात्वैवं प्रजपेल्लक्षं चतुष्कं जुहुयात्ततः ॥ त्रिमध्वक्तैर्बिल्वफ-
लैश्च लोहितैः सहस्रकं ॥ अस्य मंत्रस्य कामबीजस्य ककारस्तु लकारो रमोरंते रेफश्चेत् ॥ तदा मंत्रचू-
डामणिः ॥ क्लीं कृष्ण क्लीं ॥ पूर्ववत् ऋष्यादिन्यासः ॥ षडंगन्यासो कुर्यात् ॥ तद्यथा ॥ क्लां अंगुष्ठाभ्यां न-
मः ॥ इत्यादि षड्दीर्घयुक्तेन कुर्यात् ॥ अस्य पुरआदिकं सर्वं पूर्ववत् ॥ ध्यानं तु विशेषः ॥ आरक्तोद्या-
नं कल्पद्रुमतले विलसत्स्वर्णदोलाधिरूढं गोपीभ्यां प्रेक्ष्यमाणं विकसितनयनं घर्मसिक्तं रजोपं ॥
बालं नीलालकांतं कटितटविलसत्क्षुद्रघंटाघटाढ्यं वंदे शार्दूलकामांकुशललितगलाकल्पदीप्तं
मुकुंदं ॥ ध्यात्वैवं पूर्ववद्रीत्यैनं जपेत्स्वारक्तोत्पलैर्नवैः ॥ मधुत्रययुतैर्हुत्वा अन्यच्च तर्पणं हरिं ॥ प्रणवो न-
भगवते वासुदेवाय कीर्तितः ॥ प्रधानं वैष्णवे तंत्रे मंत्रोऽयं सुरपादपः ॥ ॐ नमो भगवते वासुदेवाय ॥
अस्य पूजा ॥ प्रातःकृत्यादि पूर्वोक्तपीठमन्वंतं विधाय अस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि प्रजापतये ऋष-
ये ॥ मुखे गायत्रीछंदसे ॥ हृदि वासुदेवाय देवतायै ॥ ततः षडंगन्यासो ॥ ॐ अंगुष्ठाभ्यां नमः ॥

नमस्तर्जनीभ्यां स्वाहा ॥ भगवते मध्यमाभ्यां वषट् ॥ वासुदेवाय अनामाभ्यां हुं ॥ समस्तेन कनिष्ठाभ्यां
फट् ॥ एवं हृदयादिषु ॥ ततो मंत्रन्यासः ॥ मूर्ध्नि भाले दृशो रास्ये गले दोर्हृदयो भुजे ॥ कुक्षौ नाभौ ध्वजे जा
नुद्वये पादद्वये तथा ॥ द्वादशाक्षराणि न्यसेत् ॥ ततो मूर्तिपंजरं न्यसेत् ॥ किरीट मंत्रेण व्यापकं कृत्वा
ध्यायेत् ॥ विष्णुं शारदचंद्रकोटिसदृशं शंखं रथांगं गदां मंभोजं दधतं सिताब्जनिलयं कां
त्या जगन्मोहनम् ॥ आबद्धांगदहारकुंडलमहामौलिं स्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभ
धरं वंदे मुनींद्रैः स्तुतं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततो वैष्णवो
क्तपीठपूजां निधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यन्तं विधायावरणपूजा
मारभेत् ॥ यथा अग्निनिर्ऋतिवायुईशानकोणेषु दिक्षु च ॥ ॐ हृदयाय नमइत्यादिना
पंचांगेन पूजयेत् ॥ ततः पूर्वादिदलेषु वासुदेवान् इंद्रादीन्वज्रादींश्च संपूज्य धूपा
दि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षं जपः ॥ तथा च ॥ वर्णलक्षं
जपेन्मंत्रं दीक्षितो विजितेंद्रियः ॥ तत्सहस्रं प्रजुहुयात्तिलै राज्यपरिप्लुतैः ॥ ॐ ह्रीं ह्रीं श्रीं श्रीं
लक्ष्मीवासुदेवाय नमः ॥ मायाद्वयं रमाद्वयं लक्ष्मीवासुदेवाय नमः ॥ प्रणवादिरयं मंत्रः
अस्य पूजादिकं वासुदेवमंत्रवत् ॥ करांगन्यासस्तु ॥ ॐ ह्रीं ह्रीं ॐ अंगुष्ठाभ्यां नमः ॥ ॐ श्री
श्रीं तर्जनीभ्यां स्वाहा ॥ ॐ लक्ष्मी मध्यमाभ्यां वषट् ॥ ॐ वासुदेवाय अनामाभ्यां हुं ॥ ॐ
नमः कनिष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ध्यानं तु ॥ विद्युच्चंद्रनिभं वपुः कमलजावैकुंठयो
रेकतां प्राप्तस्नेहवशेन रत्नविलसद्भूषाभरालंकृतं ॥ विद्यायं कजदर्पणं मणिमयं कुंभं स
रोजं गदां शंखचक्रमभम्रनिविभ्रद्दभितां द्विरूपालुश्रियं नः सदा ॥ अस्य पुरश्चरणं चतुर्द
शलक्षं जपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं सरोरुहैः ॥ होमं कुर्याद्विकसितैर्म
धुरत्रयसंयुतैः ॥ वर्णलक्षं मंत्रवर्णसंख्याक्षरलक्षं ॥ अथ दधिवामनमंत्राः ॥
ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा ॥ अस्य प्रजा ॥

प्रातःकृत्यादि ॐ सोममंडलायनमः इत्यंतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि इंदुऋषये ॥
मुखे विराट् छंदसे ॥ हृदि दधिवामनाय देवतायै ॥ चंद्रालंकृत्य तिलपीठे प्रागुक्तेन समर्चयेत् ॥
ततः करांगन्यासौ ॥ ॐ अंगुष्ठाभ्यां नमः ॥ नमस्तर्जनीभ्यां स्वाहा ॥ विष्णवे मध्यमाभ्यां वषट् ॥
स्वरूपतये अनामाभ्यां हुं ॥ महाबलाय कनिष्ठाभ्यां वौषट् ॥ स्वाहा करतलपृष्ठाभ्यां फट् ॥ एवं
हृदयादिषु ॥ ततो मंत्रन्यासः ॥ शिरसि नाले च चक्षुषोः कर्णयोः वोष्टे ॥ तालुके कंठे बाहुद्वये हृ
दये उदरे नाभौ गुह्ये ऊरुद्वये जानुद्वये जंघाद्वये पादद्वये मंत्रवर्णान्न्यसेत् ॥ जंघाद्वयादो हृ
दयं वेर्णं ॥ ततो मूर्तिपंजरादिकं विधाय ध्यानं कुर्यात् ॥ यथा ॥ मुक्तागौरं नवपेशमनि
लपडुषर्णं चंद्रसंस्थं श्वंगाकारे रतकनिकरैः शोणितवक्त्रारविंदं ॥ हस्ताब्जाभ्यां कनककल
शं शुद्धतेजोतिपूर्णं दध्यन्नाद्यं कनकचषकं धारयंतं नजामः ॥ एवं ध्यात्वा मानसैः संपूज्य
शंखस्थापनं कुर्यात् ॥ ततश्चंद्रमंडलांतं पीठं संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांज
लिदानपर्यंतं विधायावरणपूजामारभेत् ॥ अग्न्यादि कोणेमध्ये दिक्षु च ॥ ॐ हृदयाय
नमः इत्यादि पूजयेत् ॥ ततो दिग्दलेषु ॥ वासुदेवादीन् शक्तिसहितान् ध्वजादीन् तदग्रे
केशवादीन् संपूज्य इंद्र वज्रादीन् ऐरावत गजादीन् पूजयेत् ॥ ॐ ऐरावताय दिग्गजाय
नमः इत्यादिक्रमेण पूजयेत् ॥ ततो धूपादि विसर्जनांतं समापयेत् ॥ अस्य पुरश्चरणं त
त्त्रयं जपः ॥ तथा च ॥ गुणलक्षं जपेन्मंत्रं तद्दशांशं घृतप्लुतं ॥ पायसान्नं प्रजुयात्तद्दध्यन्नं
वायथाविधि ॥ अथ हयग्रीवमंत्राः ॥ ॐ उद्गिरत्प्रणवोद्गीथ सर्ववागीश्वरेश्वर ॥ सर्व
वेदमयाचिंत्य सर्वं बोधय बोधय इति मंत्रः ॥ उद्गिरत्यदमात्यप्रणवोद्गीथशब्दतः ॥
सर्ववागीश्वरेशं तं प्रवदेदीश्वरेश्वरं ॥ सर्ववेदमयाचिंत्य परांते सर्वमुच्चरेत् ॥ बोधय
द्वितयांतो यं मंत्रस्तारादिरीरितः ॥ अस्य प्रजापयोगः ॥ प्रातःकृत्यादि पीठमन्वंतं विधाय ॥
ऋष्यादिन्यासं कुर्यात् ॥ यथा शिरसि ब्रह्मणे ऋषये ॥ मुखे अनुष्टुप् छंदसे ॥ हृदि हयग्री

वायदेवतायै ॥ ततः करांगन्यासो ॥ ॐ अंगुष्ठाभ्यां नमः ॥ उग्दीरत्प्रणवोग्दीथ तर्जनी
भ्यां स्वाहा ॥ सर्ववागीश्वरेश्वर मध्यमाभ्यां वषट् ॥ सर्वदेवमयाचिंत्य अनामाभ्यां हुं ॥ स
र्वं बोधय कनिष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ततो ध्यानं यथा ॥ शरच्छशांकप्रभमश्ववक्त्रं
मुक्तामयैराभरणैः प्रदीप्तं ॥ रथांगशंखान्वितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः
एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठपूजां विधाय ॥ हस्तद्वय
नेन मूर्तिं संकल्प्य ॥ पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपू
जां कुर्यात् ॥ यथा केशरेषु दिक्षु ॥ ॐ हृदयाय नम इत्यादि पंचांगानि पूजयेत् ॥ ततो दि
ग्दलेषु ॥ चतुर्वेदान् ऋग्यजुःसामाथर्वांश्च ॥ विदिग्दलेषु ॥ स्मृतिन्यायमीमांसासर्व
शास्त्राणि ॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समा
पयेत् ॥ अस्य पुरश्चरणं त्रयस्त्रिंशल्लक्षं जपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं कुंदपुष्पै
र्मधुप्लुतैः ॥ दशांशं वैष्णवे वह्नौ जुहुयान्मंत्रसिद्धये ॥ अथ एकाक्षरः ॥ हसूं हकारसकार
षष्ठस्वरबिंद्वात्मकः ॥ चतुर्दशस्वरयुक्त इति कल्पांतरे ॥ अस्य ब्रह्मा ऋषिस्त्रिष्टुप्छं
दो हयग्रीवरूपी विष्णुर्देवता हकारो बीजं सकारः शक्तिः ॥ हसां हसीं हसूं हसैं हसौं हसः इति षडं
गकल्पना ॥ ध्यानं ॥ धवलनलिनविष्टं क्षीरगौरं कराग्रैर्जपवलयसरोजे पुस्तकाभीष्ट
दाने ॥ दधतममलवस्त्राकल्पजालाभिरामं तुरगवदनजिष्णुं नौमि विद्याप्रविष्णुं ॥ अ
न्यच्च ॥ शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैरुपेतं ॥ रथांगशंखोर्ध्वकरं च वि
द्याव्याख्यानमुद्राढ्यकरं नमामि ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पीठपूजां
विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥
तत्रांगैः प्रथमावरणं प्रज्ञाहय मेधाहय स्मृतिहय विद्याहय लक्ष्मीहय वागीश्वरीहय ॥

विद्याविशालाय हयवादविमर्दन हयैरष्टभिर्द्वितीयं लक्ष्मीसरस्वतीरतिप्रीतिकीर्त्तिकांतितुष्टि
पुष्टिभिस्तृतीयं कुमुदादिभिर्गजैश्चतुर्थम् ॥ इंद्रादिभिः पंचमं ॥ ततो धूपादिविसर्जनां
तं कर्मसमापयेत् ॥ अस्य पुरश्चरणं तत्त्वलक्षं जपः ॥ तथा च वेदलक्षं जपेन्मंत्री दशां
शं जुहुयात्ततः ॥ आज्येन दशांशहोमः ॥ हयग्रीवषडक्षरादिचतुर्थ्यंतहयशिरः शब्दो
नमोंततः ॥ तथा च कल्पे ॥ हयशिरःपदं ङेंतं हृदंतं च समुद्धरेत् ॥ स्वबीजादिर्महामंत्रश्च
तुर्वर्गफलप्रदः ॥ हसूं हयशिरसे नमः ॥ अस्य ब्रह्मा ऋषिरनुष्टुप्छंदो हयग्रीवरूपी विष्णु
र्देवता अन्यत्सर्वमेकाक्षरीवत् ॥ उद्गीरत्प्रणवोद्गीथ सर्ववागीश्वरेश्वर ॥ सर्ववेदम
याचिंत्य सर्वं बोधय बोधय ॥ स्वाहांतो मनुराख्यातो बीजप्रणवसंपुटः ॥ मंत्रांतरं ॥ वि
श्वोत्तीर्णस्वरूपाय चिन्मयानंदरूपिणे ॥ तुभ्यं नमो हयग्रीवविद्याराजाय विष्णवे स्वाहा ॥
अयं मंत्रो हंसादिः ॥ सोहमंतिकः ॥ तथा च ॥ स्वाहांतो मनुराख्यातो हंसेन संपुटीकृतः ॥ ए
तयोर्मंत्रयोः पूर्वोनुष्टुप् हयग्रीवमंत्रवत् ॥ सर्वं ज्ञातव्यं ॥ अथ नृसिंहमंत्राः ॥ उग्रं वी
रं वदेत्सर्वं महाविष्णुमनंतरं ॥ ज्वलंतं पदमाभाष्य सर्वतोमुखमीरयेत् ॥ नृसिंहं भीष
णं भद्रं मृत्युमृत्युं वदेत्ततः ॥ नमाम्यहमयं प्रोक्तो मंत्रराजः सुरद्रुमः ॥ अयं मंत्रो मा
यापुटितो भवति सर्वकामफलप्रदः ॥ क्ष्रौं उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखं ॥ नृ
सिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं क्ष्रौं ॥ अस्य प्रजापालः ऋष्यादिर्वेदवोत्करूपीठमनंतं
विन्यस्य ॥ ऋष्यादिन्यासं कुर्यात् ॥ शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे अनुष्टुप्छंदसे ॥ हृ
दि नृसिंहाय देवतायै ॥ ततः करांगन्यासौ ॥ निबंधे ॥ चतुर्भिर्हृदयं प्रोक्तं नेत्रैः शिर
स्तावद्भिरक्षरैः ॥ शिखाष्टभिः समुद्दिष्टा षड्भिः कवचमीरितं ॥ तावद्भिर्नयनं प्रोक्तमे
स्त्रं स्यात्तत्करैरक्षरैः ॥ शिरोललाटनेत्रेषु मुखबाहुंघ्रिसंधिषु ॥ नासाग्रकुक्षौ हृदये

गत्वा पार्श्वहृदये पुनः ॥ अपरांगेष्वक कुर्द्दिन्यसेद्धृत्प्रान्यथाक्रमात् ॥ ध्यानं ॥ माणिक्या
द्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकरांबुजं त्रिनयनं रत्नोल्लसद्भूषणं ॥
बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं
वंदे नृसिंहं विभुं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय वैष्णवोक्तपीठ
पूजां कृत्वा पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामार
भेत् ॥ तद्यथा ॥ केसरेषु ॥ अग्न्यादिकोणमध्ये दिक्षु च ॥ अंगानि पूजयेत् ॥ उग्रं वीरं हृ
द्याय ॥ महाविष्णुं शिरसे ॥ ज्वलंतं सर्वतोमुखं शिखायै ॥ नृसिंहं भीषणं कव ॥
भद्रं मृत्युं नेत्रत्रयाय ॥ नमाम्यहं अस्त्राय ॥ ततः पूर्वादिदलेषु गरुडं ॥ शंकरं ॥
शेषं ब्रह्माणं च पूजयेत् ॥ विदिग्दलेषु ॥ श्रियं ह्रियं धृतिं पुष्टिं च प्रणवादिनमोंतेन
पूजयेत् ॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समा
पयेत् ॥ अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं
घृतप्लुतैः ॥ पायसान्नैः प्रजुहुयात् विधिवत्प्रज्वलितेनले ॥ नरहरिमंत्रः ॥ ओं क्ष्रौं श्रौं
क्ष्रौं हं फट् ॥ पाद्मः द्वाक्लिः ओं क्ष्रौं वर्मफट् ॥ तथान्यनिबंधे ॥ पाद्मे द्वाक्लिन्ने हरिं कुरु कु
वर्मफट् मनुः ॥ षडक्षरो नरहरेः सर्वकामफलप्रदः ॥ अस्य पूजा ॥ प्रातःकृत्यादि वै
ष्णवोक्तपीठमंत्रांतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि ब्रह्मणे ऋषये नमः ॥

मुखे पंक्तिश्छंदसे नमः ॥ हृदि नृसिंहाय देवतायै नमः ॥ ततः करांगन्यासौ ॥ ओं अंगुष्ठा
भ्यां नमः ॥ क्ष्रौं तर्जनीभ्यां स्वाहा ॥ क्ष्रौं मध्यमाभ्यां वषट् ॥ क्ष्रौं अनामिकाभ्यां हुं ॥ क्ष्रौं कनिष्ठा
भ्यां वौषट् ॥ फट् करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ततो ध्यानं ॥ कोपादालोलजि
ह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादादानाभिरक्तप्रभमुपरि सितं भिन्नदैत्येन्द्र
गात्रं ॥ शंखं चक्रं च पाशांकुशकुलिशगदा दारुणान्युद्वहंतं भीमं तीक्ष्णोग्रदंष्ट्रं मणिम
यविविधाकल्पमीडे नृसिंहं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्त
पीठमंत्रेण पीठपूजां विधाय पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं ॥ विधाया
वरणपूजामाचरेत् ॥ ततः केसरेषु आग्नेयादिकोणेषु मध्ये दिक्षु च ॥ ओं हृदयाय नमः इत्या
दि षडंगानि पूजयेत् ॥ ततः पत्रेषु पूर्वादि शंखचक्रपाशांकुशवज्रगदाखड्गखेट
कांश्च पूजयेत् ॥ ततः इंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समा
पयेत् ॥ अस्य पुरश्चरणं षट्लक्षं जपः ॥ तथा च ॥ रसलक्षं जपेद्दत्तं ध्वलेन जुहु
यात्ततः ॥ तत्सहस्रं समिद्भिर्वा तर्पयेद्धस्तनागुरं ॥ क्ष्रौंकारो वह्निमार्तंडश्च लुर्द्दशास्य
रयुक्तः ॥ बिंदुमान् एकाक्षरो मंत्रः क्ष्रौं ॥ अस्य प्रजादिकं सर्वं मंत्रराजवत् ॥ ऋषिस्तु
अत्रिर्गायत्री छंदः ॥ अस्य मंत्रस्य पुरश्चरणं अष्टलक्षं जपः ॥ जय द्वयं श्रीनृसिंह
अस्य ब्रह्मा ऋषिर्गायत्री छंदः षट्दीर्घयुक्तेन बीजेनांगकल्पना ॥ ध्यानार्चनादि
कं मंत्रराजवत् ॥ जय जय श्रीनृसिंह ॥ अस्य पुरश्चरणं अष्टलक्षं जपः ॥ तथा च ॥
वसुलक्षं जपेन्मंत्री इत्यादि वचनं ॥ अथ हरिहरमंत्रः ॥ मंत्ररत्नप्रकाशिकायाम् ॥

तारो माया प्रासादं श्रीं क्रूरनारायणाय नमः ॥ प्रासादं माया तारः ॥ ॐ ह्रीं हौं श्रीं
क्रूरनारायणाय नमः हौं ह्रीं ॐ ॥ अस्य पूजा प्रातः कृत्यादि वैष्णवोक्तं कृत्वा वैष्णवोक्ते शै
वोक्ते वा पीठं विधाय ऋष्यादिन्यासं कुर्यात् ॥ शिरसि नारद ऋषये नमः ॥ मुखे अनु
ष्टुप्छंदसे नमः ॥ हृदि हरिहराय देवाय नमः ॥ गुह्ये हौं बीजाय नमः ॥ पादयोः ह्रीं शक्त
ये नमः ॥ ततः करांगन्यासौ ॥ ह्रां अंगुष्ठाभ्यां नमः ॥ इत्यादि षड्दीर्घेन एवं हृदयादिषु ॥ ततो
ध्यानं ॥ शूलं चक्रं पांचजन्यमभितिर्दधतं करैः ॥ स्वस्वभूषाढ्यलीनार्द्धदेहं हरिहरं भजे ॥
एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ वैष्णवोक्ते शैवोक्ते वा पीठे पूजां विधाय पु
नर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं निधाय आवरणपूजामारभेत् ॥ केसरेषु ॥ अ
ग्न्यादि कोणेषु मध्ये दिक्षु ह्रां हृदयाय नमः ॥ इत्यादिना पूजयेत् ॥ ततः पत्रेषु ॥ पूर्वादि ॥ ॐ लक्ष्म्यै
नमः ॥ एवं नारायण्यै । धरण्यै । भूधरायै । अंबिकायै । त्र्यंबिकायै । गंगायै । गंगाधरायै ॥ त
द्बहिरिंद्रादीन् पूजयेत् ॥ अत्रापि वज्रादिपूजा नास्त्यनुक्तत्वात् ॥ ततो धूपादि विसर्जनांतं क
र्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ घृतपायसेनायुतहोमः ॥ तथा च ॥ लक्षमे
कं जपेन्मंत्रं तद्दशांशं घृतप्लुतैः ॥ पायसैर्हवनं कुर्यात् संस्कृते हव्यवाहने ॥ अथ वराह
मंत्रः ॥ तारो नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि ददापय ठद्वयं
अयं मंत्रस्त्रयस्त्रिंशदक्षरः ॥ ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं
मे देहि ददापय स्वाहा ॥ अस्य पूजा ॥ प्रातः कृत्यादि वैष्णवोक्तपीठमंत्रांतं विन्यस्य ऋष्यादिन्या
सं कुर्यात् ॥ शिरसि भार्गवाय ऋषये नमः ॥ मुखे अनुष्टुप्छंदसे नमः ॥ हृदि आदिव

राहायदेवतायै नमः॥ ततः कूरांगन्यासौ॥ एकदंष्ट्राय अंगुष्टाभ्यां नमः॥ व्योमोल्काय तर्ज
नीभ्यां स्वाहा॥ तेजोधिपतये मध्यमाभ्यां वषट्॥ विश्वरूपाय अनामिकाभ्यां हुं॥ महादंष्ट्रा
य कनिष्टाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ आपादजानुदेशाद्दूरकर्नं कुनिभं नाभि
काद्धारधस्तात् मुक्ताभं कंठदेशाच्चतरुणरविनिभं मस्तकाच्छीनहासं॥ वंदे हस्तैर्दधानं
रथचरणदरीखड्गखेटौ गदाख्यं शक्तिं दानाभयं च ज्वलितिचरणं लसद्दंष्ट्रमाद्यं वराहं
एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनादि पंचपुष्पांजलिदानं विधायो नरणपूजामा
रभेत्॥ पूर्वादिदीक्षु॥ एकदंष्ट्राय हृदयाय नमः॥ व्योमोल्काय शिरसे स्वाहा॥ तेजो
धिपतये शिखायै वषट्॥ विश्वरूपाय कवचाय हुं॥ अग्निनिर्ऋतिवायुईशानकोणे
षु महादंष्ट्राय अस्त्राय फट्॥ तद्बहिः पत्रेषु॥ अं चक्राय नमः॥ एवं शंखाय· खड्गाय·
खेटकाय· गदायै· शक्त्यै· वराय· अभयाय· तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥
ततो रूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षं जपः॥ तथा च॥
लक्षमेकं जपेन्मंत्रं मधुराक्तैः सरोरुहैः॥ जुहुयात्तद्दशांशेन पीठे विष्णोः प्रपूजयेत्॥
विष्णुमंत्रस्य राज्ञो न जपेन्॥ तथा च॥ न जपेद्वैष्णवं राजा मोक्षान्ति मंत्रेन दुष्यति॥ इति
विष्णुपूजापरिच्छेदः॥ अथ गरुडपंचाक्षरमंत्रः॥ निबंधे॥ संवर्त्तको नेत्रयुतः
पार्श्वस्तोराग्निसंदरी॥ गारुडो मनुराख्यातो विषद्वयविनाशकः॥ क्षिप ॐ स्वाहा॥
सचत्तनीयस्वरमकं क्षपेक्षरोमणु [illegible] अग्निजापालकः॥ अस्य प्रजा॥ मालः केस्या
दि वैष्णवो कपी गं तं विन्यस्य [illegible] ष्यादिन्यासं कुर्यात्॥ यथा शिरसि रुद्र ऋषये॥

मुखे पंक्तिछंदसे नमः ॥ हृदि पक्षीन्द्राय देवतायै नमः ॥ प्रणवो बीजं ॥ स्वाहा शक्तिः ॥
तलोन्यासः ॥ ज्वल ज्वल महामति स्वाहा ॥ हृदयाय नमः इत्यादि ॥ गरुड चूडामणे स्वा
हा तर्जनीभ्यां स्वाहा ॥ गरुड शिखे स्वाहा मध्यमाभ्यां वषट् ॥ गरुड प्रभंजन प्रभंज
न प्रभेदन प्रभेदन विद्रावय विद्रावय विमर्दय विमर्दय स्वाहा अनामाभ्यां हुं ॥ उग्र
रूपधर सर्वविषहर भीषय भीषय स्वाहा कनिष्ठाभ्यां वौषट् ॥ सर्वं दह दह भस्मी
कुरु कुरु स्वाहा करतलाभ्यां फट् ॥ करद्वयोरंगुष्ठादि कनिष्ठांगुलीषु हृदयादिषु मं
त्रवर्णान्विन्यस्य ॥ पादकटिहृदयवक्त्रमूर्धसु ॥ मंत्रवर्णान्विन्यसेत् ॥ ध्यानं ॥
वर्मितो वह्निपुंजाक्षरक्रमलगले पंचभूतात्मवर्णैः कृष्णाकृत्यप्रणीतैर्नयवरकरं
पद्मवक्त्रं त्रिनेत्रं ॥ दुष्टाहिछेदिलुंडं स्मरदखिलविषप्रोषणं प्राणमूलं प्राणमग्रं एवं
त्रिवेदीतनुममलमयं पक्षिराजं भजेहं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्था
पनं कृत्वा वैहग्यो न्यत्पीठमन्वंतं पीठं संपूज्य पुनर्ध्यात्वा वाचरेपद्धयहुंकारमध्य
स्वंपक्षकार विद्यात्मक बीजयुक्त कलिकं स्वरद्वंद्वाष्टकं अकारादि द्विद्विस्वरयुक्तके
सरे इत्यर्थः ॥ केसरे कचटतपयशलाष्टवर्गयुक्तान् षट्दलमाले कोपमेपक्षि
राजं प्रजयेत् ॥ अंगैः प्रथमावरणं ॥ अनंतवासुकितक्षककर्कोटकपद्ममहा
पद्मशंखकुलिकाष्टनागैर्द्वितीयावरणं ॥ इंद्रादिभिस्तृतीयावरणं ॥ अस्य पु
रश्चरणं पंचलक्षजपः ॥ अथवा पुरश्चरणार्थे मरुत्मत्पुलं प्रसेकमध्वर
संख्यमालामंत्रं सहस्रं जपेत् ॥ घृताक्तैः लक्षपुष्पैर्दशांशतो होमः ॥

मालामंत्रस्तूच्यते॥ ॐ नमो भगवते गरुडाय कालाग्निवर्णाय एह्येहि कालानल लोल जि
ह्वाय पातय पातय मोहय मोहय विद्रावय २ भ्रामय २ हन २ दह २ पच २ हुं फट् स्वाहा॥ क्षीरा
ब्धीमध्ये तत्रोत्पलं पूर्वोक्तमात्मकाक्षर २ मयममृतात्मकं श्वेतपद्मं विचिंत्य तदग्रे दष्टद
लं संस्मृत्य दष्टस्य मूर्ध्नि च ॐ हृदये नाभिषु॥ रं हं ठं वं इति बीजचतुष्टयममृतला
विलेन संचिंत्य दष्टमूर्ध्नि सिंचेद्गलवर्णसकृधामयं गरुडं ध्यात्वा तद्धस्तस्थितामृतपू
रितशंखनिर्गतामृतधारया दष्टं प्लावयंतं गरुडं ध्यायन्मंत्रं जपेत्॥ एवं ध्याने
मात्रेण दष्टो निर्विषः समुत्थाय चिरंजीवेत्॥ ॐ नमो भगवते गरुडाय महेंद्ररूपाय
पर्वतशिखराकाररूपाय संहर २ मोचय २ चालय २ चालय पातय २ निर्विष २ विषम
प्यमृतं वा हारस दहतरूपमिदं प्रज्ञापयामि स्वाहा नमः॥ न ल २ व र २ क्षिप २ हर २ स्वा
हा॥ अनेन गरुडमंत्रेण मंत्री गरुडो भूत्वा अभिमंत्रितं स्थावरं विषं भक्षितमपि अ
मृतं भवति॥ विषमूलअन्नपानादिकं॥ इति गरुडमंत्रः॥ अथ गरुडस्तवः॥ सुपर्णं वै
नतेयं च नागारिं नागभीषणं॥ जितांतकं विषारिं च अजितं विश्वरूपिणं॥१॥ गरु
त्मंतं खगश्रेष्ठं तार्क्ष्यं कश्यपनंदनं॥ द्वादशैतानि नामानि गरुडस्य महात्मनः॥२॥ यः
पठेत्प्रातरुत्थाय स्नाने वा शयनेपि वा॥ विषं नाक्रमते तस्य न च हिंसंति हिंसकाः॥३॥
संग्रामे व्यवहारे च विजयस्तस्य जायते॥ बंधनान्मुक्तिमाप्नोति यात्रायां सिद्धिरेव च॥४॥
इति गरुडस्तोत्रं संपूर्णम्॥ अथ विषाग्निहर मंत्रः॥ सच विसर्गबिंदुयुक्तः॥ खका
रद्वयरूपः खः खः॥ अस्य प्रजापतिः ऋष्यादिकं कृत्वा ऋष्यादिन्यासं कुर्यात्॥

शिरसि अग्नये ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि अग्नये देवतायै नमः॥ रवकारो
बीजं बिंदुः शक्तिः दीर्घस्वरयुक्तरवकारेणांगन्यासो कुर्यात्॥ ओं नार्चने वैश्वानरमंत्र
वत्॥ अस्य पुरश्चरणं द्वादशसहस्रजपः॥ आज्येन दशांशहोमः॥ स्ववामहस्ततले पंच
दलं श्वेतपद्मं ध्यात्वा ततः कर्णिकायां सविसर्गरवकारं रवः॥ तत्पंचदलेषु सानुस्वार रव
कारं ध्यात्वा रक्तवर्णममृतमयं विचिंत्य तत्स्पर्शनात्॥ सर्वविषं नाशयेत्॥ इत्थं न्य
स्तकरेण विषरोगस्य स्पृष्ट्वा अष्टोत्तरशतं जपेत्॥ सर्ववृश्चिकादिविषज्वराजीर्णवि
सर्पदंतादि शूल नेत्ररोगादि सर्ववेदनां च नाशयेत्॥ इति विषहराग्निमंत्रः॥ अथ वृ
श्चिकादिविषहरमंत्रः॥ ॐ सहस्फुह ॐ हिलि मिलि हस्फुः चिलि हफु ब्रह्मलोपुः सर्वम्मादेव
श्योस्फुः॥ एते वृश्चिकविषहराः॥ ॐ गं स्वः॥ इति मूषकविषहरमंत्रः॥ ॐ शारलोपुः॥ ॐ
शारणा विषहरलोपुः॥ एतं मंत्रं जपं श्वेतसर्षपप्रक्षेपात् मूषकनाशनं॥ ॐ ह्रीं श्रीं क्लीं जय
दुर्गे स्वाहा गरुड हुं फट्॥ इति दुर्गामंत्रः॥ लूताविषहरः॥ ॐ नमो भगवते विष्णवे सर सर हन ह
न हुं फट् स्वाहा॥ इति विष्णुमंत्रः॥ सर्वकीटजातिविषहरमंत्रः॥ अथ हनुमत्कल्पः॥ देव्युवाच॥
देवयानि गाणपत्यानि शाक्तानि वैष्णवानि च॥ साधनानि च सौराणि चान्यानि यानि तानि च॥
श्रुतानि देवदेवेश त्वद्वक्त्रान्निःसृतानि च॥ किंचिदन्यत्तु देवानां साधनं यदि कथ्यतां॥२॥
शंकर उवाच॥ शृणु देवि प्रवक्ष्यामि सावधानावधारय॥ हनुमत्साधनं पुण्यं महापातकना
शनं॥ एतद्गुह्यतमं लोके शीघ्रसिद्धिकरं परं॥ जयो यस्य प्रसादेन लोकत्रयजितो भवेत्॥
तत्साधनं विधिं वक्ष्ये नृणां सिद्धिकरं द्रुतं॥ हें हनुमते रुद्रात्मकाय हुं फट्॥ वियत्सलवकं

हनुमते तदनंतरं॥ रुद्रात्मकाय हुं फडिति द्वादशाक्षरः॥ एतन्मंत्रं समाख्यातं गोपनी-
यं प्रयत्नतः॥ तव स्नेहेन भक्त्या च दासोस्मि तव सुंदरि॥ एतन्मंत्रमर्जुनाय प्रदत्तं हरिणा
पुरा॥ जपेन साधनं कृत्वा जितं सर्वं चराचरं॥ नदीकूले विष्णुगेहे निर्जने पर्वते वने॥ ए-
काग्रचित्तमास्थाय साधयेत्साधनं महत्॥ महाशैलं समुत्पाट्य धावंतं रावणं प्रति॥ लि-
ष्ठ तिष्ठ रणे दुष्ट घोररावं समुत्सृजन्॥ लाक्षारक्तारुणं रौद्रं कालांतकयमोपमं॥ ज्वल-
दग्निसमं नेत्रं सूर्यकोटिसमप्रभं॥ अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणं॥ एवं रूपं
हनूमंतं ध्यात्वा यः प्रजपेन्मनुं॥ लक्षजपात्प्रसन्नः स्यात्सत्यं ते कथितं मया॥ ध्यानैक-
मात्रतः पुंसां सिद्धिरेव न संशयः॥ प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने॥ प्राणायामं
षडंगं च मूलेन सकलं चरेत्॥ पुष्पांजल्यष्टकं दत्वा ध्यात्वा रामं ससीतकं॥ ताम्रपात्रे
ततः पद्ममष्टपत्रं सकेशरं॥ रक्तचंदनघृष्टेन लिखेत्तस्य शलाकया॥ कर्णिकायां लिखे-
न्मंत्रं तत्रावाह्य कपिप्रभुं॥ कर्णिकायां हनूमंतं ध्यात्वा पाद्यादिकं ततः॥ गंधपुष्पादिकं नै-
वेद्यं च मूलमंत्रतः॥ सुग्रीवं लक्ष्मणं चैव अंगदं नलनीलकौ॥ जांबवंतं च कुमुदं के-
शरिणं दले दले॥ पूर्ववत्क्रमतो देवि पूजयेद्गंधचंदनैः॥ पवनं चांजनीं चैव पूजयेद्दक्ष-
वामतः॥ दलाग्रे पुष्पं कपिभ्यो पि पुष्पांजल्यष्टकं ततः॥ ध्यात्वैनं मंत्रराजं तु लक्षमात्रं जपेत्सुधी-
ः॥ लक्षांते दिवसं प्राप्य कुर्याच्च पूजनं महत्॥ एकाग्रचित्तमनसा तस्मिन्पवननंदने॥
दिवारात्रौ जपं कुर्यात् यावत्संदर्शनं भवेत्॥ सुदृढं साधकं मत्वा निशीथे पवनात्मजः॥ सुप्र-
सन्नस्ततो भूत्वा प्रयाति साधकाग्रतः॥ यथेप्सितं वरं दत्वा साधकाय कपिप्रभुः॥ वरं ल

ध्यासाधकेंद्रो विहरेत् आत्मनः स्फुरैवैः ॥ एतद्धि साधनं पुण्यं देवानामपि दुर्लभं ॥ तव स्नेहात्
समाख्यातं न कस्मैचिन्मयि पार्वति ॥ इति गारुडतंत्रे देवीश्वरसंवादे हनूमत्कल्पः ॥ हनूमतो
ति गुह्यं च लिख्यते वीरसाधनं ॥ ब्राह्मे मुहूर्ते उत्थाय कृतनित्यक्रियो द्विजः ॥ गत्वा नदीं ततः
स्नात्वा तीर्थं मावाह्य चाष्टधा ॥ मूलमंत्रं ततो जप्त्वा सिंचेदादित्यसंख्यया ॥ ततो वासः परी
धाय गंगातीरेथवा गिरौ ॥ उपविश्य ॥ ॐ अंगुष्ठाभ्यां नमः ॥ ॐ हृदयाय नमः ॥ इत्यादि
नान्च ॥ करांगन्यासौ कुर्यात् ॥ ततः प्राणायामः ॥ अकारादिवर्णानुच्चरन् वामनासापुटेन वा
युं पूरयेत् ॥ पंचवर्गानुच्चरन् कुंभयेत् ॥ यकारादिवर्णानुच्चरन् रेचयेत् ॥ एवं वारत्रयं
कृत्वा मंत्रवर्णैः करांगन्यासं कुर्यात् ॥ ततो ध्यानं ॥ ध्यायेद्रणे हनुमंतं कपिकोटिसमन्वितं ॥ धावंतं
रावणं जेतुं दृष्ट्वा सत्वरमुत्थितं ॥ लक्ष्मणं च महावीरं पतितं रणभूतले ॥ गुरुं च क्रोधमुत्पाद्य ग
हीत्वा गुरुपर्वतम् ॥ हाहाकारैः सदर्पैश्च कंपयंतं जगत्त्रयं ॥ आब्रह्मांडं समाव्याप्त कृत्वा भीमक
लेवरं ॥ इति ध्यात्वा अष्टसहस्रं जपेत् ॥ अस्य मंत्रः ॥ हं बीजं पूर्वमुच्चार्य पवनं च ततो वदेत् ॥
नंदनं च ततो देयं ङेन्तं सानेऽनलप्रिया ॥ द्वादशार्णो यं मनुः ॥ हं पवननंदनाय स्वाहा ॥ प्रोक्तो
नरोणं स्करपोदपः ॥ सप्तदिनं सपर्यंतं दिवारात्रिं व्याप्य जपेत् अत्र यं दत्तात्रिभागद्वीपास्कन्निभ्रूण
स्कृचियत मागच्छति ॥ यदि साधकः मायांतरतितदाई सितं वरं प्राप्नोति ॥ विद्यां वापि धनं वापि
राज्यं वा शत्रुनिग्रहं ॥ लक्ष्मणेदेवना प्राप्नोति संससंसस्कृ निश्चितं ॥ इति हनुमत्कल्पः समाप्तम् ॥
उद्दिश्य यं कृतवती गिरिजालपस्यां यत्पादपंकजरजो विबुधा लभंति ॥ ॐ शंभवे भुजगराज
विभूषितांगं तेचंद्रचूडमतुलं मनसा स्मरामि ॥ अथ वक्ष्ये महेशस्य मंत्रान् सर्वसमृद्धिदान् ॥
यैः पूर्वं मुनयः प्रापाः शिवसायुज्यमंजसा ॥ अथ शिवमंत्रः ॥ सांत मौकारसंयुक्तं बिंदुम

स्तकमन्त्रषितं ॥ प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मणिः ॥ हौं अस्य पूजा ॥ प्रातः कृत्या
दि मातृकान्यासं प्राणायामं च विधाय ॥ श्रीकंठन्यासं मातृकास्थाने प्रकुर्यात् ॥ तद्यथा ॥
अं श्रीकंठपूर्णोदरीभ्यां नमः ॥ आं अनंतविरजाभ्यां ॥ इं सूक्ष्मशाल्मलिभ्यां ॥ नमः सर्वत्र ॥ ईं
त्रिमूर्तिलोलाक्षिभ्यां ॥ उं अमरेश्वरवर्तुलाक्षिभ्यां ॥ ऊं अर्घीशादीर्घघोणाभ्यां ॥ ऋं भारभूति
सुदीर्घमुखिभ्यां ॥ ॠं अतिथीशगोमुखीभ्यां ॥ लृं स्थाणुदीर्घजिह्वाभ्यां ॥ लॄं हरकुंडोदरी
भ्यां ॥ एं झिंटीशार्द्धमुखीभ्यां ॥ ऐं भौतिकेशविकृतमुखीभ्यां ॥ ओं सद्योजातज्वालामुखीभ्यां ॥
औं अनुग्रहेश्वरोल्कामुखीभ्यां ॥ अं अक्रूरश्रीमुखीभ्यां ॥ अः महासेनविद्यामुखीभ्यां
कं क्रोधीशसर्वसिद्धिमहाकालिभ्यां ॥ खं चंडेशसर्वसिद्धिसरस्वतीभ्यां ॥ गं पंचांतकगौरी
भ्यां ॥ घं शिवोत्तमत्रैलोक्यविद्याभ्यां ॥ ङं एकरुद्रमंत्रशक्तिभ्यां ॥ चं कूर्मात्मशक्तिभ्यां ॥ छं
एकनेत्रभूतमातृभ्यां ॥ जं चतुराननलंबोदरीभ्यां ॥ झं गजेशद्राविणीभ्यां ॥ ञं सर्वनाग
रीभ्यां ॥ टं सोमेशखेचरीभ्यां ॥ ठं लांगलिमंजरीभ्यां ॥ डं दारुकरूपिणीभ्यां ॥ ढं अर्धनारी
श्वरवीरिणीभ्यां ॥ णं उमाकांतकाकोदरीभ्यां ॥ तं आषाढपूतनाभ्यां ॥ थं दंडिभद्रकालीभ्यां
दं अद्रियोगिनीभ्यां ॥ धं मीनशंखिनीभ्यां ॥ नं मेषगर्जिनीभ्यां ॥ पं लोहितकालरात्रि
भ्यां ॥ फं शिखिकुब्जिकाभ्यां ॥ बं छगलंडकपर्दिनीभ्यां ॥ भं द्विरंडवज्राभ्यां ॥ मं महाकाल
जयाभ्यां ॥ यं त्वगात्मवालिसुमुखेश्वरीभ्यां ॥ रं असृगात्मभुजंगेशरेवतीभ्यां ॥ लं मां
सात्मपिनाकीशमाधवीभ्यां ॥ वं मेदआत्मखड्गीशवारुणीभ्यां ॥ शं अस्थ्यात्मवकेश
वायवीभ्यां ॥ षं मज्जात्मश्वेतरक्षोविदारिणीभ्यां ॥ सं शुक्रात्मतिथीशसहजाभ्यां ॥

हृत्प्राणात्मन कुलिशालक्ष्मीभ्यां॥ लं जीवात्मशिखिनव्यापिनीभ्यां॥ क्षं क्रोधात्मसंवर्त्तकमा
याभ्यां॥ ततः सामान्यपद्धत्युक्तपीठन्यासं कृत्वा पीठशक्तिर्न्यसेत्॥ तथा ॐ वामायै नमः॥
ॐ ज्येष्ठायै॥ रौद्र्यै॥ काल्यै॥ कलविकरण्यै॥ बलविकरण्यै॥ बलप्रमथिन्यै॥ सर्वभूतदमन्यै॥
एता हृत्पद्मस्य पूर्वादिकेशरेषु विन्यस्य॥ मध्ये॥ ॐ मनोन्मन्यै नमः॥ तदुपरि ॐ नमो भ
गवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः॥ ततः ऋष्यादिन्यासः॥
शिरसि वामदेवाय ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि सदाशिवाय देवतायै॥
ततः करांगन्यासौ॥ हां अंगुष्ठाभ्यां नमः॥ हीं हृदयाय नमः॥ इत्यादि षड्दीर्घयुक्तेन न्यसे
त्॥ ततः ईशानाद्यां पंचमूर्तिर्न्यसेत्॥ यथा॥ हां अंगुष्ठयोः हों ईशानाय नमः तर्जन्योः
हें तत्पुरुषाय नमः मध्यमयोः॥ ॐ अघोराय नमः॥ अनामिकयोः॥ हिं वामदेवाय नमः॥ क
निष्ठयोः॥ हं सद्योजाताय नमः॥ ततस्तत्तदंगुलीभिः हों ईशानाय नमः॥ इति शिरोवदन
हृद्गुह्यपादेषु मूर्तिर्न्यसेत्॥ तत ऊर्ध्वप्राग्दक्षिणोत्तरपश्चिमेषु तत्तदंगुलीभिस्तत्तद्वी
जैस्तत्तन्मूर्तिर्न्यसेत्॥ [illegible]॥ एतत्पर्यंतं न्यासं कृत्वा ध्यायेत्॥ अन्यत्रानधिकारात्
ततऊर्ध्वपूर्वदक्षिणोत्तरपश्चिममुखेषु॥ ईशानस्य पंचकला ब्रह्मरंध्रः पदादिक्रमः प्र
णवाद्यानमोंतान्न्यसेत्॥ तद्यथा॥ ईशानः सर्वविद्यानां ॐ शशिन्यै कलायै नमः॥ ईश्व
रः सर्वभूतानां ॐ अंगदायै कलायै नमः॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा ॐ इष्टदायै क
लायै नमः॥ शिवो मेस्तु॥ ॐ मरीच्यै कलायै॥ सदाशिवोम् ॐ ज्वालिन्यै नमः॥ ततः
पूर्वपश्चिमदक्षिणोत्तरवक्त्रेषु तत्पुरुषस्य चतस्रः कला न्यसेत्॥ यथा॥ तत्पुरुषा
य विद्महे शांत्यै कलायै नमः॥ महादेवाय धीमहि ॐ विद्याकलायै नमः॥ तन्नो रुद्रः ॐ

प्रतिष्ठायै कलायै नमः ॥ प्रचोदयात् ॐ निवृत्त्यै कलायै नमः ॥ ततो हृदये ग्रीवायां ॐ सद्ययना
भी कुक्षौ पृष्ठे वक्ष्यसि ॥ अघोरस्याष्ट कलान्यसेत् ॥ ॐ अघोरेभ्यः ॐ तमायै कलायै ॥ अथ घो
रेभ्यः ॥ ॐ मोहायै कलायै नमः ॥ घोरक्षमायै कलायै नमः ॥ घोरतरेभ्यः ॐ निद्रायै कलायै स
र्वतः सर्व ॐ व्याध्यै कलायै नमः ॥ सर्वेभ्यः ॐ मृत्यवे कलायै नमः ॥ नमस्तेस्तु ॐ क्षुधायै
कलायै नमः ॥ रुद्ररूपेभ्यः ॐ तृष्णायै कलायै नमः ॥ ततो गुह्य गुल्फ हृदये उरद्वये जानुद्वये जं
घाद्वये कट्यां पार्श्वयोः ॥ वामदेवस्य त्रयोदश कला न्यसेत् ॥ यथा ॥ ॐ वामदेवाय नमः ॐ
ऊर्जायै कलायै नमः ॥ ॐ ज्येष्ठाय नमः ॐ रक्षायै कलायै नमः ॥ रुद्राय नमः रत्यै कलायै ॥
कालाय ॐ कपालिन्यै कलायै नमः ॥ कल ॐ कामायै कलायै नमः ॥ विकरणाय नमः ॥ ॐ
संयमिन्यै कलायै नमः ॥ बल ॐ क्रियायै कलायै नमः ॥ विकरणाय ॥ ॐ वृद्ध्यै कलायै
बल ॐ स्थिरायै कलायै नमः ॥ प्रमथनाय नमः ॥ ॐ रात्र्यै कलायै नमः ॥ सर्वभूतदमना
य नमः ॥ ॐ भ्रामण्यै कलायै नमः ॥ मनः ॐ मोहिन्यै कलायै नमः ॥ उन्मत्ताय नमः ॐ ज
रायै कलायै नमः ॥ ततः पार्श्वयोस्तनयोः नासिकायां मूर्ध्नि बाहुयुग्मे सद्योजातस्याष्टौ क
लान्यसेत् ॥ यथा ॥ ॐ सद्योजातं प्रपद्यामि ॐ सिद्ध्यै कलायै नमः ॥ सद्योजाताय वै नमः
ॐ वृद्ध्यै कलायै नमः ॥ भवे ॐ धृत्यै कलायै नमः ॥ ॐ भवे ॐ लक्ष्म्यै कलायै नमः ॥ अ
नादि भवे ॐ मेधायै कलायै नमः ॥ भजस्व मां ॐ प्रज्ञायै कलायै नमः ॥ भव ॐ प्रभायै कला
यै नमः ॥ उद्भवाय नमः ॐ सुधायै कलायै नमः ॥ ततः पंचांगुलीषु ॥ ईशानाद्याः पंच ॐ न्यसेत् ॥ तद्यथा ॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधि
पतिः शिवो मे अस्तु सदाशिवो ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोद
यात् ॥ ॐ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्तेस्तु रुद्ररू

पेभ्यः ॥ ॐ वामदेवाय नमो ज्येष्ठाय श्रेष्ठाय नमो रुद्राय नमः कालाय कलविकरणाय बलविक
रणाय प्रमथनाय नमः ॥ सर्वभूतदमनाय नमः मनोन्मनाय नमः ॥ ४ ॥ ॐ सद्योजातं प्रपद्यामि
सद्योजाताय वै नमः ॥ भवे भवे नातिभवे भजस्व मां भवोद्भवाय नमः ॥ ५ ॥ एवं मूर्तिं न्यस्य हृद
यगुह्यपादेषु तान् न्यसेत् ॥ ततोंगन्यासं तत्र कुर्यात् ॥ तद्यथा ॥ ऐं क्लीं ह्रूं स्त्रीं सः सर्वज्ञाय हृद
याय नमः ॥ अमृते तेजोमालिनि नित्यतृप्तये ब्रह्मशिरसे स्वाहा ॥ ज्वलितशिखिशिखाय अना
दिबोधनाय शिखायै वषट् ॥ वज्रिणे वज्रहस्ताय स्वतंत्राय कवचाय हुं ॥ सौं चौं हौं परतो ले
मशक्तये नेत्रत्रयाय वौषट् ॥ श्लीं पशु हुं फट् अनंतशक्तये अस्त्राय फट् ॥ एवं विन्यस्य ध्या
येत् ॥ तद्यथा ॥ मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पंचभिस्त्र्यक्षैरंचितमीशमिंदुमुकुटं पू
र्णेंदुकोटिप्रभं ॥ शूलं टंककृपाणवज्रदहनान्नागेंद्रघंटांकुशान् पाशं भीतिवरं दधानममि
ताकल्पोज्वलांगं भजे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततः शिवोक्तपीठपू
जां विधाय पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् ॥
यथा ॥ ऐशान्यां ॐ ईशानाय नमः ॥ पूर्वे ॐ तत्पुरुषाय नमः ॥ दक्षिणे ॐ अघोराय नमः ॥
उत्तरे ॐ वामदेवाय नमः ॥ पश्चिमे ॐ सद्योजाताय नमः ॥ ततः ईशान्यादिकोणेषु ॥ ॐ
निवृत्यै नमः ॥ ॐ प्रतिष्ठायै नमः ॥ ॐ विद्यायै नमः ॥ ॐ शांत्यै नमः ॥ ॐ शांत्यतीतायै ॥
इति प्रथमावरणं ॥ हां हृदयाय नमः हृदयं पूजयामि ॥ अग्निकोणे हीं नमः शिरसे स्वाहा ॥ शि
रः शक्तिं पूजयामि ॥ निर्ऋतिकोणे हूं शिखायै वषट् शिखाशक्तिं पूजयामि ॥ वायुकोणे हैं
कवचाय हुं कवचशक्तिं पूजयामि ॥ ईशानकोणे हौं नेत्रत्रयाय वौषट् नेत्रशक्तिं पू० ॥
पश्चिमे हः अस्त्राय फट् अस्त्रशक्तिं पूजयामि ॥ इति द्वितीयावरणपूजा ॥ ततोष्ट
पत्रेषु पूर्वादि ॐ अनंताय - ॐ सूक्ष्माय - ॐ शिवोत्तमाय - ॐ एकनेत्राय - ॐ एकरुद्रा

य नमः॥ ॐ त्रिमूर्त्तये॰ ॐ श्रीकण्ठाय॰ ॐ शिखण्डिने॰॥ तद्बाह्ये॥ उत्तरादिक्रमेण॥ ॐ उमायै॰
ॐ चण्डेश्वराय॰ ॐ नन्दिने॰ ॐ महाकालाय॰ ॐ गणेशाय॰ ॐ वृषाय॰ ॐ भृंगिरिटये॰ ॐ
स्कन्दाय॥ प्रणवादिनमोन्तेन पूजयेत्॥ तद्बाह्ये पूर्वादिक्रमेण इंद्रादीन् वज्रादींश्च पूज
येत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं पंचलक्षं जपः॥ तथा
च॥ एवं ध्यात्वा जपेन्मंत्रं पंचलक्षं मधुप्लुतैः॥ प्रसूनैः करवीरोत्थैर्जुहुयात्तद्दशांशतः॥
भुवनेश्वरीप्रणवं नमः शिवाय भुवनेशी पुनरष्टाक्षरो मनुः॥ ह्रीं ॐ नमः शिवाय ह्रीं॥ अ
स्य पूजा प्रातः स्नानादि पूर्वोक्तपीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शि
रसि वामदेवाय ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि उमापतये देवतायै नमः॥
ततः करांगन्यासौ॥ ॐ अंगुष्ठाभ्यां नमः॥ नं तर्जनीभ्यां स्वाहा॥ मं मध्यमाभ्यां वौषट्॥
शिं अनामिकाभ्यां हुं॥ वां कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ वंधूकाभं त्रिनेत्रं
शशिशिशुकलधरं स्मेरवक्त्रं वहंतं हस्तैः शूलं कपालं वरदमभयदं चारुहारं नमामि॥
वामोरुस्तंभभागाः करतलविलसत्चारुरक्तोत्पलाया हस्तेनाश्लिष्टदेहं मणिमयवि
लसद्भूषणायाः प्रियायाः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः दे
वोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानं विधाय आवरण
पूजामारभेत्॥ यथा केसरेषु॥ आग्निनिर्ऋतिवायुईशानकोणेषु॥ मध्ये दिक्षु च॥
ॐ हृदयाय॰ नं शिरसे स्वा॰ मं शिखायै॰ शिं कवचाय॰ वां नेत्रत्रयाय॰ यं अस्त्रा॰॥
ततो मध्ये पूर्वादिदिक्षु च॥ ॐ हृल्लेखायै॰ एवं गगनायै॰ रक्तायै॰ करालिकायै॥

महोग्रायै ॥ ततः पत्रेषु ॥ पूर्वादिदिक्षु मातॄन् पूजयेत् ॥ ॐ दक्षनाय ॥ एवं क्षेत्रपालाय ·
दुर्गायै · कार्त्तिकेयाय नंदिने विघ्नविनायकाय · श्यामाय · सेनापतये ॥ ततः पूर्ववत् ॥ पत्रा
न्ते ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं चतुर्दशलक्षं जपः ॥
तथा च ॥ मनुलक्षं जपेन्मंत्री तद्दशांशं यथाविधि ॥ जुहुयान्मधुरासिक्तैरारग्वधस
मिद्वरैः ॥ आरग्वधः स्वर्णशृंग इति ख्यातं ॥ तारमायापार्श्वसादं नमः श्रीवायव्याष्टाक्षरो म
नुः ॥ तारमायान्तगो बिंदुमनुस्वरसमन्वितं ॥ पंचाक्षरसमोप्युक्तो नस्कवर्णो मनुर्मतः
ॐ ह्रीं हैं नमः श्रीवायवे ॥ अस्य पूजा प्रातः कृत्यादि द्वारपालांत पीठन्यासांतं विधाय पूर्ववन्
त्रवत् ॥ ऋष्यादिन्यासकरांगन्यासान् कुर्यात् ॥ ततो ध्यानं ॥ वंदे सिंदूरवर्णं मणिमुकुटलस
च्चारुचंद्रावतंसं भालोद्यन्नेत्रमीशं स्मितमुखकमलं दिव्यभूषांगरागं ॥ वामोरून्यस्तपाणे
रुणकुवलयं संदधत्याः प्रियायाः वृत्तोत्तुंगस्तनाग्रे निहितकरतलं वेददंडेष्टहस्तं ॥
एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततः पीठपूजां विधाय ॥ पुनर्ध्यात्वा
आवाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ पूर्ववद् गा
नि संपूज्य पत्रेषु अनंतादीन् पत्राग्रेषु उमादीन् पूजयेत् ॥ तद्बहिः इंद्रादीन् वज्रा
दींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं त्रिल
क्षं जपः ॥ तथा च ॥ त्रिलक्षं जपेन्मंत्री मंत्रं मंत्रविदांवरः ॥ ततः सहस्रं प्रजुहुयात्पाय
सान्नैर्घृतप्लुतैः ॥ अथ मृत्युंजयमंत्रः ॥ तथा च निबंधे ॥ तारः स्थिरासनकर्णेंदुदृग्गुसर्ग
समन्वितः ॥ त्र्यक्षरात्मा निगदितो मंत्रो मृत्युंजयात्मकः ॥ ॐ जूं सः भृगुः सकारः ॥ अस्य
पूजा प्रातः कृत्यादि द्वारपालांत पीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात् ॥ यथा ॥ श्रीरसिक

होलऋषये ॥ मुखे देवी गायत्रीछंदसे ॥ हृदि स्कंदजयाय देवतायै ॥ ततः करांगन्यासो ॥ यथा
सां अंगुष्ठाभ्यां नमः ॥ सीं तर्जनीभ्यां स्वाहा ॥ सूं मध्यमाभ्यां वषट् ॥ सैं अनामिकाभ्यां हुं ॥ सौं
कनिष्ठाभ्यां वौषट् ॥ सः करतलपृष्ठाभ्यां फट् ॥ एवं हृदयादि ॥ तथा च निबंधे ॥ स्वगुणादी
र्घयुक्तेन षडंगानि समाचरेत् ॥ ततो ध्यानं ॥ चंद्रार्काग्निविलोचनं स्मितमुखं पद्मद्वया
तः स्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभं ॥ कोटीरेंदुगलत्सुधाप्लुततनुं हा
राद्यैश्च भोज्वलं कांत्या विश्वविमोहनं पशुपतिं स्कंदजमंत्रं भावये ॥ एवं ध्यात्वा मानसैः संपू
ज्य शंखस्थापनं कुर्यात् ॥ ततः पीठपूजां विधाय ॥ पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदा
नपर्यंतं विधाय आवरणपूजामारभेत् ॥ तद्यथा ॥ केशरेषु ॥ अग्निनिर्ऋतिवायुईशानकोणेषु
मध्ये दिक्षु च ॥ सां हृदयाय नमः ॥ इत्यादि संपूज्य तद्बहिरिंद्रादीन् वज्रादींश्च प्रजयेत् ॥ ततो
धूपादि विसर्जनांतं समापयेत् ॥ अस्य पुरश्चरणं लक्षत्रयं जपः ॥ तथा च ॥ गुणलक्षं जपे
न्नित्यं तद्दशांशं विशालधीः ॥ जुहुयादमृताखंडैः शुद्धदुग्धाज्यलोडितैः ॥ अथ दक्षिणामू
र्तिमंत्रः ॥ प्रणवो हृदयं पश्चात्ततो भगवते पदं ॥ ङेंतं च दक्षिणामूर्ति मह्यं मेधां मुदीरये
त् ॥ प्रय घठद्वयांतोयं द्वात्रिंशाक्षरो मनुः ॥ ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्र
यच्छ स्वाहा ॥ अस्य प्रजापतिः सत्यादिश्रोवोक्तपीठमन्वेतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥
शिरसि चतुर्मुखऋषये ॥ मुखे देवी गायत्रीछंदसे ॥ हृदि दक्षिणामूर्तये देवतायै ॥ ततः
करांगन्यासो ॥ ॐ ह्रां ॐ अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं ॐ तर्जनीभ्यां स्वाहा ॥ ॐ ह्रूं ॐ मध्यमाभ्यां वषट्
ॐ ह्रैं ॐ अनामिकाभ्यां हुं ॥ ॐ ह्रौं ॐ कनिष्ठाभ्यां वौषट् ॥ ॐ ह्रः ॐ करतलपृष्ठाभ्यां फट् ॥ एवं हृद
यादिषु ॥ तथा च निबंधे ॥ तारं रुद्रैः स्वरैर्दीर्घैः षड्भिरंगानि कल्पयेत् ॥ अथ वा मंत्रसंभ

तैः पदैर्वा कल्पयेद्बुधः ॥ ततो ध्यानं ॥ वटवृक्षं महोच्छ्रायं पद्मरागफलोज्वलं ॥ गारुत्मतंमयैः पत्रैर्विचित्रैरुपशोभितं ॥ नवरत्नमहाकल्पैरंबमानैरलंकृतं ॥ विचिंत्य वटमूलस्थं चिंतयेल्लोकनायकं ॥ स्फटिकरजतवर्णं मौक्तिकीमक्षमालां अमृतकलशविद्याज्ञानमुद्राकराब्जैः ॥ दधतमुरगकक्षं चंद्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनादिकं वोक्तपीठपूजां विधाय पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् ॥ केसरेषु ॥ अग्निनिरृतिवायुईशानकोणेषु ॥ मध्ये दिक्षु च ॥ ॐ आं हृदयाय ॥ इत्यादि पूजयेत् ॥ पत्रेषु पूर्वादि ॥ ॐ सरस्वत्यै ॥ एवं ब्रह्मणे ॥ सनकाय सनंदाय सनातनाय सनत्कुमाराय शुकाय व्यासाय गौतमाय तद्बहिः पूर्वादि ॥ सिद्धाय गंधर्वाय योगीन्द्राय विद्याधराय ॥ तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षं जपः ॥ तथा च ॥ लक्षमेकं जपेन्मंत्रं ब्रह्मचारी व्रते स्थितः ॥ जुहुयात्तद्दशांशेन पायसैः ... ॥ अथ चिंतामणिमंत्रः ॥ अग्निसंवर्तकादित्यरानिलौघबिंदुमत् ॥ चिंतामणीरिति ख्यातं बीजं सर्वसमृद्धिदं ॥ अग्नि रेफः संवर्तः क्षकारः आदित्यो मकारः रेफः रः अनिलो यकारः ऊ स्वरूपं षष्ठस्वर ऊकारः बिंदुः ॥ रक्ष्म्र्यूं ॥ अस्य प्रजापतिः ... ॥ सादि ... पीठमंत्रं तं विन्यस्य ... न्यासं कुर्यात् ॥ यथा शिरसि कश्यप ऋषये ॥ मुखे ... छंदसे ॥ हृदि अर्द्धनारीश्वराय देवतायै ॥ ततः करांगन्यासः ॥ रं अंगुष्ठाभ्यां नमः ॥ रं तर्जनीभ्यां स्वाहा ॥ मं मध्यमाभ्यां वषट् ॥ मं अनामिकाभ्यां हुं ॥ रं कनिष्ठिकाभ्यां वौषट् ॥ यं करतलपृष्ठाभ्यां फट् ॥ तथा च निबंधे ॥ रेफादि व्यंजनैः षड्भिः कुर्यादंगा

विषदूषकमात्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ नीलप्रवालरुचिरं विलसत्त्रिनेत्रं पाशारुणो
त्पलकपालत्रिशूलहस्तं॥ अर्धांबिकेशमनिशमनिशं प्रविभक्तभूषं॥ बालेंदुबद्धमुकुटं प्र
णमामि रूपं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः शैवोक्तपीठपूजां वि
धाय॥ पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ त
द्यथा॥ केसरेषु॥ अग्निनिर्ऋतिवायुईशानकोणेषु मध्ये दिक्षु च॥ रहृदयायनमइत्या
दिना पूजयेत्॥ ततः पत्रेषु पूर्ववत्॥ वृषभादीन् पत्राग्रेषु पूर्वादि ब्राह्मी माहेश्वरी कौमारी
वैष्णवी वाराही इंद्राणी चामुंडा महालक्ष्मीश्च पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च पू
जयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षं जपः॥ तथान्य
लक्षमेकं जपेद्धीमानित्थं मंत्रविचिंतयन्॥ अमुतं मधुरासिक्तैर्जुहुयात्तिलतंडुलैः॥ अ
थ नीलकंठमंत्रः॥ पार्श्ववह्निसमारूढं सत्तारवानाद्यबीजकं॥ यांतो वह्निसमारूढस्तुर्यस्वर
समन्वितः॥ बिंदुमांस्तद्द्वितीयं स्यात् टांतः सर्गस्तृतीयकं॥ नीलकंठात्मको मंत्रो विषज्वरह
रः परः॥ प्रों त्रीं ठः॥ अस्य पूजा प्रातः कृत्यादि शैवोक्तपीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥
शिरसि अरुण ऋषये॥ मुखे त्रिष्टुप् छंदसे॥ हृदि नीलकंठाय देवतायै॥ ततः करांगन्या
सो॥ यथा॥ हर हर स्वाहा अंगुष्ठाभ्यां नमः॥ कपर्दिने स्वाहा तर्जनीभ्यां स्वाहा॥ नीलकंठाय
स्वाहा मध्यमाभ्यां वषट्॥ कालकूटविषभक्षणाय हुं फट् अनामिकाभ्यां हुं॥ नीलकंठिने स्वा
हा कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथान्यनिबंधे॥ हरद्वयं वह्निजाया हृदयं परिकीर्ति
तं॥ कपर्दिने तद्युगलं शिरो मंत्रमुदाहृतं॥ नीलकंठाय ठं द्वं द्वं शिखामंत्रो मे मीरितः॥ काल
कूटपदस्यांते ङेंयुतं विषभक्षणं॥ हुं फट् कवचमादिष्टमस्त्रं स्यान्नीलकंठिने॥ स्वाहं

तमंत्राणेतानि पंचांगानि मनोर्विदुः ॥ ततो मंत्रन्यासः ॥ मस्तके प्रों नमः ॥ कंठे त्रीं नमः ॥ हृदि वः नमः ॥ तथा च ॥ मूर्ध्नि कंठे हृदि चोजे क्रमाद्बीजत्रयं न्यसेत् ॥ ततः समाहितो भूत्वा नीलकंठं विचिंतयेत् ॥ ततो ध्यानं ॥ बालार्कायुततेजसं धृतजटाजूटेंदुखंडोज्ज्वलं नागेंद्रैः कृतभूषणं जपवटीं शूलं कपालं करैः ॥ खट्वांगं दधतं त्रिनेत्रविलसत्पंचाननं सुंदरं व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकंठं भजे ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥ केसरेषु दिक्षु च ॥ हरहर स्वाहा हृदयाय नमः ॥ इत्यादिना पूजयेत् ॥ ततः इंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं त्रिलक्षं जपः ॥ तथा च ॥ लक्षत्रयं जपेन्मंत्रं तद्दशांशं च सर्पिषा ॥ हविषा जुहुयात्सम्यक् संस्कृते हव्यवाहने ॥ प्रणवो हन्नीलकंठायाष्टाक्षरः ॥ कृत्ये ॥ तारो हृन्नीलकंठाय मंत्रश्चाष्टाक्षरः परः ॥ ॐ नमो नीलकंठाय ॥ अस्य पूजादिकं सर्वं पूर्ववत् विशेषस्तु ॥ ब्रह्मा ऋषिः ॥ गायत्री छंदः ॥ अथ मंत्रांतरं ॥ हृदयं वपरं साक्षि तांतोत्रा संयुक्तो महत्तत् ॥ पंचाक्षरो मनुः प्रोक्तस्तारायोयं षडक्षरः ॥ नमः शिवाय ॥ ५ ॥ ॐ नमः शिवाय ॥ ६ ॥ अस्य पूजाप्रातः कलशादि शैवोक्तपीठमन्वंतं न्यासं विधाय ऋष्यादिन्यासं कुर्यात् ॥ शिरसि वामदेवाय ऋषये ॥ मुखे पंक्तिच्छंदसे ॥ हृदि ईशानाय देवतायै ॥ ततो मूर्तिन्यासः ॥ तर्जन्योः नं तत्पुरुषाय ॥ मध्यमयोः मं अघोराय ॥ कनिष्ठयोः शिं सद्योजाताय ॥ अनामिकयोः वां वामदेवाय ॥ अंगुष्ठयोः यं ईशानाय ॥ तथा च निबंधे ॥ मंत्रवर्णादिभूतं न्यसेत्पंचमूर्तीर्यथाक्रमात् ॥ तर्जनीमध्यमयोरनामिकांगुष्ठके पुनः ॥

एवं वक्त्रे हृदये पादद्वये गुह्ये मूर्द्धि तान्न्यसेत् ॥ एवं प्राग्याम्यवरुणौदीच्यमध्यमवक्त्रे तान्न्य
सेत् ॥ ततः करांगन्यासो ॥ ॐ अंगुष्ठाभ्यां नमः ॥ नं तर्जनीभ्यां स्वाहा ॥ इत्यादि एवं हृदयादिषु
तथा च निबंधे ॥ षड्भिर्वर्णैः षडंगानि कुर्यान्मंत्रस्य देशिकः ॥ ततो गोलकन्यासः ॥ हृदि ॐ नमः
वक्त्रे नं नमः ॥ अंसयोः मं नमः ॥ शिं नमः कुक्षौ ॥ वां नमः यं नमः एवं कंठनाभौ पार्श्वद्वये हृदि पृ
ष्ठे ॥ एवं मूर्द्धिवदने नेत्रयोर्न्नसोः ॥ एवं करतलसंधिषु साग्रेषु ॥ एवं शिरोवदनहृत्कुक्षिऊ
रुपादद्वये ॥ एवं हृदि वक्त्रे टकमूगोभयेवरेषु ॥ एवं वक्त्रांसहृत्पादोरुजठरेषु च ॥ ततो मूर्द्धि
भालोदरहृद्गुह्येषु पंच मन्त्रार्णान् न्यसेत् ॥ ततो जापकं कुर्यात् ॥ ॐ नमो भगवते स्थाणुमूर्त्तये ज्योति
र्लिंगात्मतात्मने ॥ चतुर्मूर्त्तिवपुच्छाय भासितांगाय शंभवे ॥ ततो ध्यायेत् ॥ ध्यायेन्नित्यं महे
शं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं ॥
पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववीजं निखिलभयहरं
पंचवक्त्रं त्रिनेत्रं ॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ शैवोक्तपीठपूजां
विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत ॥ य
था ॥ कर्णिकायां ॥ पूर्ववदीशानादि पंचमूर्त्तीः संपूज्य ॥ केसरेषु निवृत्त्यादि कलाः पूर्ववत्पूज्याः
ततोग्न्यादिकोणेषु मध्ये दिक्षु च ॥ ॐ हृदयाय ॥ नं शिरसे स्वाहा ॥ मं शिखायै वषट् ॥ शिं
कवचाय हुं ॥ वां नेत्रत्रयाय ॥ यं अस्त्राय ॥ ततः पूर्ववदनंतादीन् पूजयेत् ॥ ततः उत्तरा
दिक्रमेणोमादीन् पूजयेत् ॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनां
तं कर्म समापयेत् ॥ अस्य पुरश्चरणं षट्त्रिंशल्लक्षं जपः ॥ पायसैराज्यसंमिश्रैः षट्त्रिं
शत्सहस्रं होमः ॥ तथान्य ॥ तत्र लक्षं जपेन्मंत्रं दीक्षितः शैववर्त्मना ॥ तावत्संख्यसहस्रा
णि जुहुयात्पायसैः शुभैः ॥ तत्र लक्षशब्देन षट्त्रिंशल्लक्षमुच्यते ॥ अंतरंगत्वात् ॥

अथ मंत्रांतरं ॥ अघदिक्को वह्निहिरिखरो मांतस्थो दांतईरितः ॥ फडंतश्चंडमंत्रोयं त्रिवर्ग
त्मासमीरितः ॥ अस्य पूजा ॥ प्रातःकृत्यादि शैवोक्तपीठन्यासांतं कर्म समाप्य ऋष्यादिन्यासं कुर्या
त् ॥ यथा ॥ शिरसि त्रितऋषये ॥ मुखे ऽनुष्टुप् छंदसे ॥ हृदि चंडेश्वराय देवतायै ॥ तथा च
त्रिवेचे ॥ अस्य त्रितो मुनिः प्रोक्तः छंदोनुष्टुबुदाहृतं ॥ चंडेश्वरो देवतेत्यादि ॥ ततः करांग
न्यासः ॥ दीप्तफट् अंगुष्ठाभ्यां नमः ॥ ज्वलफट् तर्जनीभ्यां स्वाहा ॥ ज्वालिनिफट् मध्यमाभ्यां
वषट् ॥ द्वेषयफट् अनामाभ्यां हुं ॥ हनफट् कनिष्ठाभ्यां वौषट् ॥ सर्वज्वालिनिफट् करतला
भ्यां फट् ॥ एवं हृदयादिषु ॥ तथा च ॥ प्रपंचसारे ॥ दीप्तज्वलज्ज्वालिनीति द्वेषयेत दहनेन च ॥
सर्वज्वालिनि सेयुक्तैः फडंतैरंगमाचरेत् ॥ ततो ध्यानं ॥ चंडेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशु
काढ्यं हृदि भावयामि ॥ टंकं त्रिशूलं स्फटिकाक्षमालां कमंडलुं बिभ्रतमिंदुचूडं ॥ १ ॥ एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततः शैवोक्तपीठपूजां विधाय चमिति बीजेन मूर
तिं संकल्प्य पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ अंगैः
प्रथमावरणं ॥ मातृभिर्द्वितीयं ॥ इंद्रादिभिस्तृतीयं ॥ वज्रादिभिश्चतुर्थम् ॥ ततो धूपादि
विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं त्रिलक्षं जपः ॥ तथा च ॥ वर्णलक्षं जपेन्मं
त्री होमं कुर्याद्दशांशतः ॥ मधुरत्रयसंयुक्तैः शुद्धैश्चैव तंदुलैः ॥ इति द्वियुमंत्राः ॥
अथ क्षैत्रपालमंत्राः ॥ मंत्रदेवप्रकाशिन्यां ॥ क्षौमिति बीजादिं क्षैत्रपालाय इत्यपेन नमोंत
प्रणवादि मंत्रः ॥ ॐ क्षौं क्षेत्रपालाय नमः ॥ तथा ॥ वर्णास्य मौ बिंदुयुक्तं क्षेत्रपालाय हृन्मनुः
ताराद्यो नववर्णोयं क्षेत्रपाल ईरितः ॥ अस्य पूजा प्रातःकृत्यादि प्राणायामांतं विधाय
मादि कृत्यंतं पीठं विन्यस्य ॥ ऋष्यादिन्यासं कुर्यात् ॥ अस्य ब्रह्मा ऋषिः ॥ गायत्री छंदः ॥ क्षेत्र
पालो देवता ॥ क्षौं बीजं ॥ आयेति शक्तिः ॥ षड्दीर्घयुक्तबीजेन षडंगन्यासः ॥ ततो ध्यानम् ॥

भ्राजच्चंद्रजटाधरं त्रिनयनं नीलांजनाद्रिप्रभं दोर्दंडात्तगदाकपालमरुणस्रग्वस्त्रगंधो
ज्ज्वलं ॥ घंटामेखलबर्बरध्वनिमिलत्झंकारभीमं विभुं वंदे संहितसर्पकुंडलधरं श्रीक्षे
त्रपालं सदा ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा धर्मादिकल्पितपीठे पूजां वि
धाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥ अंगैः प्र
थमावरणं ॥ अनलोक्षाग्निकेशकपालघंटावरमहाक्रोधपिंडिताशानपिंगलाख्यकूर्ध्व
केशोरगभिद्द्वितीयं ॥ इंद्रादिभिस्तृतीयं ॥ वज्रादिभिश्चतुर्थं ॥ ततो धूपादिविसर्जनांतं
कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षं जपः ॥ साज्येन चरुणा दशांशहोमः ॥ तथा च नि
बंधे ॥ लक्षमेकं जपेन्मंत्रं जुहुयात्तद्दशांशतः ॥ चरुणा घृतसिक्तेन ततः क्षेत्रं समर्चयेत् ॥
मंत्रदेवप्रकाशिकायां ॥ प्रणवरहितो यो मंत्रः ॥ क्षौं क्षेत्रपालाय ॥ मंत्रस्तस्य ॥ अस्य पुर
श्चरणं अयुतसंख्यजपः ॥ अथास्य बलिविधानं ॥ रात्रौ गृहांगने स्थंडिलं कृत्वा तत्र देवं स
परिवारं संपूज्य देवस्य कपाले बलिमंत्रेण त्रिवारं बलिं कृत्वा सपरिवारगणेभ्यः स्वस्वना
मभिर्बलिं दद्यात् ॥ बलिमंत्रस्तु ॥ एह्येहि विदुषिमुरु २ जंजय २ तर्जय २ विघ्नपद महाभैर
व क्षेत्रपाल बलिं गृण्ह २ स्वाहा ॥ तथा च ॥ प्रवमेत्हि द्वयं पश्चाद्विदुषिस्यान्मुरुद्वयं ॥ जंजयं
द्वितयं भूयस्तर्जयं द्वितयं पुनः ॥ ततो विघ्नपदस्यांते महाभैरव ततः परं ॥ क्षेत्रपाल बलिं गृ
ण्ह द्वयं पावकसुंदरी ॥ यद्वा एह्येहि लुरु लुरु जंभ जंभ हन हन विघ्नं विनाशय महाबलिं क्षेत्रपा
ल गृण्ह गृण्ह स्वाहा ॥ इति मंत्रः ॥ एष बलिविधिः ॥ सर्वविघ्नहनिवारको विजयश्चाकरश्च भ
वति बलिं मधिसोपदं शाष्ट लवहपिंडेन यात् ॥ फलं तु ॥ बलिदानेन संतुष्टः क्षेत्रपालः प्रय
च्छति ॥ शांतिमेधाबलारोग्यं तेजः पुष्टियशःश्रियः ॥ अथ बटुकमंत्रः ॥ निबंधेनुद्धरेत् ॥

ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ॥ बटुकं डेंतमुच्चार्य आपदुद्धारणं त
था ॥ कुरुद्वयं पुनर्डेतं बटुकं तं समुद्धरेत् ॥ एकविंशत्यक्षरात्मा शक्तिरुद्धो मनुः स्मृतः
अस्य प्रजापतिः ऋष्यादि प्राणायामं विधाय पीठन्यासं कुर्यात् ॥ तद्यथा ॥ धर्माद्यनैश्वर्य
तं देहे विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि बृहदारण्यकऋषये ॥ मुखे गायत्रीछंदसे
हृदि बटुकाय भैरवाय देवतायै ॥ ततो मूर्तिन्यासः ॥ ह्रां ॐ ईशानाय अंगुष्ठयोः ॥ ह्रीं
वं तत्पुरुषाय तर्जन्योः ॥ ह्रूं वुं अघोराय मध्यमयोः ॥ ह्रैं विं वामदेवाय अनामिकयोः
ह्रौं वं सद्योजाताय कनिष्ठयोः ॥ पुनस्तत्तदंगुलीभिः शिरोवदनहृद्गुह्यपादेषु तत्तद्बी
जादिकास्तत्तन्मूर्तिन्यसेत् ॥ तथा ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु च तान्न्यसेत् ॥ तथा
च निबंधे ॥ अंगुलीदेहवक्त्रेषु मूर्तिन्यासो यथा पुरा ॥ सत्पादिपंचह्रस्वाद्य शक्तिबीजपुरः
सरं ॥ आधारस्वरूपं चाद्यमीशानादिषु योजयेत् ॥ इति ॥ ततः करांगन्यासो ॥ ह्रां वां अंगुष्ठाभ्यां
इत्यादि ॥ ॐ ह्रां वां हृदयाय इत्यादिना षड्दीर्घयाजाबीजयेद्धन्न कुर्यात् ॥ तथा च निबंधे ॥
षड्दीर्घयुक्तया शक्त्या वकारेणान्वितेन रेत ॥ अंगानि जातियुक्तानि प्रणवाद्येन कल्पयेत् ॥ तस्य
ध्यानं त्रिधा प्रोक्तं सात्विकादिभजेदतः ॥ सात्विकं यथा ॥ वंदे बालं स्फटिकसदृशं कुंडलोद्भासिव
क्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः ॥ दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं ह
स्ताब्जाभ्यां बटुकमनिशं शूलदंडौ दधानम् ॥ राजसं यथा ॥ उद्यद्भास्करसन्निभं त्रिनयनं र
क्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलग्रीवमुदारभूषणशतं
शीतांशुचूडोज्ज्वलं बंधूकारुणवाससं भयहरं देवं सदा भावयेत् ॥ तामसस्तु ॥ ध्यायेन्नीला

द्विकालं शूलिशिशुकलधरं मुंडमालं महेशं दिग्वस्त्रं पिंगलाक्षं डमरुमथ सृणिं खड्गशूलाभया-
नि ॥ नागं घंटां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किं-
किणीनूपुराढ्यं ॥ सात्विकं ध्यानमाख्यातमपमृत्युविनाशनं ॥ आयुरारोग्यजननमपवर्गफलप्र-
दं ॥ राजसं ध्यानमाख्यातं धर्मकामार्थसिद्धिदं ॥ तामसं शत्रुशमनं कृत्याभूतगदापहं ॥ एवं ध्या-
त्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ अस्य पूजायंत्रं ॥ धर्माध्यमादिभिः कृतपीठे पंकजशोभि-
तं ॥ षट्कोणं च त्रिकोणस्थं व्योमपंकजशोभितं ॥ ततो मूलेन मूर्तिं संकल्प्य पूर्ववत् ध्यात्वा आवाहनादिकं
कुर्यात् ॥ तत्र क्रमः ॥ मूलादि सद्योजातमंत्रेणावाहनम् ॥ मूलादि वामदेवेन स्थापनं ॥ मूलेन
सान्निध्यं ॥ अघोरेण सन्निरोधनं ॥ तत्पुरुषेण योनिमुद्राप्रदर्शनं ॥ ईशानेन नंदनमिति शेषः ॥
ततः कर्णिकायां दिक्षु कोणेषु ईशानादीन् पूजयेत् ॥ ततो व्योमादिपंकजदलेषु असितांगादी-
न् भैरवान् पूजयेत् ॥ तत्र यथा ॥ असितांगो रुरुश्चंडः क्रोधश्चोन्मत्तभैरवः ॥ कपाली भीषण-
श्चैव संहारश्चाष्टभैरवाः ॥ एतैरष्टभिर्द्वितीयावरणं ॥ ततः षट्कोणेषु पूर्वादि ॥ ॐ ह्रां वां हृद-
याय इत्यादि षडंगानि पूजयेत् ॥ ततः पूर्वादि डाकिनी लाकिनी राकिनी काकिनी शाकिनी हाकि-
नी मालिनी देवीपुत्रान् पूजयेत् ॥ उमापुत्रान् दक्षिणतो यजेत् ॥ ऊर्ध्वं ऊर्ध्वमुखीपुत्रान् अधः
अधोमुखीपुत्रान् पूजयेत् ॥ तद्बहिरष्टदलेषु लोकपालान् बटुकरूपान् पूजयेत् ॥ तद्बहिः
पूर्वे ब्राह्मणीपुत्राय ॥ एवं ईशाने माहेश्वरीपुत्राय ॥ उत्तरे वैष्णवीपुत्राय ॥ अनिले कौमा-
रीपुत्राय ॥ पश्चिमे इंद्राणीपुत्राय ॥ नैर्ऋते महालक्ष्मीपुत्राय ॥ याम्ये वाराहीपुत्राय ॥ अन-
ले चामुंडापुत्राय ॥ तथा च निबंधे ॥ ब्रह्माणीपुत्रकं पूर्वे माहेश्वरीपुत्रमैश्वरे ॥ वैष्णवीपु-
त्रकं सौम्ये कौमारीपुत्रमानिले ॥ इंद्राणीपुत्रकं न्रयः पश्चिमे पूजयेत्ततः ॥ महालक्ष्मीसु-

तंपश्चात् रक्षोदिशि समर्चयेत् ॥ वाराहीपुत्रकं याम्ये चामुंडापुत्रमानले ॥ तद्वहिर्दशदिक्षु हेतु
कं त्रिपुरांतकं ॥ वैतालाग्निजिह्वकालांतकं करालांतकं एकपादं भीमरूपं अचलहाटकेश्वरं
पूजयेत् ॥ सकलेश्वरदिव्यांतरिक्षभूमिष्ठान् ॥ भूम्यंतरिक्षस्वर्लोकनिष्ठान् योगिनीसहि
त योगीशान् पूजयेत् ॥ योगिनीसहितदिव्ययोगीशाय ॥ सर्वयोगिनीसहितांतरिक्षयोगीशा
य ॥ योगिनीसहितभूमिष्ठयोगीशाय ॥ ईशानाग्निनिर्ऋतिषु पूजयेत् ॥ अस्यपुरश्चरण
मेकविंशतिलक्षं जपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं हविष्याशी जितेंद्रियः ॥ तद्दशांशं प्रजुहु
यात् तिलैर्मधुरसंयुतैः ॥ ततो बलिदानं ॥ पूर्वं विघ्नदुर्गां समाराध्य बलिं दद्यात् ॥ शाल्यन्नं शा
ल्पनं पललं सर्पिर्लाजचूर्णं निशार्करा ॥ गुडमिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितैः ॥ स्ताकू
रतलं माराध्य देवं प्रागुक्तवर्त्मना ॥ रक्तचंदनपुष्पाद्यैर्निश्रितस्मै बलिं हरेत् ॥ यद्वात्रन्नूना
गमजं हत्वा राजसं प्रागुदीरितं ॥ बलिप्रदानसमये रिपूणां सर्वसैन्यकेषु ॥ सर्वं गणो व्याधि
तजेत् सोमिषं क्रुद्धमानसः ॥ एवं कृते परसैन्यं क्षीयते नात्र संशयः ॥ निवेरयन् बलिं तेन
बटुकाय विशिष्टधीः ॥ निदं जायच्छत्रुनाम्ना बलिमंत्रमुदारधीः ॥ शत्रुपक्षस्य रुधिरं पिशितं च
दिने दिने ॥ भक्षयस्व गणैः सार्द्धं सारमेयसमन्वितः ॥ बलिमंत्रोयमाख्यातः सर्वेषां विजयप्रदः ॥
अनेन बलिना हृष्टो बटुकः परसैन्यकं ॥ यत्पादपंकजरजोऽमरवृंदवंद्यं यत्तू योगतः परेशि
वः परमेश्वरो भूत् ॥ यास्तष्टिपालनलयं जनुते त्रिमूर्त्या सा शांभवी विजयते जगदेकमाता ॥ शार
दायं ॥ अज्ञानतिमिरध्वंसी संसारार्णवतारकं ॥ आनंदबीजमवतादत्तवर्यं त्रैपुरं महः ॥ अथ
वक्ष्ये महाविद्यां त्रिपुरामतिगोपितां ॥ यां ज्ञात्वा सिद्धिसंघानामधिपो जायते नरः ॥ अथ भैर
वीमंत्राः ॥ तत्र शारदायां ॥ वियत् भृगुर्कुतान्दास्थो मौनि कोबिंदुशोस्वरः ॥ वियत्तदादिकेन्द्रो

ग्निस्थितं वामाक्षिबिंदुमत् ॥ आकाशांतगुवह्निस्थो मनुः सर्गेन्दुखंडवान् ॥ पंचकूटात्मिकाविद्या
वेद्यात्रिपुरभैरवी ॥ प्रथमं वाग्भवं कूटं द्वितीयं कामराजकं ॥ तृतीयं शक्तिकूटाख्यं त्रिभिर्वक्ष्ये
रुदाहृतं ॥ अस्यार्थः ॥ शिवचंद्रेवह्निर्वाग्भवं ॥ शिवचंद्रकामपृथिवीवह्निचतुर्थस्वरबिंदुम
त् ॥ शिवचंद्ररेफपृथ्वीचतुर्दशस्वरबिंदुविसर्गः ॥ ह्सैं ह्स्क्लीं ह्सौः ॥ अस्य श्रजाप्रातः कृत्यादि प्रा
णायामांतं विधाय पीठन्यासं कुर्यात् ॥ पूर्वोक्तक्रमेण पीठशक्त्यादि ईशानात्मने नमः इ सं
लविन्यस्य हृत्पद्मस्य पूर्वादिकेसरेषु ॥ ॐ इच्छायै नमः ॥ एवं ज्ञानायै । क्रियायै । कामिन्यै । का
मदायिन्यै । रत्यै । रतिप्रियायै । आनंदायै । मध्ये मनोन्मन्यै । तदुपरि ऐं परायै । अपरायै । परायै
ह्सौः सदाशिवमहाप्रेतपद्मासनाय ॥ पीठमनुं च विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि द
क्षिणामूर्तिऋषये ॥ मुखे पंक्तिछंदसे ॥ हृदि त्रिपुरभैरव्यै देवतायै ॥ गुह्ये वाग्भवाय बी
जाय ॥ पादयोस्तार्तीयशक्तये ॥ सर्वांगे कामराजाय कीलकाय ॥ दक्षिणामूर्तिसंहितायां
ऋषिश्च दक्षिणामूर्तिरहं शिरसि विन्यसेत् ॥ छंदः पंक्तिश्च विज्ञेयं मुखे विन्यस्य देवतां
हृदि न्यसेच्च ईशानी वाग्भवं बीजमुच्यते ॥ शक्तिबीजं शक्तिरेव कामराजं च कीलकं ॥ ततो ना
भ्यादिचरणपर्यंतं ह्सैं नमः ॥ हृदयान्नाभिपर्यंतं हसकलरीं नमः ॥ शिरसो हृदयांतं ह्सौः
नमः ॥ आद्यबीजं दक्षिणकरे द्वितीयं वामकरे तृतीयं बीजमुभयकरे ॥ ततो मूर्द्धि मूलाधारे
हृदि यथासंख्यं त्रीणि बीजानि विन्यसेत् ॥ तथा च निबंधे ॥ नाभेराचरणं न्यसेद्वाग्भवं
मंत्रवित्तमः ॥ हृदादिनाभिपर्यंतं कामराजं प्रविन्यसेत् ॥ शिरसो हृत्प्रदेशांतं तार्तीयं विन्य
सेद्बुधः ॥ आद्यं द्वितीयं करयोस्तार्तीयमुभयोर्न्यसेत् ॥ मूर्द्धाधारे हृदि न्यसेत्त्रयो बीजत्र
यं क्रमात् ॥ ततो नवयोनिन्यासः ॥ आद्यं बीजं दक्षिणकर्णे द्वितीयं वामकर्णे तृतीयं चिबुके एव

गंडयोर्वदने॥ नेत्रयोर्नसि॥ अंसयोर्जठरे॥ कूर्परयोः कुक्षौ॥ जानुनोर्लिंगे पादयोर्गुह्ये॥ पार्श्वयोर्हृ
दि॥ स्तनयोः कंठे॥ तथा च निबंधे॥ नरयोन्यात्मकं न्यासे कुर्याद्बीजैस्त्रिभिः क्रमात्॥ कर्णयोश्चिबु
के न्यसेः शंखयोर्वदने पुनः॥ नेत्रयोर्नसि विन्यस्येदंसयोर्जठरे पुनः॥ ततः कूर्परयोः कुक्षौ जानुनो
र्ध्वजे न्यसेदिति॥ पादयोर्गुह्यदेशे च पार्श्वयोर्हृदयांबुजे॥ स्तनयोः कंठदेशे च श्रीलिबीजानि विन्य
सेत्॥ ततो रत्यादिन्यासः॥ मूलाधारे ऐं रत्यै नमः॥ हृदि क्लीं प्रीत्यै॥ भ्रुवोर्मध्ये सौं मनोभवायै॥
पुनर्भ्रूमध्ये सौः अमृतेश्यै नमः॥ क्लीं हृदि योगिन्यै॥ मूलाधारे ऐं विश्वयोन्यै नमः॥ तथा च
निबंधे॥ मूले रतिं हृदि प्रीतिं भ्रूयोर्मध्ये मनोभवां॥ वाग्भवबीजे निर्न्यस्य स्रष्टाने पुनर्विलो
मतः॥ अमृतेशीं च योगेशीं विश्वयोनिं क्रमादिमाः॥ विलोमबीजैर्विन्यसेन्मूर्तिन्यासमथाचरे
त्॥ अथ मूर्तिन्यासः॥ मूर्ध्नि सहरां ईशानमनोभवाय॥ वक्त्रे सहरें तत्पुरुषमकरध्वजाय॥
हृदि सहरुं अघोरकुमारकंदर्पाय॥ गुह्ये सहरिं वामदेवाय मन्मथाय॥ पादयोः सहरं सद्यो
जाताय कामदेवाय॥ एवं मूर्ध्नि प्राग्याम्योत्तरपश्चिममुखेषु ईशानमनोभवादि पंच मूर्तिस्तत्त
द्बीजादिपूर्वकं न्यसेत्॥ स्वस्वबीजादिकं सर्वं मूर्ध्नि ईशानमनोभवं॥ सहरां ईशानमनोभवाय
नमः इति मूर्ध्नि एवं वक्त्रादौ॥ न्यसेद्वक्त्रे तत्पुरुषं मकरध्वजमात्मवित्॥ सहरें हृदये घोरकु
मारादि कंदर्पं तदनंतरं॥ सहरीं॥ गुह्यदेशेऽपि विन्यस्य वामदेवादिमन्मथम्॥ सहरं॥ सद्यो
जातं कामदेवं पादयोर्विन्यसेत्ततः॥ ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु तान्॥ प्रविन्य
सेद्यथापूर्वं गुर्व्यो मार्गसंस्थितं॥ सघादि पंचकं स्वाद्यं बीजमेषां प्रकीर्तितं॥ ततो बा
णन्यासः॥ मूर्ध्नि द्रां द्राविण्यै॥ अंगुष्ठयोः॥ क्लीं क्षोभिण्यै॥ तर्जन्योः॥ क्लीं वशीकरण्यै॥
मध्यमयोः॥ ब्लूं आकर्षिण्यै॥ अनामयोः॥ सः संमोहिन्यै॥ कनिष्ठयोः॥ तथा च ज्ञानार्णवे॥

पंचबाणान्क्रमेणैव करांगुलीषु विन्यसेत्॥ अंगुष्ठादिकनिष्ठांतं क्रमेण कामन्यासः॥ क्लीं कामाय॥ क्लीं मन्मथाय॥ ऐं कंदर्पाय॥ ह्रूं मकरध्वजाय॥ स्त्रीं मीनकेतनाय॥ ततो मूर्ध्नि पादवक्त्रे गुह्ये हृदि पूर्ववत् बाणान्कामांश्च न्यसेत्॥ तथा च ज्ञानार्णवे॥ थांतं सांतं समालिख्य बिंदुसंस्थं क्रमेण हि॥ मुखवृत्तेन नेत्रेण वामेन परिमंडितं॥ बाणद्वयमिदं प्रोक्तं मादनं मोहनं स्मृतं॥ चतुर्थस्वरबिंद्वाढ्यं नादह्रं पंचराननं॥ फूंतं द्रांक्रसमायुक्तं वामकर्णविभूषितं॥ बिंदुनादसमायुक्तं सर्गवांश्चंद्रमानंतं॥ पंचबाणान्महेशानि नामानि शृणु पार्वती॥ द्रावणः क्षोभणो वश्यस्तथाकर्षणसंज्ञकः॥ तथोन्मादः क्रमेणैव नामानि परमेश्वरी॥ न्यासे तु सर्वत्र स्त्रीलिंगेन प्रयोगः॥ तथा च निबंधे॥ द्रां मायाद्राविणीं मूर्ध्नि द्रीं मायाक्षोभिणीं पदे॥ क्लीं वशीकरणीं वक्त्रे गुह्ये ब्लूं बीजपूर्विकां॥ आकर्षिणीं हृदि पुनः सर्गांतं भृगुसंयुतं॥ संमोहिनी क्रमादेवं बाणन्यासोयमीरितः॥ तत्रोन्मादसंमोहनयोरेकपर्यायिता॥ कामांस्तत्रैव विन्यसेत् यास्तेषां पंचकामान्महदादिवी नामानि शृणु पार्वतीति॥ कामो मन्मथ कंदर्प मकरध्वजसंज्ञकाः॥ मीनकेतुर्महेशानि पंचमः परिकीर्तितः॥ पंचकामाइमे देवी बाणस्थानेषु विन्यसेत्॥ ततः करांगन्यासो कुर्यात्॥ षड्दीर्घयुक्तेनाद्येन बीजेनांगक्रिया मता॥ ह्रां अंगुष्ठाभ्यां नमः॥ [illegible] ह्रीं तर्जनीभ्यां स्वाहा॥ [illegible]॥ ह्रूं मध्यमाभ्यां वषट्॥ ह्रैं अनामिकाभ्यां हुं॥ ह्रौं कनिष्ठाभ्यां वौषट्॥ [illegible]॥ ह्रः करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततः स्वांगन्यासः॥ भाले ऐं क्लीं ब्लूं स्त्रीं सः स्वनंगाये॥ भ्रूमध्ये ऐं५ अनंगायै॥ वदने ऐं५ अनंगसर्पिण्यै॥ चिबुकायां ऐं५ अनंगमालिन्यै॥ कंठे ऐं५ अनंगायै॥ हृदि ऐं५ अनंगकुसुमायै॥ नाभौ ऐं५

अनंगमेखलायै॰ ॥ लिंगमूले ऐं ५ अनंगमदनायै॰ ॥ तथा च निबंधे ॥ स्रालक्तमध्यवदने लंबिका
कंठहृत्सु च ॥ नाभ्यधिष्ठानयोः पंचताराद्याः से नगादिकाः ॥ न्यस्तव्या विधिनादेव्या मंत्रिणा स्वमगा
मगाः ॥ मगसर्पिण्यथपरा नगमालिन्यतः परं ॥ अनंगानंगकुसुमा न्मथाख्यानंगमेखला ॥ अनं
गमदनासर्वा मदनविभ्रममंथराः ॥ प्रधानदेवतावर्णैरूपदगाधेरलंकृताः ॥ अक्षसस्तु वर
दाश्चीतिपुस्तकाधेकरांबुजा ॥ वाकूप्रमवाजकूस्त्री सस्ताराः पंचोदितास्तमी ॥ ततोन्मवर्णन्या
सः ॥ तल्लक्षयथा शिरसि अं नमः ॥ भाले आं नमः ॥ भ्रुवोर्मध्ये इं ईं नमः ॥ कर्णयोः उं ऊं नमः ॥ ने
त्रयोः ऋं ॠं ॥ नसि लृं लॄं ॥ गंडयोः एं ऐं ॥ ओष्ठयोः ओं औं ॥ दंतपंक्त्योः अं ॥ मुखे अः ॥ ॥
चिबुके कं ॥ गले खं ॥ कंठे गं ॥ पार्श्वयोः घं ङं ॥ स्तनद्वये चं छं ॥ दोर्मूलयोः जं झं ॥ कूर्परयोः
ञं टं ॥ पाण्योः ठं डं ॥ करपृष्ठयोः ढं णं ॥ नाभौ तं ॥ गुह्ये थं ॥ वौ दं धं ॥ जानुनोः नं पं ॥ जंघ
योः फं बं ॥ ग्रंथिस्थानयोः भं मं ॥ पत्तलयोः यं ॥ चरणांगुष्ठयोः रं ॥ कूर्च्यां लं ॥ ग्रीवायां
वं ॥ हृदि शं ॥ गुह्ये षं ॥ कर्णयोः षं ॥ गंडयोः सं ॥ मौलौ हं नमः ॥ सर्वत्र तथा च निबंधे
न्यसेच्छिरसि भाले भ्रू कर्णाक्षि पुगले नसि ॥ गंडयोरोष्ठयोर्दंतपंक्त्यां रास्येन्यसेत्स्वरा
न् ॥ चिबुके च गले कंठे पार्श्वयोस्तनयुग्मके ॥ दोर्मूलयोः कूर्परयोः पाण्योस्तत्पृष्ठदेशतः ॥
नाभौ गुह्ये पुनश्चोर्वौ जानुनोर्जंघयोस्तलः ॥ गुल्फयोः पत्तलयोः पश्चाच्चरणांगुष्ठयो
र्द्वयोः ॥ कादिरांतान्न्यसेद्वर्णान्स्थानेष्वेषु समाहितः ॥ कांचांगेवैयकेपश्चात्कंठके हृ
दि च गुह्यके ॥ कर्णयोगंडयोर्मौलौ लवतान्न्यक्षसांत्सहो ॥ एवं विमातृकान्यासं दे
विसाधकेसत्तमः ॥ ततस्त्रिखंडामुद्रां बध्वा ध्यायेत् ॥ उद्यत्सूर्यसहस्रकांतिमरुण
क्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरं ॥ हस्ताब्जैर्दधतीं त्रिने

च्चविलसत्तरवत्कारविंदुभियं देवीमर्द्धहिमांशुरत्नमुकुटां वंदे समेदस्मितां॥ एवं ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात्॥ ततः ओं आधारशक्त्यादि ह्रीं श्रीं नालांतेन मंत्रेण तं निन्यस्य पूर्वादि
केशरेषु मध्ये दिक्षु च॥ शारदायां॥ इच्छादिशक्तिभिर्युक्तं जैरत्नपीठमर्चयेत्॥ इच्छा ज्ञाना क्रि
या पश्चात् कामदा कामदायिनी॥ रतिरतिप्रियानंदा नंदिनी च मनोन्मनी॥ एताः प्रणवाद्यान
मोंताः पूजयेत्॥ ततः ऐं परायै॥ अपरायै॥ परापरायै॥ ह्सौः सदाशिवमहाप्रेतपद्मासनाय
नमः इति संपूज्य प्राग्वन्निमध्ये योन्यंतराले श्रीविद्योक्तगुरुपंक्तीः पूजयेत्॥ तथा च निबंधे॥
वाग्भवं लोहितं राय श्रीं अंकठोलोहि ५ तो नतः॥ दीर्घवान् येः परा पश्चात् अपरायै ह्सौ पुनः
सदाशिवमहाप्रेतङेंतेपद्मासनं नमः॥ अनेन मनुना दद्यादासनं श्रीगुरोः क्रमं॥ पातङेन्म
ध्ये योन्यंतराले पूजयेत् कल्पयेत्ततः॥ पंचभिः प्रणवैर्मूर्तिं तत्स्यामावाह्य देवतां॥ पूजयेद्दा
गमोक्तेन विधानेन समाहितः॥ शारदातिलके॥ कमलाहंस खफ्रें ह्सौं स्मृताः॥ ततः श्रीविद्यो
क्तगुरुपंक्तीः पूजयेत्॥ तद्यथा ओं गुरुभ्यो नमः॥ ओं गुरुपादुकाभ्यो नमः॥ ओं परमगु
रुभ्यो॰॥ ओं परमगुरुपादुकाभ्यो॰॥ ओं परात्परगुरुपादुकाभ्यो॰॥ ओं परमेष्ठिगुरुभ्यो नमः॥
तत्पादुकाभ्यो नमः॥ ओं आचार्येभ्यस्तत्पादुकाभ्यो नमः॥ अस्याः पूजायंत्रं॥ शारदायां॥ पद्म
मष्टदलोपेतं नवयोन्याद्यकर्णिकं॥ चतुर्द्वारसमायुक्तं भूगृहं विलिखेत्ततः॥ ऐं क्लीं श्रीं ह्सौः इति
विदुर्वर्णकैर्व्याप्तं मूर्तिं संकल्प्य त्रिखंडमुद्रया पूर्ववत् देवीं ध्यात्वा वीराहयेत्॥ ओं देवेशि भक्तिसुलभे प
रिवारसमन्विते॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥ तथा च निबंधे॥ पंचभिः प्रणवैर्मूर्
तिं तत्स्यामावाह्य देवतां॥ इत्यावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय अनुज्ञामादाय ने
त्॥ दत्वा वामकोणे ऐं रत्यै॥ एवं दक्षिणकोणे क्लीं प्रीत्यै॥ अग्निकोणे सौः मनोभवायै॥

केशरेषु ब्राह्म्यादि कोणेषु मध्ये दिक्षु च ह्रौं क्लीं हसरां हृदयाय नमः॥ इत्यादि नाग मंत्रेण पूजयेत्॥
तथा च ज्ञानार्णवे॥ अग्नीशासुरवायुषु मध्ये दिक्षु अंगपूजनं॥ ततः उत्तरे द्रां द्राविण्यै॥ क्लीं क्षो
भिण्यै॥ दक्षिणे क्लूं वशीकरण्यै॥ ब्लूं आकर्षिण्यै॥ अग्रे सः संमोहिन्यै॥ अथ ततः पंचकामा
न् पूजयेत्॥ उत्तरे क्लीं कामाय॥ क्लीं मन्मथाय॥ दक्षिणे ऐं कंदर्पाय॥ ब्लूं मकरध्वजाय॥ अग्रे
स्त्रीं मीनकेतवे॥ तथा च ज्ञानार्णवे॥ उत्तरस्यां द्वयं देवि दक्षिणस्यां द्वयं तथा॥ अग्रे चैकं क्र
मादेवि पंचबाणान् क्रमाद्यजेत्॥ पंचकामांस्तथा देवि बाणवत् परिपूजयेत्॥ पंचकामांस्तत
श्चैव परा बीजं मध्यबाणं वाग्भवं परमेश्वरि॥ तूर्यबाणं ततश्चैव स्त्रीबीजं च क्रमात्प्रिये॥ का
ममन्मथकंदर्पमकरध्वजसंज्ञकाः॥ मीनकेतुर्महेशानि पंचमः परिकीर्तितः॥ ततोऽष्टयोनि
षु पूर्वादि ऐं क्लीं क्लूं स्त्रीं सः अनंगायै॥ एवं ऐं ४ अनंगायै॥ ऐं ४ अनंगसर्पिण्यै॥ ऐं ४ अनंगमालिन्यै।
ऐं ४ अनंगायै॥ ऐं ४ अनंगकुसुमायै। ऐं ४ अनंगमेखलायै। ऐं ४ अनंगमदनायै॥ ततोऽ
ष्टपत्रेषु पूर्वादि क्रमेण अं असितांगब्राह्मीभ्यां॥ एवं रुरुमाहेश्वरीभ्यां॥ चंडकौमारीभ्यां।
क्रोधवैष्णवीभ्यां॥ उन्मत्तवाराहीभ्यां॥ कपालीन्द्राणीभ्यां॥ भीषणचामुंडाभ्यां। संहारमहा
लक्ष्मीभ्यां॥ तथा च निबंधे॥ मातरो भैरवांकस्थाः मदविभ्रमविह्वलाः॥ अष्टपत्रेषु संपूज्याः
यथावत् कुसुमादिभिः॥ तद्बहिः पूर्ववदिन्द्रादीन् वज्रादींश्च संपूज्य धूपादि विसर्जनांतं क
र्म समापयेत्॥ किंतु नैवेद्यानंतरं आविघ्नोच्च बलिं च तस्यै देयमिति॥ अस्य पुरश्चरणं
दशलक्षं जपः॥ होमस्तद्दशांशसहस्रसंख्यकः॥ तथा च शारदायां॥ दीक्षां प्राप्य जपेन्मंत्रं तत्त
त्त्वं जितेन्द्रियः॥ पुष्पैर्भानुसहस्राणि जुहुयात् ब्रह्मवृक्षजैः॥ बालाकौलेशसकलेष्टदा विद्या
नां एतावा पीठशक्तयः॥ स्थानापनो केतौ॥ अथ ऋष्यादिन्यासः॥ शिरसि दक्षिणामूर्त्तये।

ऋषये ॥ मुखे पंक्तिछंदसे ॥ हृदि चैतन्ये भैरव्यै देवतायै ॥ ततः करांगन्यासो ॥ प्रथमबीजमुच्चार्य अंगु
ष्ठाभ्यां ॥ द्वितीयं तर्जन्योः ॥ तृतीयं मध्यमा ॥ पूर्वक्रमात् ॥ द्वितीयं बीजमुच्चार्य कनिष्ठाभ्यां वौषट्
तृतीयबीजमुच्चार्य करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादि ॥ द्विरावृत्त्या षडंगानि न्यसेत् ॥
सर्वांगकृत्य नमः ॥ इति वचनात् ॥ ततो ध्यानं ॥ उद्यद्भानुसहस्राभां नानालंकारभूषितां ॥
मुकुटाग्रलसच्चंद्रलेखां रक्तांबरान्वितां ॥ पाशांकुशधरां निसांशामहस्तकपालिनीं ॥ वरदा
भयशोभाढ्यां पीनोन्नतघनस्तनीं ॥ एवं ध्यात्वा मानसैः संपूज्य कलशस्थापनं कृत्वा आधा
रशक्त्यादिपीठपूजां विधाय वामाज्येष्ठादिपीठशक्तीः पीठमनुं च यजेत् ॥ ततो भैरव्याः कृत्वा गुरु
पंक्तीः संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् ॥
तद्यथा ॥ प्रथमं षडंगानि संपूज्य आग्नेयकोणे प्रथमबीजमुच्चार्य हृदयाय ॥ ईशाने द्वितीयमु
च्चार्य शिरसे स्वाहा ॥ नैर्ऋते तृतीयबीजमुच्चार्य नेत्राय वौषट् ॥ चतुर्दिक्षु तृतीयबीजमुच्चा
र्य अस्त्राय फट् ॥ ततः पूर्वदलादिक संपूज्य ॥ अग्रे वसंताय ॥ वामे कामदेवाय ॥ दक्षिणे अं
चापाय ॥ ततः पूर्ववरुणान् पूजयेत् ॥ ततः षट्कोणेषु पूर्वादि अं डाकिन्यै ॥ एवं राकिण्यै ला
किन्यै काकिन्यै साकिन्यै ॥ अष्टदलेषु पूर्वादि पूर्वोक्तानंगकुसुमाद्याः पूजयेत् ॥ पत्राग्रेषु
पूर्वादि अं ब्रह्मणे नमः ॥ एवं सारसायभृगो यामे धायापापायाप्रमयायेतिवा ॥ अपांगां
य ॥ भुविलासाय ॥ हावाय भाराय ॥ ततः इंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादि वि
सर्जनांतं कर्म समापयेत् ॥ अस्याः पुरश्चरणं लक्षजपः ॥ तथान्वसानाएवे ॥ तद्द
संख्यं जपेन्मंत्रविदारि ॥ अथ कामेश्वरीभैरवी ॥ ज्ञानार्णवे ॥ कामेश्वरीचक्रदुर्गाप्रवीसिं
हासनेस्थिता ॥ एतस्या एव विधाया बीजद्वयमुदाहृतं ॥ तदंते भैरवी ॥ ज्ञानार्णवे ॥ यथा ॥
श्रीमत्त्रिपुरबालात्तथात्रिपुरभैरवी ॥ संपत्प्रदा नामतस्याः शृणु निर्मलमानसे ॥ त्रिवर्णं द्वो

वह्निसंस्थे वाग्भवं च वदनं तरं ॥ कामराजं तथा देवि ह्रीं वह्नि चंद्रान्वितं ततः ॥ पृथ्वीबीजं त
वत्स्वाढ्यं तालव्यं पश्चिमे तु चेत् ॥ शक्तिबीजे महेशानि ह्रीं वह्निनियोजयेत् ॥ कुमारी
परमेशानि हित्वा सर्गं तु भैरवं ॥ त्रिपुराभैरवी देवी महासंपत्प्रदा भवेत् ॥ तस्यार्थः
त्रिपुराभैरवी विसर्गरहिता चेत् संपत्प्रदा भवति ॥ भैरवी ॥ ज्ञानार्णवे ॥ यथा ॥ श्रीत्रिपुरा वालोल
था त्रिपुरभैरवी ॥ संपत्प्रदा ॥ अस्या ध्यानं ॥ आताम्रार्कसहस्राभां शरच्चंद्रकलाजटां ॥ किरी
टरत्नविलसत् भिन्नचित्रितमौक्तिकां ॥ स्रवद्रुधिरपंकाढ्यमुंडमालाविराजितां ॥ नयनत्र
यशोभाढ्यां पूर्णेंदुवदनान्वितां ॥ मुक्ताहारलताराजत्पीनोन्नतघनस्तनीं ॥ त्रिवलीरचनि
ता लग्नां नानारत्नविभूषितां ॥ रक्तांबरपरीधानां यौवनोन्मत्तरूपिणीं ॥ पुस्तकं चाभयं वामे द
क्षिणे चाक्षमालिकां ॥ वरदानरतां नित्यां महासंपत्प्रदां स्मरेत् ॥ न्यासपूजादिकं च पूर्ववत् ॥
अंगमंत्रे तु विशेषः ॥ ह्रूं रूं रैं स्त्रीं त्रिभिर्बीजैः करांगन्यासमाचरेत् ॥ अस्याः पुरश्चरणं त्रिलक्षं
जपः ॥ ज्ञानार्णवे ॥ वालावदस्याः पूजादिकं भिन्नकलात् ॥ तथा च ॥ न्यासपूजादिकं सर्वं कुमार्यो
इवस्कृते ॥ एकलक्षं जपः पुरश्चरणमिति केचित् ॥ सिद्धविद्यात्वात् ॥ अथ कौलेशीभैरवी ॥
ज्ञानार्णवे ॥ संपत्प्रदाभैरवीवह्निद्विकौलेशभैरवी ॥ सहाद्याभैरवी सा तु त्रिपुबीजे पुपार्वती ॥
इयं तु सहराद्यास्या ध्यानं पूजादिकं यथा ॥ अस्यार्थः ॥ त्रिकूटसकारादिश्चेत्तदा कौलेशभै
रवी भवति ॥ सहैं ॥ सहकलीं ॥ सहौं ॥ ध्यानपूजादिकं सर्वं संपत्प्रदाभैरवीवत् ॥ संपत्प्रदाभैर
वी आद्यंते रेफवर्जिता चेत् तदा भयविध्वंसिनी ॥ दक्षिणामूर्त्तौ तथा दर्शनात् ॥ ज्ञानार्णवे ॥ ए
तस्या एव विद्याया आद्यंते रेफवर्जिते ॥ सैं हं ॥ सहकलं स्हौं ॥ तदेव परमेशानि नाम्ना सकल
सिद्धिदा ॥ संपत्प्रदाभैरवीवत् ध्यानपूजादिकं भवेत् ॥ अस्यार्थः ॥ कौलेशभैरवी माद्यंते

रेफवर्जितान्वेतत्॥ दासकलसिद्धिदान्नवलि॥ ध्यानप्रजादिकं तु संपत्प्रदावत्॥ सदाद्यं सेहं॥
हसकत्री॥ हसौः॥ वाग्भवं वाद्यं ह्रींवच्चंद्रकलाःपराः॥ त्रिपुरे श्रीं ह्रीं क्लीं बीजं ह्रीं वाद्यं भैरवी
मनुः॥ प्रबोन्मेक ईश्वरी देव्याः कामकूटपरां ह्रीं वं॥ हिलोव्यारादियं विद्या भैरवी डामरेश्वरी॥
डामरेश्वरि भैरव्याः कादिहिलासरेश्वरि॥ बिंदुनादकलाक्रांतं शक्तिबीजं समुच्चरेत्॥ भै
यविध्वंसिनीनामभैरवी परिकीर्तिता॥ इति सर्वत्रिपुरभैरवी बहुधा॥ अथ चैतन्यभैरवी॥
रुद्रयामले॥ वाग्भवं बीजमुच्चार्य जीवप्राणसमन्वितं॥ सकलं भुवनेशानी द्वितीयं बीजमु
द्धरेत्॥ जीवप्राणं वह्निसंस्थं हाक्षस्वरविभूषितं॥ विसर्गाद्यं महेशानि विद्या त्रैलोक्यमातृ
का॥ अस्यार्थः॥ चंद्रहीन ह्रादशस्वरयुक्तः बिंदुनादकलाद्यं सेहं॥ चंद्रकामपृथिवी महामाया
सकलं ह्रीं॥ चंद्रह्रीं वह्निबीजं चतुर्दशस्वरविसर्गाद्यं च सह्रौः॥ अस्याः प्रज्या यंत्रं तन्नैव॥
त्रिकोणं चैव षट्कोणं नवकयंत्रं वरानने॥ चतुरस्रं चतुर्द्वारं एवं मंडलमालिखेत्॥ अस्याः प्रजा
आधारशक्त्यादिक्लीं आनात्मने॥ इसंतं विन्यस्य केशरे पूर्वादिक्रमेण॥ ॐ वामायै नमः॥ एवं
ज्येष्ठायै रौद्र्यै अंबिकायै इच्छायै ज्ञानायै कुब्जिकायै चित्रायै विषघ्निकायै सर्वयै आनंदायै
नमः॥ मध्ये ह्सौः सदाशिवमहाप्रेतपद्मासनाय॥ संपत्प्रदापरेशानि नियन्ति नेमदद्रवे॥ एतस्या
एनतीतद्यं रुद्राणीपरमेश्वरी॥ पूजाध्यानादिकं देवि चैतन्याश्चैव पूर्ववत्॥ त्रिकोणे तु विद्रो
पोस्ति कथयामि तवानघे॥ अग्रकोणक्रमेणैव नित्यं क्लिन्ना मदद्रवा॥ षडंगावरणं पश्चात्प्र
जयेत्सर्वसिद्धये॥ अथ षट्कूटाभैरवी॥ ज्ञानार्णवे॥ डाकिनी राकिनी बीजे लाकिनी काकिनीप
गे॥ साकिनी हाकिनी बीजाद्याहसक्षरसंकरहि॥ बीजषट्कं रुष्यदेवेहि योजयेभ्वं द्वस्व युगे॥ भा
षमेकारसंयुक्तं मम मध्यदी कारमंडितं॥ रोक्षस्वराक्षितं देवि तार्त्तीयं बीजमालिखेत्॥ बिंदुनाद

पूर्णाकांलंत्रितयं प्रोक्तं संभवं ॥ तृतीयबीजं सविसर्गमित्यर्पितं चांतरे ॥ कूरोष्ठ्यामादनं बीजं शिवं म
त्रैत्रिधालिखेत् ॥ ॐ ऐं ह्रीं मायाराकाभ्यां क्रमात् मंडितं कुरु ॥ बिंदुनादान्वितं चाधे हृदयमत्यं विसर्ग
वत् ॥ ध्यानमस्याः प्रवक्ष्यामि सर्वमंगलविस्तरं ॥ बालसूर्यप्रभां देवीं जपाकुसुमसन्निभां ॥ मुंडमा
लावलीरम्यां बालसूर्यसमांशुकां ॥ स्वर्णकलशाकार पीनोन्नतपयोधरां ॥ पाशांकुशौ पुस्तकं च
तथा च जपमालिकां ॥ दधतीमिति निर्दोषः ॥ द्विरष्टत्वाषडंगानि विधायपरमेश्वरि ॥ यंत्रमस्या व
दामि हे त्रिकोणं ततः पुटं लिखेत् ॥ बहिरष्टदलं पद्मं रविपत्रं ततो लिखेत् ॥ चतुरस्रं चतुर्द्वार
मेवं मंडलमालिखेत् ॥ षडंगावरणं देवि पूर्ववत् पूजयेत् शिवे ॥ रत्यादित्रितयं देवि त्रिकोणप
रि पूजयेत् ॥ डाकिन्याद्याश्च षट्कोणे अष्टपत्रे ततः परम् ॥ ब्राह्म्यादि युगलं पश्चात् रविपत्रे त
तः परं ॥ बालाद्याः पीठशक्तिस्तु वामाद्याः पूजयेत् क्रमात् ॥ चतुरस्रे लोकपालान् सायुधानपि प
रमेश्वरि ॥ अनेनैव विधानेन नित्यारव्यां भैरवीं यजेत् ॥ अथ भोगमोक्षप्रदा भैरवी ॥ ईशानादेवि ॥
एतस्या एव विद्याया षड्वर्णान् क्रमशः स्थितान् ॥ विपरितान् प्रदापोदेवि घोयं भोगमोक्षदा ॥ न्या
सपूजादिकं सर्वमस्या पूर्ववदाचरेत् ॥ अथ रुद्रभैरवी ॥ ईशानाद्येवे ॥ ह्रीं वन्हेचंद्रो मादनां तपातं व
ह्निसमन्वितं ॥ शाकिनि त्रं बिंदुनादकलाग्नवाग्भवं प्रिये ॥ संपत्प्रदाया भैरव्याः कामराजं तदे
वहि ॥ सदाशिवस्य बीजं तु महाहासि हासनस्य च ॥ एषा विद्या महेशानि वर्णितुं नैव शक्यते ॥ अ
स्यार्थः ॥ शिवचंद्र कांतपातं वह्निसंयुक्तमेकारदीर्घस्वरविशिष्टं बिंदुनादकलाकांतं वाग्भवं
बीजं ॥ शिवचंद्र काम पृथ्वी वह्नि चतुर्थस्वरसंयुक्तं नादबिंदुकलान्वितं कामराजबीजं ॥
प्रेतबीजं ॥ शाकिनीकूटं तृतीयं अस्याः पूजायंत्रं ॥ त्रिकोणं चैव वृत्तं च वृत्ताष्टदलपंकजं ॥ वृ
त्तभूमंडलं चेत्यादि ॥ अस्याः पूजा पीठः न्यासादि प्राणायामांतं विधाय चैतन्यभैरवीवत् ॥
पीठन्यासं कुर्यात् ॥ ॐ तत्पीठमंत्रस्तु ॥ अघोरे ऐघोरे ह्रीं सर्वतः सर्व सर्वेभ्यो घोरघोरे

तरेभ्यः श्रीनमोस्तु रुद्ररूपेभ्य ऐं ततः ऋष्यादिन्यासः ॥ यथा शिरसि दक्षिणामूर्त्तये ऋषये नमः
मुखे पंक्तिछंदसे ॥ हृदि रुद्रभैरव्यै देवतायै ॥ ततः करांगन्यासः ॥ प्रथमं बीजमुच्चार्य अंगुष्ठा
भ्यां नमः ॥ द्वितीयं बीजमुच्चार्य तर्जनीभ्यां स्वाहा ॥ तृतीयं बीजमुच्चार्य मध्यमाभ्यां वषट् ॥ पुनः
प्रथमं बीजमुच्चार्य अनामिकाभ्यां हुं ॥ द्वितीयबीजमुच्चार्य कनिष्ठाभ्यां वौषट् ॥ तृतीयबीज
मुच्चार्य करतलपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ततो ध्यानं ॥ उद्यद्भानुसहस्राभां चंद्रचूडां
त्रिलोचनां ॥ नानालंकारसुभगां सर्ववैरिनिकृंतनीं ॥ वमद्रुधिरमुंडालीकलितां रक्तवाससीं
त्रिशूलं डमरुं खड्गं तथा खेटकमेव च ॥ पिनाकं च शरां देवी पाशांकुशयुगं क्रमात् ॥ पुस्तकं चा
क्षमालां च बिभ्राणां सिंहासनस्थितां ॥ एवं ध्यात्वा मानसैः संपूज्य पूर्ववत् ध्यात्वा वाहनादि पं
चपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् ॥ अथाग्निकोणे प्रथमबीजमुच्चा
र्य हृदयाय ॥ ऐशान्यां द्वितीयबीजमुच्चार्य शिरसे स्वाहा ॥ नैरृत्यां तृतीयबीजमुच्चार्य शि
खायै वषट् ॥ वायव्यां पुनः प्रथमबीजमुच्चार्य कवचाय हुं ॥ मध्ये द्वितीयबीजमुच्चार्य नेत्र
त्रयाय वौषट् ॥ चतुर्दिक्षु पूर्वादिदिक्षु तृतीयबीजमुच्चार्य अस्त्राय फट् ॥ ततस्त्रिकोणे रत्यादिक
मभ्यर्च्य पत्राग्रेषु अंगादिकाः पूजयेत् ॥ पत्रेषु पूर्वादिदिक्षु असितांगब्रह्माद्याः पूजयेत् ॥ भू
गेहे इंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्च
रणं लक्षजपः ॥ अथ भुवनेश्वरीभैरवी ॥ तंत्रनामानि ॥ हंसाद्यं गगनं बाले हंसकांते स्फु
रणं ॥ शिवचंद्रौ महेशानि भुवनेशी च भैरवी ॥ त
रेश्वरी ॥ मंत्रबीजं भुवनेशानी द्वितीयं बीजमुद्धृतं ॥ आद्यो सबिंदु
थाग्निपुराणवे ॥ हंसास्त्रयोपि हसकाररूढास्तथापि पंक्तिस्वरसंविभिन्नाः ॥ शिवचंद्रराज्ञनमिति प्रथमं बी
परनोनि समग्रमध्ये निविष्टं बीजद्वयराज्ञियुक्तः ॥ अस्यार्थः ॥

जं ह्रीं वन्हिचंद्र नाम पृथिवी महामायाइति द्वितीयबीजं ॥ ह्रीं वन्हिचंद्र चतुर्दशस्वरसविसर्गं तृतीयं
बीजं ॥ अस्या यंत्रे चैतन्यभैरवी नवद्वीप्यं ॥ पूजनं च ॥ प्रातः कृत्यादि प्राणायामं विधाय चैतन्य
भैरव्याः पीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शिरसि दक्षिणामूर्तये ऋषये नमः ॥
मुखे पंक्तिछंदसे ॥ हृदि ॐ भुवनेश्वर्यै भैरव्यै देवतायै ॥ ततः कराङ्गन्यासौ ॥ षड्दीर्घभाज
मध्येन कुर्यादंगक्रियां मनोः ॥ तेन षड्दीर्घयुक्तेन मध्यमबीजेन कराङ्गन्यासौ ॥ तथा ॥ हस
कलह्रां अंगुष्ठाभ्यां नमः ॥ हसकलह्रीं तर्जनीभ्यां स्वाहा ॥ हसकलह्रूं मध्यमाभ्यां वषट् ॥
हसकलह्रैं अनामिकाभ्यां हुं ॥ हसकलह्रौं कनिष्ठाभ्यां वौषट् ॥ हसकलह्रः करतलपृष्ठाभ्यां फ
ट् ॥ एवं हृदयादिषु ॥ ततो ध्यानं ॥ जपाकुसुमसंकाशां दाडिमीकुसुमोपमां ॥ चंद्ररेखाजटा
जूटां त्रिनेत्रां रक्तवाससीं ॥ नानालंकारसुभगां पीनोन्नतघनस्तनीं ॥ पाशांकुशवराभीतिं
धारयंतीं शिवां श्रये ॥ अन्यत्सर्वं चैतन्यभैरवीवत्कर्तव्यं ॥ भुवनेश्वरीभैरव्या भेदांतर
मथोच्यते ॥ सहाद्यासे वदने शिलदासास्य सकलेश्वरी ॥ ध्यानपूजादिकं सर्वमेतस्या एव पार्व
ती ॥ इयं सहाद्यान्चेत् सकलेश्वरी ॥ ध्यानपूजादिकं तु पूर्ववत् ॥ अथ त्रिपुरबालामंत्रः ॥
निबध्यते ॥ अधरो बिंदुमानाद्यं मं सेंद्रस्थ ... ॥ पुनः ॥ द्वितीयं भृगुसर्गाढ्यो मनुस्वात्तृतीय
मीरितः ॥ एषा बालेति विख्याता त्रैलोक्यवशकारिणी ॥ अस्यार्थः ॥ ऐं क्लीं सौः ॥ वाग्भवं नाम बी
जं चंद्रबीजं सविसर्गश्चतुर्दशस्वरयुक्तं ॥ अस्याः पूजादिकं तु त्रिपुरभैरवीवत् ॥ शार
दायां पुरुषार्थे ॥ ज्ञानार्णवे वेदे विशेषतः ॥ न्यासादिकं तु तृतीयबीजेनैव कुर्यात् ॥ षडं
गमाचरेद्देवि ह्रींशब्दस्याक्रमेण तु ॥ अस्याः पुरश्चरणं त्रिलक्षं जपः ॥ तथा च ॥ ज्ञानार्ण
वे ॥ वर्णलक्षं जपेन्मंत्रं दशांशं हवनं चरेत् ॥ तर्पणं च तथा कुर्यात् सर्वसौभाग्यवर्धनं ॥

इतरेषां लक्षं जपः ॥ श्रीविद्यायां तु कूटत्वात् ॥ मंत्रांतरं श्रीचक्रमे ॥ तुर्यस्वरसमुच्चार्य बिंदुनादक
लान्वितं ॥ स्वरांतं पृथिवीसंस्थं तुर्यस्वरसमन्वितं ॥ बिंदुनादकलाक्रांतं सर्गवान्भृगुरव्ययः
शक्रस्वरसमोपेतो ऽहं कूलौः विद्यां समुद्धृत्य सारसमुच्चयादौ रूपबोधनात् ॥ तद्यथा ॥ वि
द्यामूलोत्पत्तिरेषा मयोक्ता ऽशालव्येयं सर्वथा सिद्धिकामैः ॥ देव्याः शापायेन विद्येयमाद्या पूर्वं
ले नप्रशापहीना न वेत्सेति मुंडमालातंत्रेपि ॥ कुमारीया श्रविद्येयं तं शापातिसंनतालथा ॥ आदि
मेन तुत्तुमा सामध्यमेन तु कीलिता ॥ तोले नसिध्यति ॥ नन्वेवं शारदोक्ता विद्यापि शापा स्यादिति
वाच्यं ॥ तस्याश्शापार्णवोक्तबिंदुघटितत्वात् ॥ शापोद्धारमाह ॥ मुंडमालातंत्रे ॥ केवलं शिवरूपे
ण शक्तिरूपेण केवलं ॥ माया प्रतिष्ठा विद्या इति हकारो वाग्भवे कामराजे च लातृ यवीजे हका
रः वक्ष्यमाणसारसमुच्चये तथा चदर्शनात् ॥ रुद्रयामले ॥ वाग्भवं प्रथमं देवि कामराजद्वि
तीयकं ॥ तृतीयं शक्तिवीजं तु शिवयुक्तं सदा भवेत् ॥ एषा वाला समाख्याता सर्वदोषविवर्जिता ॥
वाग्भवं कुंडिनीवीजं इकारांतं ततः परं ॥ शक्तिमौकारसंयुक्तं विसर्गं तदधः पठेत् ॥ नादविं
दुक्रांतं वीजं परमदुर्लभं ॥ एतद्वीजं मयं देवि हत्वा चा राजपेत्सुधीः ॥ साहं तं नाम हा नागे सुपा
रिदोषशांतये ॥ तत्रैव पाशवीजं महेशानि सशक्तिशिववह्निकं ॥ द्वादशस्वरसंयुक्तं नादविंदुस
मन्वितं ॥ कामवीजं प्रवक्ष्यामि क्लींकारं शक्तिकेवकं ॥ मादनं चंद्रवीजं च वह्निवामाक्षीविंदुवत्
शक्तिकूटं महादेवि क्रोंकारं शक्तिशैवकं ॥ वह्निवीजं मनुयुक्तं नादविंदुविसर्गकं ॥ चतुर्दशाक्ष
रीविद्या षोडशी श्रणु चांबिके ॥ हंसवीजं ततः पश्चात् षोडशी कथिता मया ॥ अथ नवकूटा ॥
तत्रैव ॥ वालावीजत्रयं देवि कूटत्रयं नवाक्षरी ॥ त्रियत्कूटत्रयं देवि त्रैरमानवकूटकं ॥ मंत्रां
तरं श्रीक्रमे ॥ शिवः शक्तिश्च वाग्वीजं नादविंदुकलान्वितं ॥ नादविंदुकलाक्रांतं कूटं परमदु
र्लभं ॥ शिवश्चेंद्रश्च संघातः सर्गविंदुकलान्वितः ॥ एषा नवाक्षरी वाला सर्वदोषविवर्जिता ॥

अस्यार्थः॥ शिवचंद्रवाग्भवं शिवचंद्रकामजं वह्निमायातुर्यस्वरविंदुयुक्तं द्वितीयं शिवच
तुर्दशस्वरविंदुविसर्गयुक्तं अपरश्चायं चंद्रादिश्च तथा च त्रिपुरासारे॥ भैरवीयमुदिता कुल
पूर्वाशिष्टैर्धरित्रि न वेद्य॥ कूटत्रयं सेवशी प्रफुल्लदा च तुर्विधियेयमुच्यते॥ पशुजने च गोप्या
त्रिपुरासारे॥ शिवाष्टमं वेदवेलुमादिवीजं जगस्य पूर्वाष्टमवीजमन्यत्तः॥ परं शिवो युक्तकृथि
तास्त्रिवर्णा संकेतविद्या गुरुवक्त्रगम्या॥ एतासां मनुभैरवीवत्॥ मंत्रांतरं॥ शक्तिः शि
वो वह्निवीजं द्वादशस्वरविंदुकं॥ शक्तिर्महेशः कामश्च इंद्र वह्नी दु मायया॥ शक्तिः शिव
श्च वह्निश्च मनुस्वरविसर्गकः॥ नादविंदुकलायुक्तं वीजमेतत्प्रकीर्तितं॥ एतासां पूजा
दिकं तु भैरवीवत्॥ अस्य पुरश्चरणं लक्षजपः॥ श्रीक्रमादौ तथोक्तत्वात्॥ एतासां दीप
नी विद्या श्रीक्रमे॥ वद युग्मं महेशानि वाग्वादिनी ततः परं॥ एषा तु षोडशाक्षरी विद्या वाग्भवरा
द्ये नियोजयेत्॥ क्लिन्ने क्लेदिनि देवेशि महामोक्षं ततः कुरु॥ कामवीजं समुच्चार्य प्रणवं त
दनंतरं॥ महामोक्षं कुरु पश्चात् शक्तिकूटं तथोच्चरेत्॥ जपेद्वा दीजपेत् पश्चात् सप्तवार
मनुक्रमात्॥ अथान्नपूर्णेश्वरी भैरवी॥ ज्ञानार्णवे॥ तारं तु भुवनेशानी श्रीवीजं कामवी
जकं॥ हृदं ते भगवत्यंते माहेश्वरि पदं ततः॥ अन्नपूर्णे ठयुगलं विद्येयं विंशदक्षरी॥ का
मवीजं विना देवि त्रिवीजं सर्वकामदा॥ ऊनविंशाक्षरी देवि धनधान्यसमृद्धिदा॥ अस्याः पु
जापालः कुमारि सामान्यषडंगपूर्वन्यासं विधाय केशरेषु॥ सर्वाद्याभामायै॰ एवं ज्ये
ष्ठायै रौद्र्यै काल्यै कलविकरण्यै बलमथन्यै सर्वभूतदमन्यै मध्ये मनोन्मन्यै तत्समीपे ज
यायै विजयायै जितायै अपराजितायै नित्यायै विलासिन्यै दोग्ध्र्यै अघोरायै मध्ये मंगलायै॥

प्रणवादिनमोंतेन ततो ह्रोः सदाशिवमहाप्रेतपद्मासनाय नमः ॥ ततः ऋष्यादिन्यासः ॥ शि
रसि ब्रह्मणे ऋषये ॥ मुखे पंक्तिछंदसे नमः ॥ हृदि श्रीमत्पूर्णैश्वर्यै नैरव्यै देवतायै ॥ गुह्ये ह्रीं
बीजाय ॥ पादयोः श्रीं शक्तये ॥ सर्वांगे क्लीं कीलकाय ॥ ततः करांगन्यासे ॥ ह्रां अंगुष्ठाभ्यां नमः
इत्यादि ह्रां हृदयाय नमः इत्यादि ॥ अत्र च ज्ञानार्णवे तु भुवनेश्या महेशानि षड्दीर्घस्वरभिन्नया ॥
षडंगानि महेशानि छंदोन्यासादनंतरं ॥ ततः पदन्यासः ॥ मूर्ध्नि ॐ नमः ॥ चक्षुषोः ह्रीं नमः ॥
श्रीं नमः कर्णयोः ॥ क्लीं नमः नमो नमः ॥ नमो भगवति नमः ॥ माहेश्वरी नमः ॥ मुखे अन्नपू
र्णे स्वाहा नमः ॥ पुनः गुह्यादि मूर्धांतं न्यसेत् ॥ ततो ब्रह्मरंध्रमुखहृदयमूलाधारेषु च
तुर्वर्णानि विन्यस्य शेषं भ्रूमध्ये नासिकाकंठनाभिलिंगेषु सर्वत्र प्रणवादिनमोंतेन न्यसे
त् ॥ ज्ञानार्णवे ॥ एकमेकं पुनश्चैकं पुनरेकं द्वयं चतुः ॥ चतुश्चतुस्तथा द्वाभ्यां पदान्येता
नि पार्वति ॥ पदान्येतानि देवेशि नवद्वारेषु विन्यसेत् ॥ मूर्धादि गुह्यपर्यंतं पुनस्तेषु वरान
ने ॥ गुह्यादि ब्रह्मरंध्रांतं पदानां नवकं न्यसेत् ॥ तद्वत्कं तत्रैव ॥ ब्रह्मरंध्रास्यहृदयमूला
धारे चतुःक्रमात् ॥ चतुर्वर्णानि विन्यस्य परे वर्णानि विन्यसेत् ॥ भ्रूमध्ये नासिकाकंठ
नाभिलिंगेषु पंचसु ॥ एवं वर्णक्रमतो देवि नमः प्रभृति विन्यसेत् ॥ ततो मूलेन व्याप
कं न्यस्य ध्यानं कुर्यात् ॥ तप्तकांचनवर्णाभां बालेंदुकृतशेखरां ॥ नवरत्नप्रभादीप्त
मुकुटां कुंकुमारुणां ॥ चित्रवस्त्रपरीधानां शफराक्षीं त्रिलोचनां ॥ स्वर्णकुंभाका
रपीनोन्नतपयोधरां ॥ गोक्षीरधामधवलं पंचवक्त्रं त्रिलोचनं ॥ प्रसन्नवदनं शुभ्रं
नीलकंठविराजितं ॥ कपर्दिनं स्फुरत्सर्पभूषणं कुंदसन्निभं ॥ नृत्यंतमनिशं हृष्टं दृ
ष्ट्वानंदमयीं परां ॥ आनंदस्फुरल्लोलाक्षीं मेखलाद्यनिलंबिनीं ॥ अन्नदानरतां नि

यां भ्रमिश्री भ्रामलेरुतां ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ अस्याः पूजा
यंत्रे ॥ त्रिकोणं चतुष्पत्रं स्कपत्रं ततः परं ॥ कलापत्रं च भूविंबं चतुर्द्वारं समालिख
त् ॥ ततः पीठ पूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिं दत्वावरणपूजामारभेत् ॥ कर्णि
कायां ॥ आग्नेय्यादिषु वायुमध्ये दिक्षु च ॥ ह्रां हृदयाय नमः ॥ इत्यादिना षडंगानि पूजयेत् ॥
त्रिकोणाग्रे ॥ ॐ ह्रीं नमः ॥ श्रियायेति श्रियं पूजयेत् ॥ वायुकोणे ॥ ॐ नमो भगवते वराहरू
पाय ॐ भूर्भुवः स्वपतये भूपतित्वं मे देहि ददापय स्वाहेति वराहं पूजयेत् ॥ ईशानार्णवे ॥
ॐ नमः पश्चाच्च ततो भगवते परं ॥ ततो वराहरूपाय भूर्भुवः स्वपतिस्तथा ॥ ङें तं भूपति
त्वं च मे देहीति च ददापय ॥ वह्निजायान्वितो मंत्रो वराहस्य वरानने ॥ दक्षिणकोणे ॐ नमो ना
रायणाय निवारायणं पूजयेत् ॥ ततो वामदक्षिणे ग्लौं श्री मन्नमत्वा नं मे देहि अन्नाधिप
तये ममान्नं ददापय स्वाहा ॥ श्रीं ग्लौं इत्यनेन भूविंबे पंच पूजयेत् ॥ ततः चतुर्दले पुरतः
आरभ्य ऋं परे विघायेनमः ॥ क्लीं भुवनेश्वर्यै ॥ श्रीं कमलायै ॥ क्लीं सुभगायै नमः ॥ तथा च
ईशानार्णवे ॥ तारेशापर विघां च भुवनेशीं लक्ष्मीं ततः ॥ कमलां कमलया चान्द्रकामेन सुभगां यजे
त् ॥ अष्टपत्रे पुआल्वाधाभात रुः पूजयेत् ॥ षोडशपत्रेषु ॥ ॐ अमृतायै · आं अन्नपूर्णायै ·
इं मानदायै · ईं तुष्ट्यै · उं प्रीत्यै · ऊं रत्यै · ऋं ह्रियायै · ॠं श्रियै · लृं स्वधायै · ॡं धात्र्यै · एं ज्योत्स्ना
यै · ऐं हैमवत्यै · ओं छायायै · औं पूर्णिमायै · अं नित्यायै · अः अमावास्यायै नमः ॥ एता अन्न
पूर्णाशक्तीः ताः पूजयेत् ॥ तथा च ईशानार्णवे ॥ षोडशैते ः प्रपूज्याथ अन्नपूर्णा तु शक्तयः ॥
चतुरस्रे लोकपालान् पूजयेत् ॥ ईशानार्णवे ॥ तत्रैव ॥ चतुरस्रे लोकपालान् क्रमेण परि
पूजिताः ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तथा च ॥

एवं ध्यात्वा जपेन्मंत्रं लक्षसंख्यमनन्यधीः ॥ आज्येनान्ते जुहुयात् तद्दशांशमनंतरं ॥ श्री
डुपत्रे इरेयं ॥ इति भैरवीमंत्रपरिच्छेदः ॥ अथ श्रीविद्या ॥ तत्र ज्ञानार्णवे ॥ तत्र मेरुः ॥ भूमिश्चं
द्रः ॥ शिवो माया शक्तिः कृशानुः खमादनौ ॥ अर्धचंद्रश्च बिंदुश्च नवार्णो मेरुरुच्यते ॥ महात्रिपुरसुं
दर्या मंत्रा मेरुसमुद्भवाः ॥ सकला भुवनेशानी कामबीजसमुद्भवं ॥ सकलेति ॥ ककारलकार
सहितेत्यर्थः ॥ अनया सकला विद्या कथयामि वरानने ॥ शास्यतः स्वरवर्णाद्यं कलमध्ये सुलोचने
वाग्भवं पंचवर्णाद्यं कामराजमथोच्यते ॥ मादनं शिवचंद्राद्यं शिवांतं मीनलोचने ॥ कामरा
जमिदं चन्द्रषड्वर्णं सर्वमोहनं ॥ शक्तिबीजं वरारोहे चंद्राद्यं सर्वसिद्धिदं ॥ चतुरक्षररूपं तु
त्र्यक्षरा त्रिपुरी परा ॥ एतामुपास्य देवेशि कामः सर्वांगसुंदरः ॥ कामराजोऽत्र वेदे हि विधेयं श्रीस
रूपिणी ॥ अस्यार्थः ॥ शक्तिरेकारः तुर्यस्वर ईकारः तेन ककार एकार ईकार लकार महामाया ॥
इति वाग्भवकूटं ॥ मादनं ककारः शिवो हकारश्चंद्रः सकारः ॥ तावाद्यो यस्य ककारस्य शिवो हका
रं अंते यस्य तादृशः ककारः ॥ तेन हकार सकार ककार हकार लकार माहामाया ॥ इति काम
राजकूटं ॥ चंद्रः सकारः तेन सकार ककार लकार माहामाया इति शक्तिकूटं ॥ तेन त्रिभिः कू
टैः कामराजविधेयं ॥ कामराजाख्यविद्यायाः शक्तिं तुर्यं च सुंदरि ॥ हित्वा मुखे शिवं दद्या
लोपामुद्रा प्रकाशिता ॥ हसकलह्रीं हसकहलह्रीं सकलह्रीं लोपामुद्रोपासिता प्रकीर्तिता ॥
अस्यार्थः ॥ कामराजाख्यविद्यायाः वाग्भवे एकारमीकारं च सत्का आदौ हकारं सकारं च द
द्यात् अन्यत् समानं ॥ चंद्रपीठे ॥ कं शिवो भगतुर्यं च क्षमा मायेति वाग्भवं ॥ शिवकामौ
भगं तुर्यं क्षमा मायेति कामकं ॥ जीवकामौ भगं तुर्यं तत्परा शक्तिकूटकं ॥ मानवीयं समुदिता
सर्वदेवैर्नमस्कृता ॥ अन्यत् समानं ॥ इयमगस्त्योपासिता ॥ अनयो भेदमग्रे वक्ष्यामः ॥ ज्ञानार्ण
वेपि ॥ कामराजाख्यविद्यायां वाग्भवेन वरानने ॥ विद्योद्धारं प्रवक्ष्यामि शक्तिमादनमध्यगं ॥

ह्रीं वं कुर्याद्वाग्भवेलु ह्रीं वाद्यं कामराजकं ॥ चंद्राद्यं लुत्तृतीयं स्याद्विद्येयं मनुपूजिता ॥ अस्यार्थः
कामस्ततः ह्रीं वस्तदनंतरं एकारस्ततइकारादित्रयं वाग्भवं कूटं मध्यकूटं ह्रीं वाद्यं लत्तृतीयं चंद्रा
द्यं ॥ सहाद्यं वाग्भवं देवि चंद्राद्यं ह्रीं वमध्यगं ॥ मादनं कामराजं लुशान्तिबीजं सहाननं ॥ चं
द्रा ॥ सहकएईलह्रीं सहकहएईलह्रीं सहकएईलह्रीं इयं चंद्राराधितविद्येयं जोगमोक्षफल
प्रदा ॥ अस्यार्थः ॥ सकारहकारादि कामराजविद्याया वाग्भवकूटमस्या वाग्भवं ॥ सकारस्त
तो हकारस्ततः कामस्ततः ह्रीं वस्ततं एकारस्ततो लकारस्ततो महामायाइति कामराजकूटं
अस्य वाग्भवकूटं सहाद्यं शान्तिकूटं विद्येयं चंद्राराधिता ॥ हसाननं वाग्भवं लुह्रीं वाद्यं सहं
मध्यगं ॥ मादनं कामराजे लुतालरियं शृणु पार्वती ॥ हसाद्यं शान्तिबीजं लु कहसकएईलह्रीं ह
सकएईलह्रीं क्रो वेरीनेरेणप्रपूजिता ॥ अस्यार्थः ॥ कामराजाख्यविद्याया वाग्भवं हसाद्यं त
दस्य वाग्भवं ह्रीं वं चंद्रोततः कामस्ततः ह्रीं वस्ततः एकारस्ततः ईकारस्ततो लकारः महामा
यां इति कामराजकूटं ॥ अस्य वाग्भवकूटं ॥ हसाद्यं शान्तिकूटं ॥ कामराजाख्यविद्यायास्तात्त्वि
विद्यायापरे न वाग्भवकूटं ॥ कामराजकूटं वा त्रापि लदनशान्तिबीजं सहाद्य भिलिविशेषः ॥
रयं लुद्वितीयलोपामुद्रा ॥ कामराजाख्यविद्याया वाग्भवे मादनं त्यजेत ॥ चंद्रं तत्रैव संयो
ज्य कामराजे ततः परं ॥ हिलाचंद्रं मुखे कुर्याल्लृ ॥ विद्येयं चंद्रपूजिता ॥ अस्यार्थः ॥ कामरा
जाख्यविद्याया वाग्भवे कोमं त्यक्त्वा चंद्रं दद्याल्लृ ॥ कामराजे पुनः ह्रीं वाले चंद्रं सकाचंद्राद्यं
कुर्यात्ल ॥ अन्यत्समानं ॥ कामराजाख्यविद्याया हिलाभिमिं लत्तृतीयकं ॥ शान्तिबीजं स्थितां दे
वि चंद्रार्धः कुरुएव च ॥ तेन शान्तिकूटं चंद्रे द्रकामे महामायात्मकं ॥ विद्येयं ॥ कएईलह्रीं
हसकलहह्रीं इयं इंद्रोपासिता ॥ ह्रीं पासिता ॥ अन्यत्समानं ॥ चंद्रपीठे ॥

त्रगुर्स्वर्गं बिंदुमली जमाया त्रगुः शिवः कामहन्तृमिमायाः ॥ त्रगुस्मरो भर्त्तुर्भुवनेश्वरी च वि
द्येयमनुस्का त्रुवि सएईलह्रीं सहकहलह्रीं सकलह्रीं इयं च लोकं तरे एणपि नं मूपासितवि
द्या बोध्यो ॥ नंदिपूजिता ॥ सूर्योपासिताऽयं संप्रदायिगस्तु ॥ लोपामुद्राख्यविद्यायां द्वितीया
यां महेश्वरि ॥ कामराजे त्रगुं हित्वा मुखे कुर्यात्तमेवहि ॥ शिवं विना चतुर्थं तु लातरेयश्चात्के
गः शिवः ॥ अस्यार्थः ॥ द्वितीया लोपामुद्राविलिख्य कामराजकूटे सकारं स्वस्थानादुध्दृत्य
तमेवादौ दत्वा द्वितीयं हकारं विहाय सहकलह्रीं इति पंचाक्षरकूटं चरतित्त्वलीयशक्तिकूटे
शक्तं गध लीति शक्तिकोल कारानुबंधे ॥ शिवो हकारो यत्रेति प्रकोशः कएईलह्रीं सहकलह्रीं
सहकलहलह्रीं इयं सूर्योपासिता ॥ दक्षिणामूर्त्तिसंहितायां च सहाधमधसहेयोमं
ध्येकेः सूर्यपूजिता ॥ शृणु देवि प्रवक्ष्यामि चतुःकूटां च शांकरी ॥ लोपामुद्रां द्वितीयां तु वि
लिख्य स्मरसंदरि ॥ पुनर्विलिख्य तामेव च चतुर्थं पंचमे स्थितां ॥ हित्वा तु भुवनेशानीमेकं
त्वारेणचोद्धरेत ॥ चतुःकूटा महाविद्या शंकरेण प्रपूजिता ॥ कएईलह्रीं हसकहलह्रीं
सकलह्रीं कएईलहसकहलसकलह्रीं इयं शांकरी ॥ अस्यार्थः ॥ द्वितीयां लोपामुद्रां विलि
ख्य पुनरपि तामेव विलिख्य चतुर्थे पंचमे पि भुवनेशानी ॥ यत्केको त्वारेण चोद्धरेत ॥ तुत्वार
पांतु पूर्वं त्रिकूटमुत्वा यं कामे कारेतत्र ये दुःसंभु शाक्तां क वंदेपे शिवेंद्र चंद्र शिवचंद्र कं दर्पेंद्र
महामायाकत्वेरेत ॥ लोपामुद्रां पुनर्देवि विलिखेत्तदनंतरं ॥ नंदिकेश्वर विद्यां च वद कैश
वेस्ले बीकएईलह्रीं हसकहलह्रीं सहसकलह्रीं सहकहलह्रीं सकलह्रीं इयं विष्णूपासिता म
वेत ॥ अस्यार्थः ॥ पुनः सदर्थवशात् द्वितीया लोपामुद्रामित्यर्थः ॥ प्रक्रमादिति लंत्रको मु
द्रीकारः ॥ वस्कलस्त्वभागस्यस्य द्विधा विद्यां विलिख्य नंदिपूजितेति दक्षिणामूर्त्तिसंच 

नात्॥ कामराजाख्यविद्यायास्त्रिकूटेषु वरानने॥ यास्थिता भुवनेशानीद्वियाकुरु महेश्वरि॥ बिंदु
हीनां नादहीनां दुर्वासिः पूजितां भवेत्॥ दक्षिणामूर्त्तिसंहितायां च॥ मायास्थाने हरं वर्णयुगलं चक्र
मोयसेत्॥ काम मायारमा पूर्वं माया लक्ष्मी स्वरस्तथा॥ रमा माया तथा कामोयस्व वेदाक्षरी
जिधा॥ स्मरं योनि लक्ष्मीत्रितयमिति भगवद्दाचार्येण प्रतिपादितं॥ शक्तिकामराजस्कन्दी
क्रमे॥ मायाबीजं तथा क्षितिं कामशक्के वियत्क्रमात्॥ जालवेदोमगांकेन लांछितं परमे
श्वरि॥ एतद्व्यग्रवकूटं च पूर्ववत् कामराजकं॥ तथैव शक्तिबीजेतु संदृश्यं पापप्रकीर्त्तिता
अत्रापि पूर्ववद्बीजसंयोगः॥ अस्यार्थः॥ त्रिकूटस्थ भुवनेश्वरी द्वियाविवर्ज्य नाद बिंदुहीनं
कृतोच्चरेत्॥ परिभाषि कषोडशी माह॥ शानादर्वे॥ चंद्रांतं वारुणांतं च शक्रादि संहितं प्र
थकू॥ वामाक्षि बिंदुनादाद्यं विम्बमात्रकलात्मकं॥ विद्यादौ योजयेद्देवि साक्षात् ब्रह्मस्व
रूपिणी॥ त्रिकूटा सकला भेदाः पंचकूटाश्च वंति हि॥ वेष्ठबीजस्य कूटं स्यात् षट्कूटा शांक
री भवेत्॥ अस्यार्थः॥ चंद्रांतं हकारः वारुणांतं सकारः शक्रादि रेफः वामाक्षि ईकारः विद्यादौ पूर्वा
क्तविद्यादौ॥ वेदादि मंडिता देवि ब्रह्मविष्णु शक्तिमयी परा॥ तदा भेदास्सकलाः षट्कूटा परमेश्व
रि॥ वेष्ठबीजस्य कूटास्यात् सप्तकूटा च शांकरी॥ अस्यार्थः॥ पूर्वोक्तबीजद्वयवेली वेदादि
प्रणवः मंडिता आदौ भूषिता॥ अथ महाषोडशी॥ आद्यबीजद्वयं चन्द्र विपरीतक्रमेण हि॥
विलिख्य परमेशानि ललोन्या विसमुद्धरेत्॥ अंतमुखी वरारोहे कुमारी त्रिपुरेश्वरी॥ एभि
स्तु पंच संख्या तैर्वर्जैः संपुटितां यजेत्॥ षट्कूटा परमेशानि विद्येयं षोडशाक्षरी॥ त्रिकूटाः
सकलाश्चन्द्रे षोडशार्णाश्च वंति हि॥ वेष्ठबीजे केनेविंशार्णा भवेत् सप्तदशाक्षरी॥ अस्यार्थः॥
आद्यबीजद्वयं मायारमात्मकं तस्य विपरीतक्रमः॥ आदौ रमा पश्चान्माया अंतर्मध्ये स्थि

तं कामबीजं मुखे आदौ यस्याः कुमार्याः एभिस्तु पंचसंख्याकैः बीजैः षट्कूटां सप्तकूटां वसुकू-
टां नवकूटां वा संपुटीतां संपुटीतत्वं तु तलेनानुलोमविलोमेन संपुटितामित्यर्थः ॥ गांधर्वे-
पि ॥ ईश्वर उवाच ॥ रमाबीजं समुद्धृत्य मायाबीजं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क० ह० स०
सौः ऐं क्लीं ह्रीं श्रीं नियोजयेत् ॥ कामबीजं समालिख्य वाग्बीजं तदनंतरं ॥ चतुर्दशस्वरोपे-
तं चंद्रबीजं गुणान्वितं ॥ प्रवदाम्भुवनेशानि रमां चैव महेश्वरि ॥ पंचदशाक्षरीपश्चात् उद्धरेत्प-
रमेश्वरि ॥ व्युत्क्रमेण परमेशानि पूर्वोक्तं बीजपंचकं आलिख्य संपुटं कुर्याद्विधेयं द्व्यष्टकूटकं ॥
केचित्तु ॥ अनुलोमेन संपुटितामाहुः ॥ तत्र तथा च ॥ योगिनीतंत्रे ॥ श्रीबीजं मायास्मरयोनि-
शक्तिः तारं च मायाक्रमतोथ विद्या ॥ शक्त्यादिबीजैश्च विलोमतोत्स्याः श्रीषोडशी पंचक्लिवप्र-
दिष्टा ॥ तथा च रुद्रयामले ॥ श्रीर्माया मदनो वाणी परा तारं शिवप्रिया ॥ हरिप्रिया त्रिकूटा साथ
सा वाणी मतो भवः ॥ माया लक्ष्मीर्महाविद्या श्रीबीजा षोडशी परा ॥ दक्षिणोमन्त्रतो ॥ द्वितीयस्यादि
युग्मं तु विपरीतं लिखेत्सुधीः ॥ बालां चांते मुखी रुक्तां विलिखेत्तदनंतरं ॥ तारं मायां ततो लक्ष्मीं
तथा कूटत्रयं लिखेत् ॥ कलया संपुटं कुर्यात् रमाख्यां परमेश्वरी ॥ कलया पूर्वोक्त पंचकलया ॥
रमाख्या प्रलवादिषट्कूटा ॥ उमाख्यामिति पाठे अयमर्थः ॥ केचित्तु कलयेति स्थाने बालयेति पाठं कुर्व-
तस्तत्र परमेश्वरीमिति बालया आंतमुखया संपुटं वदंति ॥ श्रीं ह्रीं ऐं ह्रीं श्रीं क्लीं ऐं सौः क्लीं ह्रीं स्क्लीं सौः
क्लीं ऐं श्रीं ह्रीं श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं रमाख्य श्रीं ह्रीं मिति चलेनोत्तर रहस्ये ॥ क्लीं ऐं सौः ह्रीं ह्रीं श्रीं ह्रीं
मिति वदंति ॥ तन्न ॥ संपुटशब्दार्थापरिज्ञानात् ॥ नवरत्नेश्वरे ॥ मंत्रमादौ वदेत्सर्वं सांत्ये संज्ञामनं-
तरं ॥ विपरीतं पुनश्चांते मंत्रं तत्संपुटं स्मृतमिति ॥ संपुटलक्षणात् ॥ अनन्यथा पत्तेश्च सर्वतं-
त्रविरोधाच्च ॥ तथा च श्रीक्रमसंहितायां ॥ श्रीमायामादनोवाणीपरे तानि मुखे कुरु ॥ वेदादि ८५

भुवनेशानि श्रीबीजं च त्रिकूटकं ॥ षट्कूटां संपुटीकुर्यात् आद्यैः पंचभिरक्षरैः ॥ मायातंत्रे ॥ लक्ष्मी
परा मदनयोनियुता च शक्तिस्तारं परा च क्रमतः प्रथमस्त्वविद्या ॥ शक्त्यादिभिश्च विपरीततया प्र
दिष्टा श्रीमंत्रराजमुदितं परदेवतायाः ॥ एतेनानुलोमतः पंचबीजैः संपुटिता मिलितमलहेयं ॥ श्रुतौ
च ॥ रमा माया तारः परा लक्ष्मीः कुमारिका ॥ विद्या व्यस्ता बाला श्रीः परा तथा व्यस्ता विपरीता तथेति
व्यस्तेत्यर्थः ॥ कुमारी चांतमुखी ॥ अत्र कुमारिकानंतरं ताराद्रिति बीजसंबंधः स्त्रैरूपाक्यं वचना
त् ॥ त्रिपुरीश्रुतिवचनात् ॥ वस्तुतस्तु ॥ श्रीमायेमध्यादि बालिकालारोमया श्रीविद्यापरादि पंचबीजा
त्परां तव्यस्तानि वेति ॥ श्रीपराचेति पाठेन केवलं बाला व्यस्ता श्रीपरा चेति विद्याया षोडशीबीजानां
स्वरूपकथनेन ॥ तेन श्रीमत्साता रं माया श्रीबालात्रिकूटं व्यस्ता बाला अंतमुखा बाला रमामा
येति मतं च हेयं ॥ तथा च कुलाष्टके ॥ श्रीबीजं शक्तिबीजं च कामबीजं च वाग्भवं ॥ बालांतसंस्थितं बी
जं प्रणवं च ततः परं ॥ शक्तिबीजं रमां चैव विद्यां च परमेश्वरि ॥ लोपां वा काम राजं वा त्रिकूटमथवाप
रा ॥ विन्यस्य पुनराद्यानि पंच बीजानि सुंदरि ॥ विपरीतक्रमेणैव विन्यसेत् षोडशी परा ॥ यामले च ॥
लक्ष्मीपरामदनवाग्भवशक्तिबीजं तारं च मूलिकमले कथितां च विद्या ॥ कूटत्रयं च विपरीत
यानियुक्तं श्रीषोडशाक्षरमिहागमसुप्रसिद्धं ॥ कूटत्रयं कामारि बालायाः चैकाराद्यं रमां मायां
च ॥ निबंधे ॥ श्रीं लीं तं श्रीं नरवं सप्तममथुतं मंत्रयां तमस्तान्वितं ॥ देवी दक्षिणबाहुशक्ति नयनं का
मं कलालांछितं ॥ दंतां लोद्भु मुखं सजीवदशानं शेषं मुखेतान्वितं बीजं पंचकमित्थमेव मुदितं
सर्वार्थसिद्धिप्रदं ॥ वेदाद्यं त्रिगुणार मामथ वदेत् कामेन संसेविता लोपां वा पुनरेव पंच कमथो
द्वंद्वं विलोमक्रमेः ॥ एषा श्रीपरमापरा लपरतमा सर्वार्थसिद्धिप्रदा सारात्सारतरा समस्तजग
तामुत्पत्तिभर्ता शिवा ॥ सेयं श्रीब्रह्मरूपा सकलगुणमयी निर्गुणा निष्प्रपंचा साक्षात्काम

दुग्धासुराख्यरणैर्वंदितानंदरूपा ॥ अस्यार्थः ॥ स एव अंते यस्य लदंत ॥ शालः षकारः स एवांते
यस्य ॥ तेन शकारः ॥ शिवो हकारः ॥ तस्य पूर्वसप्तमो रेफः ॥ रकारः ॥ तुर्या ईकारः ॥ मस्तं अनु
स्वारः ॥ तेन रमाबीजं भवति ॥ श्रीं ॥ देवीशब्देन मायाबीजं ॥ ह्रीं ॥ दक्षिणबाहुः ककारः ॥ क्रो
क्रोलः लकारः ॥ नयनं ईकारः ॥ कामो कला लांछितं ॥ ईबिंदुलांछितं ॥ तेन क्लीं कामबीजं ॥ दंतां
तः ऐकारः ॥ तुर्य मुखबिंदुः ॥ तेन योनिबीजं ॥ ऐं ॥ जीवः सकारः ॥ शेषदशानमोकारः ॥ मुख
विसर्गः ॥ तेनान्वितं ॥ पराबीजं भवति ॥ सौः ॥ इत्थं सर्वार्थसिद्धिप्रदं बीजपंचकं ॥ वेदाद्यं
प्रणवः ॥ ॐ त्रिगुणा ॥ मायाबीजं ॥ रमा लक्ष्मीबीजं ॥ अथ च कामसंसेवितां लोपां वा त्रि
कूटात्मकां वदेत् ॥ पुनः पूर्वबीजपंचकं विलोमेन पठेत् ॥ मेदांतरमाह ॥ परा च कमला कामो
वाग्भवः शक्तिरेव च ॥ तारं शक्तिश्च कमला चित्कूटा योजयेत्ततः ॥ शान्त्याद्यं व्युत्क्रमान्न्यस्ये
त्स्यान्महाषोडशीपरा ॥ इमां विद्यां महादेवि योगीन्द्रोऽथ वा जपेत् ॥ भुक्तिमुक्तिप्रदा विद्या अं
ते कैवल्यदायिनी ॥ परा चाद्या भुवनेशानि ज्ञेया भुवनसुंदरी ॥ कमला चाद्या महाविद्या कमला
सुंदरी मता ॥ कामा चाद्या च महाविद्या विज्ञेया कामसुंदरी ॥ वाग्भवाद्या महाविद्या वाग्भ
वासुंदरी मता ॥ शान्त्याद्या च महाविद्या विज्ञेया शान्तिसुंदरी ॥ आनंदसुंदरीविद्या प्रथमो तु
परसुंदरी ॥ कामराजेन देवेशि लोपायाश्च विशेषतः ॥ स्यान्महाषोडशीमंत्रः खलु स्याद्विपर्य
यात् ॥ योगिनीतंत्रे ॥ श्रीबीजं शक्तिबीजं च कामबीजं च वाग्भवं ॥ शाक्तं संस्थितं बीजं प्रण
वं च ततः परं ॥ शक्तिबीजं रमां चैव विन्यसेत् परमेश्वरि ॥ लोपां वा कामराजं वा चैव वामथ
वा परा ॥ विन्यस्य पुनराद्यानि बीजानि पंच सुंदरि ॥ व्युत्क्रमेण समेता सा षोडशी तु विद्
तेजा ॥ तुरीया यास्ति था लक्षं जप्ता सिद्धिर्भवेत् ॥ व्युत्क्रमेणेति पंचबीजानि विन्यसेत्

स्यर्थः॥ श्रृणु देवि॥ वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि॥ वर्णितुं नैव शक्यं यच्छ्रीविद्याषो
डशाक्षरी॥ वैखरीवाच्यभावत्वात् अशक्ता गुणवर्णने॥ यतो निरक्षरं वस्तु परात्परतरं कारणं
मन्त्रीभूता हि पश्यंती मध्यमा मध्यमा च वैखरी॥ ब्रह्मविद्यास्वरूपा हि भुक्तिमुक्तिफलप्रदा॥ एको
च्चारे शतं देवि वाजपेयस्य कोटयः॥ अश्वमेधसहस्राणि प्रादक्षिण्य भुवस्तथा॥ कन्यादि
तीर्थयात्राः स्युः सार्द्धकोटितपस्विनाः॥ तुल्यं नाहं लिखे देवि नाम्नोच्चार्यविचारणा॥ एकोच्चारे पा
पिशितजं किं पुनर्ब्रह्म केवलं॥ षोडशार्णमहाविद्या न प्रकाश्या कदाचन॥ गोपितव्या त्वया भद्रे स्वयो
निरिव पार्वति॥ सिद्धियामले॥ कामो माया रमा वाग् ऐं क्लीं सौः त्रिकूटास्त्री नगोकुले॥ कालीकामक
लाकूर्चं सर्वादौ प्रणवः प्रिये॥ श्रीमहाषोडशी पंचअरव्याता भुवनत्रये॥ ज्ञाने नमस्तु हा विद्या
सर्वदेवैर्नमस्कृता॥ सप्तलक्षमहाविद्यास्तत्रापि संकथिताः प्रिये॥ सारात्सारतरा मुख्या मया वि
द्याः सुगोपिताः॥ बहुनाकिमहोक्तेन तासां सारा तु षोडशी॥ रुद्रयामले॥ बीजानि षोडश्यामाह
रुद्रयामले॥ आदौ लक्ष्मीपरं चैव तथा चैव कुमारिकां॥ श्रीबीजं च पराबीजं कामवाग्भवमेव च॥
परां श्रीबालिकां चैव लिखेत् चक्रमयोगतः॥ अं ते द्या तु परा श्री च संप्रकथिता त्वयि॥ बाला
प्रधाना विद्या च सर्वशास्त्रेषु गोपिता॥ तंत्रांतरे॥ आद्या कुंडलिनी शक्तिः शक्तिरागा तलः परा॥
निवेशयन्त्रयोर्मध्ये रेविजो बिंदुवल्लजं॥ ततस्तु मन्मथं बीजं वाग्भवांतरं॥ हल्लेखा रमयो
वल्के वेदवल्के विनिक्षिपेत्॥ ततो लोपां न्यसेत् देवि त्रिकूटे यथा वा परं॥ आद्यानि पंच बीजानि प
श्चात् विन्यस्य संहरि॥ षोडशीयं सुगोप्या हि स्त्रीहाद्वि प्रकाशिता॥ अस्या माहात्म्यमतुलं जिह्वा
कोटिशतैरपि॥ वक्तुं न शक्यते देवि किं वाच्यं पंचभिर्मुखैः॥ अपि प्रियतमं देयं सुतदारधनादि
कं॥ राज्यं देयं शिरो देयं न तु देया षोडशाक्षरी॥ इति महाषोडशी॥ रुद्रयामले॥ लोपायाः शक्तिकूटांते
हंसबीजं प्रकृतायदि॥ तदा सप्तदशार्णा विद्या साक्षात् ब्रह्मस्वरूपिणी॥ लोपामुद्रा वाग्भवे तु लुप्तध्वं

लेह्रीं वयोजनात्॥ सकारं कामराजाद्ये लोपा तु षोडशाक्षरी॥ अनयासदृशी विद्या न विद्या एव
गोचरे॥ तत्रैव॥ विद्याराज्ञी वाग्भवे तु कं लेसां तं नियोजनात्॥ षोडशाणी महाविद्या चिदूस्तेक
मयी श्रुता॥ सांतो हकारः॥ लोपा वाग्भवशाक्तो लेह्रीं व बीजं नियोजयेत्॥ तथैव शक्तिबीजे तु
लोपा सप्तदशाक्षरी॥ लोपायाः शक्तिकूटांते हंसबीजयुता यदि॥ सप्तदशाक्षरी विद्या साक्षा
त्कृशानस्वरूपिणी॥ अस्याः स्मरणमात्रेण ह्री वो न वलिनान्यथा॥ अणिमाद्यष्टसिद्धीश्च
साक्षाद्भूमिपुरंदरः॥ तत्रैवाष्टदशाक्षरी॥ यथा॥ लोपामुद्रामधिकृत्य अधरविंदुनायुक्तं
वाग्भवाद्ये नियोजयेत्॥ मादनं कामराजाद्ये तालं याद्ये महेश्वरि॥ भृगुः सर्गान्वितो देवि मनुना
च समन्वितः॥ अष्टादशाक्षरी ह्येषा श्रीविद्यानुविदुर्लभा॥ श्रीगुरोः कृपया देवि नित्या सिद्धिप्रदा
यिनी॥ नवलक्षं जपित्वा तु लोपामुद्रां महेश्वरी॥ अष्टादशाक्षरी विद्या पश्चाद्धावरानने॥ अ
न्यथा शापमाप्नोति कुलं तस्य विनश्यति॥ सर्वकल्याणदा विद्या सर्वविघ्नविनाशिनी॥ सर्वसौभा
ग्यदा देवि सर्वमंगलकारिणी॥ अनयासदृशी विद्या त्रैलोक्ये चातिदुर्लभा॥ रुद्रत्वं प्राप्तवा
नस्मिन्जे द्वा च ह्यष्टादशाक्षरी॥ विष्णुत्वं प्राप्तवान्विष्णुः ब्रह्मत्वं च प्रजापतिः॥ एवं प्रकारा वासा दे
वि श्रीमदष्टादशाक्षरी॥ नहि पंचदशाणीं हि लोपामुद्रा महेश्वरि॥ सम्यकूफत्प्रदा चैषा बी
जत्रयविवर्जिता॥ तत्रैव॥ कामराजाख्यविद्याया वाग्भवादौ तु वाग्भवं॥ भुवने श्रीकामराजे
श्रीबीजे शक्तिरर्वतः॥ एषाष्टादशी विद्या सर्वसिद्धिप्रदायिनी॥ भोगमोक्षप्रदा साक्षात्पुरुषा
र्थप्रदायिनी॥ अनयासदृशी विद्या श्रीविद्या एव गोचरे॥ नास्ति नास्ति पुनर्नास्ति सत्यं सत्यं व
रानने॥ तत्रैव॥ प्रणवं पूर्वमुद्धृत्य ततो वै कुलसुंदरी॥ कामाक्षरं शक्तिवलं पुरंदर हंसो
ततः॥ भुवनेशी समुद्धृत्य विलोमा वालि कान्ततः॥ प्रणवं सविसर्गं तु पुनश्च कुलसुंदरी॥

शक्तिकूटमध्यभागे हकारं योजयेत् शिवे॥ विलोमां वालिकां तत्र ब्रह्माणः सविसर्गकः॥ इयं
श्रीपरमाविद्या केवलं मोक्षदायिनी॥ अस्या लक्षजपेनैव किन्नसाध्येत साधकैः॥ अस्याः स्म
रणमात्रेण शिवो जयति नान्यथा॥ कुलसुंदरी बाला॥ ब्रह्माणः प्रणवः॥ योगिनीजालसंव
तसरे॥ कामराजविद्यामधिकृत्य वाग्भार शक्तिबीजाद्यत्रिकूटात्क्रमयोगतः॥ त्रिपुरामालि
नीनाम्नान्नेद्वादशाक्षरी॥ वर्णसंख्यार्धजापेन पुरश्चरणमिष्यते॥ ब्रह्मविद्येतिया
प्रोक्ता स्वचितानमकाशिता॥ इतिप्रश्नांतरं॥ श्रीक्रमे॥ तां विद्यां शृणु देवेशि कामभिंद्रस
मन्वितां॥ नादबिंदुकलाभेदात्तुरीयस्वरसंयुतं॥ महाश्रीसुंदरीविद्या महात्रिपुरसुंदरी॥ क
कारे सर्वमुल्लंन्तं कामं कैवल्यदायकं॥ लकारे सर्वमैश्वर्यं ईकारे सर्वसिद्धिदं॥ एवं बीजत्रयं
मद्रे विद्यानां सारसंग्रहं॥ वाक्भवं कामराजं च शक्तित्वेन नियोजयेत्॥ एकाक्षरेण कथि
ता ब्रह्मविद्यैव केवला॥ कामराजलोपामुद्रयोर्विशेषमाह॥ कुलोड्डीशे॥ श्रीन्नवावाग्भवाख्ये
श्वईश्वरी तारमन्मथैः॥ आद्यन्ते विद्यमाना सुंदरी षड्विधा भवेत्॥ तथा॥ अनयोराद्ये का
ममायाश्रीबीजं मायाश्रीकामबीजं॥ तथा॥ श्रीमायाकामबीजं तदा त्रिविधा द्वादशाक्षरी॥
तथा च कुलोड्डीशे॥ काममायारमापूर्वे मायालक्ष्मीस्मरस्तथा॥ रमा या तथा कामो वस्तृच द्वा
दशात्रिधा॥ स्मरं योनिं लक्ष्मीं त्रितयमिति नवतां वाण्येणप्रतिपादितेन च॥ शक्तिकामराजस्त
श्रीक्रमे॥ मायावीनथाक्षितिकामेशाक्रे नियतक्रमात्॥ जालवेदोम्टगांकेन लांछितं परमेश्व
री॥ एतद्वाग्भवकूटं च पूर्वनित् कामराजकं॥ तथैव शक्तिबीजं चेसुंदर्याषाप्रकीर्तिता॥ अत्रापि
पूर्ववत् बीजसंयोगः॥ माया ईकारः॥ क्षितिः एकारः॥ परमेश्वरी ईकारः॥ पुनः शक्तिमाह॥ ए
तद्भगं तो माया ब्रह्मा शक्रो हरो ग्निना॥ वामनेत्रेण संयुक्तो नादबिंदुविभूषितः॥ एतद्भाग

नवमुद्दिष्टं पूर्ववत्कामराजशक्तिकं ॥ गगनं एकारः ॥ अत्रापि पूर्ववत् बीजसंयोगः ॥ अत्र विशेषः ॥ त्रस्त्वी
जं यदा देवि त्रिकूटे देवि दुर्लभे ॥ प्रथमा सुंदरी देवि द्वितीया ब्रह्मसुंदरी ॥ शक्तिकूटं महेशानि
आनंदसुंदरीमता ॥ एषा तु षोडशी विद्या मलच्छेदे नदर्शिता ॥ त्रिकूटांते हंसबीजं बिंदुमर्द्धेन्दुभू
षितं ॥ एषा श्रीप्राणसंयुक्ता दारिद्र्यदुःखमोचनी ॥ शक्तिलोपामुद्रा ॥ शक्तिर्महेशः कामश्चंद्र
बीजं ततः परं ॥ महामाया ततः पश्चात् तव स्नेहाद्वदाम्यहं ॥ पूर्वेण तु कामशक्त्याप्ता व ऐनिष्की
लितात्मके ॥ इति शक्तिकामा हादिविद्या पश्चिमाम्नाययोजिता ॥ शक्तिः सकारः पूर्वेण तु कामराजवि
द्यावत् ॥ अत्रापि पूर्ववद्बीजसंयोगः ॥ शिवबीजं शक्तिः सोमं मादनं च पुरंदरं ॥ व्योम वह्निसमा
युक्तं तुरीयस्वरबिंदुकं ॥ पूर्ववत्कामराजे तु शक्तिबीजं समुद्धरेत् ॥ एषा विद्या महेशानि वर्णि
तुं नैव शक्यते ॥ शक्तिः सकारः सोमः सकारः पूर्ववत्कामराजविद्यावत् ॥ शिवः शक्तिर्भुवनेशी
वीवाग्भवं बीजमुत्तमं ॥ कामं व्योमेश्वरं देवि महामाया ततः परं ॥ सोमं व्योम महामाया नवार्णः
परिकीर्तिताः ॥ रुद्रशक्तिरियं देवि पूर्वाम्नाये हि नायिका ॥ मादनं गोत्रभित्संलोरेफवामाक्षि
चंद्रवान् ॥ नादबिंदुसमायुक्तः कपिलः परमेश्वरि ॥ अस्याद्य गगनेशाक्रांत कुली शान लश
शी ॥ मायाबिंदुसनादेन कामराजं समुद्धरेत् ॥ शक्तिर्मादनेशाक्रांत्येहरोच क्लीं तु माययाः ॥ बिंदु
नादसमाक्रांतः कपितः कामदो मनुः ॥ एषा विद्या महेशानि कपिलेकादशाक्षरी ॥ मादनं पंच
व क्रेंच लोहिताह दृयोगिनी ॥ पुरंदरो महामाया वाग्भवं बीजमुत्तमं ॥ पूर्ववत्कामशक्त्या
स्यमुद्धरेद्देवि सुंदरी ॥ लोहितो सकारः हे द्रयोगिनी मकारः पूर्ववत्कामराजविद्यावत्
न्टगवीशं गगनं हालं कालं बिंदुमहेश्वरं ॥ कामो सीवह्निबिंदुध्यं वाग्भवं परमेश्वरि ॥ कामरा
जे शक्तिकूटं पूर्ववत्तु समुद्धरेत् ॥ न्टगवी शां सकारः हालः क्षेकारः कालो मकारः गगनं हकारः

रः पूर्ववत् कामराजविद्यावत् ॥ सर्वत्रैवं क्रमः ॥ विद्युद्वीशस्ततो हांतः कालेशः पृथिवी ततः ॥ भुव
नेशी ततः पश्चाल्लयाग्भवं कथितं तथि ॥ कामराजं मूशक्तिकूटं पूर्ववत्कथितं प्रिये ॥ विद्युदीशश्च
कारयुक्तो हकारः कालेशो मकारः ॥ शक्तिः स्वयंभुः शंभुश्च शक्रश्च भुवनेश्वरी ॥ द्विवो मादनर
द्रेंद्र महामाया ततः परं ॥ कामं द्विवस्ततो ब्रह्माइंद्रश्च भुवनेश्वरी ॥ एषा तु परमेशानि सुंदरी सुके
गोद्या ॥ त्रिकूटा लेहं स बीजं तदा से पंचदशाक्षरी ॥ श्री ललचिं विलामलो ॥ वाग्बीजं विजयामायाब्र
ह्मा शक्रस्कपार्वती ॥ मन्मथं द्विवशक्तीच मादनो हरइंद्रकः ॥ महामाया ततः पश्चात् शक्तिमनु
ससर्गिकः ॥ चंद्रः प्रजापतिः शक्रो महामाया ततः परः ॥ अष्टादशाक्षरी विद्या महात्रिपुरसुंदरी
सर्वा लिहं ससंयुक्ता विंशाक्षरी तदा नवेत् ॥ देव्युवाच ॥ भाषा स्टेष्टि स्थिति हृती लिरा ख्यापंच सुंद
री ॥ कथयस्व प्रजास्व यद्विज्ञां रोचते मयि ॥ ईश्वर उवाच ॥ द्विवो मादन इंद्रश्च शक्तिश्च भुवनेश्वरी ॥
ब्रह्मा द्विवेंद्र शक्तिश्च महामाया ततः परं ॥ मदनेंद्रो शक्तिर्द्विवो महामाया तदंतिके ॥ एषा पंचदशी
भाषा साक्षात्त्रिपुरसुंदरी ॥ शक्तिः सकारः एषा भाषा ॥ द्विवश्चेंद्रस्तथा काममूशक्तिश्च भुवनेश्वरी ॥
द्विवेंद्र काम रुद्रो च चंद्रश्च परमेश्वरी ॥ शक्तिः कामश्च शक्रश्च महामाया ततः परं ॥ इयं स्टष्टिः ॥
द्विवेंद्रो कामशक्ती च महामाया ततः परं ॥ कामश्चंद्रो महेशश्च इंद्रः शक्तिश्च पार्वती ॥ ब्रह्मा महेश्व
रः शक्तिः शक्रस्क भुवनेश्वरी ॥ स्थितिरेषा ॥ द्विवेंद्र कामः शक्तिश्च तत्परा भुवनेश्वरी ॥ द्विवशक्ती
मादनेन्द्रो द्विवबह्नी भुमायया ॥ द्विवशक्तिश्च कलहा वह्निमायेंदुभूषिता ॥ एषा संहृतिः ॥ शक्रो ब्र
ह्माइंदुबीजं महामाया ततः परं ॥ वाग्भवं कथितं चैतत् कामराजं ततः शृणु ॥ शक्तिर्द्विवो मादनेंद्रो
तत्परा परमेश्वरि ॥ द्विवः शक्तिश्च सोमश्च भृग्वोब्रह्मा महेश्वरि ॥ एषा निराख्या ॥ भृग्वो हकारः ॥
देव्युवाच ॥ स्वभारतीम युमती कथयस्व मयि प्रभो ॥ इदानीं श्रोतुमिच्छामि यदि तेऽस्ति कृपा मयि
ईश्वर उवाच ॥ हकलसह्रीं हकहसह्रीं हसकलह्रीं इयं स्वभारती पंचदशाक्षरी ॥ द्विवा मादनशक्रो

च शक्तिस्तु भुवनेश्वरी ॥ महेशो ब्रह्म हंसश्च चंद्रोपि परमेश्वरी ॥ महेशः शक्तिः कामश्च पुरंदरो वि
यत् यथा ॥ अग्निमाया कलायुक्तं नादबिंदुविभूषितं ॥ हंसो हकारः माया कलाईकारः एषा स्वप्नाव
ती समाख्याता कलापंचदशी च या ॥ ब्रह्मा महेशाइंद्रश्च शक्तिश्च भुवनेश्वरी ॥ ब्रह्मा वियत् मरु
त् शक्रस्तत्परा भुवनेश्वरी ॥ मादनं सोमचंद्रश्च शक्रश्च भुवनेश्वरी ॥ मरुत् यकारः सोमः सका
रः चंद्रः सकारः ठकारो वा ॥ कहलसह्रीं कहलह्रीं कससठलह्रीं इयं प्रभावती त्रिपुरसुंदरी ॥ ए
षा प्रभावती ख्याता सर्वमंत्रेषु गोपिता ॥ वामकेश्वरतंत्रे च त्रिकूटक्रमेणाश्रिता ॥ सौभाग्यायास्त्रि
कूटेन पंचम्याः पंचकूटकं ॥ त्रिपुरायाम रुविद्या कूटैकादशभिर्मिता ॥ सारात्सारतरा विद्या क
थिते कादशाक्षरी ॥ अथ पंचमी ॥ कामं बिंदुयुतं देवि शक्तिर्मायेंद्रमेव च ॥ महामाया ततः प
श्चात् वाग्भवं बीजमुद्धरेत् ॥ कामं व्यंजनं ककारं बिंदुयुतं अकारयुक्तमित्यर्थः ॥ शक्तिरे
कारः ॥ माया ईकारः ॥ इंद्रः लकारः महामाया ह्रीं तेन कएईलह्रीं इति पंचाक्षरकं वाग्भवसं
ज्ञकं कूटं कामोपासित विद्यायाः स्थितं तत्रापि पंचमी विद्यायां वाग्भवं कूटं जातं ॥ वियच्चं
द्रः ततः पश्चात् कलोन कुलि वह्नि च ॥ मायास्वरेण संयुक्तं नादबिंदुसमन्वितं ॥ कुलो डीशो ॥
वाग्भवं प्रथमं कूटं शक्तिकूटं च पंचमं ॥ मध्यकूटत्रयं देवि कामराजं मनोहरं ॥ प्रथमं का
म पंचमी विद्यायोः प्रथमं कूटं वाग्भवाख्यं मध्यतन कूटत्रयं कामकूटाख्यं पंचमं त्यतं कूट
शक्तिकूट संसंज्ञकं भवति ॥ तथोच्च कामराजस्य मध्यवर्ति काम संज्ञक कूटत्रयस्य मध्ये हसकलह्रीं
इति पंचाक्षरकं प्रथमं कामराजस्य बीजं परमदुर्लभं ॥ वियद्बिंदुयुतं कामो हंसः शक्रस्ततः प
रं ॥ महामायालल: पश्चात् स्वभावतीति कथ्यते ॥ वियत् हकारः अकारश्चतः तेन हकामः सस्वरः
कः हंसः सस्वरः हकारः शक्रः सस्वरः लः महामाया ह्रीं एतत् पंचवर्णात्मकं कामकूटत्रयमध्ये

स्वभावतीनामकं॥ एतद्द्वितीयं काम कूटं च वलि॥ मादनं शिवबीजं च वायुबीजं ततः परं॥ इंद्र
बीजं ततः पश्चान्महामायां समुद्धरेत्॥ इति तृतीयं मधुमत्याः काम कूटं च वलि॥ मधुमत्यास्त
द्वितीय कूटं च वति॥ शिवबीजं तथा कामं इंद्रं देवि नियोजयेत्॥ महामायां ततः पश्चात् शक्ति कू
टं समुद्धरेत्॥ कथिता पंचमी विद्या त्रैलोक्ये भुवनगोप्या॥ देवी सकारं॥ ईश्वर उवाच॥ शृणु
देवि महाभागे शक्ति कूटं सुदुर्लभं॥ प्रथमं वाग्भवं कूटं कामराज कूटकं॥ शक्ति कूटं प्रवक्ष्या
मि तव स्नेहाद्विशेषतः॥ जीवं प्राणं महादेवि मादनं तदनंतरं॥ इंद्रबीजं ततः पश्चात् भुवनेशी
तु पंचमं॥ इति वा शक्ति कूटं॥ पंचपंचाक्षरैर्मंत्रैः पंच कूटश्च पंचमी॥ पंचपंचाक्षरी देवि पं
च कूटात्मका भवेत्॥ एषोक्ता च महादेवि पंचमी परमेश्वरी॥ जीवः सकारः प्राणो हकारः॥ अथ
वा देव देवेशि सौभाग्यायाश्च वाग्भवं॥ कूटत्रयं कामराजे शक्तिबीजं च सर्ववत्॥ वामनेत्रादि
कूटं वा नेत्रादि कूटमेव वा॥ अभिहासिद्धिदा नित्या सर्वदोषविवर्जिता॥ नेत्र एकारः॥ वाम
नेत्र ईकारः॥ लादि रादि कूटेयस्येत्यर्थः॥ एतेन अष्टधा पंचमी वाग्भवशक्ति कूट भेदात्॥ तथा
यामले॥ द्विविधा पंचमी विद्या पंचपंचाक्षरी प्रिया॥ मध्ये षडक्षरी चैव शक्तिश्चतुरक्षरी
षडिति कामराज विद्यायां मध्य कूटं शक्ति कूटस्य कामराजस्य शक्ति कूटमित्यर्थः॥ एषा चतु
र्धा वाग्भव कूटभेदात्॥ एतयोः कामराजस्योत्तरीयं कूटं तत्रैव॥ कामबीजं महेशानि शिव
बीजं ततः परं॥ लदैधो हंसबीजं तु इंद्रबीजं विचिंतयेत्॥ महामायां ततः पश्चात् कूटं पर
म दुर्लभं॥ एषा पूर्ववदष्टधा॥ अन्यास्तु धा॥ तथा॥ मायात्रैलोक्ये॥ काम कामा परा शक्ति
संस्थान स्थल रूपिणी॥ परा सकारः संस्थान स्थल रूपिणी॥ तेन षडंत्रिशत् रूपिणी॥

तथाच प्रदीपतंत्रे ॥ कामबीजं महेशानि ह्रीं तु बीजं ततः परं ॥ ततश्चंद्रबीजं तु पृथ्वीबीजं
ततो लिखेत् ॥ महामाया ततः पश्चात् कूटं परमदुर्लभं ॥ एषा पूर्वं वरदृष्टा ॥ अन्या च तु या ॥
तेन षड्विंशरूपिणी ॥ हंसमाहेश्वरि ॥ वामकेश्वरविद्यायाः कूटं वाग्भवमुत्तमं ॥ लोपायाः वाग्भ
वकूटं शक्तेर्वाग्भवमुत्तमं ॥ एकारादिवाग्भवं तु सौभाग्यश्च वाग्भवं ॥ एषा च पंचमी विद्या त्रैलो
क्यवशकारिणी ॥ पंचमी ॥ श्रीक्रमे ॥ एतासां चैव विद्यानां प्राणं शृणु वरानने ॥ रमाया हंसबी
जं च वाग्भवाद्ये नियोजयेत् ॥ जपश्च सप्तवारमेव ॥ दीपन्यां तु आदर्शनात् ॥ एतामिति पूर्वोक्तं ॥
श्रीक्रमोक्तविद्यानां पंचमानां ॥ विशेषः तद्यथा ॥ पूर्वोक्तपंचम्याः कामराजतृतीयेकूटे कहएलह्रीं
एलाद्द्वयोः एकारस्थाने सकारो देयः तद्रूपिणी महामाया ॥ रमामाया हंसबीजं वाग्भवाद्ये नि
योजयेत् ॥ शक्त्यां तु महेशानि हंसमायां रमां तथा ॥ कामराजत्रये देवि ककारं शक्तिसंयुतं ॥ मा
याबिंदुस्वरयुतं सूर्यकोटिसमप्रभं ॥ स्फुरत्त्रिकोणमध्यस्थं करुणानेत्रसंयुतं ॥ प्रथमं काम
कूटस्य चाद्ये नियोजयेद्दृढं ॥ वातं वह्निसमायुक्तं वामनेत्रविभूषितं ॥ नादबिंदुसमायुक्तं श्रियो
बीजमुदाहृतं ॥ चंद्रकोटिसमाभासं शुभ्रमत्यंतदुर्लभं ॥ सहस्रारे महापद्ममध्येयं सोऽहं महेश्वरि ॥ द्वि
तीयं कामराजं च जपेद्धृत्वा च सुंदरि ॥ गगनं वह्निसंयुक्तं वामनेत्रविभूषितं ॥ नादबिंदुसमायुक्तं मो
माबीजं प्रकीर्त्तितं ॥ ज्वलदग्निनिभं बीजं शुद्धहाटकसन्निभं ॥ कुलाकुलालये पद्मे ध्येयं कमलोचनं
मधुमतीं जपेत्सर्वापि सर्वकामफलप्रदां ॥ अथ दीपिनी ॥ तारं लक्ष्मीं च वाग्बीजं मन्मथं भुवनेश्वरी ॥
एतज्जप्त्वा ततः पश्चात् वाग्भवाख्यं समुच्चरेत् ॥ प्रणवं भुवनेशानीं रमां कामं च वाग्भवम् ॥ कामरा
जं ततो जप्त्वा त्रैलोक्यक्षोभकारकं ॥ आकाशं चैव वाग्बीजं रमामन्मथमायया ॥ स्वप्नावती महादेवि ज
पेत्तत्र समाहितः ॥ प्रणवं चाद्यं रं कामं रमां च भुवनेश्वरीं ॥ मधुमती ततो जप्त्वा मायां श्रीं कूर्चबी

जकं॥ प्रणवाद्यं चरेद्देवि ह्रीं हंसबीजपुटीकृतं॥ एतद्बीजं समुच्चार्य शक्तिकूटं ततो जपेत्॥ एषा
तुरीयविनीविद्या अजपा प्राणरूपिणी॥ जपनियमसक्त॥ जपेद्यादौ जपेत् पश्चात् सप्तवारम
नुक्रमात्॥ कामराजादिविद्यानां दीपनी चैव कारयेत्॥ वाग्भवं चैव कामराजे तु शक्तिकूटे
स्फुरेश्वरि॥ सर्वत्र क्रमशः पंचमीव ह्रीं ध्येयः॥ वाग्भवं च शक्त्योर्दीपनी काम कूटे पुनः॥ प्र
णवं भुवनेशानीं रमां कामं च वाग्भवं॥ सर्वत्र कूटे स्वरसंवेद्यः॥ तथा च॥ सौभाग्य
विद्यायाः प्रथमकूटे अकारश्चतुष्टयं इकारश्चेति षड्व्यंजनानि द्वितीयकूटे स्वरव्यंजने
भेदेन एकारश्च द्वितीयकूटे प्येवं तेन मिलित्वात्र यस्त्रिंशदक्षराणि कूटत्रये बिंदुत्रयं नाद
लेनैक इति मिलित्वा सप्तत्रिंशद्भेदा तेन नादं विहाय तत्त्वरूपिणी नादयुक्ता चेति संज्ञा
र्थैकं सप्ततत्त्वाती तत्स्वभावा इति॥ आग्न्यादिविद्यामध्ये कैश्य योगिनीहृदये स्वरव्यंजन
भेदेन सप्तत्रिंशत्प्रभेदिनी॥ सप्तत्रिंशद्भेदेन षट्त्रिंशत्तत्त्वरूपिणी॥ तत्त्वातीतस्वभा
वाच्ये विशेषात्मतेसदा॥ श्रीकंठरुद्राङ्कैलेख्य तत्स्वपरिवारचक्रे॥ प्राणमन्त्रे तत्स्थितो दे
वितद्र्देकारशः परः॥ अथ श्रीयंत्रं॥ तथा बिंदुमत्स्त्रमष्टकोणं एतत्त्रयं संहारच
क्रद्विदशारेचतुर्दशारं स्थितिचक्रेल तत्त्रयं अष्टपत्रं षोडशारं त्रिवलं चतुःसदनत्रयं॥ चतु
र्द्वारसमायुक्तं एतत्सृष्ट्यात्मकं तदुक्तं यामले॥ बिंदुत्रिकोणवसुकोणदशारयुग्ममन्व
स्रनागदलसंगतषोडशारं॥ वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रराजमुदितं प
रदेवतायाः॥ चतुर्द्वारसमायुक्तं चक्रराजसिंदूरकुंकुमादिनालिखितं॥ सुवर्णरजतपं
चरत्नस्फटिकताम्रपत्रे कीलं वा कुर्यात्॥ तंत्रे॥ अरुणासमारेखानालिख्य सुसमंमु
खं॥ योत्रयंत्रे प्रवृत्ते तत्तस्य सर्वं हरत्यम्यहं॥ यस्य यंत्रस्थितिर्देवी तत्र तंत्रार्चये सुधीः॥
लनांसरुधिरेणैव पावनातस्य जायते॥ पक्षोरालोकनं तस्यात्तथा कुरुत यत्नतः॥ यदि बलात्स

शोरग्रे लिखितं विद्यते क्वचित् ॥ ममां गक्षलिरेवात्र क्रियते पशु बुद्धिनां तथा भूतले भैरवे ॥ यो
स्मिन् यंत्रे महेशानि केशराणि प्रकल्पयेत् ॥ योगिनी संहितास्तस्य हिंसां कुर्वंति भैरवाः ॥
इति वचनात्र केशराणि ॥ तथा स्वच्छंदभैरवे ॥ कुर्यात्तु स्थंडिले यंत्रं हस्तमात्रं सुसुंद
रं ॥ रत्नादिधातु चनिर्माणे मानमिच्छानसंभवेत् ॥ रत्नेन रजसा पूर्वं श्रीचक्रं तु विपूज
येत् ॥ नश्यंति सर्वविघ्नानि प्राप्यते च यथेप्सितं ॥ दशभागं सुवर्णस्य ताम्रस्य द्वादशांत
था ॥ षड्गुणं रजतस्यापि चैवे तल्लोहत्रयं भवेत् ॥ चक्रेस्मिन् पूजये यो हि स सौभाग्यमवाप्नुया
त् ॥ अणिमाद्यष्टसिद्धीनां अधिपो जायते चिरात् ॥ विद्रुमे रचिते यंत्रे पद्मरागे अथवा प्रिये ॥ इंद्रनी
ले अथ वैडूर्ये स्फटिके मरकतेपि च ॥ धनं पुत्रं तथा राज्यं यशांसि लभते ध्रुवं ॥ ताम्रं तु कांतिदं प्रोक्तं
सुवर्णं शत्रुनाशनं ॥ राजतं क्षेमदं चैव स्फाटिकं सर्वकामदं ॥ एतत्तु यंत्रमात्रमिति ज्ञेयं ॥ अथ
श्रीचक्रादिनाशे प्रायश्चित्तं ॥ दग्धं च स्फुटितं यंत्रं हृतं चौरेणवा प्रिये ॥ उपवासं प्रकुर्वीत दिन
मेकमतंद्रितः ॥ लक्षमात्रं जपेद्विद्यां होमतर्पणपूर्वकं ॥ सद्रत्नाच्च गुरुं तोष्य ब्राह्मणान्
पि भोजयेत् ॥ लक्षं जप्याद्दशांशं होमः ॥ तद्दशांशेन तर्पणं ॥ लक्षमथुलमित्येके ॥ कदाचि
त्तु सचिद्रं वा स्फुटिताद्विदूषणं ॥ भग्नं करोति यो मर्त्यो सुस्नस्य क्षयं भवेत् ॥ तस्मा
त् तीर्थराजे वा गंगादि सलिलांबरे ॥ समुद्रे वा क्षिपेद्देवि अन्यथा दुःखमाप्नुयात् ॥ इदं तु यं
त्रमात्रविषयं ॥ अथ श्रीचक्रपादोदकमहात्म्यं ॥ गंगा पुष्कर नर्मदा च यमुना गोदावरी गोमती
गंगाद्वारमयाप्रयागबदरी वाराणसी सिंधु पुष्करे वासेतु सरस्वती प्रभृति पुत्रसांड भांडोदरे
तीर्थस्नानसहस्रकोटि फलदं श्रीचक्रपादोदकं ॥ अथ दर्शनफलं ॥ सम्यक् शीलकृतं नकु
लायत फलं लभते प्रिये ॥ तत्फलं समवाप्नोति कृत्वा श्रीचक्रदर्शनं ॥ श्रीचक्रमित्रफल लक्षणं ॥

अथ संक्षेपश्रीविद्यापद्धतिः॥ प्रातः कृत्यादि प्राणायामांतं कर्म विधाय ऋष्यादिन्यासं कुर्यात्॥ य
था॥ अस्य श्रीत्रिपुरसुंदरीमंत्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छंदः त्रिपुरसुंदरी देवता वाग्भवं बी
जं तार्तीयं शक्तिः कामराजं कीलकं पुरुषार्थचतुष्टयसिध्यर्थे विनियोगः॥ तथा च॥ ज्ञानार्ण
वे॥ बीजं तु वाग्भवं शक्तिस्तार्तीयं कीलकं ततः॥ कामराजं महेशानि बीजन्यासस्ततः परं॥ तद्य
था॥ दक्षिणामूर्तिऋषये नमः शिरसि॥ पंक्तये छंदसे नमः मुखे॥ त्रिपुरसुंदर्यै देवतायै नमः
हृदि॥ ततो वशिन्यादिन्यासः॥ तद्यथा॥ अं १६ रव्लह्रूं वशिनी वाग्देवतायै नमो ब्रह्मरंध्रे॥ कं ५
कलह्रीं कामेश्वरी वाग्देवतायै नमो ललाटे॥ चं ५ न्सली मोदिनी वाग्देवतायै नमो भ्रूमध्ये॥ टं ५
य्लूं विमलायै वाग्देवतायै नमः कंठे॥ तं ५ जम्रीं अरुणा वाग्देवतायै नमो हृदि॥ पं ५ ह्सल्व
यूं जयिनी वाग्देवतायै नमो नाभौ॥ यं ४ झम्रयूं सर्वेश्वरी वाग्देवतायै नमो मूलाधारे॥ शं ५
क्ष्म्रीं कौलिनी वाग्देवतायै नमः सर्वांगे॥ तथा च॥ ज्ञानार्णवे॥ अवर्गांते लिखेद्बीजं वह्निफां
तक्ष्मान्वितं॥ वामकर्णविभूषाढ्यं बिंदुनादांकितं प्रिये॥ वशिनीं पूजयेद्वाचां देवतां सर्वसिद्ध
ये॥ कवर्गांते महेशानि कलह्रीं बीजमुत्तमं॥ कामेश्वरीं समुच्चार्य वाग्देवीं पूजयेत्ततः॥ चवर्गांते वा
वायुबीजं व्योमपूर्वं महेश्वरि॥ वामकर्णेन्दुबिंद्वाढ्यं विमलां वागधीश्वरीं॥ तवर्गांते जमव्योमांतवाम
नेत्रेंदुभूषितं॥ बिंदुनादान्वितं बीजं वाग्देवीमरुणां भजेत्॥ पवर्गांते व्योमचंद्रक्ष्मातोयानिलसं
युतं॥ उकारस्वरसंयुक्तं बिंदुनादकलान्वितं॥ जयिनीं पूजयेद्वाचां देवतां वीरवंदितां॥ यवर्गां
ते जोंत क्ष्मा लरेफवायुसमन्वितं॥ वामकर्णेंदुभूषाढ्यं सर्वेशीं परिपूजयेत्॥ क्षमावह्निगतं त्र
यं बीजेन परिवेष्टितं॥ नादबिंदुकलाक्रांतं कौलिनीं वाचमर्चयेत्॥ शवर्गांते महेशानि न्यसेत्स
र्वार्थसिद्धये॥ शिरो ललाट भ्रूमध्य कंठ हृन्नाभिदेशके॥ आधारे च सर्वांगे च मैरिष्टञ्जि वाचं रे
दिति॥ ततः करांगन्यासो॥ तथा॥ अं मध्यमाभ्यां नमः॥ आं अनामिकाभ्यां नमः॥ सौः कनिष्ठाभ्यां॥

ऐं अंगुष्ठाभ्यांनमः॥ ओं तर्जनीभ्यांनमः॥ सौः करतलपृष्ठाभ्यांनमः॥ अंगन्यासः॥ ऐं वं हृदयाय॰ ऐं
क्लीं शिरसेस्वाहा॥ सौः शिखायैवषट्॥ ऐं कवचाय हुं॥ क्लीं नेत्रत्रयाय वौषट्॥ सौः अस्त्राय फट्॥
वाग्भवादिस्वरूपं दक्षिणामूर्तिभिः सरंति महामंत्राः महाग्नेश्च स्फुलिंगवत्॥ तथैव मातृकाव
र्णानिः सृष्टानि वाग्भवात्प्रिये॥ अतएव तदेतस्या वाग्भवं बीजमुच्यते॥ योषित्पुरुषरूपेण स्फुरंती
विश्वमातृका॥ महामोहेन देवेशि कीलयंती जगत्त्रयं॥ अतस्तत्कीलकं देवि तेन सौभाग्यगर्विता॥
पालयंती जगत्सर्वं तेनेयं शक्तिरुच्यते॥ ततो मूलेन व्यापकं कृत्वा ध्यायेत्॥ बालार्कमंडलाभासां च
तुर्बाहां त्रिलोचनां॥ पाशांकुशशराश्चापं धारयंतीं शिवां श्रये॥ इति ध्यात्वा मानसैः संपूज्य आनं
दोहमिति विभाव्य शंखस्थापनं कुर्यात्॥ यथा श्रीचक्रपुरतः॥ स्ववामे षट्कोणमध्ये त्रिकोणं विलिख्य
तत्र त्रिपदिकां संस्थाप्य मूलेन षट्कोणं पूजयेत्॥ फट् इति कुंभं प्रक्षाल्य तत्र गंधपुष्पादिकं निःक्षि
प्य मूलेनार्घ्यमंडलादिकं पूजयेत्॥ मं वह्निमंडलाय दशकलात्मने नमः॥ इति त्रिपदिकां शंखं सं
स्थाप्य अं सूर्यमंडलाय द्वादशकलात्मने नमः॥ इति शंखे॥ उं सोममंडलाय षोडशकलात्मने नम
इति जलं॥ निबंधे॥ प्रणवस्य त्रिभिर्भागैर्वह्निसूर्येंदुमंडलात्॥ ततो गंगे च यमुने चैव गोदावरि सरस्व
ति॥ नर्मदे सिंधु कावेरी जलेस्मिन्सन्निधिं कुरु॥ इति सूर्यमंडलात्तीर्थमावाह्य हृमित्यवगुंठ्य षडंगेन
पूजयेत्॥ ततो धेनुमुद्रां प्रदर्श्य मूलमष्टधा जप्त्वा तज्जलं किंचित्प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं
पूजोपकरणान्युक्ष्य तद्दक्षिणे याग्यादिपात्रं संस्थाप्य आसनपूजामाचरेत्॥ ततः उपर्युपरि यं
त्रस्य अं आधारशक्तये नमः॥ एवं कूर्माय॰ पृथिव्यै॰ अनंताय॰ रसांबुधये॰ रत्नद्वीपाय॰ नंदनोद्याना
य॰ रत्नमंडपाय॰ अं कल्पवृक्षाय॰ मणिवेदिकायै॰ रत्नसिंहासनायनमः॥ पीठोपरि बिंदुचक्रे॥ ह
सौं सदाशिव महाप्रेतपद्मासनाय॰॥ ततो बिंदौ॥ हसरैं हसकलरीं हसरौं इति मंत्रेण मूर्तिं संकल्प्य त्रि
खंडां मुद्रां बध्वा पुनर्ध्यात्वा प्रवहन्नासापुटेन तेजोमयं पुष्पांजलौ वानीय अं महापद्मवनांतस्थे

कारणानंदविग्रहे॥ सर्वमंगलहिते मातरेह्येहि परमेश्वरि॥ इति मन्त्रैः संस्थाप्यावाहनादि यथोपचा
रेण पूजां विधायेषडंगानि पूजयेत्॥ अग्नीशासुरवायुमध्ये दिक्षु च वाग्भवकूटमुच्चार्य हृदया
य॥ कामराजकूटमुच्चार्य शिरसे स्वाहा॥ शक्तिकूटमुच्चार्य शिखायै वषट्॥ पुनर्वाग्भवेन कूट
मुच्चार्य कवचाय हुं॥ कामराजकूटमुच्चार्य नेत्रत्रयाय वौषट्॥ शक्तिकूटमुच्चार्य अस्त्रा
य फट्॥ तथा च ज्ञानार्णवे॥ अशोणावर एं कुर्यात् श्रीविद्यार्णवसंज्ञके॥ ततो मध्यत्रिकूच्य
स्त्र मध्ये गुरुपंक्तिं पूजयेत्॥ ऐं ह्रीं श्रीं गुरुभ्यो नमः॥ परापरगुरुपादुकाभ्यो नमः॥ परमेष्ठिगुरु
भ्यो नमः॥ परमेष्ठिगुरुपादुकाभ्यो नमः॥ आचार्येभ्यो नमः॥ आचार्यपादुकाभ्यां॥ ततः चतुरस्रस्य
प्रथमरेखायां॥ अणिमाद्यष्टसिद्धि श्रीपादुकां पूजयामि नमः॥ मध्यमरेखायां ब्राह्म्याद्या
द्यष्टदेवी श्रीपादुकां पूजयामि नमः॥ अष्टरेखायां सर्वसंक्षोभिण्यादिमुद्रा श्रीपादुकां पूज
यामि नमः॥ सर्वत्रावरणे पूजयामि श्रीपादुकां पदं॥ तथा च ज्ञानार्णवे॥ श्रीपदं पूर्वमुच्चार्य
पादुकापदमुद्धरेत्॥ पूजयामि नमः पश्चात् पूजयेद्देवताः॥ चक्राग्रे॥ त्रिपुराचक्रनायिका
श्रीपा॰पू॰॥ अत्र त्रैलोक्यमोहने चतुरस्रचक्रे त्रिपुराचक्रनायिकाधिष्ठिते एता अणिमाद्याः प्रक
ट योगिन्यः समुद्राः सायुधाः सपरिवाराः सवाहनाः पूजिताः तर्पिताः संतु॥ इत्यर्घ्यजलेन मू
लदेव्यै समर्पयेत्॥ त्रिपुराख्या सन्निस्कवाराहीमे॥ ब्रह्मविष्णुमहेशाद्यैस्त्रिदशैरर्चिता पुरा॥ त्रि
पुरेति ललनानाम कथिते देवते स्तव॥ तर्पणं तु वामहस्तेन तत्त्वमुद्रया॥ तथा स्वतंत्र तंत्रे॥
अंगुष्ठानामिकायोगाद्वामहस्तस्य पार्वति॥ तर्पयेत् देवीं देवीं समुद्रां च सवाहनां॥ ततः षोडश
दलेषु॥ अं १६ ऐं ह्रीं श्रीं कामाकर्षिण्यादि षोडशनित्याकला श्रीपा॰पू॰॥ अत्र सर्वाशापरिपूरक
षोडशदलचक्रे त्रिपुरेशीचक्रनायिकाधिष्ठिते एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः समु
द्रा इत्यादि मूलदेव्यै समर्पयेत्॥ ततो अष्टदले अनंगकुसुमाद्यष्टदेवी श्रीपा॰पू॰॥ चक्राग्रे॥

त्रिपुरसुंदरीचक्रनायिकाश्रीपा·पू·॥ अत्र सर्वसंक्षोभकारके अष्टदलचक्रे त्रिपुरसुंदरीच
क्रनायिकाधिष्ठिते एताः अनंगकुसुमाद्या गुप्ततरयोगिन्यः समुद्रा इत्यादिनामंडलदेव्यै समर्
पयेत् ॥ बहिर्दशारचक्रे सर्वसिद्धिप्रदादेवीश्रीपा·पू·॥ चक्राग्रे ॥ ३ त्रिपुराश्रीचक्रनायिका
श्रीपा·पू·॥ अत्र सर्वार्थसाधके बहिर्दशारचक्रे त्रिपुराश्रीचक्रनायिकाधिष्ठिते एताः सर्वसि
द्धिप्रदादेव्यः कुलकौलिनीयोगिन्यः समुद्रा इत्यादि मंडलदेव्यै समर्पयेत् ॥ अंतर्दशारचक्रे ३
सर्वज्ञादिदेवीश्रीपा·पू·॥ चक्राग्रे ३ त्रिपुरमालिनीचक्रनायिकाश्रीपा·पू·॥ अत्र सर्वर
क्षाअंतर्दशारचक्रे त्रिपुरमालिनीचक्रनायिकाधिष्ठिते एताः सर्वज्ञाद्यादेव्यः निगर्भयो
गिन्यः समुद्रा इत्यादि मंडलदेव्यै समर्पयेत् ॥ अष्टारचक्रे वशिन्याद्यवाग्देवताश्रीपा·पू·॥ अ
त्र सर्वरोगहराष्टारचक्रे त्रिपुरासिद्धाचक्रनायिकाधिष्ठिते एता वशिन्याद्याः रहस्ययोगिन्यः
समुद्रा इत्यादि मंडलदेव्यै समर्पयेत् ॥ अंतराले त्र्यस्रमंडलविधया षडंगानि पूजयेत् ॥ ततो
ग्रकोणे ३ कामेश्वरीनित्याश्रीपा·पू·॥ दक्षिणकोणे वज्रेश्रीपा·पू·॥ वामकोणे ३ भगमालिनी
नित्याश्रीपा·पू·॥ चक्राग्रे ३ त्रिपुरांबिकाश्रीपा·पू·॥ अत्र सर्वसिद्धिप्रदे त्र्यस्रचक्रे बाण
चापपाशांकुशान् ऋपितांतराले त्रिपुरांबिकाचक्रनायिकाधिष्ठिते एता कामेश्वर्याद्यार
हस्यातिरहस्ययोगिन्यः समुद्रा इत्यादिनाः समर्पयेत् ॥ ततो बिंदुमध्ये बीजत्रयमुच्चा
र्य श्रीमहात्रिपुरसुंदरीनित्याश्रीपा·पू· इति त्रिवारं पूजयेत् ॥ वामे ३ योनिमुद्रांश्रीपा·पू·॥
चक्राग्रे ३ त्रिपुरभैरवीश्रीपा·पू·॥ चक्राग्रे ३ त्रिपुरभैरवीश्रीपा·पू·॥ अत्र सर्वानंदमये पर
ब्रह्मस्वरूपिणि बैंदवचक्रे त्रिपुरभैरवीचक्रनायिकाधिष्ठिते एतास्सर्वचक्रेश्वरी योगिन्यः
समुद्रा इत्यादिना सायुधाः सवाहनाः सपरिवाराः पूजिताः तर्पिताः संतु इति मंडलदेव्यै समर्पयेत्
ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणे लक्षं जपः ॥ अथर्वणे वामकेश्वरे तंत्रे

तत्रास्थित्वा जपेल्लक्षं साक्षाद्देवीस्वरूपधृक्॥ किंशुकैर्हवनं कुर्यात्लद्दशांशं वरानने॥ कुसुंभ
कुंकुमैर्वापि मधुरत्रयमिश्रितैः॥ अथ श्रीविद्यापद्धतिः॥ विशेषः यथा॥ ब्राह्मे मुहूर्ते उत्था
य मुक्तस्वापो रात्रिवासः परित्यज्य गुरुं यथोक्तरूपं ध्यात्वा ऐं क्लीं श्रीं हसखफ्रें हसक्षमलवरयूं
हसक्षमलवरयीं हसौः ह्स्रौः श्री अमुकानंदनाथश्रीपादुकां पूजयामि॥ अमुकाम्बा श्रीपादु
कां पूजयामि इति मानसैर्गंधादिभिः पूजयेत्॥ यथा॥ क्लीं श्रीं लं पृथिव्यात्मकं गंधं समर्पयामि
नमः कनिष्ठाभ्यां नमः॥ हं आकाशात्मकं पुष्पं सम० अंगुष्ठाभ्यां॥ यं वाय्वात्मकं धूपं समर्प०
तर्जनीभ्यां॥ रं वह्न्यात्मकं दीपं सम० मध्यमाभ्यां॥ वं अमृतात्मकं नैवेद्यं सम० अनामाभ्यां
सं नमः तांबूलं समर्पयामि नमः॥ इत्यंजलिना तांबूलं सर्वसिद्धीश्वर तंत्रे॥ एवं ध्यात्वा पुन
श्चैकपंचभूतात्मकैर्यजेत्॥ गंधं लं तं पार्थिवं तु कनिष्ठांगुलियोगतः॥ शब्दमयं महापु
ष्पं प्रथमांगुलियोगतः॥ नमस्कारेणांजलिना तांबूलं वा गरुन्नवं स्मृतं॥ स्वस्ववीजांतेन
सर्वत्र नमस्कारेण योजयेत्॥ प्रथमांगुलीवृद्धा स्वस्ववीजांतेन तत्कृतं बीजांते ततो योन्यं
जलिमुद्रां प्रदर्श्य नमस्कारसहितं कुर्यात्॥ अखंडमंडलेत्यादिश्लोकेषु सामान्यपद्धत्युक्तक्रमे
ण कुर्यात्॥ अथ श्रीविद्याविशेषस्नानं॥ वैदिकस्नानं कृत्वा षडंगानि विधाय क्रों इत्यनेनां
कुशमुद्रया सवितृमंडलात्तीर्थमावाह्य मूलविद्यां त्रिखंडबीजमुच्चार्य योनिमुद्रया जले
निक्षिप्य धेनुयोनिमुद्रे प्रदर्श्य मूलवाग्भवबीजेन दशवारमभिमंत्र्य आनंदामृतवा
रिमध्यस्थं देवीं विचिंत्य मूलविद्यया समस्तवारमभिमंत्र्य तन्मुखवारबिंदुनिर्गलितामृ
तामृतधाराचतुर्व्यासमस्तकुलं आत्मानमभिषिंच्य पुनरेकविंशतिवारं मूलविद्यया
मभिमंत्र्य मूलविद्यामुच्चरेत् देवीपादारविंदयोगलं दमनधारयात्रिवारं निमज्ज्य उत्था
य पुनर्योनिमुद्रया त्रिवारं सप्तवारं वा शिरस्यभिषेकं विधाय तत्रैवान्यत्तीरमागत्या

नुपहुते वा ससीपरिधाय यज्ञीयचस्मना त्रिपुंड्रं त्रिरेखात्मकं विधाय पूर्ववत् स्वगुरुं स्मृ
त्वा तांत्रिकार्घ्यमर्पणं तं क्रमं विधाय तर्पणं कुर्यात् ॥ तथा च ॥ षडंगान्यपि विन्यस्य तीर्थमंकुशमु
द्रया ॥ क्रों मंत्रेण समाकृष्य ततः सवित्मंडलात् ह्रां क्लीं बीजं समुच्चार्य निक्षिपेत् योनिमुद्रया
धेनुमुद्रां योनिमुद्रां ततस्तत्र प्रदर्शयेत् ॥ मूलं वाग्भवबीजेन मंत्रविप्राथ्य देवतां ॥ आनंदामृत
वारीणां मध्यस्थां परिचिंतयेत् ॥ देवीमुखारविंदाच्च निर्गतामृतधारया ॥ सप्तकृत्वो जपेद्विद्या
मभिषिंचेत्स्वकां तनुं ॥ एकविंशति वारान् वा जपेद्विद्यामनंतरं ॥ आचम्य पाद्यमुखासीनो मूलमं
त्राभिमंत्रितं ॥ व्याप्ता नाल ललितेन स्नात्वा पूर्ववत् श्रीगुरुं स्मरेत् ॥ सूर्यमंडलवासिन्यै देवतायै ततः
परं ॥ अर्घ्यंजलिसमादाय गायत्र्या च त्रिरुत्क्षिपेत् ॥ यथाशक्ति जपेद्देवीगायत्रीं तदनंतरं ॥
तर्पणार्थं तदा चैव प्राणानायम्य साधकः ॥ वैश्वानरं रुद्रं स्तथादित्यांस्तथैवांगिरसं ततः ॥ देवान्
गांश्च ततो ब्रह्मन् विष्णुरुद्रान्महान् अपि ॥ लोपामुद्रामहिल्यां च याज्ञुस्तु याम्यपि तीर्थकैः ॥ नेश्वर
तरां ह्रीं योगांश्च कूर एतानि यथाक्रमं ॥ चतुर्थ्यं वह्निजायांतं देवतीर्थेन तर्पयेत् ॥ मरीचिमत्रिं
पुलहं पुलस्त्यं क्रतुमेव च ॥ वसिष्ठं च नरहाजं गौतमांगस्वनामकौ ॥ अग्निष्वात्ता बर्हिषदः पि
तृश्च स्वपितृक्रमं ॥ त्रिपादेंता ह दत्ताश्च पितृतीर्थेन तर्पयेत् ॥ भैरवान्क्षेत्रपालश्च कुमारी
योगिनीगणं ॥ एतानि सर्वतत्त्वानि तत्पंतामिलितर्पयेत् ॥ दक्षिणामूर्तिसंहितायामपि ॥
तु कौचक्रमेण दक्षिणतः ॥ संतर्प्य त्रिकोणान्तश्चतुरस्रान्तरालेषु विद्योगमगणेशाव
लगुरुपंक्तिं संतर्प्य त्रिकोणमध्ये साध्यसिद्धासनं मंत्रैर्वक्ष्यमाणैः संतर्प्य जले भगवती मा
राद्य परमाद्यत धारेत् त्रिवारं पूर्वोक्तक्रमेण संतर्प्य त्रिकोणे पुष्कलमेश्वर्यादि देवीत्रयं वक्ष्य
माणे समयविद्यया संतर्प्य चतुरस्रकोणेष्वंगदेवतास्तर्पयेत् ॥ ततः आवरणदेवतानां

तर्पणं ततः सूर्यायार्घ्यं दत्त्वा ततः हंसः सोऽहमिति रूपस्थानं कृत्वा स्वचित्तमंडले तीर्थं विसृज्य नि
यतवाक्‌ चैनो यागस्थानमागच्छेदिति ॥ यागस्थानं तु कालीकुलसद्भावे ॥ अथ एवं स्वल्पकामानां
सिध्यर्थं पूजनं हितं ॥ निष्कामानां मुमुक्षूणां गृहे शास्त्रसंदर्चनं ॥ ऋषीणां मुनिमुख्यानां दी
क्षितानां द्विजन्मनां ॥ गृहेपि यजनं शास्त्र स्वैरसेवा यथेच्छसंभवे ॥ कुलार्णवेपि ॥ एकान्ते निर्जने र
म्ये देवे वा धाविवर्जिते ॥ सुखासने समासीन प्राङ्मुखो वाप्युदङ्मुखः ॥ तत्रादौ स्वस्य पूजा ॥ तदु
क्तं रुद्रयामले ॥ आदित्यं पूजयेदादौ प्रत्यक्षं लोकसाक्षिणं ॥ अन्यथा न च सिद्धिः स्यात्कल्पकोटि
शतैरपि ॥ बहलस्तव राजेपि स्नानं तु विधिवत् ॥ संध्यां तर्पणं स्वस्य पूजनं कृत्वा पूजालयेवा
स्वपंचमी पूजयामिहमिति ॥ इति स्नानं ॥ ततो गृहद्वारि गत्वा ॥ ॐ आत्मतत्त्वाय स्वाहा ॥ ॐ वि
द्यातत्त्वाय ॥ ॐ शिवतत्त्वाय स्वाहा ॥ इत्यनेनाचम्य सामान्यार्घ्यं विधाय द्वारपूजां कुर्यात् ॥ तद्य
था ॥ बालया द्वारमभ्युक्ष्य दक्षिणवामपार्श्वयोः उपर्यधः ऐं ह्रीं श्रीं गां गणपतये नमः ॥ ऊं दु
र्गायै ॥ वं वटुकाय ॥ क्षौं क्षेत्रपालाय ॥ द्वारश्रियै ॥ देहल्यै नमः ॥ ततो वामपादपुरःसरं
गृहं प्रविश्य अग्न्यादिकोणेषु ऐं ह्रीं श्रीं रत्नमंडपाय ॥ दिक्षु कामदेवाय रत्यै ॥ वसंताय प्रीत्यै ॥
हंसं सरस्वत्यै ॥ श्रीं श्रियै ॥ सोमनुजगावरत्यां ॥ सरस्वतीं श्रियं मायां दुर्गां चैव तदनंतरं ॥ भद्र
कालीं ततः स्वस्तिं स्वाहां चैव शुभंकरीं ॥ गौरीं च लोकधात्रीं च तथा वागीश्वरीमपि ॥ एताः पूज
येत् ॥ ततः ऐं ह्रीं श्रीं रत्नद्वारद्वारशक्तियुक्ताय दीपनाथाय ॥ इति पुष्पांजलिमुत्क्षिपेत् ॥ विश्वसा
रे ॥ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ इति प्रार्थ
य ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां नित्यं पवित्रं कुरु चासनं ॥
इति निवेश्य ॥ ततो स्वेच्छावामपार्ष्णिपातत्रयेण भौमान्विघ्नानुत्सार्य स्फोटजलेनांतरिक्षां
श्चोत्सार्य बालान्यस्तत्तीमदृष्ट्यावलोकनेन दिव्यान्विघ्नानुत्सार्य सिद्धार्थाक्षतकुसुमा

न्याशयऐं ह्रीं श्रीं अपसर्पंतु ते भूता इत्यादि नास्त्रि ज्वालाविघ्नानुत्सारयेत् ॥ ततो नैरृत्यां ३ ब्रह्मणे नमः ॥ ३ वास्तुपतये ॥ ३ आधारशक्तिकमलासनाय ॥ इत्यासनं संपूज्य तत्रोपविश्य भूतशुद्धिं प्राणायामांतं कृत्वा ऋष्यादिन्यासं कुर्यात् ॥ यद्यपि कल्पसूत्रे वाय्वग्निसलिलात्मकैः प्राणायामैः शोषणदहनप्लवनं च भूतशुद्धिं विधाय त्रिः प्राणायाम्येति तथापि मातृकान्यासानंतरं प्राणायामो बोद्धव्यः ॥ तथा च तंत्रांतरे ॥ भूतशुद्धिं विधायेत्थं मातृकान्यासमाचरेत् ॥ प्राणायामत्रयं कृत्वा न्यासान्न्यासं समाचरेत् ॥ ततो मातृकान्यासं प्राणायामत्रयं च विधाय ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शिरसि दक्षिणामूर्तये ऋषये नमः ॥ मुखे पंक्तिच्छंदसे ॥ हृदि त्रिपुरसुंदर्यै देवतायै ॥ गुह्ये वाग्भवबीजाय ॥ पादयोः शक्तिकूटाय ॥ सर्वांगे कामराजाय कीलकाय ॥ तंत्रांतरे ॥ ऋषिं न्यसेन्मूर्ध्नि देशे छंदस्तु मुखपंकजे ॥ देवतां हृदये चैव बीजं तु गुह्यदेशके ॥ शक्तिं च पादयोश्चैव सर्वांगे कीलकं न्यसेत् ॥ ततः करांगन्यासो ॥ यथा ॥ ऐं मध्यमाभ्यां ॥ क्लीं अनामिकाभ्यां ॥ सौः कनिष्ठाभ्यां ॥ ऐं अंगुष्ठाभ्यां ॥ क्लीं तर्जनीभ्यां ॥ सौः करतलपृष्ठाभ्यां ॥ तदुक्तं ॥ एतद्बीजद्वयात्त्याम ध्यमाद्यंगुलीषु च ॥ शुद्धं करस्य कुर्वीत तलयोः पृष्ठयोरपि ॥ चेत्थं तनुसंपुटकानाम मंत्रैः पृथक् पृथक् ॥ ततो निवृत्त्यादिन्यासः ॥ गुह्ये क्लीं निवृत्त्यै ॥ हृदये ह्रीं प्रतिष्ठायै ॥ कंठे ऐं विद्यायै ॥ भ्रूमध्ये क्लीं शांत्यै ॥ ब्रह्मरंध्रे ह्रः शांत्यतीतायै ॥ तथोक्तं कुलामृते ॥ निवृत्तिं च प्रतिष्ठां च विद्यां शांतिं तथामृतां ॥ गुह्यहृत्कंठभ्रूमध्ये ब्रह्मरंध्रेषु विन्यसेत् ॥ व्योमाग्निसंपुटौ हौ तु भस्य वामदृगन्वितौ ॥ मनुविसर्गाभ्यां च युतम् योनिं ह्यं न्यसेत् पुनः ॥ द्वितीया धाम वेदाग्निरेवं च परमेश्वरि ॥ अर्द्धचंद्रेन्दुसर्गानि सर्वाण्येवं क्रमेण हि ॥

बीजन्यासांश्चि योज्यानि पूर्वतः परमेश्वरि इति ॥ ततो बालां समुच्चार्य महात्रिपुरसुंदरिं ॥ आ
त्मानं रक्ष रक्षेति कुर्याद्दृक्ष्यां हृदिस्थितान् ॥ तथैवास्त्रेण मुद्रया कुर्याद्दिग्बंधनं ततः ॥ ततो बा
लां ते अमृतार्णवासनाय ॥ पादयोः ॥ बालां ते त्रिपुरेश्वरि पोतांबुजासनाय ॥ इति जानुद्वये ॥
तथा च यामले ॥ अमृतार्णवद्वीपोपर्यासनाय नमो मनुः ॥ पादयोर्विन्यसेत् पश्चात् बालां
ते त्रिपुरेश्वरि ॥ पोतांबुजासनायेति नमो जानुनि विन्यसेत् ॥ ह्रीं क्लीं सौः त्रिपुरसुंदरि देव्या
सनाय नमः इत्यूरुद्वये ॥ तथा च ह्यासनाद्यं वै ॥ ह्रीं क्लीं सौः त्रिपुरे स्वच्छा सुंदरीति पदं ततः ॥ ङे
तं दद्यादासनं चोक्तेन नमऊरुद्वये न्यसेत् ॥ ततो हैं ह्क्लीं ह्सौः त्रिपुरवासिनी च क्रासनाय नमः ॥
इति स्फिक्द्वये ॥ हसैं हसक्लीं हसौः त्रिपुराश्रीसर्वमंत्रासनाय ॥ इति गुह्ये ॥ ह्रीं क्लीं ब्लें त्रिपुरमालि
नि साध्यसिद्धासनाय इति नाभिदेशे ॥ हसरैं हसकलरीं हसरौः त्रिपुरांबा परं ततः ॥ पर्यंकरू
पिण्यासनाय नमो वक्ष्यसि विन्यसेत् ॥ त्रिकूटविद्यानां बीजं ते श्री महात्रिपुरभैरवी ॥ सदाशि
व महाप्रेतपद्मासनाय नमो ब्रह्मरंध्रे ॥ तथोक्त ॥ नमः इत्यमुना ब्रह्मरंध्रस्थाने प्रविन्यसेत् ॥
अथ षडंगन्यासः ॥ ऐं सर्वज्ञाशक्ति श्रीमहात्रिपुरसुंदरी हृदयाय ॥ क्लीं नित्यतृप्तिशक्ति श्री
महात्रिपुरसुंदरी शिरसे ॥ सौः अनादिबोधशक्ति श्रीमहात्रिपुरसुंदरी शिखायै ॥ ऐं स्वतं
त्रशक्ति श्रीमहात्रिपुरसुंदरी कवचाय ॥ क्लीं अलुप्तशक्ति श्री महात्रिपुरसुंदरी नेत्रत्रय ॥ सौः
अनंतशक्ति श्रीमहात्रिपुरसुंदरी अस्त्राय ॥ तथा च नवरत्नेश्वरे ॥ सर्वज्ञता नित्यतृप्ता च
शक्तिरनादिबोधश्च स्वतंत्रता च अलुप्तशक्तिरनंतता च षडंगमाहुः शिवयोः शिवाद्याः ॥
तथा ॥ बीजानि तेषां समयोज्य जातियुक्तं षडंगकं ॥ ततो वश्चिन्यादिन्यासः ॥ सच संक्षेपप्रयोगः ॥
ततः नवयोन्यात्मकन्यासः ॥ यथा च ॥ ध्यातायाः त्रिपुरे ध्याने न मोन्यात्मकं न्यसेत् ॥ प्रयोग
स्तु ॥ भैरवी प्रकरणोक्तः पुनर्बालां समुच्चार्य गोलकं तेन चिंतयेत् ॥

पुनर्वाग्भवं समुच्चार्य चतुरस्रं विचिंतयेत् ॥ अथ पीठतत्त्वन्यासो ॥ यथा ॥ मूलवाग्भवमुच्चा
र्याग्निचक्रे कामगिर्यालये मित्रीशनाथात्मके रुद्रात्मशक्तिकामेश्वरीदेवीश्रीपादुकायै नमः ॥
ह्याधारे ॥ द्वितीयकूटमुच्चार्य सूर्यचक्रे जालंधरे पीठे षष्ठीशनाथात्मके विष्ण्वात्मशक्ति
श्रीवज्रेश्वरीदेवीश्रीपादुकायै॰ हृदि ॥ तृतीयकूटमुच्चार्य सोमचक्रे पूर्णगिरिपीठे उड्डीश
यानात्मके ब्रह्मात्मशक्ति श्रीभगमालिनीदेवीश्रीपादुकायै॰ ॥ ललाटे ॥ समस्तमंत्रमुच्चार्य ब्र
ह्मचक्रे ॥ ॐ उड्डीयानपीठे श्रीचर्यानाथात्मके परब्रह्मात्मशक्ति श्रीमहात्रिपुरसुंदरीचक्रे
श्वरीश्रीपादुकायै नमो ब्रह्मरंध्रे ॥ कुलाम्ले पीठाय सिद्धिप्रदान् मूलात्प्रथमं बीजमुच्च
रन् ॥ अग्निचक्रे योजयेच्च कामगिर्यालये पुनः ॥ मित्रीशेति ततो नाथात्मके कामेश्वरी पुनः
देवी रुद्रात्मका शक्तिः श्रीपादुकां पूजयामि च ॥ नमः पदं द्वितीयं च बीजमुच्चार्य पार्वति ॥ सूर्य
येचक्रे योजयेच्च जालंधरपदं ततः ॥ पीठे षष्ठीशनाथात्मके श्रीवज्रेश्वरीपदं ॥ देवी विष्ण्वात्म
शक्तिः श्रीपादुकां पूजयामि च ॥ नमः पदं तृतीयं च बीजमुच्चार्य पार्वति ॥ सोमचक्रे योजये
च्च पूर्णगिरिपदं ततः ॥ पीठे उड्डीशनाथात्मके भगमालिनीपदं ॥ देवी ब्रह्मात्मके शक्ति श्री
पादुकां पूजयामि च ॥ नमः पदं समस्तं च मंत्रमुच्चार्य पार्वति ॥ परब्रह्मपदं चक्रे उड्डीया
नपदं पुनः ॥ पीठे पदं योजयित्वा चर्यानाथात्मके पदं ॥ महात्रिपुरशब्दांते सुंदरीतिपदं ततः
देवी ब्रह्मपरात्मेच्च शक्तिश्रीपादुकां ततः ॥ पूजयामि नमः पश्चात् पयीये प्रथमे शिवे ॥ स्थाना
नि च ॥ मूलाधारे च हृदये ललाटे ब्रह्मरंध्रके ॥ अथ तत्त्वन्यासः ॥ यथा ॥ वाग्भवं कूटमु
च्चार्य आत्मतत्त्वव्यापिकायै श्रीमहात्रिपुरसुंदर्यै॰ आधारे ॥ द्वितीयकूटमुच्चार्य विद्या
तत्त्वव्यापिकायै श्रीमहात्रिपुरसुंदर्यै॰ हृदये ॥ तृतीयकूटमुच्चार्य शिवतत्त्वव्यापिका
यै श्रीमहात्रिपुरसुंदर्यै॰ भ्रूमध्ये ॥ समस्तबीजमुच्चार्य सर्वतत्त्वव्यापिकायै श्रीमहात्रिपु

रसंहृदयै॰ ब्रह्मरंध्रे॥ ततः पंचदशीन्यासः॥ तद्यथा॥ मूलाधारे हृदि च चक्षुषो कर्णयोर्नसोर्मु
खभुजयुगपृष्ठजानुयुगलोदि षु प्रत्येकं॥ नमोलंम्लमंत्रं वर्णान्न्यसेत्॥ अथ षोडशी
न्यासः॥ निबंधे॥ ब्रह्मरंध्रे पुनर्विंध्यां रक्तवर्णां विचिंतयेत्॥ सौभाग्यदंडिनी मुद्रां वामांसे न्या
मयेत्सुधीः॥ रिपुजिह्वाग्रहा मुद्रां रामपादतले न्यसेत्॥ व्यापकां ले योनिमुद्रां मुखे क्षि
प्त्वाभिवंघच॥ पुनर्ब्रह्मरंध्रे मणिबंधे ललाटे बालिकां लं षोडशावर्णान्नू स्मरेद्बुधः॥ ततः
पादयोर्जंघयोर्जान्वोः कट्यां संधिषु पृष्ठके॥ नाभौ पार्श्वद्वये वापि स्तनयोरंसयोस्तथा॥
कूर्परयोर्ब्रह्मरंध्रे च वदने न्युविंयादिति॥ ततः कर्णप्रदेशे च कूरवेष्टनयोः क्रमात्॥ इति
संहारक्रमः॥ ततः स्थितिः क्रमः॥ करयोरंगुलीषु पंच ब्रह्मरंध्रे मुखे हृदि त्रयं नाभ्यादि
पादपर्यंतं मेकं कंठान्नाभिपर्यंतं त्वपरमेकं ब्रह्मरंध्रात्कंठपर्यंतं मेकं॥ पादयोः पंच
अथ स्वष्टिन्यासः॥ ब्रह्मरंध्रे ललाटे नेत्रे श्रवणे घ्राणे ओष्ठे दंतौ लेठद्र्ध्वे जिह्वायां चिबु
के पृष्ठे सर्वांगे हृदि स्तनयोः कुक्षौ लिंगे च षोडशाणान्नू प्रविन्यसेत्॥ अथ नादन्यासः॥ शिरसि
अव्यक्तनादाय॰॥ ललाटे शून्यनादाय॰॥ भ्रूमध्ये स्पर्शनादाय॰॥ नासायां नादनादाय॰॥ वद
ने ध्वनिनादाय॰॥ कंठे बिंदुनादाय॰॥ हृदि शक्तिनादाय॰॥ नाभौ जीवनादाय॰॥ मूलाधारे अ
क्षरात्मकनादाय॰॥ कुलाम्रत्ले॥ प्रथमं चाव्यक्तनादं शून्यनादमतः परं॥ स्पर्शनादं नाद
नादं ध्वनिनादमतः परं॥ बिंदुनादं शक्तिनादं जीवनादं ततः शिवे॥ अक्षरात्मकनादं च
ड॰ नमो लक्ष्मेऽणि हि॥ शिरोललाटभ्रूमध्ये नासावदनकंठके॥ हृन्नाभिमूलदेशे पुनरेना
दं न्यसेत्सुधीः॥ अथ धामादिन्यासः॥ ततः शिरसि षट्कोणे पृथक्त्वे त्रयं वामोर्ध्वस्तने वामाधा
न्यसेत्॥ यथा॥ वामायै॰१ ज्येष्ठायै॰२ रौद्र्यै॰३ अंबिकायै॰४ अक्षरात्मने॰५ अक्षराकारायै॰६॥

तथाचकुलाम्टते॥ ततःह्रींरसिन्यांन्यस्य षडङ्गोएऐषु पृथक्त्रयं॥ वामकर्णेनिवामाद्यामारभ्य
स्वपुरंन्यसेत्॥ वामाज्येष्ठातथारौद्रीअंबिकाच चतुष्टयं॥ अक्षरात्माक्षराकारानाघंडेनाः
क्रमयोगतइति॥ अथ षोढान्यासः इशानाशिवे॥ गणेशैः प्रथमोन्यासो द्वितीयश्चग्रहैर्मतः॥
नक्षत्रैस्तृतीयःस्यात् योगिनीभिश्चतुर्थकः॥ राशिभिःपंचमोन्यासःषष्ठःपीठैर्निगद्यते॥
षोढान्यासस्त्वयंप्रोक्तःसर्वत्रैवापराजितः॥ एवंयोन्यस्तगात्रस्तु संपूज्यःपूर्वयोगिभिः॥
न्यासस्यप्रज्योलोकेपुपितृमातृमुखाजनः॥ सएवपूज्यःसर्वेषांसत्ययंपरमेश्वरः॥ षोढा
न्यासविहीनोयःप्रणमेद्देविपार्वती॥ सोचिरान्मृत्युमाप्नोति नरकंचप्रपद्यते॥ अस्यपूर्वषो
ढान्यासस्य॥ दक्षहराएवऋषिः॥ अनुष्टुप्छंदो गणेशोदेवतान्यासकर्मणिजपेविनियोगः
ऐंह्रींश्रींअंविघ्नेश्वरश्रीभ्यांनमः ह्रींरसि॥ ३ आंविघ्नराजह्रीभ्यां मुखे॥ ३ इंविनायकपुष्टि
भ्यां दक्षनेत्रे॥ ३ ईं शिवोत्तमशांतिभ्यां वामनेत्रे॥ ३ उंविघ्नहृत्पुष्टिभ्यां दक्षनासि॥ ३ ऊंविघ्न
कर्तृसरस्वतीभ्यां वामनासि॥ ३ ऋंविघ्नराजरतिभ्यां दक्षकर्णे॥ ३ ॠंगणनायकमेधाभ्यां
वामकर्णे॥ ३ लृंएकदंतकांतिभ्यां दक्षगंडे॥ ३ लॄंद्विदंतकामिनीभ्यां वामगंडे॥ ३ एंग
जवक्त्रमोहिनीभ्यां ऊर्ध्वोष्ठे॥ ३ ऐंनिरंजनजटाभ्यां अधरोष्ठे॥ ३ ओंकपर्दिन्तीव्राभ्यां ऊ
र्ध्वदंते॥ ३ औंदीर्घमुखज्वालामुखीभ्यां अधोदंते॥ ३ अंशंकुकर्णनंदाभ्यां ब्रह्मरंध्रे॥ ३ अः
वृषध्वजसुरसाभ्यां मुखे॥ ३ कंगणनाथकामरूपिणीभ्यां दक्षभुजे॥ ३ खंगजेन्द्रउमाभ्यां
कूर्परे॥ ३ गंशूर्पकर्णजयनीभ्यां मणिबंधे॥ ३ घंत्रिनेत्रसत्याभ्यां अंगुलिमूले॥ ३ ङंलंबो
दरविघ्नेशीभ्यां अंगुल्यग्रे॥ ३ चंमहामोदस्वरूपिणीभ्यां वामभुजे॥ ३ छंचतुर्मूर्तिकामदा
भ्यां कूर्परे॥ ३ जंसदाशिवमदविह्वलाभ्यां मणिबंधे॥ ३ झंआमोदविकटाभ्यां अंगुलिमू
ले॥ ३ ञंदुर्मुखघूर्णाभ्यां अंगुल्यग्रे॥

२दं सुमुखमूर्तिभ्यां दक्षजंघे ॥२॥ गं प्रमोदमूर्तिभ्यां जानुनि ॥२॥ डं एकपादसतीभ्यां गुल्फे ॥२॥
ढं द्विजिह्वरमाभ्यां गुलिमूले ॥२॥ णं शूरमानुषीभ्यां गुल्फाग्रे ॥२॥ तं वीरमकरध्वजाभ्यां वा
मकघ्यघः ॥२॥ थं षण्मुखविकर्णीभ्यां जानुनि ॥२॥ दं वरदभ्रूकुटिभ्यां गुल्फे ॥२॥ धं विम
ललज्जाभ्यां गुलिमूले ॥२॥ नं वक्रतुंडदीर्घघोणाभ्यां गुल्फाग्रे ॥२॥ पं द्विरंडकधनुर्द्ध
राभ्यां दक्षपार्श्वे ॥२॥ फं सेनानीयामिनीभ्यां वामपार्श्वे ॥२॥ बं ग्रामणिरात्रिभ्यां पृष्ठे ॥२॥
भं मत्तचंद्रिकाभ्यां नाभौ ॥२॥ मं विमलशशिप्रभाभ्यां उदरे ॥२॥ यं मत्तवाहनलोला
भ्यां हृदि ॥२॥ रं जटिचपलाक्षीभ्यां दक्षस्कंधे ॥२॥ लं मुंडीऋद्धिभ्यां ककुदि ॥२॥ वं खड्गि
दुर्गाभ्यां वामस्कंधे ॥२॥ शं वरेण्यसुभगाभ्यां हृदादिदक्षहस्ते ॥२॥ षं वृषकेतुशिवाभ्यां
हृदादिवामहस्ते ॥२॥ सं भक्षप्रियदुर्गाभ्यां हृदादिदक्षपादे ॥२॥ हं मेघनादकामिनीभ्यां हृ
दादिवामपादे ॥२॥ ळं गणेशकान्त्यकुब्जाभ्यां हृदादुदरे ॥२॥ क्षं गणेशविघ्नहारिणीभ्यां ले
मोहृदादिमुखे ॥ तथान्यन्नामानि ॥ विघ्नेश्वरस्तथा श्रीमद्विघ्नराजस्तथापरः ॥ विनायक
स्तथा हिः प्रोक्तिपुत्रः शिवोत्तमः ॥ विघ्नहृत्पुष्टिपुत्रश्च विघ्नकृच्च सरस्वती ॥ विघ्नराज
लिपुत्रश्च मेधा च गणनायकः ॥ एकदंतश्च कांतिश्च द्विदंतकामिनी स्मृतः ॥ गजवक्त्रो
मोहिनी च निरंजनजटे ततः ॥ कपर्दी च तथा तीव्रा दीर्घवक्त्रस्ततः प्रियः ॥ ज्वालादीर्घमु
पश्चाल नंदासंकर्षणस्तथा ॥ वृषध्वजश्च स्फुरसागरनादेन संयुता ॥ नामरूपिणिका
पश्चात्त गजेन्द्रः शुभ्रा तथा ततः ॥ शूर्पकर्णस्तु जयिनी त्रिनेत्रः सप्तमायुता ॥ लंबोदरश्च
विघ्नेशी महामोदः स्वरूपिणी ॥ चतुर्मूर्तिः कामदा च सदाशिवसमायुता ततः ॥ मदविह्वलना
मी च आमोदविकटस्तथा ॥ दुर्मुखश्च तथा पूर्णा सुमुखो मूर्तिमांस्ततः ॥ प्रमोदश्च तथा
भिरेकपादस्तथा सती ॥ विद्वज्जनश्च रमायुक्तः शूरश्चैव तु मानुषी ॥ वीरेणासहिताप

श्चात्कैलजेमकरध्वजा॥ षण्मुखश्च विकर्णश्चिवरदोत्कुटीतलः॥ वामदेवस्त
था लेज्जा वक्रतुंडस्ततः परं॥ दीर्घघोणान्वितः पश्चात् द्विरंडकधनुर्द्धरेत्॥
सेनानी यामिनीयुक्तो ग्रामणी रात्रिसंयुतः॥ मत्तश्च चंद्रिकायुक्तो विमल
श्च शशिप्रभा॥ मत्तवाहन लोला च जटी चंचपलाह्विरणी॥ मुंडी ऋद्धियु
तः पश्चात् खड्गी दुर्गयायुतः॥ वरेण्यश्चैव स्कन्नगा वृषकेतुस्तथाह्वियौ॥
मश्रंप्रियेचदुर्गा चि मेघनादश्च कामिनी॥ गणेशाः कान्यकुब्जाश्च गणेशो विघ्न
हारिणीति॥ इति गणेशन्यासः॥ अथ ग्रहन्यासः॥ ऐं ह्रीं श्रीं अं १६ आं आ
दिसरुचिभ्यां नमो हृदि अधेः॥ २ यं ४ सौं सोमरमाभ्यां भ्रूमध्ये॥ २ कं ५ अं अंगारकरक्ता
भ्यां नेत्रे॥ २ चं ५ बुं बुधज्ञानरूपाभ्यां हृदयोपरि॥ २ टं ५ बृं बृहस्पतियशस्विनीभ्यां कंठे
२ तं ५ शुं शुक्रह्लादिनीभ्यां गले॥ २ पं ५ शं शनैश्चरशक्तिभ्यां नाभौ॥ २ शं रां राहुकस्का
भ्यां वक्षसि॥ २ ळं क्षं कें केतुवायवीभ्यां नमो गुह्ये॥ तथा च शारदातिलके॥ स्वरैरर्कं हृदिन्य
स्येत्कवर्गेण शशी ललाटे॥ ... युग्मे इत्यादि॥ इति ग्रहन्यासः॥ अथ नक्षत्रन्यासः॥ ऐं ह्रीं श्री
अं आं अश्विन्यै नमो ललाटे॥ २ इं ईं भरण्यै दक्षनेत्रे॥ २ उं ऊं कृत्तिकायै वामनेत्रे॥ २ ऋं ॠं
लृं लॄं रोहिण्यै दक्षकर्णे॥ २ एं मृगशिरसे वामकर्णे॥ २ ऐं आर्द्रायै दक्षनासायां॥ २ ओं औं
पुनर्वसवे वामनसि॥ २ कं पुष्यायै मुखे॥ २ खं गं आश्लेषायै दक्षस्कंधे॥ २ घं ङं मघायै वाम
स्कंधे॥ २ चं छं पूर्वफाल्गुन्यै दक्षभुजमध्ये॥ २ जं झं उत्तरफाल्गुन्यै वामभुजमध्ये॥ २ ञं टं हस्ता
यै दक्षमणिबंधे॥ २ ठं डं चित्रायै वाममणिबंधे॥ २ डं स्वात्यै वामहस्ततले॥ २ ढं णं वि
शाखायै वामहस्ततले॥ २ तं थं दं अनुराधायै नाभौ॥

३ धं ज्येष्ठायै· दक्षकटिदेशे॥३ नं पं फं मूलायै· वामकटिदेशे॥३ बं पूर्वाषाढायै· दक्षिणोरौ॥३
भं उत्तराषाढायै· वामोरौ॥३ मं श्रवणायै· दक्षजानुनि॥३ यं रं धनिष्ठायै· वामजानुनि॥३ लं
शतभिषायै· दक्षजंघायां॥३ वं शं पूर्वाभाद्रपदायै नमः· वामजंघायां॥३ षं सं हं उत्तराभाद्रप
दायै· दक्षपादे॥३ ळं क्षं अं अः रेवत्यै· वामपादे॥ अथ योगिनीन्यासः॥३ ऐं १६ डां डीं ड म
लवरयूं डाकिन्यै मां रक्ष २ त्वगात्मने नमः कंठे॥३ कं ९ चं ५ टं ठं रां रीं र मलवरयूं राकिन्यै
मां रक्ष २ असृगात्मने· हृदि॥३ डं ४ पं फं लां लीं ल मलवरयूं लाकिन्यै मां रक्ष २ मांसात्मने·
नाभौ॥३ बं ५ कां कीं क मलवरयूं काकिन्यै मां रक्ष २ मेदात्मने· स्वाधिष्ठाने॥३ वं ४ सां सीं स म
लवरयूं शाकिन्यै मां रक्ष २ अस्थ्यात्मने नमो मूलाधारे॥३ हं ३ हां हीं ह मलवरयूं हाकिन्यै
मां रक्ष २ रक्ष मज्जात्मने· भ्रूमध्ये॥ अथ राशिन्यासः॥३ अं आं इं ईं मेषराशये नमो दक्षगुल्फे
३ उं ऊं ऋं ॠं वृषभराशये· दक्षजानुनि॥३ लृं लॄं मिथुनराशये· दक्षवृषणे॥३ एं ऐं कर्कट
राशये· कुक्षौ॥३ ओं औं सिंहराशये· दक्षस्कंधे॥ अं अः शं ५ क्षं कन्याराशये· दक्षमस्तके॥
३ कं ५ तुलाराशये· मस्तके॥३ चं ५ वृश्चिकराशये· वामबाहुमूले॥३ टं ५ धनुराशये· हृदि॥
३ तं ५ मकरराशये· वामवृषणे॥३ पं ५ कुंभराशये· वामजानुनि॥३ यं ४ मीनराशये· वाम
गुल्फे॥ अथ पीठन्यासः॥ ऐं ह्रीं श्रीं अं कामरूपपीठाय नमः शिरसि॥३ आं वाराणसीपी
ठाय· मुखे॥३ इं नेपालपीठाय· दक्षनेत्रे॥३ ईं पौंड्रवर्द्धनपी· वामनेत्रे॥३ उं पुरस्थिरपीठा
य· दक्षकर्णे॥३ ऊं कान्यकुब्जपी· वामकर्णे॥३ ऋं पूर्णशैलपीठा· दक्षनासि॥३ ॠं अर्बु
दपीठा· वामनासि॥३ लृं आम्रातकेश्वरपी· दक्षगंडे॥३ लॄं एकाम्रपीठा· वामगंडे॥३ एं
त्रिस्रोतपी· ऊर्ध्वोष्ठे॥३ ऐं कामकोट्टीपी· अधरे॥३ ओं चंद्रपुरपी· ऊर्ध्वदंते॥३ औं श्री

पीठाय· इं ताधः॥२ ओं भृगुनगरपी· उत्तमांगे॥२ अः केदारपीठ· मुखे॥२ कं मारुतेश्वर
पी· दक्षांसे॥२ खं ओंकारपीठ· दक्षकूर्परे॥२ गं जालंधरपी· मणिबंधे॥२ घं मालवपीठाय·
गुल्यधः॥२ ङं भद्रपीठ· चरणाग्रे॥२ चं देवीकूटपी· वामस्कंधे॥२ छं गोकर्णपी· कूर्परे॥
२ जं मंगलकोटिपी· मणिबंधे॥२ झं अट्टहासपी· गुल्यधः॥२ ञं विरजपी· गुल्फाग्रे॥२ टं
राजगृहपी· दक्षकट्यधः॥२ ठं महापथपीठ· दक्षजानुनि॥२ डं कोल्लगिरिपी· गुल्फे॥२
ढं एलापुरपीठ· गुल्फमूले॥२ णं कालेश्वरपी· गुल्याग्रे॥२ तं जयंतीपी· वामकट्यधः॥
२ थं उज्जयिनीपी· जानुनि॥२ दं चरित्रपी· गुल्फे॥२ धं क्षीरिकायपी· गुल्यधः॥२ नं हस्ति
नापुरपी· गुल्फाग्रे॥२ पं उड्डीशपी· दक्षपार्श्वे॥२ फं प्रयागपीठ· वामपार्श्वे॥२ बं षष्ठीश
पी· पृष्ठे॥२ भं मायापुरेपी· नाभौ॥२ मं जलेश्वरपी· उदरे॥२ यं मलयगिरिपी· हृदि॥२ रं श्री
शैलपी· दक्षांसे॥२ लं महामेरुपी· ककुदि॥२ वं मेरुगिरिपी· वामबाहु॥२ शं महेन्द्रपी· हृ· श्वे॥
२ षं वामनपुरपी· हृ· वा· श्वे॥२ सं हिरण्यपुरपी· हृ· दक्ष· दे॥२ हं महालक्ष्मीपुरपी· हृ· वाम· दे॥
२ ळं उड्डीयानपी· हृ· उदरे॥२ क्षं छायाछत्रपुरपी· हृ· मुखे॥ सर्वत्र मातृकास्थानेषु नमोंतेन
न्यसेत्॥ इति पीठन्यासः॥ अयं पीठन्यासो मातृकान्यासानंतरं कर्त्तव्य इति संप्रदायः॥ अ
थ त्रिपुरान्यासः॥ तथा च तंत्रे॥ त्रिपुरान्यासं ततः कुर्यात्सर्वकामार्थसिद्धये॥ अस्यास्तन्या
समात्रेण जीवन्मुक्तो भवेन्नरः॥ तद्यथा॥ ऐं ह्रीं श्रीं अं कामिनीत्रिपुरायै नमः॥२ आं मालिनीत्रि
पुरायै॥२ इं मदनात्रिपुरायै॥२ ईं उन्मादिनीत्रिपुरायै॥२ उं द्राविणीत्रिपुरायै॥२ ऊं खेचरीत्रि
पुरायै॥२ ऋं सिद्धिकात्रिपुरायै॥२ ॠं कलावतीत्रिपुरायै॥२ ऌं क्लेदिनीत्रिपुरायै॥२ ॡं शिवदूती

त्रिपुरायै॥२ ऐं स्कन्दगात्रिपुरायै॥२ ऐं भगवहात्रिपुरायै॥२ अं सिद्धेश्वरीत्रिपुरायै॥२ औं म
हालक्ष्मीत्रिपुरायै॥२ अं कौलिनीत्रिपुरायै॥२ अः कामेश्वरीत्रिपुरायै॥२ कं कुलमालिनी
त्रिपुरायै॥२ खं व्यापिनीत्रि॥२ गं स्कन्दगात्रि॥२ घं वागीश्वरीत्रि॥२ ङं कालित्रि॥२ चं पिंग
लात्रि॥२ छं भगसर्पिणीत्रि॥२ जं सुंदरीत्रि॥२ झं नीलपताकात्रि॥२ ञं विघ्नेश्वरीत्रि॥२
टं मतासिद्धेश्वरीत्रि॥२ ठं अघोरात्रि॥२ डं रत्नमालात्रि॥२ ढं मंगलात्रिपु॥२ णं चममा
लिनीत्रि॥२ तं रौद्रार्णवीत्रि॥२ थं योगेश्वरीत्रि॥२ दं अंबिकात्रि॥२ धं अट्टहासात्रि॥२
नं व्योमरूपिणीत्रि॥२ पं वज्रेश्वरीत्रि॥२ फं क्षोभिणीत्रि॥२ बं भ्रामरीत्रि॥२ भं अनंतात्रि॥
२ मं लोकेश्वरीत्रि॥२ यं रक्तात्रि॥२ रं स्करथात्रि॥२ लं शुक्लात्रि॥२ वं अपराजितात्रि॥२
शं संवर्त्तात्रि॥२ षं विमलात्रि॥२ सं अघोरात्रि॥ हं क्षोभिणीत्रि॥२ ळं अमोघात्रि॥२ क्षं स
र्वाकर्षिणीत्रिपुरायै नमः॥ इति पंचाशत्त्रिपुरान्यासं मातृस्थानेषु विन्यसेत्॥ अथ कामर
अं २२ तिन्यासः॥ ऐं क्लीं श्रीं क्लीं कामरतिभ्यां नमः सर्वत्र॥४ आं कामप्रीतिभ्यां॥४ इं कालकामिनीभ्यां॥४
ईं भ्रांतमोहिनीभ्यां॥४ उं कामधुरूकमलाभ्यां॥४ ऊं कामचारविलासिनीभ्यां॥४ ऋं कामक
र्णलताभ्यां॥४ ॠं कोमलश्यामलाभ्यां॥४ लृं कामवर्द्धकविजयाभ्यां॥४ ॡं कामविस्मयाभ्यां॥
४ एं रमणविश्रांतकाक्षिभ्यां॥४ ऐं विमललिहाभ्यां॥४ ओं रतिनाथदिगंबराभ्यां॥४ औं रतिप्रि
यदिगंबराभ्यां॥४ अं रात्रिनाथकुब्जिकाभ्यां॥४ अः स्मरकौलाभ्यां॥४ कं रमणसत्याभ्यां॥४
खं निशाचरकल्याणिभ्यां॥४ गं नंदनयोगिनीभ्यां॥४ घं नंदीशकामदाभ्यां॥४ ङं मेदनलेलो
चनाभ्यां॥४ चं नंदपित्स्कलावण्याभ्यां॥४ छं निशाचरमर्द्दिनीभ्यां॥४ जं रतिहंसकलह
प्रियाभ्यां॥४ झं पुष्पधन्वकाक्षिणीभ्यां॥४ ञं महाधनुःस्कमुखीभ्यां॥४ टं ग्रामलीनलिनी

१०

भ्यां॰॥४ ठं नीलजटिलीभ्यां॰॥४ डं ज्वालामलकालिनीभ्यां॰॥४ ढं भीमज्वालाग्निशिखिनीभ्यां॰॥४ णं शूश्या
म मुग्धाभ्यां॰॥४ तं ज्वालामलीरमाभ्यां॰॥४ थं त्र्यंगुष्ठमाभ्यां॰॥४ दं भ्रांलचारमरलोलाभ्यां॰
४ धं भ्रोशावहस्तचारुचंचलाभ्यां॰॥४ नं मोहनदीर्घजिह्वाभ्यां॰॥४ पं मोक्षमलिभ्यां॰॥४ फं मुग्ध
लोलाक्षिभ्यां॰॥४ बं गाहनदुनभंगिनीभ्यां॰॥४ भं मोहनचपेटाभ्यां॰॥४ मं मन्मथाभ्यां॰॥४
यं मतंगमालिनीभ्यां॰॥४ रं त्रंगनायकहंसिनीभ्यां॰॥४ लं गायकविश्वलामुरलीभ्यां॰॥४ वं गीति
गर्जनवंहिनीभ्यां॰॥४ शं नर्त्तकरंजिनीभ्यां॰४ षं लेखकांतिभ्यां॰॥४ सं उन्मत्तरलकंठाभ्यां॰॥४ हं क
मलचर्णष्टलोदरीभ्यां॰॥४ ळं पेघःश्यामाभ्यां॰॥४ क्षं विमलश्रीभ्यां॰॥४ मालकास्थानेषुडेंता
नमोतान्यसेत्॥ अथ षोडशनित्यान्यासः॥ ज्ञानार्णवे॥ प्रथमं सुंदरीनित्या महात्रिपुरसुंदरी
कामेश्वरी समाख्याता तथैव भगमालिनी॥ नित्यक्लिन्ना च भेरुंडा तथैव वह्निवासिनी॥ वज्रे
श्वरी च दूती च त्वरिता कुलसुंदरी॥ नित्या नीलपताका च विजया सर्वमंगला॥ ज्वालामालि
नि चित्राः ताः पंचदशप्रकीर्तिताः॥ एतासां मंत्राः॥ यथा ज्ञानार्णवे॥ शृणु देवि प्रवक्ष्यामि नि
त्यामंडलमुत्तमं॥ वाग्लंतारं च हसां ले कामेश्वरि पदं वदेत्॥१॥ इच्छाकामफलं स्यांते प्रदे सर्वपदं
वदेत्॥ ततः सत्ववशं श्रयात कुरि सर्वजगत्पदं॥२॥ क्षोभनांते कुरि प्रपाल्य हंकारत्रयमालिखे
त्॥ पंचवर्णान्विसमालिख्य ले हारे णकुमारिकं॥३॥ एषा कामेश्वरी नित्या प्रसंगात् कथिता त्री
वे॥ वाग्भवं भगबुध्यंते भगि भगिनि चालिखेत्॥४॥ भगोदरी भगांते च भगमाले भगावहे
भगगुह्ये भग प्रांते योनिप्रांते भगांतिकं॥५॥ नित्यातिनिचसंवीते ललो भगवशा कुरि॥ भगले
पेतलोलेरव्य नार जायल लोचने॥६॥ नित्यक्लिन्ने भग प्रांते स्वरूपे सर्वमालिखेत्॥ भगानि पे
स्थानयांते वरदे ऽथ समालिखेत्॥७॥ रेते सुरेते सु भगक्लिन्ने क्लिन्न द्रवे ततः॥ क्लेदयं द्रावयांते
सर्वसत्त्वान् भगेश्वरि॥८॥ अमोघे भगविच्चे च क्षोभय क्षोभ सर्वं च॥ सत्त्वान् भगेश्वरि श्रया

१००

त् वाग्भवं क्लूं जमादिकं ॥ ऐं क्लूं मों ब्लूं हें क्लूं हें क्लिन्ने च ततः परं ॥ सवीलिन्च भगांन्यं ले मे च द्रांन्चा नयेति
च ॥ १ ॥ स्त्रीबीजंच हरपांतें वेले मोत्म क्रमेक्षरं ॥ भुवने श्रीं समालिख्य विधेयं भगमालिनी ॥ २ ॥ परा
बीजं समुच्चार्य नित्ये क्लिन्ने मदद्रवे ॥ अग्निजायान्विता मंत्रो नित्यक्लिन्नेयमीरिता ॥ ३ ॥ प्रणवं पूर्वमु
च्चार्य तथांकुशयुग्मं वदेत् ॥ तन्मध्ये विलिखेत् देवि चरेफात्म क्रमक्षरं ॥ ४ ॥ चवर्गे मंत्सहीनं च
विलिखेद् वह्निसंस्थितं ॥ चतुर्दशस्वरोपेतं बिंदुनादान्वितं पृथक् ॥ ५ ॥ वह्निजायान्विता विद्या भे
रुंडा देवता भवेत् ॥ ६ ॥ परां विलिख्य वन्यं ले वासिन्ये नमइत्यपि ॥ अष्टार्णं चैव महेशानि देवता
वह्निवासिनी ॥ ७ ॥ प्रणवं भुवनेशानी क्रों मात्म क्रमक्षरं ॥ सविसर्गः श्रीश्चात् नित्यक्लिन्ने
मदद्रवे ॥ ८ ॥ वह्निजायान्विता विद्या देवी वज्रेश्वरी भवेत् ॥ नित्यक्लिन्नो समालिख्य मुखे तांब
त्समालिखेत् ॥ ९ ॥ ह्लंस्रांत क्रेते चैव ह्रू बीजं विसर्गवत् ॥ चतुर्दशाक्षरी विद्या महाविजेश्व
री भवेत् ॥ १० ॥ पराबीजं समुच्चार्य शिवदूती चडे युता ॥ ह्रदंतोयं मनुर्देवी दूती सर्वसिद्धि
दा ॥ ११ ॥ ॐकारं बीजमुच्चार्य परां क्रूं च मोलिखेत् ॥ खेचछेक्षं समालिख्य स्त्रीबीजं च समा
लिखेत् ॥ १२ ॥ हुंकारं क्षेपरान्यास्त्रं विधेयं त्वरिता भवेत् ॥ सरीसिहासनमाया वालेव कुलसुंदरी
॥ १३ ॥ वाग्मायापुटिता कुर्यात् तथा नित्य च भैरवी ॥ पंचवाणांश्च देवेशि विद्या शाकाक्षरी भवेत् १४
अथवा ॥ पंचाक्षरी वालवीजे नित्येय परा भवेत् ॥ प्रणवं भुवनेशानीं केरेवात्म क्रमक्षरं ॥ १५ ॥
क्रौं मालम कं छिंतीयं च भुवनेशां कुशांततः ॥ नित्यशाब्दं समुच्चार्य संवो ध्याच मदद्रवा ॥ १६ ॥ वाग्भवं च
अंकुशं मायानित्यानीलपताकिनी ॥ वातककालसमायुक्तं रफं श्राक्रस्वरान्वितं ॥ बिंदुनादात्मकं दे
वि नित्ये पविजया भवेत् ॥ १७ ॥ पद्ध ॥ वालक्रा [illegible] वायुश्च [illegible] स्वरविभूषितः ॥ नादबिंदुकला
युक्ता विघ्नविजया भवेत् ॥ १८ ॥ वेद्रवातल संयुक्तं तारबीजं समालिखेत् ॥ चत्थ्यंते लतांदे

निगलायपरिकीर्त्तिता॥ क्लिन्नस्त्वार्यंच सर्वांतिन्नलसंहारकारिके॥ जालवेदःसिसंलिख्य ज्वलंतिपदमु
त्तमकं॥ ज्वलं ज्वलेपज्वल हुं हुं हुंकारत्रयमालिखेत्तु॥ वह्निवीजत्रयं चस्वं अस्वंत्रस्वाहान्तिसो मनुः॥
इयंनित्यामहादेविज्वालामालिनिपारकाः॥ कुणां तेस्वस्वरांतेन व्रूक्रस्वरविभूषितं॥ विंदुनादकला
क्रांतं चिंतिताऽपरमेश्वरि॥ आकारादिषु सर्वेषु स्वरेषु क्रमलोपजेत्॥ अः स्वरेषरमेशानि श्रीविद्या
विश्वमातृकां॥ स्वरवर्द्धित्यसेद्धि यांनीरजायतलोचने॥ एताः षोडशस्वरन्याससस्थानेषु निन्यसे
त्॥ यथा॥ अं ऐं ह्रीं श्रीं अं ऐं क्लीं सौः ॐ नमः कामेश्वरी इच्छाकाममफलप्रदे सर्वसत्ववशंकरि सर्वजि
गत्क्षोभनकरि हुं हुं हुं द्रां द्रीं क्लीं ब्लूं सः सौः ह्रीं ऐं कामेश्वरीनित्याकलायैनमः॥१॥ आं ऐं भगभुगे भगि
नीभगोदरि भगो भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपिनि
नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मेह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे
सर्वसंतान्नगेस्वरिते येन गरिच्चे क्षुभ क्षोभय सर्वसत्वान्भगेश्वरि॥ ऐं ब्लूं जं ब्लूं मों ब्लूं हें ब्लूं हें क्लि
न्ने सर्वाणि भगानि मे ह्यानय स्त्रीं हर ब्लें ह्रीं भगमालिनी नित्याकलायै नमः॥२॥ ह्रीं ऐं ह्रीं श्रीं ह्रीं नि
त्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्ना नित्याकलायै नमः॥३॥ ह्रीं ईं ॐ क्रों भ्रौं क्रौं झ्रौं छ्रौं ज्रौं स्वाहा॥ भेरुंडानि
त्याकलायै नमः॥४॥ ॐ ह्रीं वह्निवासिन्यै नमः॥ वह्निवासिनी नित्याकलायै नमः॥५॥ ह्रीं ॐ क्रीं ऐं सः नित्य
क्लिन्ने मदद्रवे स्वाहा॥ वज्रेश्वरी नित्याकलायै नमः॥६॥ ह्रीं शिवदूत्यै नमः॥ दूतीनित्याकलायै नमः
॥७॥ ॐ क्रौं भ्रूं क्रौं ह्रीं छ्रौं स्वच्छे क्षं स्त्रीं हूं क्षं ह्रीं फट् त्वरिता नित्याकलायै नमः॥८॥ ह्रीं ह्रूं ऐं ह्रीं सौं कुल
सुंदरी नित्याकलायै नमः॥९॥ ह्रीं ह्रूं ऐं ह्रीं सौः हसकलरडैं हसकलरडीं हसकलरडौं ह्रीं ह्रीं क्लीं
ब्लूं सः सौः ह्रीं ऐं विमला नित्याकलायै नमः॥१०॥ ह्रीं ऐं ॐ ह्रीं फ्रें स्त्रें ह्रीं क्रों नित्यमदद्रवे हूं फ्रें ह्रीं नील
पताकिनी नित्याकलायै नमः॥११॥ ऐं ह्रूं नमः स्वाहा ॐ विजया नित्याकलायै नमः॥१२॥ यथा ऐं ह्रूं नमः

योइत्यादि॥ॐ स्वां सर्वमंगलायै नमः॥ सर्वमंगलनित्याकलायै नमः॥१३॥ औं ॐ नमो भगवति ज्वा
लामालिनि देवि सर्वभूतसंहारकारिके जातवेदसे ज्वलंति ज्वल ज्वल प्रज्वल २ हूं ३ रं ३ हूं फट् स्वा
हा ज्वालामालिनी नित्याकलायै नमः॥१४॥ अं ३ चक्रौं विचित्रा नित्याकलायै नमः॥१५॥ अं ४ मूल
विद्यामुच्चार्य महात्रिपुरसुंदरी नित्याकलायै नमः॥१६॥ यद्वा ३ अं कामेश्वरी नित्याकलायै नमः
इत्यादिना षोडशनित्यान्यसेत्॥ इति षोडशनित्यान्यासः॥ अस्मिन्काले वास्तुस्थितिरिति न्यासः॥
अथ प्रकटादियोगिनीन्यासः॥ मूलाधारे ऐं ह्रीं श्रीं प्रकटयोगिनीभ्यो नमः स्वाधिष्ठाने॥२ गुप्त
योगिनीभ्यो नमः नाभौ॥३ गुप्ततरयोगिनीभ्यो नमः हृदि॥ ३ संप्रदायकुलयोगिनीभ्यो नमः कंठे
३ कुलकौलिनीयोगिनीभ्यो नमः भ्रूमध्ये॥३ निगर्भयोगिनीभ्यो नमः नादे॥ ३ रहस्ययोगिनी
भ्यो नमः॥ नादांते॥ अतिरहस्ययोगिनीभ्यो नमः ब्रह्मरंध्रे॥ परमातिरहस्ययोगिनीभ्यो नमः॥ अथा
युधन्यासः॥ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां संमोहनकामेश्वरधनुषे नमः॥ यां ५ द्रां ५ संमोहना
य कामेश्वरीधनुषे नमः॥ एतद्वयं स्ववामाधोहस्ते द्रां ५ यां ५ जं जं जनेभ्यः दक्षिणाधः कामेश्व
रबाणेभ्यो नमः॥ यां ५ द्रां ५ जं जं जनेभ्यो कामेश्वरीबाणेभ्यो नमः॥ एतद्वयं दक्षिणाधः करे॥
द्रां ५ यां ५ आं वश्यकरणाय कामेश्वरपाशाय नमः॥ वामोर्ध्वे॥ यां ५ द्रां ५ ह्रीं वश्यकरणाय कामेश्व
रीपाशाय नमः॥ एतद्वयं वामोर्ध्वहस्ते द्रां ५ यां ५ क्रौं सर्वस्तंभनाय कामेश्वरांकुशाय नमः॥ यां ५ द्रां ५
क्रौं सर्वस्तंभनाय कामेश्वर्यंकुशाय नमः॥ एतद्वयं दक्षोर्ध्वे तलोवक्ष्यमाणक्रमेण कामकलां ध्या
त्वा न्यसेत्॥ तथा च॥ द्रां द्रीं क्लीं ब्लूं सः इत्येते कामबाणाः प्रकीर्तिताः॥ यां रां लां वां शां इदं कामेशी
बाणपंचकं॥ द्रादीनि पंच यादीनि च संमोहनरात्रितः॥ ङें तं कामेश्वरधनुङेन्नमोंतं चेमुद्धरेत्
अनेन च स्ववामाधोहस्ते संधारयेद्धनुः॥ यादि द्रादी निधङे तं संमोहं च पदोपरि॥ कामेश्वरि

धनुर्हुं तं नमोंतमिस्यधः करे॥ वामे देव्यास्तथा मंत्री धारयेदैक्षवं धनुः॥ ह्रादियाजं जं नने भ्यः कामेश्वर
पदांतिके॥ वाणेभ्यो नम इत्येवं दक्षिणाधः करे निजे॥ देवी वान् प्रविन्यसेद्बाणान् पौष्पान् साधकसत्त
मः॥ यादि ह्रादि जं जं नने भ्यः कामेश्वरी पदं ततः॥ बाणेभ्यो नम इत्येतान् दक्षिणाधः करे निजे॥ देव्याः
प्रविन्यसेद्बाणान् पौष्पान् साधकसत्तमः॥ ह्रादियादि निन्न योपिमुखव्यसंसविंदुकं॥ स्याद्द्रां कर
णायेति कामेश्वरीपदं ततः॥ पाशाय नमः इत्येवं वामोर्द्ध्वं विन्यसेत्करे॥ यादि ह्रादि नि गगनं वह्नि
वामाक्षि विंदुमत्॥ स्याद्द्रां करणायेति ततः कामेश्वरी तिच॥ पाशाय नम इत्येवं वामोर्द्ध्वे विन्य
सेत्करे॥ ह्रादि यादि नि क्रों सर्वसंस्तंभनाय पदं ततः॥ कामेश्वर पदात् पश्चात् तथं कुशाय नमो लि
खेत्॥ दक्षिणोर्द्ध्व करे देवं विन्यसेदंकुशं ततः॥ यादि ह्रादि नि क्रों सर्वसंस्तंभनाय ततः परं॥ कामे
श्वरी पदाद् हर्ध्वमंकुशाय नमो लिखेत्॥ दक्षिणोर्द्ध्व करे देव्या विन्यसेदंकुशं ततः॥ ततो मूलेन व्या
पकं कृत्वा न च मुद्राः प्रदर्शयेत्॥ तद्यथा॥ द्रां सर्वसंक्षोभिणी॥ द्रीं सर्वविद्राविणी॥ क्लीं आकर्षि
णी॥ ब्लूं सर्ववशिनी॥ सः सर्वोन्मादिनी॥ क्रों महांकुशा॥ हसखफ्रें खेचरी॥ ह्सौः बीजमुद्रा ऐं योनिमु
द्रा॥ न्यासकालास्तु योगिनी हृदये॥ प्रातः काले थवा प्रआसमये होमकर्मणि॥ जपकाले पिवा
ले षां विनियोगः पृथक् पृथक्॥ पूजाकाले समस्तं वा कुर्यात्साधकसत्तमः॥ ततो ध्यानं॥ ततः प
द्यविचांदेरी बालार्ककिरणोज्वलां॥ जपाकुसुमसंकाशां दाडिमीकुसुमोपमां॥ पद्मरागप्रतीकाशां
कुंकुमारुणसंनिभां॥ स्फुरन्मुकुटमाणिक्यकिंकिणीजालमंडितां॥ कालाग्निकुलसंकाशकुटिला
लकपल्लवां॥ प्रत्यग्रारुणसंकाशवदनांभोजमंडलां॥ किंचिदर्धेंदुकुटिलललाटमृदुपट्टि
कां॥ पिनाकिधनुराकारभ्रूलतां परमेश्वरीं॥ आनंदमुदितोल्लासलीलांदोलितलोचनां॥

स्फुरन्मयूखसंकाशविलसद्धेमकुंडलां॥ स्फुरद्गंडमंडलाभोगजितेंदुमंडलां॥ विश्वकर्मीविनि
र्मीतस्त्रत्नस्फुरत्स्फुटनासिकां॥ ताम्रविद्रुमबिंबाभरक्तोष्ठीममृतोपमां॥ स्मितमाधुर्यविजितमाधुर्य
रससागरां॥ अनौपम्यगुणोपेतचिबुकोद्देशशोभितां॥ कंबुग्रीवांमहादेवीमृणाललसिताभुजां॥
रक्तोत्पलदलाकारसुकुमारकरांबुजां॥ करांबुजनखज्योतिर्विभासितनभस्तलां॥ लावण्यसंविरा
वर्त्तीकारणाभरणभूषितां॥ अनर्घ्यरत्नघटितकांचीयुतनितंबिनी॥ नितंबबिंबद्विरदरोमरा
जीवरांकुशां॥ कदलीललितस्तंभसुकुमारोरुमीश्वरीं॥ लावण्यकुसुमाकारजानुमंडलमंडितां
गूढगुल्फपदद्वंद्वप्रपदाजितकच्छपां॥ तनुदीर्घांगुलिस्वच्छनखराजिविराजितां॥ ब्रह्मविष्णुशिरोर
त्नविघट्टचरणांबुजां॥ शीतांशुशतसंकाशकांतिसंतानहासिनीं॥ लौहित्यजितसिंदूरजपादाडि
मरूपिणीं॥ रक्तवस्त्रपरीधानां पाशांकुशकरोद्यतां॥ रक्तपद्मनिविष्टां तु रत्नाभरणभूषितां॥ च
तुर्भुजां त्रिनेत्रां तु पंचबाणधनुर्धरां॥ कर्पूरशकलोन्मिश्रतांबूलपूरिताननां॥ महामृगमदोद्दा
मकुंकुमारुणविग्रहां॥ सर्वशृंगारवेषाढ्यां सर्वाभरणभूषितां॥ जगदाह्लादजननीं जगद्रंजनका
रिणीं॥ जगदाकर्षणकरीं जगत्कारणरूपिणीं॥ सर्वमंत्रमयीं देवीं सर्वसौभाग्यसुंदरीं॥ सर्वलक्ष्मी
मयीं नित्यां सर्वशक्तिमयीं शिवां॥ एवंरूपमात्मनि ध्यात्वा मानसैः संपूजयेत्॥ तद्यथा॥ हृत्पद्मम
ध्ये देवीं विभाव्य कुंडलिनीपात्रसंस्थेन सहस्रारामृतेन पाद्यं देयाच्छेरलोदघात॥ ततो आचम
नं चार्घ्यं दद्यात् सहस्रदलपद्मशृंगारललितपरमामृतजलेनाचमनीयं मुखे॥ पंचविंश
तितत्त्वेन गंधं च॥ आहं सा विज्ञानं क्षमां दयां अलोभं अमोहं अमात्सर्यं अमायां अनहं
कारं अरागं अमदं अद्वेषं इंद्रियाणि दश एतानि पुष्पाणि च प्रदापयेत्॥ ततस्तेजोरूपं दी
पं वायुरूपं धूपं दद्यात्॥ अंबरं चामरं॥ दर्पणं सूर्यचंद्रं छत्रं॥ पवनं च मेखलां॥ आनंदह

रमुज्ज्वलं॥ अनाहतध्वनिमयीं घंटां निवेदयेत्॥ ततः सकपारसां बुद्धिं ब्रह्माण्डपूरितमांसपर्वतां
ब्रह्माण्डपूरितपात्रसंचरद्रसां॥ मनोनर्त्तकतो लेभ्य शृंगारादिरसोद्भवैः॥ नृत्यगीतैश्च वाद्यैश्च तो
षयेत्परमेश्वरीं॥ एवं संपूज्य स्वच्छेदेन जपः कार्यः ततो बहिः पूजामारभेत्॥ ततोऽर्घ्यस्थापनं॥ प्र
थमं सामान्यार्घ्यं॥ तत्क्रमः॥ आदौ स्ववामे जलेन चतुरस्रं विधाय तद्बहिर्वृत्तमालिखेत्॥ ॐ
मंडलाय नमः॥ इति पुष्पैस्तमभ्यर्च्य तत्र साधारं पात्रं संस्थाप्य सूर्यमंडलाय नमः इत्यभ्य
र्च्य शुद्धजलेन तमापूर्य ऐं सर्वज्ञायै ह्रीं क्लीं श्रीमहात्रिपुरसुंदरी हृदयाय नमः॥ इत्यादिक्र
मेण षडंगानि संपूज्य तदुपरि मूलमंत्रमष्टधा जपेत्॥ ततो विशेषार्घ्यस्थापनं कुर्यात्॥
तत्पात्रं तु तंत्रांतरे॥ पात्रं कांचनकं च रूप्यजनितं मुक्ताकपालोद्भवं॥ विश्वामित्रमयं च कामद
मिदं तैमं प्रियं स्फाटिकं॥ ताम्रं प्रीतिदमष्टसिद्धिजनकं श्रीनारिकेलोद्भवं॥ कापालं स्फुटमंत्रसि
द्धिजनकं मुक्तिप्रदं शौक्तिकं॥ तदुक्तं च वरलेश्वरे॥ नवपात्रं महेशानि विशेषं चोत्तमोत्तमं॥ ना
रिकेलाजिधं देवि विशेषं चोत्तमकल्पकं॥ रत्नपात्रं च शुभ्रोणि विशेषं चोत्तममध्यमं॥ मध्यमोत्त
मकं बिल्वब्रह्मवृक्षजमेव च॥ कल्पं सममध्यमं प्रोक्तमन्त्यमायं कल्पनाधमं॥ रूप्यकर्पूरगकर्माणि
हेमपात्रे शुभाय ने॥ शांतिके पौष्टिके वापि राजतं कारयेत्प्रिये॥ लोहपात्रं विजानीयात् मारणो
च्चाटने तथा॥ स्तंभे च कार्ये पाषाणं विद्वेषे लोहमन्ययं॥ सर्वकार्येषु कर्त्तव्यं विश्वामित्रेण तु सु
व्रते॥ कुलोत्साधनकार्येषु कारयेत्पात्रं विशिष्यते॥ काष्ठपात्रं विजानीयात् मंत्राराधनकर्मणि
ताम्रपात्रं तु गृह्णीयात् भुक्तिमुक्तिप्रदायकं॥ दृष्ट्वार्थं पात्रं देवेशि ब्रह्माद्याद्देवताः सदा॥ न
स्यंति सर्वयोगिन्यः प्रीताः सिद्धिं ददत्यपि॥ सामान्यविशेषार्घ्ययोरावश्यकतमोरः॥ [illegible] परस्तेन्यं
दे॥ एकपात्रेण कर्त्तव्यं यदि साक्षान्महेश्वरः॥ मंत्राः प्राच्छुरखायांति आपदश्च पदे पदे॥ इह लो

केसरिद्वंस्यालमूलेन च पशुतां त्यजेत्॥ ततः आत्मश्रीचक्रयोर्मध्ये सामान्यार्घ्यजलेन त्रिकोणवृ
त्तषट्कोणचतुरस्रमंडलं कृत्वा त्रिकोणमध्ये मूलविद्यया मध्ये संपूज्य त्रिकोणप्रत्येककू
टैः पूजयेत्॥ अग्न्यादिकोणक्रमेण ललनः षट्कोणेषु मूलविद्यया षडंगानि पूज
येत्॥ तत्र त्रिपादिकां संस्थाप्य॥ ३ ऐं मं वह्निमंडलाय दशकलात्मने अर्घ्यपात्राधाराय नमः॥
इत्याधारं संपूज्य दशाकारेण वह्नेर्दश कलाः पूजयेत्॥ तथा॥ ऐं ह्रीं श्रीं यं धूम्रायै नमः॥ एवं ३
रं नीलवर्णायै ३ लं कपिलायै ३ वं विस्फुलिंगिन्यै ३ शं ज्वालिन्यै ३ षं हैमवत्यै ३ सं हव्यवा
हिन्यै ३ हं कव्यवाहिन्यै ३ ळं रात्र्यै ३ क्षं संकर्षिण्यै॥ इति संपूज्य तदुपरि अस्त्रेण मूलेन क्षा
लितमर्घ्यपात्रं संस्थाप्य पूर्ववत् तत्र यंत्रं मानसिकं संपूज्य ३ ह्रीं अं सूर्यमंडलाय द्वादशकला
त्मने॥ अर्घ्यपात्राय॥ इति संपूज्य द्वादशाकारेण सूर्यस्य द्वादश कलाः पूजयेत्॥ तद्यथा॥ ३ कं भं
तपिन्यै ३ खं बं तापिन्यै ३ गं फं धूम्रायै ३ घं पं विधुधूम्रायै ३ ङं नं बोधिन्यै ३ चं धं कपालिन्यै ३
छं दं शोषिण्यै ३ जं थं वारल्यै वरेण्यायै ३ झं तं आकर्षिण्यै ३ ञं णं नंदामायायै ३ टं ढं विश्वाव
त्यै विवस्वत्यै ३ ठं डं हेमप्रभायै इति संपूज्य मूलेन जलादिनापूर्य पूर्ववत् यंत्रं मानसिकं त्रिको
णेष्वकथादिरेखामध्ये हंसं च चिंतयेत्॥ ततः पूर्ववत् संपूज्य ह्सौः सोममंडलाय षोडश
कलात्मने अर्घ्यामृतात्मने॥ इति संपूज्य सोमस्य षोडशाकारेणावृत्ताकारेण पूजयेत्॥ तद्यथा
३ अं अमृतायै ३ एवं ३ आं मानदायै ३ इं तुष्ट्यै ३ ईं पुष्ट्यै ३ उं प्रीत्यै ३ ऊं रत्यै ३ ऋं श्रियै ३
ॠं क्रियायै ३ लृं स्वधायै ३ ॡं रात्र्यै ३ एं ज्योत्स्नायै ३ ऐं हैमवत्यै ३ ओं छायायै ३ औं पूर्णि
मायै ३ अं नित्यायै ३ अः अमावास्यायै॥ इति संपूज्य तोयं मापाद्य मध्ये हंसः आत्मने॥ ततो
हसक्षमलवरयूं आनंदभैरवाय वषट्॥ हसक्षमलवरयीं सुधादेव्यै वौषट्॥ इति संपूज्य॥
मत्स्यमुद्रया तज्जलमाच्छाद्य मूलविद्यामष्टधा जप्त्वा परिपोदेतानवमुद्रां प्रदर्श्य ब्रह्ममयं

ततो जलं किंचित्संगृह्य किंचित्पात्रांतरे प्रक्षिप्य मूलेन तज्जलेन आत्मानं पूजाद्रव्याणि च त्रिः संप्रोक्ष्य
सर्वं ब्रह्ममयं कुर्यात्॥ मार्त्तंडभैरोकवेतुष्टयं पूजयेद्॥ ब्रह्मांडखंडसंभूतमशेषरससंभृ
तं॥ आपूरितं महापात्रं पीयूषरसमावह॥१॥ अखंडैकरसानंदकरे परसुधात्मनि॥ स्वच्छंदस्फुर
णं मंत्रं निधेहि कुलरूपिणी॥२॥ अकुलस्यामृताकारे शुद्धज्ञानकरे परे॥ अमृतत्वं निधेह्यस्मि
न्तुनि सर्गकुलरूपिणी॥३॥ तद्रूपेणैकरस्यत्वं तत्त्वासिद्धिकरे परे॥ भूत्वा परामृताकारं मयि चित्स्फु
रणं कुरु इति॥४॥ पूजासमाप्तिर्यावत्स्यात्तावद्ध्यानं न चालयेत्॥ समयांके स्कंदरीविद्यायां अंगदे
वतार्चनं तु अर्घ्यस्थापनानंतरं॥ तथा च॥ आत्मानं यागवस्तूनि प्रोक्षयित्वा यथाक्रमं॥ चि
न्मयं तेजसा चिंत्यं चिंतयेन्मंत्रवित्तमः॥ तस्मात्स्वकं चतुर्दिक्षु क्रमरत्नानि भाय च क्रं भुजं स्व
र्णं हस्तिमुखं स्मरं पुरं हरं गोपालमेवं तथा॥ आराधना च तां स्ततो बहुविधैः पुष्पैश्च पाद्यादिभि
र्नानाद्रव्यसुगंधिपीतकमलैरदास्यसे हरिः॥ ततो महाचक्रे॥ ३ ॐ अमृतोद्भवनिधये· ३ र
त्नद्वीपाय· ३ नानावृक्षमहोद्यानाय· ३ संतानवृक्षवाटिकायै· ३ हरिचंदनवाटिकायै· ३ मंदार
वाटिकायै· ३ पारिजातवाटिकायै· ३ पुष्परागरत्नप्राकाराय· ३ गोमेदरत्नप्राकाराय· ३ इंद्रनी
लरत्नप्राकाराय· ३ वज्ररत्नप्राकाराय· ३ वैडूर्यरत्नप्राकाराय· ३ मुक्तारत्नप्राकाराय· ३ वि
द्रुमरत्नप्राकाराय· ३ माणिक्यमंडपाय· ३ सहस्रस्तंभमंडपाय· ३ अमृतवापिकायै· ३ आनंद
वापिकायै· ३ विमर्शवापिकायै· ३ बालातपोद्गाराय· ३ चंद्रिकोद्गाराय· ३ महाशृंगारपरिखायै· ३
महापद्माटव्यै· ३ चिंतामणिगृहराजाय· ३ पूर्वाम्नायपूर्वद्वाराय· ३ दक्षिणाम्नायदक्षि
णद्वाराय· ३ पश्चिमाम्नायपश्चिमद्वाराय· ३ उत्तराम्नायउत्तरद्वाराय· ३ द्वीपावलयाय·
३ महासिंहासनाय ३ ब्रह्ममयैकमंचपादाय· ३ विष्णुमयैकमंचपादाय· ३ रुद्रमयैकमंच

३ ब्रह्ममयै कमंचपादाय· ३ विष्णुमयै कमंचपादाय· ३ रुद्रमयै कमंचपादाय· ३ ईश्वरमयै कमंचपादा
य· ३ सदाशिवमयै कफलकाय· ३ हंसतूलिकायै· ३ हंसतूलमहोपधानाय· ३ कौसुंभास्तरणाय· ३
महाविलानिकायै· ३ महायमनिकायै· ३ सर्वत्रानमीलेन पूजयेत्॥ तदुपरि ह्सौः सदाशिवमहाप्रे
तपद्मासनाय·॥ ततः पूर्वेण व्यात्तत्रिखंडामुद्रां कृत्वा तदुपरि शिखरे मात्लेकायंत्रे समानीय
ह्रीं श्रीं सौः त्रिपुरसुंदरी मूर्त्तिं कल्पयामि नमः॥ इति बिंदौ कल्पितां मूर्तिं मावाहयेत्॥ हसरैं ह
सकलरीं हसरौं इत्युच्चार्य महापद्मवनान्तस्थे कारणानंदविग्रहे॥ सर्वभूतहिते मातरेह्येहि परमेश्व
रि॥ इति वैदर्भचक्रे परचितिमावाह्यावाहनादि प्राणप्रतिष्ठांत कर्म विधाय॥ चापकोदंडपाशांकुशादि
मुद्राः प्रदर्शयेत्॥ तथा यथोपचारैः संपूज्य त्रिधा संतर्पयेत्॥ तत्राय क्रमः॥ सव्ये हस्तानामिकां
गुष्ठनखाग्रेण घृतश्रीपात्रार्घ्यबिंदुनाऽन्यहस्ताक्षिप्तपुष्पाक्षतासे पैमूलमुच्चार्य श्रीमहात्रिपु
रसुंदरीं तर्पयामि इति त्रिस्तर्पयेत्॥ तदुक्तं स्वतंत्रे॥ अंगुष्ठानामिकायोगाद्वामहस्तस्य पार्वति॥ तर्पये
त् सुंदरीं देवीं समुद्रां च सवाहनां॥ तर्पणानि मुखे देव्याः त्रिवारं मूलविद्यया॥ अंगुष्ठानामिकाभ्यां तु
नखैर्निर्दिष्टमुद्रितः॥ श्रीपात्रस्थाद् कुबिंदुं तर्पयेत् कुलनायिकां॥ अंगुष्ठेनैव वादेवि मध्यमाञ्चं
डिकाप्रिये॥ सव्येन हस्तयोगेन तर्पयेद्धा कुलेश्वरी॥ विशेषतः॥ अंगुष्ठानामिकाभ्यां तु वश्यकर्म
णि तर्पयेत्॥ अंगुष्ठमध्यमाभ्यां तु तर्पयेत् शांतिकर्मणि॥ तर्जन्यंगुष्ठयोगेन तर्पयेदभिचार
के॥ कनिष्ठांगुष्ठयोगेन स्तंभने तर्पयेत् प्रिये॥ ततोग्नीशासुरवायव्यमध्यदिक्षु चतुरस्रादे हेष
डंगानि पूजयेत्॥ तद्यथा॥ ऐं सर्वज्ञाशक्ति श्रीमहात्रिपुरसुंदरी हृदयाय·॥ क्लीं नित्यतृप्तिश
क्ति श्रीमहात्रिपुरसुंदरी शिरसे॥ सौः अनादिबोधशक्ति श्रीमहात्रिपुरसुंदरी शिखायै·॥

ऐं स्वतंत्रशक्तिश्रीमहात्रिपुरसुंदरी कवचा ॥ क्लीं अलुप्तशक्तिश्रीमहात्रिपुरसुंदरी नेत्र-
सौः अनंतशक्तिश्रीमहात्रिपुसुंदरी अस्त्राय ॥ ततः स्वशरीरे कामकलां भावयेत् ॥ यथा
बिंदुसंकल्पं च कस्तु तदधस्तु कुचद्वयं ॥ तदधः सपरार्धं तु चिंतयेत्तदधोमुखं ॥ ततः
स्तिथिनित्यां समर्चयेत् ॥ महात्र्यस्रे वामावर्तेन अकारादि पंच ङकारादि पंच एकारादि पं
च विभाज्य मध्ये विसर्गं तेषु वामावर्तेन शुक्लपक्षे विचित्रादि कामेश्वर्यंतं पूजयेत् ॥ तद्यथा
शुक्लप्रतिपदि अंकारे ऐं ह्रीं श्रीं तत्तन्मंत्रमुच्चार्य कामेश्वरीनित्याकला श्रीपादुकां पूजयामि नमः
एवं आंकारे द्वितीयां भगमालिनी ॥ २ इंकारे तृतीयायां नित्यक्लिन्नां ३ ईंकारे चतुर्थ्यां भेरुंडा ४
उंकारे पंचम्यां वह्निवासिनी ५ ऊंकारे षष्ठ्यां महाविद्येश्वरी ६ ऋंकारे सप्तम्यां शिवदूतीश्वरी ७
ॠंकारे अष्टम्यां त्वरितां ८ लृंकारे नवम्यां कुलसुंदरी ९ लॄंकारे दशम्यां नित्यां १० एंकारे एका
दश्यां नीलपताकां ११ ऐंकारे द्वादश्यां विजयां १२ ओंकारे त्रयोदश्यां सर्वमंगलां १३ औंकारे चतुर्द
श्यां ज्वालामालिनी १४ अंकारे पौर्णिमास्यां विचित्रां विसर्गे त्रिपुरसुंदरी पूजयेत् ॥ कृष्णपक्षे
विचित्रादि कामेश्वर्यंतं पूजयेत् ॥ पूजामंत्रस्तु ॥ तंत्रांतरे ॥ श्रीपदं पूर्वमुच्चार्य पादुकां पदमु
द्धरेत् ॥ पूजयामि नमः पश्चात् पूजयेद्गुरुदेवताः ॥ ततो मध्यप्राक्त्र्यस्रमध्येषु गुरुपंक्तिं पू
जयेत् ॥ आनंदनाथशब्दांतां दिव्यापरमेश्वरि ॥ अंबांता गुरवः प्रोक्ताः स्त्रीलिंगा वीरवंदिते ॥
तद्यथा ॥ ३ ऐं ह्रीं श्रीं परप्रकाशानंदनाथ श्रीपादुकां पू० ॥ एवं परशिवं तथा परशक्त्यंबा श्रीपा०
पू० ३ एवं कौलेश्वरी शुक्लादेवी ३ परमेशानी ३ कामेश्वर्यंबां एते दिव्यौघाः ॥ भोगकौडं सम
यदेवं सहजं एते सिद्धौघाः ॥ गगनं विश्व विमल मदनं भुवनं नीलं ओंल्यानंदप्रियं ॥ एते मानवौघाः ॥

ततो गुरुं परमगुरुं परात्परगुरुं परमेष्ठिगुरुं केवलं स्वगुरुं वा॥ एते क्रमराजविद्यायास्तत्
घटिताया श्च गुरवः सोपायाः स्तत् घटितास्च परमं ब्रूोन्कामेश्वर्यं रादिश्चौघं महौघं सर्वानं
द प्रकाशदेवी कामकालं एते दिव्यौघाः॥ दिव्यं चित्रं केवल्यं दिव्य नाम होदयं॥ एते सिद्धौघाः॥ सिद्धि
श्चेश्वाग्निः ईश्वर कमल परमानंद मनोहर स्वरूपानंद प्रतिभासानंद एते मानवौघाः॥ इति पूज
येत्॥ ततः पूर्ववत् गुरुत्रयं एकं वा पूजयेत्॥ अथ वा सामान्य गुरुपंक्तिः पूजयेत्॥ तद्यथा॥
ऐं ह्रीं श्रीं गुरुभ्यो॰ २ गुरुपादुकाभ्यो॰ २ परमगुरुभ्यो॰ २ परमगुरुपादुकाभ्यो॰ २ परात्परगुरुभ्यो॰ २ परा
त्परगुरुपादुकाभ्यो॰ २ परमेष्ठीगुरुभ्यो॰ २ परमेष्ठीगुरुपादुकाभ्यो॥ आचार्येभ्यो॰ आचार्यपादुका॰
सर्वत्रादौ द्विताद्यंत्रितारीं वा प्रयोगः॥ तथा च ज्ञानार्णवे॥ माया लक्ष्मी मयं बीजं मन्त्रपूर्वं क्रमेण
हि॥ कथितं योजयेद्देवि त्रैलोक्ये परमेश्वरि॥ कुलसूत्रेपि॥ सर्वत्रादौ त्रितारीप्रयोगः॥ त्रितारी च॥ वा
ग्माया कमला चेति त्रितारी समुदाहृता॥ ततस्त्रैलोक्यमोहनादि सृष्टिचक्रे॥ २ हसरीं स ह्रीं श्रीं कल
ह्रीं पूर्वाम्नाय उन्मनी देवी श्रीपा॰ पू॰ स्थितिचक्रे॥ २ ऐं क्लिन्ने क्लीं मदद्रवे कुले ह्सौः दक्षिणाम्नाय योगिनी
देवी श्रीपा॰ पू॰॥ ततः सर्वसौभाग्यादि संहारात्मक त्रिचक्रे २ हसरवप्रें हसौं भगवत्यंबहसहरवफ्रें कु
ब्जिके ह्स्रां ह्स्रीं ह्स्रूं अघोरे घोरे घोरमुखि छ्रां छ्रीं किलि किलि विच्चे पूर्वोक्तानि पंच बीजानि पश्चिमा
म्नाय कुब्जिका श्रीपा॰ पू॰॥ सर्वचक्रे॥ २ हसरवफ्रें महाचंडयोगेश्वरि उत्तराम्नाय कालिकादेवी श्री॥
बैंदवचक्रे ह्सैं हसकलरीं हसौं ऊर्ध्वाम्नाये सकलसिद्धिदा देवी श्रीपा॰ पू॰॥ ततो ग्नीशासुरवायव्यम
ध्ये दिक्षु च मध्ये लेन षडंगानि पूजयेत्॥ तथा च ज्ञानार्णवे॥ अथांगावरणं कुर्यात् श्रीविद्यां मनुसंभ
वं॥ आग्नेशासुरवायव्य मध्ये दिक्ष्वंगपूजनं॥ ततो बाह्य चतुरस्र पश्चिमादि द्वारचतुष्टये वृत्ते लिमा
दि सिद्धीः पूजयेत्॥ पश्चिमादि द्विद्वानियम स्तत्ज्ञानार्णवे॥ यदाज्ञानि मुखो मंत्री त्रिपुरां परिपूजयेत्

देवी पश्चात्तदा प्राचीं प्रतीचीं त्रिपुरापुरः ॥ त्रिपुरेश्वरे च ॥ उत्तराभिमुखो भूत्वा यद्दिक्चक्रं प्रपूजये
त् ॥ उत्तराग्रतलद्वारे विप्रर्षि सैव न संशयः ॥ दक्षिणं पश्चिमं प्रोक्तं देव्या दक्षे तथोत्तरं ॥ तद्वामं दक्षिणं कु
र्यात्सर्वत्र नियमः स्मृतः ॥ ईशानकोणं देवेशि आग्नेयं नैर्ऋतं तथा ॥ वायुकोणं तदा देवि ऐशानीं वि
दिगुच्यते ॥ ३ अणिमासिद्धिश्रीपा·पू·३ लघिमासिद्धिश्रीपा·पू·३ महिमासिद्धिश्रीपा·पू·३ ईशित्वा
सिद्धिश्रीपा·पू· ॥ वायुकोणे चतुष्टयेषु ॥ ३ वशित्वासिद्धिश्रीपा·पू·३ प्राकाम्यासिद्धिश्रीपा·पू·३ इच्छा
सिद्धिश्रीपा·पू·३ भुक्तिसिद्धिश्रीपा·पू·३ अथः प्राप्तिसिद्धिश्रीपा·पू· ॥ मध्ये चतुरस्रस्य पश्चिमा
दिद्वारचतुष्टयेषु ॥ ३ आं ब्राह्मीश्रीपा·पू·३ ईं माहेश्वरीश्रीपा·पू·३ ऊं कौमारीश्रीपा·पू·३ ॠं वैष्णवी
श्रीपा·पू·३ वायुकोणे चतुष्टयेषु ॡं वाराहीश्रीपा·पू·३ ऐं इन्द्राणीश्रीपा·पू·३ औं चामुंडाश्रीपा·पू·३ अः
महालक्ष्मीश्रीपा·पू· ॥ अभ्यंतरचतुरस्रस्य पश्चिमादिद्वारचतुष्टयेषु ॥ ३ द्रां सर्वसंक्षोभिणीमुद्राश्री
पा·पू·३ द्रीं सर्वविद्राविणीमुद्राश्रीपा·पू·३ क्लीं सर्वाकर्षिणीमुद्राश्रीपा·पू·३ ब्लूं सर्ववशंकरीमुद्राश्रीपा·पू·
वायव्यादिकोणचतुष्टयेषु ॥ ३ सः सर्वोन्मादिनीमुद्राश्रीपा·पू·३ क्रों महांकुशामुद्राश्रीपा·पू·३ हसखफ्रें
खेचरीमुद्राश्रीपा·पू·३ हसौः सर्वबीजमुद्राश्रीपा·पू·३ अथः ऐं योनिमुद्राश्रीपा·पू·३ ऐं क्लीं सौः त्रि
खंडामुद्राश्रीपा·पू· ॥ एतस्या दक्षिणे च कोणे संपूर्णं चक्रं ३ त्रैलोक्यमोहनचतुरस्रचक्राय नमः ॥ चक्रा
ग्रे ॥ ३ अं आं सौः त्रिपुराश्रीपा·पू· एतस्या दक्षिणे ॥ ३ द्रां सर्वसंक्षोभिणीश्रीमुद्रापा·पू· देव्या वामे ॥ ३
अणिमासिद्धिश्रीपा·पू·३ चार्वाकुदर्शनाय नमः ॥ अत्र त्रैलोक्यमोहनचतुरस्रचक्रे त्रिपुराचक्रनायि
काधिष्ठिते एता अणिमाद्याः प्रकटयोगिन्यः समुद्राः ससिद्धयः सायुधाः सपरिवाराः सर्वोपचारैः
पूजितास्तर्पिताः संतु इत्यर्घजलेन मूलदेव्यै समर्पयेत् ॥ ततो द्रामिति सर्वसंक्षोभिणीमुद्रां प्रदर्श्य
ऐं आत्मतत्त्वाय स्वाहा ॥ क्लीं विद्यातत्त्वाय स्वाहा ॥ सौः शिवतत्त्वाय स्वाहा ॥ इति त्रिवारं मध्यादिके

नतर्पयेत्॥ षोडशदले पुपश्चिमदलादारभ्य वामावर्त्तेन॥ ३ अं कामाकर्षिणी नित्याकला श्रीपा· पू· ३ आं
बुध्याकर्षिणी नित्याकला श्रीपा· पू·॥ एवं सर्वत्र नित्याकला श्रीपादुकां पूजयामीति पदप्रयोगः॥ त
था च नवरत्नेश्वरे॥ विलोमेन यजेद्देवीः क्रमान्नित्याकला पुनः॥ ३ आं बुध्याकर्षिणी नित्याकला श्री
पा· पू· ३ इं अहंकाराकर्षिणी नित्याकला श्रीपा· पू· सर्वत्र ३ ईं शब्दाकर्षिणी· ३ उं स्पर्शाकर्षिणी· ३ ऊं
रूपाकर्षिणी· ३ ऋं रसाकर्षिणी· ३ ॠं गंधाकर्षिणी· ३ लृं चित्ताकर्षिणी· ३ ॡं धैर्याकर्षिणी· ३
एं स्मृत्याकर्षिणी· ३ ऐं नामाकर्षिणी· ३ ओं बीजाकर्षिणी· ३ औं आत्माकर्षिणी· ३ अं अमृताकर्षिणी·
३ अः शरीराकर्षिणी·॥ सर्वत्र कलापदप्रयोगः॥ चक्राग्ने सर्वाशापरिपूरक षोडशदलचक्राय·॥ ऐं
क्लीं सौः त्रिपुरेशी चक्रनायिका श्रीपा· पू·॥ एतस्या दक्षिणे द्रीं सर्वविद्राविणी मुद्रा श्रीपा· पू· वामे ३ ल
घिमासिद्धि श्रीपा· पू· षोडशदलं नीत्वा॥ अनेन सर्वाशापरिपूरक षोडशदलचक्रे त्रिपुरेश्वरी चक्रनायि
काधिष्ठिते एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः समुद्रा इत्यादि मण्डले ध्येयं समर्पयेत्॥ द्रीमिति सर्ववि
द्राविणी मुद्रां प्रदर्श्य ऐं आत्मतत्वाय स्वाहा इति इष्टदेवतां॥ अष्टदलचक्रे पूर्वादिचतुर्दलेषु वामावर्त्ते
न॥ ३ कं ५ अनंगकुसुमादेवी श्रीपा· पू· ३ चं ५ अनंगमेखलादेवी श्रीपा· पू· ३ टं ५ अनंगमदनादेवी
श्रीपा· पू· ३ तं ५ अनंगमदनातुरादेवी श्रीपा· पू·॥ आग्नेयादिदलेषु ३ पं ५ अनंगरेखादेवी श्रीपा· पू·
३ यं ५ अनंगवेगिनीदेवी श्रीपा· पू· ३ शं ५ अनंगांकुशादेवी श्रीपा· पू· ३ ळं क्षं अनंगमालिनीदेवी
श्रीपा· पू·॥ चक्राग्ने सर्वसंक्षोभनाष्टदलचक्राय·॥ ३ ह्रीं क्लीं सौः त्रिपुरसुंदरी चक्रनायिका श्री
पा· पू· एतस्या दक्षिणे॥ ३ क्लीं सर्वाकर्षिणी मुद्रा श्रीपा· पू· वामे ३ महिमासिद्धि श्रीपा· पू·॥ जितें
द्रदृष्टिनीय·॥ अनेन सर्वसंक्षोभनाष्टदलचक्रे श्रीत्रिपुरसुंदरी चक्रनायिकाधिष्ठिते एता
अनंगकुसुमाद्या गुप्ततरयोगिन्यः समुद्रा इत्यादि मण्डले ध्येयं समर्पयेत्॥ क्लीमिति सर्वाकर्षिणी मुद्रा
प्रदर्श्य येत्॥ ऐं आत्मतत्वाय स्वाहा॥ इत्यादि इष्टदेवतां॥ चतुर्दशारचक्रे मातृका समारभ्य पश्चिमा

दिदक्षिणांतं यावत्॥ सर्वसंक्षोभिणीशक्तिश्रीपा.प्र.३ एवं सर्वविद्राविणी३ सर्वाकर्षिणी३ सर्वाह्लादि
नी३ सर्वसंमोहिनी३ सर्वस्तंभिनी३ सर्वजृंभणी३ सर्ववशंकरी३ सर्वरंजनी३ सर्वोन्मादिनी३ सर्वार्थ
साधनी३ सर्वसंपत्तिपूरणी३ सर्वमंत्रमयी३ सर्वद्वंद्वक्षयंकरी३ सर्वनिशक्तिश्रीपा.प्र.॥ इतिपदम
योगः॥ चक्राग्रे३ सर्वसौभाग्यदायकचतुर्दशारचक्राय॥ हैं ह्क्लीं ह्सौः त्रिपुरवासिनीचक्रनायिका
श्रीपा.प्र. एतस्या दक्षिणे ह्रूं सर्ववशंकरीमुद्राश्रीपा.प्र. वामे३ ईशित्वसिद्धिश्रीपा.प्र. सांख्यमिमां
साम्प्रायदर्शिनिभ्यो॥ अत्र सौभाग्यदायकचतुर्दशारचक्रे त्रिपुरवासिनीचक्रनायिकाधिष्ठिते एताः
सर्वसंक्षोभिण्याद्याः शक्तयः संप्रदाययोगिन्यः समुद्रा इत्यादि मूलदेव्ये समर्पयेत्॥ ह्रूं सर्ववशंकरी
मुद्रां प्रदर्श्य॥ ऐं आत्मतत्त्वाय स्वाहा॥ इतिपूर्ववत्॥ बहिर्दशारचक्रालसंमारभ्य पश्चिमदक्षिणांतं सर्व
सिद्धिप्रदादेवीश्रीपा.प्र.३ सर्वत्रिदेवीश्रीपा.प्र.३ सर्वसंपत्प्रदा सर्वप्रियंकरी३ सर्वमंगलकारिणी३ स
र्वकामप्रदा३ सर्वदुःखविमोचिनी३ सर्वमृत्युप्रशमनी३ सर्वविघ्ननिवारिणी३ सर्वांगसुंदरी३ स
र्वसौभाग्यदायिनी श्रीपा.प्र.॥ चक्राग्रे सर्वार्थसाधकबहिर्दशारचक्राय॥ ३ ह्सैं ह्क्लूं ह्सौः त्रिपुरा
श्रीचक्रनायिकाश्रीपा.प्र. एतस्या दक्षिणे सः सर्वोन्मादिनीमुद्राश्रीपा.प्र. वामे३ वशित्वसिद्धिश्रीपा.
प्र.३ आत्मनैवेद्यकदर्शनाय॥ अत्र सर्वार्थसाधके बहिर्दशारचक्रे त्रिपुराश्रीचक्रनायिकाधिष्ठिते एताः
सर्वसिद्धिप्रदादेव्यः कुलकौलिनीयोगिन्यः समुद्रा इत्यादि मूलदेव्ये समर्पयेत्॥ सः सर्वोन्मादिनीमुद्रां
प्रदर्श्य ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत्॥ अंतर्दशारचक्रालसमारभ्य पश्चिमादक्षिणांतं यावत्॥ ३
सर्वज्ञादेवीश्रीपा.प्र.३ सर्वशक्तिमयी३ सर्वैश्वर्यप्रदायिनी३ सर्वज्ञानमयी३ सर्वव्याधिविनाशिनी३
सर्वाधारस्वरूपिणी३ सर्वपापहरादेवी३ सर्वानंदमयी३ सर्वरक्षास्वरूपिणी३ सर्वेप्सितफलप्रदायिनी
श्रीपा.प्र.॥ सर्वत्रसर्वचक्राग्रे सर्वरक्षाकरांतर्दशारचक्राय॥ ह्रीं क्लीं ब्लें त्रिपुरमालिनीचक्रनायि

कां श्रीपा·पू· एतस्याः दक्षिणे क्रों महांकुशमुद्रा श्रीपा·पू· वामे प्राकाम्यासिद्धि श्रीपा·पू· ३ सोरदव्याय·
अत्र सर्वरक्षाकरे त्रैलोक्यसार चक्रे त्रिपुरमालिनी चक्रनायिकाधिष्ठिते॥ एताः सर्वे ह्यायादे योनि
गर्भयोगिन्यः समुद्रा इत्यादि समर्पयेत्॥ क्रों महांकुशमुद्रां प्रदर्श्य ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत्॥ त
तोऽष्टारचक्राग्राग्र समारभ्य पश्चिमादि दक्षिणांतं यावत्॥ ३ अं १६ य र ल व वशिनी वाग्देवता श्रीपा·पू· ए
वं वाग्देवता श्रीपा·पू· सर्वत्र ३ कं ५ कलह्रीं कामेश्वरी ३ चं ५ कवलीं मोदिनी ३ टं ५ य र ल व्लूं विमला तं ३
लं ५ यमलीं अरुणा ३ पं ५ हसलव्यूं जयिनी ३ यं ४ मम रयं सर्वेश्वरी ३ शं ५ क्ष्मरीं कौलिनी वाग्दे
वता श्रीपा·पू·॥ चक्रारंगे ३ सर्वरोगहरचक्राय·॥ ह्रीं श्रीं सौः त्रिपुरासिद्धा नित्या श्रीपा·पू·॥ एतस्या
दक्षिणे ३ हसखफ्रें खेचरीमुद्रा श्रीपा·पू· वामे ३ भुक्तिसिद्धि श्रीपा·पू·॥ वैश्वलवदडीनाय·॥ अत्र सर्वरो
गहरे अष्टारचक्रे त्रिपुरासिद्धा नायिकाधिष्ठिते एतावत्रहस्याख्या योगिन्यः समुद्रा इत्यादि मन्त्रलदेभ्य
समर्पयेत्॥ हसखफ्रें खेचरीमुद्रां प्रदर्श्य॥ ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत्॥ त्रिकोणबाह्ये अग्निकोणा
मावर्तेन पश्चिमादि दक्षिणांतं यावत्॥ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां कामेश्वरी जंभन बाणेभ्यो॥ द्रां ५ यां ५
सर्वसंमोहनाय कामेश्वरी धनुषे॥ यां ५ द्रां ५ आं ह्रीं वशीकरणाय कामेश्वर कामेश्वरी पाशाय॥ द्रां ५ यां ५
क्रों सर्वस्तंभनाय कामेश्वर कामेश्वरी अंकुशाय·॥ ततः त्रिकोणाग्र दक्षिणोत्तर वामेषु मूल वाग्भ
व मुख्यायोगिनी चक्रे कामगिर्यालये मित्रीशानाथात्मक रुद्रात्मशक्ति कामेश्वरी श्रीपा·पू·॥ कामेश्व
री बीज मुख्यार्य सूर्यचक्रे जालंधरपीठे षष्ठीशनाथात्मक विष्ण्वात्मशक्ति वज्रेश्वरी देवी नित्या श्रीपा·
पू·॥ शक्तिकूट मुख्यार्य सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मक ब्रह्मात्मशक्ति भगमालिनी देवी
श्रीपा·पू·॥ त्रिकोणे ३ सर्वसिद्धिप्रदा चक्राय·॥ हसरें हसकलरीं हसरौं त्रिपुराम्बा नित्या श्रीपा·पू·॥
एतस्याः दक्षिणे ३ हसौः बीजमुद्रा श्रीपा·पू· वामे ३ इच्छासिद्धि श्रीपा·पू·॥ मध्ये श्यामल दडीनाय·॥ अत्र
सर्वसिद्धिप्रदा त्रिकोणचक्रे बाणचापपाशांकुश विन्यस्तपितांतराले त्रिपुराम्बा चक्रनायिकाधिष्ठिते

एतान्क्रमेश्वर्यप्रतिरहस्ययोगिन्यः ॥ समुद्रा इत्यादि मूलदेव्यै समर्पयेत् ॥ हसौः बीजमुद्रां प्रदर्श्य ऐं आ
त्मतत्वाय स्वाहा इत्यादि पूर्ववत् ॥ ततो बैन्दवचक्रे मूलमुच्चार्य श्रीमहात्रिपुरसुंदरीनित्या श्री
पा॰ पू॰ ॥ इति त्रिः संपूज्य चक्राग्रे सर्वानंदमयबैंदवचक्राय ॥ मूलमुच्चार्य श्रीमहात्रिपुरसुंद
री चक्रनायिका श्रीपा॰ पू॰ ॥ एतस्या दक्षिणे ऐं योनिमुद्रां श्रीपा॰ पू॰ ॥ वामे प्राप्तिसिद्धि श्रीपा॰ पू॰ ॥ मो
क्षसिद्धि श्रीपा॰ पू॰ ॥ शैवदर्शनाय ॥ कुलोड्डीशो यथा ॥ ततो मूलं समुच्चार्य महात्रिपुरसुंदरी ॥ पू
जयेद्देवतारूपां बिंदौ चक्रेश्वरीं पुनः ॥ षडाननचक्रेश्वरे ॥ बौद्धं ब्राह्म्यं तथा सौरं शैवं वैष्णवमेव च
शाक्तं षष्ठं तु विज्ञेयं चक्रषड्दर्शनात्मकं ॥ रुद्रयामलेऽपि ॥ चतुरस्रे बौद्धं श्वेते ब्राह्मं हीनं वै षोडशच्छदे
वैष्णवं शैवं त्वेदं च मनुस्त्रे सौरमुच्यते ॥ वैष्णवं बिंदि र शाक्तं वर्णमध्ये शक्तिसमीरितं ॥ इत्क्रमस्थलेषु
षड्दर्शनपूजा ॥ अत्र सर्वानंदमये बैंदवचक्रे परब्रह्मस्वरूपिणी ॥ परात्परशक्ति श्रीमहात्रिपु
रसुंदरी ॥ समस्तचक्रनायिकासंपत्तिरूपा समस्तचक्रनायिकाधिष्ठिते त्रैलोक्यमोहनसर्वा
शापरिपूरक सर्वसंक्षोभणकारक सर्वसौभाग्यदायक सर्वार्थसाधक सर्वरक्षाकर सर्वरोगहर सर्वसि
द्धिप्रद सर्वानंदमयी श्रीचक्रस्थ श्रीलिलित समस्त प्रगट गुप्त गुप्ततर संप्रदाय कुल कौलिनीगर्भ रह
स्यातिरहस्य परापररहस्य सर्वरहस्यातिरहस्य समस्तयोगिनीपरिवरित श्रीत्रिपुरा त्रिपुरेशी त्रि
पुरसुंदरी त्रिपुरवासिनी त्रिपुराश्री त्रिपुरमालिनी त्रिपुरासिद्धा त्रिपुरांबा चक्रनायिकावंदित च
रणकमल श्रीमहात्रिपुरसुंदरी नित्यादेवी सर्वचक्रेश्वरी सर्वमंत्रेश्वरी सर्वविद्येश्वरी सर्वपीठे
श्वरी सर्वकामेश्वरी त्रैलोक्यमोहिनी जगदुत्पत्तिमातृका सर्वचक्रमयी तत्तच्चक्रनायिका सहि
ताः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः श्रीमहात्रिपुरसुंदरी परात्पर
या सपर्यया पूजितास्तर्पिताः संतु इति विशेषार्घ्यादिकाक्षत कुसुमैः प्रधानदेव्या वामहस्ते समर्पयेत् ॥

ततो नवमुद्राः प्रदर्श्य ऐं आत्मतत्त्वाय स्वाहा इत्यादिना आचम्यादिकेन सर्वं निवेदयेत् ॥ ततो गंधपुष्पधूपदी
क्षतमाल्यादीनि दत्त्वा ऐं घंटां वादयन् मूलमुच्चार्य ॥ ॐ वनस्पतिरसोत्पन्नो गंधाढ्यो गंधसंयुतः ॥
आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ इति धूपं दद्यात् ॥ ततो मूलमुच्चार्य ॐ स्वप्रकाशो महा
दीपः सर्वतस्तिमिरापहः ॥ सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यतां ॥ इति दीपं दद्यात् ॥ ततो मूलमु
च्चार्य श्रीमहात्रिपुरसुंदर्यै नैवेद्यं कल्पयामि नमः ॥ इति नैवेद्यं दद्यात् ॥ निवेद्य होमं कुर्या
त् ॥ तद्यथा ॥ परिषिच्य मूलमुच्चार्य प्राणाय स्वाहा ॥ अपानाय व्यानाय उदानाय समाना
य ॥ इति षडंगेषु आहुतिषट्कं दद्यात् ॥ ततः स्ववामे त्रिकोणं संवर्त्तं चतुरस्रं कृत्वा व्यापकमंड
लाय ॥ आर्द्रान्नशुल्लं सन्निधौ स्थापयेत्तत्र भाजनं ॥ त्रिधा पठनं कृत्वा तर्पणमनुं दद्यात् बलिं ततः ॥
ॐ क्लीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा ॥ इति सामान्यार्घ्यादिकेन दद्यात् तत्त्वमुद्रां प्रदर्शयेत्
ततो बटुकादिभ्यो बलिं दद्यात् ॥ एह्येहि देविपुत्र बटुकनाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्व
विघ्नान्नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण ईशान वायु निर्ऋति अग्नि कोणेषु त्रिकोणवृत्त मंडलानि सं
स्वाते पुष्पं बटुकाय ॥ यां योगिनीभ्यो गां गणपतये क्षां क्षेत्रपालाय ॥ इति संपूज्य तेषु द्रव्यभावितान्नानि
निक्षिप्य बलिं दद्यात् ॥ तद्युक्तं ॥ वामादिकं तु कंडं तंनमांतो मनुरीरितः ॥ पाद्यादिभिः संपूज्य बलिं दद्यादनेन
मनुना एवं अन्येषामपि बोध्यं ॥ ततो वामांगुष्ठानामायोगेन मुद्रां प्रदर्शयेत् ॥ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले
भूतले निष्कले वा पाताले वानले वा पवने सलिले यत्र कुत्र स्थिता वा ॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदी
पादिकैः सेप्रतारैर्व्याः सदानः शुभ बलिविधिना पातु वीरेन्द्र वंद्याः ॥ यां योगिनीभ्यः स्वाहा सर्वत्र योगिनीभ्यः हुं
फट् स्वाहा इत्यनेन बलिं दद्यात् ॥ वामहस्तांगुष्ठतर्जनीमध्यमानामिकाभिर्योन्याकारेण मुद्रां प्रदर्शयेत् ॥ क्षां
क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्र स्थान क्षेत्रपाल धूपादिसहितं बलिं गृह्ण गृह्ण स्वाहा ॥ इत्यनेन क्षेत्रपाल बलिं हरेत् ॥ वाम
मुष्टिस्तर्जनीसरलीकृता मुद्रां प्रदर्शयेत् ॥ गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण

स्वाहा इत्यनेन मंत्रेण गणपतेर्बलिं हरेत् ॥ वाममुष्टेर्मध्यमांगुलिं दंडवत् कृत्वा मुद्रां प्रदर्शयेत् ॥ भैरवीविद्या
यामपि ॥ एतद्बलिं चतुष्टयं कर्म कर्तव्यं ॥ सर्वोत्तरास्सर्वेऽन्नबलिः ॥ तंत्रे ॥ बलिमध्ये कृत्य ॥ मद्यस्वाद्वादी
नां यः प्रजयति चंडिके ॥ पूजा च विफला तस्य देवीशापमवाप्नुयात् ॥ ततो मंडले देव्या आचमनीयादि कृत्वा
मुपवासितलतांबूलं दद्यात् ॥ ततः आरात्तिकं दद्यात् ॥ यथा स्वर्णादिभाजने रौप्यादिभाजने वा कुंकुमादिना
बालापाश्वके विलिख्य तन्त्र घटे रंगवर्त्तिका पार्श्वे घृतप्रदिताष्टयोनिपृष्ठदीपान् विधाय मध्ये पिष्टकादि
रचितमस्तके परिमहादीपं संस्थाप्य श्रीं ह्रीं [illegible] इति मंत्रेणानर्चनं मंत्रेणाच्छन्नपात्रं समे
त्यर्घ्यं तत्पात्रे मस्तकोत्ते समुद्धृत्य नवरारं निराजयेत् ॥ तथा च ज्ञानार्णवे ॥ आरात्तिकमतः कुर्यात् सर्वका
मार्थसिद्धये ॥ सौवर्णे राजते कांस्ये स्थानके परमेश्वरि ॥ कुंकुमेन लिखेत् यंत्रं नवकोणं मनोहरं ॥ चतुर
पंचरत्नं कृत्वा तन्मध्ये मस्तकं स्थिरं ॥ दीपमेकं विनिक्षिप्य वस्त्रकोणे घृतदीपकान् ॥ यवगोधूममुद्गादि रचितान्
दीपकाः युतान् ॥ चणकोच्चितरूपे नाचिः शोभितान् घृतपूरितान् ॥ अभिमंत्र्य महेशानि रत्नेश्वर्यास्ततः परं ॥
श्रीवीजं च परो वीजं संलिखन् वरवर्णिनि ॥ हसौःपमपताप्य श्रेष्ठा रिंदू स्याः क्रमतः प्रिये ॥ वामकर्णसमायुक्तं
नादविंदुविभूषितं ॥ वीजपंचक्रमेतत्तु पंचरत्नानि सुंदरी ॥ पूर्ववीजं विलोमेन रत्नेशीयं नवाक्षरी ॥ ततो
मूलमुच्चार्य समस्तचक्रचक्रेशिमुच्चेदेविन शान्तिके ॥ आरात्तिकमिदं देवि गृहाण मम सिद्धये ॥ तत
श्चक्रमुद्रां प्रदर्शयेत् ॥ तथा च ॥ आरात्तिकमिदं देवि चक्रमुद्रायवस्थितेति तनोविसर्जनीते कर्मसमा

पयेत् ॥ इति श्रीविद्याप्रकरणं समाप्तं ॥ अथ चंडे चंडिकां रक्ष्ये सर्वकामफलप्रदं ॥ यस्याः प्रसादमात्रेण स
र्वसिद्धीश्वरी भवेत् ॥ अपुत्रो लभते पुत्रं दरिद्रो धनमाप्नुयात् ॥ चंडीं च लक्ष्मीं च संलभते नात्र संशयः
अथ प्रचंडचंडिकामंत्राः ॥ तत्र विश्वसारे यामले च ॥ लक्ष्मीलज्जांततो मायामात्रां द्वादशाक्षामपि ॥ वज्र
वैरोचनीयेमायेतो फट्द्वयं स्वाहया युतः ॥ भैरवो स्य ऋषिर्देवि सम्राट् छंद उदाहृतं ॥ छिन्नमस्ता स्फुटा दे
वीवीजं कूर्चद्वयं पुनः ॥ स्वाहा शक्तिरजीवार्थे विनियोग उदाहृतः ॥ अत्र लज्जापदं कामवीजपदं

तथा च॥ अत्र लज्जापदे देवि कामबीजं विभाव्यते॥ महाकालमतं ज्ञेयं मन्त्रोद्धारं श्रुणु चावहं॥ एवं मायापदे देवि
पाठे मायायाः एवं लज्जाबीजे लक्ष्मिन्निस्पर्थः॥ तथा॥ तादिध्यादिविरोधः स्यात्॥ तथा॥ रमोपां वाग्भवो पां
वामायापांवाजपेस्त्रवीः॥ लज्जापांवाजपेहिपोत्र्चतुर्वर्गफलप्रदा॥ अन्येषां मुनीनां च मते मायापदं कूर्च
परं॥ तत्रैव॥ वीतवह्निसमायुक्तं रतिबिंदुविभूषितं॥ लक्ष्मीबीजमितिप्रोक्तं सर्वकामसमृद्धिदं॥ मामाक्षि
वह्निसंयुक्तं नादबिंदुविभूषितं॥ शिवबीजं महेशानि लज्जाबीजमुदाहृतं॥ ईशानमुद्धृत्य पुराबीजं सबिं
दुकं नादविभूषितं प्रिये॥ सवामकर्णं परितः प्रकल्प्य मायां वदंतीह मनीषिणस्तां॥ द्वादशस्वरवर्ण
स्याच्चादबिंदुविभूषितं॥ वाग्भवं बीजमुच्चार्य सर्ववाक्यविशुद्धये॥ इति मंत्रचतुष्कं जप्याख्याना
तं॥ अन्ये सर्वत्र मायापदं कूर्चपरं जपंतु पक्षः स समीचीनः॥ भैरवतंत्रमते॥ लक्ष्मीप्रथमबीजे
स्त्री लज्जाबीजे मनोभवः॥ तृतीये स्मरसदादेवि महापातकनाशिनी॥ चतुर्थे षुगुणातीता विद्यामु
क्तिप्रदायिका॥ वकारे वरुणः साक्षाज्जकारे स्तिसदाधिप॥ रेफे हुताशनो देवो वकारे वरुणाधिपः
ऐकारे त्रिपुरादेवी रेफे त्रिपुरसुंदरी॥ त्रैलोक्यविजया देवि सर्वदोंकारसंस्थिता॥ चकारे चंद्रमा देवो
नकारे हि विनायकः॥ ईकारे कमला साक्षात्क्षकारे च सरस्वती॥ मायायुग्मं सदा देवि प्रवक्ष्यामि सहसंग
ताः॥ प्रकृतिः फट्कारे च स्वाहा हाकारे कमायुधः॥ हाकारे च शक्तिस्तिष्ठेदेवं मंत्रे समुच्चयः॥ अस्य पू
जाप्रयोगः॥ प्रातः कृत्यादि कृत्वा मंत्राच्चमनं कुर्यात्॥ तथा च॥ लक्ष्मीमायाकूर्चबीजैस्त्रिभिः पी
त्वा तु साधकः॥ वाग्भवेनोष्ठौ संमृज्य मायाभ्यां च द्विरुन्मृजेत्॥ कूर्चेन क्षालयेत्पाणिमेनिमंत्रे
श्वविन्यसेत्॥ श्रीमायाकूर्चवाक्कामत्रिपुटा भगवर्णकैः॥ कामकलो कुशाभ्यां च वक्त्रं नासाक्षिश्रो
त्रयोः॥ नाभिं हृन्मस्तके च सर्वैः स्पृष्ट्वा शुभं भवेत्क्षणात्॥ ध्यात्वा च स्वे वपुषि परमसत्त्वो वत्सरां तां प्र
पश्यति॥ ततः प्राणायामं ते कृत्वा षोढान्यासं कुर्यात्॥ यथा॥ मंत्रे षोढा ततः कुर्यात् त्रैलोक्यवशकाः

रिणी॥ श्रीबालात्रिपुरायै निःप्रासादप्रणवैस्तथा॥ कालीबीजं कुर्चैः कामकला कूर्चास्त्रकैः क्र
मात्॥ षोडशो मंत्रवर्णैः स्यात् लष्टघगोष्टादशाक्षरी॥ एभिर्वर्णैर्मालिकाख्या न्यूसेषु स्थानेषु वि
न्यसेत्॥ एषा मन्त्रस्वरूपा हि वीजषोडशपूजिता॥ अस्याश्च न्यसनात्सर्वे मन्त्रा द हान्त्र वंति
हि॥ सर्वैश्वर्ययुतास्ते हि यं जीवन्मुक्ता दशाब्दतः॥ ततः ऋष्यादिन्यासः॥ यथा॥ शिरसि भैर
वाय ऋषये॥ मुखे संम्राट् छंदसे॥ हृदि प्रचंडचंडिकायै देवतायै॥ मुखे ह्रं बीजाय॥ पादयोः स्वा
हा शक्तये॥ ततः करांगन्यासो॥ ओं खड्गाय हृदयाय स्वाहा इति कनीयसी॥ ईं सखड्गाय शि
रसे स्वाहा अनामयोः॥ ॐ श्रीवज्राय शिखायै स्वाहा मध्यमयोः॥ ऐं पाशाय कवचाय स्वाहा
तर्जन्योः॥ ॐ ओं कुशाय स्वाहा नेत्रत्रयाय स्वाहा अंगुष्ठयोः॥ त्रः स्फुरत्क्षयास्फुरक्षयु स्वाहा
अस्त्राय फट् करतलपृष्ठयोः॥ एवं ओं खड्गाय हृदयादि षडंगं भैरवतंत्रे॥ उच्चैरेत पूर्व
माकारं बिंदुलांछितमस्तकं॥ खड्गाय हृदयायेति स्वाहांतं कनीयसि॥ ईकारं च ततो देवि चंद्रकोटिसमप्र
भं॥ सखड्गाय ललोराच्च शिरसे तदनंतरं॥ स्वाहायुक्तं ततो वाच्यं पवित्रांगुलिसंज्ञकं॥ ॐकारं च ललोरा
च्चं बिंदुलांछितमस्तकं॥ श्रीवज्राय ततो वाच्यं शिखायै च ततः परं॥ स्वाहांतं मध्यमायां च विन्यसेत्तदनं
तरं॥ मौचाद्यं शिकापाशं विन्यसेच्च ततः परं॥ स्वाहांतं विन्यसेन्मंत्री तर्जन्यां तदनंतरं॥ क्रुंकारं च ततो देवि चां
कुशं तदनंतरं॥ नेत्रत्रयाय स्वाहांतं अंगुल्याकरयोर्द्वयोः॥ अकारं च विसर्गांतं स्वरक्षाक्षरसंयुतं॥ असुर
क्षयसंयुक्तमस्त्रायेति ततः परम्॥ फडक्षरसमायुक्तं विन्यसेत्करयोर्द्वयोः॥ हृदि मूर्ध्नि शिखायां तु क
वचे नेत्रमंडले॥ यावदस्त्रं च तुर्दिक्षु विदिक्षु च यथाक्रमं॥ ततो मूलेन मस्तकादि पादपर्यंतं विन्यसे
त्॥ पादादिमस्तकांतं वारत्रयं व्यापकं कृत्वा ध्यायेत्॥ यथा॥ स्वनाभौ नीरजं ध्यायेद्दृढं विकसितं सितं॥
सितत्पद्मकेशमध्ये तन्मंडलं चंडरोचिषः॥ जपाकुसुमसंकाशं रक्तवर्णं दृढकसन्निभं॥ रजःसत्वतमोरेखा

योनिमंडलमंडितां ॥ मध्ये तु तां महादेवीं सूर्यकोटिसमप्रभां ॥ छिन्नमस्तकरे वामे धारयंतीं स्वमस्त
कं ॥ प्रसारितमुखीं भीमां लेलिहानाग्रजिह्विकां ॥ पिबंतीं रौधिरीं धारां निजकंठविनिर्गतां ॥ विकीर्णके
शपाशांश्च नानापुष्पसमन्वितां ॥ दक्षिणे च करे कर्त्रीं मुंडमालाविभूषितां ॥ दिगंबरां महाघोरां प्रत्याली
ढपदस्थितां ॥ अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीं ॥ रतिकामोपविष्टां च सदा ध्यायंति मंत्रिणः ॥
सदा षोडशवर्षीयां पीनोन्नतपयोधरां ॥ विपरीतरतिस्थां च ध्यायेद्दृढमनोभवः ॥ डाकिनी वर्णिनी यु
क्ता वामदक्षिणयोगतः ॥ देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीं ॥ वर्णिनी लोहिता सौम्या मुक्तकेशी
दिगंबरा ॥ कपालकर्तृकाहस्ता वामदक्षिणयोगतः ॥ नागयज्ञोपवीताढ्या ज्वलत्तेजोमयीमिव ॥ प्रत्या
लीढपदा दिव्या मुक्तकेशी दिगंबरा ॥ सदा द्वादशवर्षीया मस्थिमालाविभूषिता ॥ डाकिनी वामपार्श्वे
तु कोटिसूर्यानलोपमा ॥ विद्युज्जटा त्रिनयना दंतपंक्तिबलाकिनी ॥ दंष्ट्राकराला रसना पीनोन्नतप
योधरा ॥ महादेवी महाघोरा मुक्तकेशी दिगंबरा ॥ लेलिहाना महाजिह्वा मुंडमालाविभूषिता ॥ कपाल
कर्तृकाहस्ता वामदक्षिणयोगतः ॥ देवीगलोच्छलद्रक्तधारापानं प्रकुर्वती ॥ करस्थितकपालेन भीष
णेनातिभीषणा ॥ आभ्यां निषेव्यमाणां तां ध्यायेद्देवीं विचक्षणः ॥ पिबंती भिन्नितेन मुखेनेति शेषः ॥ त
था च ॥ स्वमस्तकसखड्गं रक्तधाराभिः प्रहितं ॥ लेलजिह्वमहाभीमं ध्यतं वाम भुजे तथा ॥ इति भैर
वीतंत्रे ॥ एवं ध्यात्वा मानसैः संपूज्य ताम्रिलीवतदेशे स्थापनं कुर्यात् ॥ अस्याः पूजा ॥ यंत्रं त्रिकोणं विन्यसेद्वादौ तन्मध्ये
मंडलत्रयं ॥ तन्मध्ये विलिखेद्योनिद्वारत्रयसमन्वितं ॥ बहिरष्टदलं पद्मं भूबिंबद्वितयं पुनः ॥ कूर्चबीजं लिखेन्म
ध्ये त्रिकोणे पद्मसमन्वितं ॥ यद्वा एतद्ध्यानोक्तयंत्रं वा ॥ ततः पीठपूजा ॥ ॐ आधारशक्तये ॐ अनंताय पृथिव्यै र
त्नद्वीपाय कल्पवृक्षाय ॥ तदधः स्कवर्णसिंहासनाय आनंदकंदाय संविन्नालाय सर्वतत्त्वात्मकपद्माय एवं
रं रजसे सं सत्वाय तं तमसे अं आत्मने पं परमात्मने ह्रीं ज्ञानात्मने पद्ममध्ये रतिकामाभ्यां रतिकामोपरि
वज्रवैरोचनीये देहि २ एहि २ गृण्ह २ मम सिद्धिं देहि २ मम शत्रून्मारय २ कपालिके हुं फट् स्वाहेति पीठमंत्रः ॥

ततः पूर्ववद्ध्यात्वा वाहयेत्॥ मूलमंत्रकल्पितमूर्त्तौ चावाहयेत्॥ तथा॥ सर्वसिद्धिवर्णिनीये सर्वसिद्धिडा
किनीये वज्रवैरोचनीये इहावह २ पुनस्तन्मंत्रमुच्चार्य इह तिष्ठ २ इह सन्निधेहि इह सन्निरुध्यस्व इ
सनेनाराधय आं ह्रीं क्रों हंसः इत्यनेन प्राणप्रतिष्ठां कृत्वा ओं खड्गाय स्वाहा हृदयाय नमः इत्यादिना ष
डंगानि विन्यस्य यथाशक्ति पूजां कृत्वा बलिं दद्यात्॥ तद्यथा॥ वज्रवैरोचनीये देहि २ एहि २ गृण्ह
२ अमुं बलिं मम सिद्धिं देहि २ मम शत्रून् नाशय २ करालिके हुं फट् स्वाहेति मंत्रेण बलिं दद्यात्॥ ततो
देव्या दक्षिणे ॐ वर्णिन्यै॰ वामे ॐ डाकिन्यै॥ ततो देव्या अग्रे षडंगं संपूज्य दक्षिणे ॐ ह्रां खनिधये॰
वामे पद्मनिधये॰॥ पूर्वादिदिक्षु॥ लक्ष्मी लज्जा मायां वाणीं च पूजयेत्॥ ॐ लं लक्ष्म्यै नमः इत्यादि दिक्षु
ब्रह्मविष्णुरुद्रमहेश्वरान् ध्येसदाशिवं प्रणवादिनमोंतेन पूजयेत्॥ ततः पुष्पांजलिं दत्वावरणपूजां मा
रभेत्॥ अग्नीशासुरवायुमध्ये दिक्षु च॥ ओं खड्गाय स्वाहा हृदयाय नमः सादि षडंगानि अष्टपत्रेषु पूर्वादि
ह्रीं ॐ कराल्यै स्वाहा॥ एवं वर्णिन्यै डाकिन्यै महाभैरव्यै इंद्राक्ष्यै पिंगलाक्ष्यै संहारिण्यै स्वाहांतेन पूजयेत्॥
भैरवतंत्रे॥ एकानानाविधाकाली योगिनी डाकिनी तथा॥ भैरवी च महापूर्वं भैरवी तदनंतरं॥ पूर्वादिके दले
ष्वेता शक्तयश्च यथाक्रमं॥ प्रणवादिनमोंतेन लज्जाबीजसमुच्चरेत्॥ प्रथम ध्येहुं फट् हनमः स्वाहा इ
ति देव्या दक्षिणे॥ संमार्दुष्टं दसे॰ देव्या उत्तरे॥ सर्ववर्णेभ्यो॰ पुनः दक्षिणे॥ ॐ बीजशक्तिभ्यो॰॥ पत्राग्रेषु
पूर्वादिक्रमेण॥ ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा महालक्ष्मीः प्रणवादिनमोंतेन पूज
येत्॥ ततश्चतुर्दिक्षु हुं करालाय॰॥ एवं हुं विकरालाय हुं अतिकरालाय॰॥ हुं महाकरालाय॰ ततो धूपा
दिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ सिद्धविघ्नलात्॥ मंत्रांतरं॥ भुवनेश्वरी
कामबीजं कूर्चबीजं च वाग्भवं॥ भुवनेशी कूर्चबीजं वाग्भवं तदनंतरं॥ वज्रवैरोचनीये हुं फट् स्वाहा तदनं
तरं॥ अंगन्यास सहजारि हुं सर्वषोडशीव द्वादश्यं॥ हृल्लेखामादने कूर्चं वाग्भवं कूर्चमेव च॥ अस्त्रांतेऽपि च

मस्तायामहाविद्याप्रकीर्त्तिता॥ अस्यापि सदृशीविद्या जगत्स्वपिनविद्यते॥ षडर्णोयंमनुःसाक्षान्मोक्षदोना
त्रसंशयः॥ अस्या ध्यानमहंवक्ष्ये शृणुष्व कमलानने॥ प्रत्यालीढपदांसदैवदधतीं छिन्नंशिरः कर्त्तृकांदिग्वस्त्रां
स्वकबंधशोणितसुधाधारांपिबंतीं मुदा॥ नागाबद्धशिरोमणींत्रिनयनांहृद्युत्पलालंकृतां॥ रत्यासक्तमनोभ
वोपरिदृढांध्यायेज्जपासन्निभांदक्षेचातिसितांविमुक्तचिकुरांकर्त्तृंतथाखर्परंहस्ताभ्यांदधतींरजोगु
णाच्चशानाम्नापिसावर्णिनी॥ देव्योछिन्नकबंधतःपतदसृग्धारांपिबंतींमुदानागाबद्धशिरोमणिर्मनु
विदाध्येयातथासास्फुरेः वामेकृष्णतनुस्तथैवदधतीखड्गंतथाखर्परंप्रत्यालीढपदांकबंधविगलत्सत
दृक्पिबंतीमुदासेषायाप्रलयेसमस्तभुवनंभोक्तुंक्षमातामसीशक्तिःसापिपरात्पराभगवतीनाम्ना
पराडाकिनी॥ अस्याःप्रजादिकंसर्वंषोडशीवच्चरेत्॥ तारंलज्जाद्वयंवज्रवैरोचनीयेहूंहूंफट्स्वाहा॥ ध्यानंप्र
जादिकंसर्वंषोडशीवत्सुपाचरेत्॥ मंत्रांतरं॥ वियत्सत्र्ययुतंबिंदुनादयुक्तंततःप्रिये॥ एकाक्षरीमहाविद्या
विन्यस्य अर्घ्यपात्रं मत्स्यमुद्रया आच्छाद्य मूलं दशधा जपेत् ॥ देवीं तत्र जपेद्विद्यां देवतां
चाव सिद्धये ॥ तेजोमयं तज्जलं विभाव्य तज्जलं किंचित्प्रोक्षणीपात्रे निःक्षिप्य तेनोदकेनात्मानं
पूजोपकरणं चाभ्युक्ष्य पूजामारभेत ॥ भूतशुद्ध्यनंतरं वा ॥ तथा च फेत्कारीये ॥ भूतशुद्धिं वि
धाय सार्घ्यादिस्थापनं चरेत् ॥ प्राणायामततः कृत्वा मंत्र्यादिन्यास माचरेत् ॥ ततः पुष्पांजलिं
विरच्य आत्मानं देवदेवतां ध्यायेत् ॥ तद्यथा ॥ प्रत्यालीढपदार्पितांघ्रिशवहृद्घोराट्टहासां परां
खड्गेंदीवरकर्तृखर्परभुजां हुंकारबीजोद्भवां ॥ सर्वां नीलविशालपिंगलजटाजूटैकनागैर्यु
तां जाड्यं न्यस्य कपालके त्रिजगतां हंत्युग्रतारा स्वयं ॥ एवं विभाव्य करकलितद्वीक्षरतरक्त

चंदनचर्चितदिनकरद्विरेणारक्तकुसुमांजलैः ॥ मातृकायंत्रे आवाहयेद्यान्मूलमंत्रेणोमयीं शु
द्धशोनचैतन्यमयीं षट्चक्रभेदेन शिरःस्थितसहस्रदलकमलकर्णिकांतर्गतपरमशिवं प्राप्य
क्रियासमभिहारेणैतदमृतां सुधोर्मि श्राम्यतदमृतललौलीभूतां चैतन्यानंदमयीं तां प्रवहन्नासा
पुटाद्दानीयमूलेन कल्पितमूर्त्तावावाहयेत् ॥ तंत्रांतरे ॥ देवीं सुषुम्णामार्गेण चानीय मूलमंत्रकं ॥ वहंना
सापुटे ध्यानियांतीस्वांजलिस्थितां ॥ पुष्पे चारोप्य तत्पुष्पं प्रतिमायां विधापयेत् ॥ देवेशि मंत्रिकस्तलं जेप
रिवारसमन्विते ॥ यावत्तां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥ ओं नमः ख्वेद्र ष्योम्यमात्र पूजयेत् ॥
ततः प्रवीरिद्दले ॥ महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च ॥ घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी
अष्टमी भैरवी प्रोक्ता योगिनीस्ताः प्रपूजयेत् ॥ ततः प्रवीरि चतुर्द्दले वामावर्त्तेन वैरोचनं धूम्रं पांडुरं च
नामं असितांगं नान्पूजयेत् ॥ अग्न्यादिकोणदले पुनामकं मामकं पांडुरं तारकं न पूजयेत् ॥ प्रवीरिद्वा
रचतुष्टये पुवामावर्त्तेन पद्मांतकविघ्नांतकनीलकान्पूजयेत् ॥ तथा च सिद्धसारस्वते ॥ वैरोचनं तथा
धूम्रं पांडुरं पद्मनाभकं ॥ असितांगान्यजेन्मंत्री दिक्षु चैव चतुर्दले ॥ नामकं नामकं चैव पांडुरं तारकं
तथा ॥ वह्न्यादि पुचतुष्कोणे मंत्रैः स्वैः क्रमतो यजेत् ॥ द्वारप्रद्वारिकं तद्वत्पद्मांतकयमांतकं ॥ विघ्नांतकं क्रम
शोभ्यच्च पूजये नीलकं ॥ तथा च सिद्धसारस्वते ॥ वामावर्त्तक्रमेणैव पूजयेदंगदेवताः ॥ ततः स्ववामे
त्रिकोणवृत्तचतुरस्त्रमंडलं कृत्वा पुष्पैस्तमभ्यर्च्य तत्र विहितद्रव्यभरितं साधारं पात्रं निधाय तदग्रमांगु
ष्ठानामिकाभ्यां स्पृष्ट्वा ओं ह्रीं एकजटे महायक्षाधिपतये ममोपनीतं बलिं गृह्ण गृह्ण गृह्णापय मम सर्वशांतिं कुरु
रु परविद्यामाकृष्य त्रुट त्रुट छिंदि छिंदि सर्वजगद्वशमानय ह्रीं स्वाहेति निःपठित्वा बलिं दापयेत् ॥ तथा च ॥ सिद्ध
सारस्वते ॥ प्रणवं स्वबीजं पुटद्वयं हृल्लेखां च ततः परं ॥ एकजटे पदांते च महायक्षं समुदीरयेत् ॥ यक्षाधिपद
मा भाष्य पतये गदतो मम ॥ उपनीतमपरं चोक्त्वा बलिं गृह्णेति द्विधा ॥ गृह्णापय द्वियाम्नात्वा मम सर्वपदं तथा ॥

ग्रंथिं कुरु पदं चैव परविद्यामनंतरं ॥ आकृष्येति च पदं अयान्नु टाग्रं दीति च द्विधा ॥ सर्वजगत्सदं चोत्काव
न्त्रामानयद्वयं ततः ॥ मायास्वाहेति मंत्रोऽयं त्र्यपादोत्ट द्विरः स्मृतः ॥ अक्षोभ्यमंत्रमष्टोत्तरं शतं यजेत्ततः ॥
श्रीं अं अक्षोभ्याय ॥ ततो रहस्यमालया ॥ निगदे नीयाम्भुना ॥ मानसेन वाष्टोत्तरसहस्रं शतं वाज
पेत् ॥ तथा चाष्टोत्तरशतं जाप्यं यावज्जीवितसंख्यया ॥ सहस्रं राजपेद्देवीं नियम्य जाविधौ पुनः ॥
अमूल्ये श्वेदिव्यायां नरः न जपं न जपेत् ॥ तथा सहस्रं वा लविंशति वा जपेत् तस्य मालया ॥ तत्र जप
रहस्यं यथा मूलाधारस्वाधिष्ठानमणिपूरकेषु यथाक्रमं ॥ बीजत्रयं व्याप्ति लोडित्कोटिचन्द्रास्कंपरस्य
तं त्वे ॥ मंत्रध्यानं प्रवक्ष्यामि जपात्सर्वार्थदायकं ॥ मंत्रध्यानो महेशानि शृणु ध्यात्वेव सर्वदायकः ॥ मू
लचक्रे तु हृद्बीजं स्वांसूर्यकोटिसमप्रभां ॥ स्वाधिष्ठाने पीतवर्णं द्वितीयं तु विभावयेत् ॥ नाभौ जीम्
त संभ्रामूं कूर्चबीजमहत्प्रभं ॥ अस्त्रबीजं हरिं ध्यायेत् मूलाज्ञिसद्दत्रांप्रभं ॥ मूलादिब्रह्मरंध्रेतु
रिविसर्ज्य नीतं मर्मसमापयेत् ॥ अस्याः पुरश्चरणं लक्षसंख्यजपः ॥ तथा च ॥ एवं यथाशक्ति जह्वा जपसमर्पण
मनन्यधीः ॥ तथा ॥ रहस्यमालामादाय लक्षमेकं सदा जपेत् ॥ रहस्यमालायथा ॥ अक्षमालादि हि तासिद्धिमहा
शंखस्य मालया ॥ पंचाशन्मणिभिर्माला निर्मिता सर्वसिद्धिदा ॥ महाशंखाभावेपि स्फाटिकी माला कर्त्तव्या ॥ तथा
महाशंखेप्यशक्तश्चेत्स्फाटिकीमालया जपेत् ॥ ताराम मंत्रे पुके कुकायाश्यानमावश्यकं ॥ कुल्लुकेति समाख्या
ता सर्वतंत्रेषु गोपिता ॥ तारारक्तंडे ॥ ताराबीजे क्रोधबीजं कूर्चं तत्र समुद्धरेत् ॥ देवि हृदय मुद्दिष्टं नरेमयस्यकु
स्यचितं ॥ विधेयं कुल्लुकाख्याता गोपितास्ते पुगोपिता ॥ विलिखेत्र्यक्षरं मंत्रं हरिद्रान्वेनैवना ॥ यावज्जीवितमलं
हि शंखपाधारयेत्सदा ॥ ध्यानासना कृत हस्ताच्चतुर्बाहुसमन्वितं ॥ नीलोत्पलेन्दुस्वापामोसर्वालंकारभूषिता ॥

तथा च ॥ तथा मत्स्यसूक्ते ॥ कुल्लुकां च न जानाति तारामंत्रं जपेन्नरः ॥ पंचत्वं आयते तस्य अथवा वातुलो
भवेत् ॥ मायातंत्रे ॥ कुल्लुकां च धारयेत् शीर्षे लिखित्वा भूर्जपत्रके ॥ राजद्वारे सभायां च विजयी भवति ध्रु
वं ॥ एवं मुक्तो लिजल्पा लुलदृग्रांपूं च होमयेत् ॥ तद्दशांशं तर्पणं च तद्दशांशं विप्रभोजनं ॥ तर्पयेच्च परां
देवीं तत्प्रकारमिहोच्यते ॥ तथा च सिद्धसारस्वते ॥ एवं जपं यथाशक्त्या तद्दशांशं सितोत्पलैः ॥ आज्याक्तै
र्जुहुयान्मंत्री तद्दशांशेन तर्पणं ॥ कृतोयगस्त्वदूरोपेते निर्मिते गंधवारिभिः ॥ तर्पयेच्च परां देवीं तत्प्रकार
मिहोच्यते ॥ जलेच्छाराद्यविधिरतर्पणाद्यैर् दशालभैः ॥ संतर्प्य विधिवत्देवीं परिवारान्सकलान्सकल
अभिषेके यथा ॥ देवीवु आस्यमालामानें संपूज्य साधकोत्तमः ॥ तारिणीं सिंचयामि तिजलं तन्त्र ह्रिविनिक्षि
पेदिति ॥ अथ मंत्रभेदाः ॥ तथा च वीरकृत्ये ॥ लिखेत्तत्वं कूर्चसंयुक्तं रौद्रं त्रैगुण्यमेव च ॥ विधिविष्णु
महेशानां स्वरूपास्याः क्रमयोगतः ॥ एषा विद्या महाविद्या सर्वसिद्धिप्रदायिनी ॥ अस्यार्थः ॥ रौद्रं प्रसादं त्रै
गुण्यं प्रणवं विधिविष्णुशक्तियाग्नवं ॥ विष्णुशक्ति रमाबीजं महेशशक्ती कृत्तु वनेश्वरीबीजं ॥ ध्योवाच्च नेत्र
योगश्च तारिण्याः पूर्वचन्द्रवेत् ॥ प्रणवं तु वनेश्वरी ह्रीं कूर्चबीजं नमस्तारायेत्यलकूल दुस्तरं तारयतार
य प्रणवयुग्मं वह्निजाया मंत्रोयं स्फुरपादपः ॥ तथा च नीलतंत्रे ॥ प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्ध
रेत् ॥ गगनं रोपसंयुक्तं विंदुनादविभूषितं ॥ कूर्चबीजं च हृदयं तारायै च समुद्धरेत् ॥ सकलदुस्तरं तारयतार
येति तथा पुनः ॥ तारयुग्मं वह्निजाया मंत्रोयं स्फुरपादपः ॥ ध्यानपूजादिकं सर्वं पूर्ववत्समुपाचरेत् ॥ अ
स्य पुरश्चरणं च तु लक्षजपः ॥ तदुक्तं ॥ तत्रैव ॥ चतुर्लक्षजपेनो स्यात्सिद्धयो भवंति हि ॥ मायातंत्रे ॥
श्रीभगवानुवाच ॥ तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती ॥ कामेश्वरी भद्रकाली इत्यष्टौ तारिणीस्व
ला ॥ उग्रबलं गतो जीवो निगमस्वरसंपुटः ॥ नादविंदुसमाक्रांतस्तत्तरस्मिन्समेलितः ॥ कपिलो वामकर्ण
स्थं नादाढ्यं विंदुरोश्वरं ॥ पार्श्वात्यं च तथा कांतद्वारा संपरिकीर्तितं ॥ मध्यादि मायां कवरं द्वितीयं मन्त्रमुद्धृतं ॥

विपरीतं तथा ज्ञेयं कूर्चाद्यं चतुरीयकं ॥ मायादि कूर्चवंचांतं पंचमं परिकीर्त्तितं ॥ मायामध्यगतं षष्ठं ह्रिली
योयं च सप्तमम् ॥ अष्टमं कूर्चमध्ये स्यादेवं चैवाष्टकं च वै तु ॥ अस्यार्थः उष्मवर्णो रेफजीवो हकारः निग
मईकारः ॥ ततः रस्मिर्व रवीजं रूपिणो हकारः ज्ञारां तं फडंतं तेन पंचाक्षरः ॥ फडंतं श्वेदियमेकाविघाले
न पंचाक्षरः प्रकृतिः सम्याऽऽदीति ॥ तेन वधूमायाकूर्चफट् ॥ विपरीतमिति ॥ अघंतवीजयोर्वैपरी
त्यमंत्रः तेन कूर्चवधूमायाफट् ॥ कूर्चेति कूर्चमायावधूफट् ॥ मायादीति तेन मायावधूः फट् कूर्चं ॥
मायेति ॥ तेन वधू मायाफट् कूर्चं ॥ ह्रिलीयेति ॥ तेन मायाकूर्चवधूः फट् ॥ अष्टमेति ॥ वधू कूर्च
मायाफट् ऋषिः स्यान्नारदः छंदोऽनुष्टुप् देवता तथा ॥ ज्ञं जुषऽनी महेशानि चतुर्वर्गेभु योजयेत्
काललक्षं जपेन्मंत्रमेवमुक्तेन वर्त्मना ॥ ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत् ॥ त्र्यक्षरस्यैव
चैदोयं प्रदीयत्रं नतत्रवे ॥ जपेल्लुत्र्यक्षरं ज्ञेयं न्यासे सर्वं प्रतिष्ठितं ॥ प्रणवं च तुलातारे पूर्वमुध्दत्यरे
तथा ॥ तारे स्वाहेति मंत्रोयं दशाक्षरदाहतः ॥ अस्या ध्यानं स्वतंत्रतंत्रे ॥ रूपामवर्णां त्रिनयनां द्विभु
जां रक्तपद्मजां ॥ दधानां बहुवर्णां नेवहंसपाभिरावृतां ॥ मूर्त्तिसंस्मेरवदनां स्मेरमौक्तिकभूषणां ॥
रक्तपादुकयोर्न्यस्तपादा चतुर्जपुगा स्मरेत् ॥ अस्य पूजादिकं सर्वं पूर्ववत्तत्र कार्यं ॥ पुरश्चरणं तु दश
लक्षजपः ॥ तद्दशांशतश्चैव ॥ बलिलक्षं जपेद्धीमान्नियमेन यथाविधिः ॥ दशांशं जुहयान्मंत्री घृता
क्तैरक्तपुष्पकैः ॥ मंत्रांतरं ॥ वाग्भवं चतुर्भुवनेश्वरीप्रणववाग्भवं चतुर्भुवनेश्वरी फट् स्वाहा ॥ तदुक्तं
मात्स्यक्रमार्णवे ॥ वाग्भवं कुलदेवीं च तारं वाग्भवं तथा ॥ हसौः स्वान्तास्थमंत्रोऽयं लवह्निजायावधिर्मनुः ॥ अ
ष्टाक्षरो महामंत्रो वेदमातुरनुत्तमः ॥ पंचांगान्यस्य मंत्रस्य पंचवीजैः प्रकल्पयेत् ॥ ओं स्क्ष्यं शोषाक्षरैर्न्यस्य
सकलं सोमवेत्तरः ॥ ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत् ॥ मत्स्यसूक्ते ॥ प्रणवं तु रमा पुह्रदयपदं भुवनेत
श्वैवच ॥ महापद्मे पदं भूयात्पद्मोचतियपदं ततः ॥ मामेस्वाहेति मंत्रोयं प्रोक्तः समदशाक्षरः ॥ हूजा हरवचिदु

दिशाअर्द्धरात्रे चतुष्पथे ॥ जपमस्याश्चरेयस्तु स सस्याद्धुलकृवित्तथा ॥ हंसः प्रणवं मायावधूबीजं कूर्च
हंसः तदुक्तं स्वच्छंदसंग्रहे ॥ शिवबीजं महेशानि शक्तिबीजमतलः परं ॥ बिंदुसर्गसमायुक्तं वेदाद्यं लदपः के
मातृ ॥ माया स्त्रीवमबीजांते हंसबीजमुदाहृतं ॥ एषा तत्त्वाक्षरी विद्या कथिता चतुरिंद्रलंचा ॥ हंसः ह्रीं स्त्रीं हं फ
हूं हंसः ॥ पंचाक्षरी च या विद्या हंसा घेतामहोदया ॥ केवलं तत्प्रयत्नेन तत्त्वं हालं कीर्तिता ॥ अनयोर्जपपूजा
दीपं चाक्षरीवदाचरेत ॥ अथ रहस्यपुरश्चरणं ॥ यथा ॥ अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ कुजे वा
विवरे वा नरमुंडसमाहृतं ॥ पंचगव्येन मिलितं चंदनाद्यैर्विलेपितः ॥ निःक्षिप्य भूमौ हस्ताद्धमानतः
श्मशाने वने ॥ तत्र तद्दिवसे रात्रौ सहस्रं यदि मानतः ॥ एकाकी प्रजपेन्मंत्री स भवेत्कल्पपादपः ॥ अथ वा
न्यप्रकारेण पुरश्चरणमिष्यते ॥ शवमानीय तद्धारिते नैव परिरक्ष्य च ॥ तद्दिनात् रविने यावत्तावद्दशोत्तरेश
तं ॥ स भवेत्सर्वसिद्धीशो नात्र कार्या विचारणा ॥ अथ वान्यप्रकारेण पुरश्चरणमुच्यते ॥ अष्टम्यां च चतुर्दश्यां प
क्षयोरुभयोरपि ॥ सूर्योदयं समारभ्य यावत्सूर्योदयान्तरं ॥ यावज्जपान्निरालकः सर्वसिद्धीश्वरो भवेत् ॥ अथ
वान्यप्रकारेण पुरश्चरणमिष्यते ॥ ग्रहकाले च तुष्योऽदिनवम्यंतं विशेषतः ॥ भक्तितः प्रजपेद्रात्रौ तावत्
सहस्रकं ॥ जपेदेकाकी विजने केवलं तिमिरालये ॥ अष्टम्यादि नवम्यंतं उपवासपरो भवेत् ॥ मुंडमालातंत्रे ॥
कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत् ॥ सहस्रसंख्या जपेत्तु पुरश्चरणमीष्यते ॥ कृष्णां चतुर्दशीं प्राप्य नव
म्यंतं महोत्सवे ॥ अष्टमीं नवमीं रात्रौ प्रजां कुर्याद्विशेषतः ॥ एवं मांसापारणं कुर्यान्मासस्य मासादि निर्मितं ॥ षट्सह
स्रं जपान्नित्यं जनिंद्रा भावपरायणः ॥ चतुर्दशीं समारभ्य यावदन्या चतुर्दशी ॥ तावज्जपा मते ह्यानि पुरश्च
रणमिष्यते ॥ केवलं जपमात्रेण मंत्राः सिद्धा भवंति हि ॥ सूर्यादियं समारभ्य यावत्सूर्यास्तगो भवेत् ॥ तावत्सं
ख्यजपेनास्य पुरश्चरणमिष्यते ॥ पिच्छसारे ॥ राजास्थाने विनिःक्षिप्य नरमुंडं तदुध्वे ॥ शोमता सनमासती
र्यं प्रजयेत्परे रेवतां ॥ षट्सहस्रप्रमाणेन प्रत्यहं किं न सिध्यति ॥ अथ वीरसाधनं ॥ तदुक्तं वीरतंत्रे ॥ अष्टम्यां
च चतुर्दश्यां पक्षयोरुभयोरपि ॥ कृष्णपक्षे विशेषेण साधयेद्वीरसाधनं ॥ तत्सादृ प्रथमे नामेग तेन च सुरसं

दृष्टि ॥ एवं चापि चितां वापि नीत्वा गत्वा यथासुखं ॥ साधयेत्स्वहितं मंत्री मंत्रध्यानपरायणः ॥ न यत्नेन तु कर्त्त
व्यं हास्यं तत्र विवर्जयेत् ॥ चतुर्दिक्षु न निरीक्ष्येत मंत्रमेव समभ्यसेत् ॥ अथ पूजाद्रव्यं ॥ सामिषान्नं गुडं छा
गं मधुपायसपिष्टकं ॥ नानाफलं च नैवेद्यं स्वस्वकल्पोक्तसाधितं ॥ चितास्थानं समानीय सुहृद्भिः शस्त्रपाणि
भिः ॥ समानगुणसंपन्नैः साधकैर्वा तपस्विभिः ॥ तथा च योगिनीहृदये ॥ वक्ष्ये सामिषान्नं च गुडं छागलं तथा
मधुः ॥ पिष्टकं परमान्नं च पयो मूलं फलं तथा ॥ समपात्रे बलिं कृत्वा चतुःपात्रे चतुर्दिक्षु ॥ पात्रत्रयं सदा मध्ये
साधयेन्मनुनामुना ॥ गृहं वा प्रान्तरं वापि श्मशानं वापि संवृतं ॥ अन्यान्वापि चरेत्स्थानं विहाय दूरे निवेश
येत् ॥ चितालक्षणं ॥ यथा ॥ असंस्कृता चिता ग्राह्या न तु संस्कारसंस्कृता ॥ चांडालादिषु संप्राप्ता केवलं
शीघ्रसिद्धिदा ॥ अथाभिचारिणो लक्षणं ॥ यथा ॥ महाबलो महाबुद्धिर्महासाहसिकः शुचिः ॥ महास्वच्छ
दयावांश्च सर्वभूतहिते रतः ॥ ततः सामान्यार्घ्यं विधाय स्वस्तिवाचनं पूर्वं संकल्पं कुर्यात् ॥ यथा ॥ अ
द्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मा अमुकमंत्रसिद्धिकामः श्मशानसाधनमहं करिष्ये ॥ इति संक
ल्प्य ॥ वक्ष्यमाणं मार्जनपात्रे निषिक्तं पूर्वसंपुटं ॥ अस्त्रांते मूलमंत्रेण प्रोक्षणं भागमभिषु ॥ ततो मूल
मंत्रेण पुष्पांजलिं तेन गुरुपादसरोजे ध्यात्वा गणेशं बटुकं तथा ॥ योगिनीमातृकांश्चैव क्षेत्रपालपुरः
सरं ॥ ततो देहशरीरं संरक्ष्यत्यर्थः ॥ अस्त्रमंत्रेण स्थानं संरक्ष्य ॥ यथा ॥ अस्त्रमंत्रेण मंत्रज्ञो रक्षा
मात्मनि कारयेत् ॥ ततः पुष्पांजलित्रयं क्षिपेत् ॥ तदुक्तं वीरतंत्रे ॥ ये चात्र संस्थिता देवा राक्षसा
श्च भयानकाः ॥ पिशाचाः सिद्धयो यक्षा गंधर्वाप्सरसां गणाः ॥ योगिन्यो मातरो भूताः सर्वाश्च
खेचरस्त्रियः ॥ सिद्धिदातारस्ते भवंतु तथा च मम रक्षकाः ॥ एवं मनुनानेन पुष्पांजलित्रयं क्षिपे
त् ॥ श्मशानाधिपतिं पश्चात् भैरवं कालभैरवं ॥ महाकालं यजेत्पश्चात् [illegible] वीरादिकं च तथैवे
शानहं बीजं ततः पश्चात् श्मशानाधिपतत्परं ॥ इमं मंत्रं सामिषान्नबलिं गृह्ण ततः परं ॥ जटण्टण्टापय

हूं हूं विघ्ननिवारणं ततः॥ कुरु सिद्धिं मम मन्त्रान्तं प्रयच्छ स्वाहा पात्रिवेतं॥ प्रणवाद्येन मनुना प्रथमो बलिरीरितः॥
मोयांते भैरवः पश्चात् कुर्यान् कृततः परं॥ पूर्ववद्बलिमुद्धृत्य दक्षिणे बलिमाहरेत्॥ हुं मंत्रेण च महाकालाय प
श्चात्तर्पयेद्गुरुरेत॥ पश्चिमे कालरेरायप्रणवाद्येन कल्पयेत्॥ प्रांते कालरात्र्यां ते भैरवलिततः परं॥ स्मशा
नाधिपतये इत्येवं पूर्ववद्बलिमाहरेत्॥ पाद्यादिभिश्च मंत्रज्ञो बलिं पश्चात् निवेदयेत्॥ तद्यथा॥ स्मशानाधि
पति प्रेतोपच्चारः सेव्य अनेन मंत्रेण बलिं दद्यात्॥ तद्यथा॥ ॐ हूं स्मशानाधिपतये इमं सामिषं बलिं गृह्ण गृ
ह्णापय विघ्ननिवारणं कुरु सिद्धिं मम प्रयच्छ स्वाहा॥ ततो भैरवं पूर्ववत्संपूज्य दक्षिणस्यां दिशि॥ ॐ हूं भै
रवं स्मशानाधिपतये इमं मित्यादि ततः पश्चिमकाल भैरवं पूर्ववत्संपूज्य॥ हूं कालभैरव स्मशानाधिपतये इममित्यादि
चिंतामध्ये बलिं दद्याद्बलित्रयमनुत्तमं॥ कालरात्रि महाकालि कालिके घोरनिस्वने॥ अट्टहासे इमं बलिं मात
र्देहि सिद्धिमनुत्तमं॥ कालिकायै बलिं दत्वा भूतनाथाय दापयेत्॥ प्रांते भूतनाथाय स्मशानाधिपतये इत्यपि॥
प्रणवाद्येन मनुना दापयेद्बलिमुत्तमं॥ हूं ॐ दंते सर्वगणनाथाते चाधिपतये च॥ स्मशानं नमस्तेऽस्तु दत्वा पूर्ववच्च
समुद्धरेत्॥ ताराते नवबलिं दत्वा पंचगव्येन संदरि॥ अद्भिः संप्रोक्षणं सर्वापील वस्त्रं न्यसेत्ततः॥ मूर्जे वा वट
पत्रे वा नेत्रपीठ मनुं न्यसेत्॥ पीठमास्तीर्य तस्मिन्नेव दृढं वीरासनं ततः॥ वीरार्दनेन रेवेद्वारक्षा दिक्षु प्रकल्प
येत्॥ अस्यार्थः॥ मूर्जपत्रे वटपत्रे वा पीठमंत्रं लिखित्वा तत्र व्याघ्रचर्मादिपीठमास्तीर्य तत्र वीरासन
क्रमेणोपविश्य वीरार्दनमंत्रेण चतुर्दिक्षु रक्षां कुर्यात्॥ वीरार्दनमंत्रस्तु हूं हूं ह्रीं ह्रीं कालिके घोरदंष्ट्रे प्रचंडे
चंडनायिके दानवान्दारय हन हन शववशारीरे महाविघ्नं छेदय छेदय स्वाहा हूं फट्॥ अनेन मंत्रितं लोष्टं दशदिक्षु वि
निःक्षिपेत्॥ तन्मध्ये भैरवो रौद्रो न विघ्नैः परिभूयते॥ तथा च नीलतंत्रे॥ कूर्चं युग्मं ततो देवि मायायुग्मं ततः
परं॥ कालिके घोरदंष्ट्रे च प्रचंडे चंडनायिके॥ दानवान्दारयेत्पश्चात् नतिद्वन्द्वयं ततः॥ शववशारीरे महाविघ्नं
छेदय द्वितयं पुनः॥ द्विठांतेवर्मशस्त्रांतो वीरार्दनमनुर्मतः॥ येन प्रमादादेवो हि साधको न यविद्वलः॥ ततस्ते
स्तैः सहदंगैः रक्षितो नाभिभूयते॥ सितार्क सितशाद्यालतर लेबु कुलेमन्निर्मितप्रदीपं तत्र संस्थाप्या

स्त्रं तत्र प्रजपेत् ॥ हतेत्स्मिन्महादीपे रिपोश्च परिच्छन्नयते ॥ तदधश्चास्त्रमंत्रेण लिखनेत्कुलदीपकं ॥ तत
स्तत्कुत्सो स्तं नरलशुद्ध्यादिन्यासजालं विधाय इष्टदेवतां संप्रज्य संकल्प मंत्रं जपेत् ॥ संकल्पस्तु ॥ अद्येत्यादि
अमुकगोत्रः श्री अमुकदेवशर्मा अमुकदेवताया अमुकमंत्रसिद्धिकामो मुकमंत्रस्यामुकसंख्यजपमहं करिष्ये ॥
इति संकल्प देवतां ध्यानपूर्वकं मंत्रं जपेत् ॥ तथा ॥ चोक्तकल्पविधानेन भूतशुद्ध्यादिकं चरेत् ॥ षोढां वा ततोरयारा
पिविन्यस्य प्रजयेत्ततः ॥ मंत्रध्यानपरो भूत्वा जपेन्मंत्रमनन्यधीः ॥ जपनियमस्तु ॥ एकाक्षरी यदि जपेत्तर्हि दुसह
स्त्रं ततो जपेत् ॥ घ्यक्षरे अष्टसहस्रं त्र्यक्षरे वायुताद्धकं ॥ अतः परं तु मंत्रश्रोगजात कसहस्रकं ॥ निवृणां यो रोसमा
रभ्यउद्यांतं समाचरेत् ॥ गजांतरमष्टोत्तरसहस्रकमित्यर्थः ॥ यथसहस्रो जये कलीनेत्रं वस्त्रेणावं धयेत् ॥ ततो
दूरात्रपर्यंतं यदि किंचिन्नेलभ्यते ॥ जयदुर्गाख्यमनुना तेनेवसर्षपान्क्षिपेत् ॥ जयदुर्गामंत्रस्तु ॥ ॐ दुर्गे दुर्गे र
क्षणि स्वाहा ॥ ॐ तिलोसि सोमदैवत्यो गोसवस्ट्रतिकारकः ॥ पितृणां स्वर्गदाता त्वं मर्त्यानां मम रक्षकः ॥ भूतप्रे
तपिशाचानां विघ्नघ्नशांतिकारकः ॥ इति पठित्वा ईशानादिच्चतुर्दिक्षु तिलान्क्षिपेत् ॥ ततः सप्तपदं गत्वा पुनस्तत्रै
व संविशेत् ॥ पुनर्देवतां संप्रजयेत् ॥ ततो वरं वरय परिवदेत् ॥ तदा संसंकोरयेत् ॥ तथा च ॥ वरं वरय इत्युक्ते
साधकः स्थिरमानसः ॥ सत्यं तु धारयितान्च वरयेह्वरमुत्तमं ॥ जेपांते तु बलिं दत्वा पश्चादपि बलिं हरेत् ॥ जपां
ते जपमध्ये वा देहि देहीति भाषिते ॥ तदापि च बलिं दद्यान्महिषं वापिच्छागलं ॥ बलिं चायवपिष्टमयेनायदा व
लिं प्रार्थयेत् नरकुंजरमेव वा ॥ दिनांतरे च दास्यामि स्वीकृत्य स्वगृहं व्रजेत् ॥ अपरे हि ततो दद्यात्पिष्टेन न
वकुंजरान् ॥ पिष्टेनेति ॥ यववधान्याङ्कुरेनेत्यर्थः ॥ तथा चतंत्रांतरे ॥ यवक्षोदमयं वापि शालिक्षोदमयं तथा
चंद्रहासेन विधिवत्तत्तन्मंत्रेण घातयेत् ॥ योगिनीहृदये ॥ जपांते च बलिं दद्याद्देवतायै यथाविधि ॥ महिषं
छागलं वापि नरलीला वरमेव च ॥ गृहं गच्छेत्स्वस्थहृदा साधैः संहृष्टमानसः ॥ ततो दक्षिणां दद्यात् ॥ समा
प्य साधनं देवि दक्षिणां विभवावधि ॥ गुरवे गुरुपुत्राय तत्पत्न्यै वा निवेदयेत् ॥ अथ शवसाधनमाह ॥ स्था
ननिर्णयमाह ॥ चोवचूडामणौ ॥ शून्यागारे नदीतीरे पर्वते निर्जने पि वा ॥ बिल्वमूले श्मशाने वा तत्समीपेर

गस्थले॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥ भौमवारे तमिस्रायां साधयेत्सिद्धिमुत्तमां॥ मांसभक्तं
च वल्यर्थं धूपदीपादिकं तथा॥ तिलाः कुशाः सर्षपाश्च स्थापनीयाः प्रयत्नतः॥ गृहीत्वा तत्र गत्वेत्थं शवं नैव च स्पृश-
येत्॥ अथ पूर्वोक्तानां पूजनस्थाने गत्वा सामान्यार्घ्यं विधाय पूर्वोक्तमूलेनाले पूर्द्वारं दत्वा यागे भूमिं संप्रोक्ष्य
गुरुं गणेशं बटुकं योगिनीश्च चतुर्दिक्षु पूर्वादितः संपूज्य पूर्वोक्तवीरार्द्धेन मंत्रेण भूमौ विलिख्य ये चात्रेत्यादि पू-
र्वोक्तक्रमेण भूमौ पुष्पांजलित्रयं दत्वा प्रणम्य श्मशानाधिपतिं च पूर्वोक्तक्रमेण पूर्वोक्तबलिं दत्वा अघोरमंत्रे-
ण शिखाबंधनं विधाय सुदर्शनमंत्रेणात्मानं रक्षेत् इति हरिहस्तं दत्वात्मरक्षां कुर्यात्॥ अघोरसुदर्शनमं-
त्रस्तु॥ ह्रीं स्फुर प्रस्फुर २ घोर २ तरे तनुरूप चट २ कह २ वम २ बंध २ घातय २ हूं फट्॥ ॐ सहस्रार हूं फट्॥ लं त्रांत
रे॥ मायास्फुरद्वयं चैव प्रस्फुरद्वितयं पुनः॥ घोरघोरतरेत्यंते तनुरूपपदं ततः॥ चटयुग्मं ततः पश्चात्प्रचटद्वित-
यं पुनः॥ कहयुग्मं वमद्वंद्वं ततो बंधद्वयं पुनः॥ घातयद्वितयं वर्म फडंतः समुदाहृतः॥ एकपंचाशदर्णोयमघो-
रास्त्रो महामनुः॥ हलोहलं समुच्चार्य सहस्रारस्वरूपकं॥ नमस्त्रांतं महामंत्रं सुदर्शनस्य कीर्तितं॥ हलोह-
लं प्रणवं॥ ततः पूर्वोक्तक्रमेण भूतशुद्धिन्यासजालं विधाय जयदुर्गामंत्रेण दिक्षु सर्षपान् विकीर्य तिलो-
सीति मंत्रेण तिलांश्च विकीर्य विहितशवसमीपे गच्छेत्॥ विहितशवं यथा चा वीरचूडामणौ॥ यष्टिविद्धं शूल-
विद्धं खड्गविद्धं पयोमृतं॥ वज्रविद्धं सर्पदष्टं चांडालं वाभिभूतकं॥ तरुणं सुंदरं शूरं रणे नष्टं समुज्वलं॥
पलायनविशून्यं च संमुखं रणवर्तिनां॥ भैरवतंत्रेपि॥ यष्टिप्रभृतिविद्धं वा चाभिभूतं जले मृतं॥ शव-
मानीय यत्नेन नाहरेत्स्वेच्छया मृतं॥ स्त्रीवश्यपतितास्पृश्यनपवयं हितद्वं २॥ अव्यक्तलिंगं कुष्ठिनं वृद्धमि-
त्येवं शवं हरेत्॥ न भिदुर्भिक्षमृतं चापि न पर्युषितमेव वा॥ स्त्रीजनं च द्विरूपं सर्वथा परिवर्जयेत्॥ कालीतं-
त्रेपि॥ ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनं॥ महाशवाः प्रशस्तास्युः प्रधाने वीरसाधने॥ क्षत्रद्राः प्रयोगक-
र्तॄणां प्रशस्ताः सर्वसिद्धये॥ एवंभूतं शवं गृहीत्वा मूलमंत्रेण पूजास्थानमानयेत्॥ तत्समीपं गत्वा ॐ फडिति शि-
वमंत्रस्य ॐ हूं मृतकाय॥ फडिति पुष्पांजलित्रयं दत्वा शवं स्पृष्ट्वा प्रणमेत्॥ स्पर्शे मंत्रं॥ तदुक्तं चाचार्यचूडामणौ॥

प्रणवाद्यस्त्रमंत्रेण शवस्य प्रोक्षणं चरेत्॥ प्रणवं कूर्चबीजं च मूलमायनमश्च फट्॥ पुष्पांजलित्रयं दत्वा प्रणमे
त्तस्य मूर्द्धकं॥ प्रणाममंत्रस्तु॥ ॐ वीरेश परमानंद शिवानंद कुलेश्वर॥ आनंदभैरवाकार देवीपर्यंक शंकर॥ वी
रोहं त्वां प्रपद्यामि उत्तिष्ठ चंडिकार्चने॥ अनेन मंत्रेण प्रणम्य प्रक्षालयेत्॥ हूं मूलमाय॥ अनेन क्षालयित्वा सुगंधिज
लेन स्नापयित्वा वाससा जलमुत्सोत्स्य धूपेन धूपितं कृत्वा गंधादिना शवं प्रलिप्य शवस्य कटिदेशो धृत्वा पूजास्थानमा
नयेत्॥ तदुक्तं कालीतंत्रे॥ ततः शवं मूलमायेन मोतमंत्रमुद्धरेत्॥ शवस्य स्नानमंत्रोयमित्यादि॥ भावचूडामणौ
धूपेन धूपितं कृत्वा गंधादिना प्रलिप्य च॥ रक्षां कृत्वा यदि देवेशि भक्षयेत्तु तं साधकं॥ ततः कुशशय्यां कृत्वा
पूर्वशिरः कृत्वा शवं स्थापयेत्॥ तदुक्तं॥ तत्रैव॥ कुशशय्यां परिष्कृत्य तत्र संस्थापयेत् शवं॥ एलालवं
गकर्पूरजातीखदिरमार्द्रकं॥ तांबूलं तन्मुखे दत्वा शवं कुर्यादधोमुखं॥ तत्पृष्ठं चंदनेनापि विलिप्य प्र
यतः सुधीः॥ बाहुमूलादिकट्यंतं चतुरस्रं विधाय च॥ मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितं॥ मंत्रपी
ठं लिखेन्मध्ये तत्तत्कल्पविधानतः॥ ॐ ह्रीं फट् इति मंत्रेण तत्तत्कल्पोक्तपीठमंत्रं लिखेत्॥ तदुपरि कंब
लाद्यासनं न्यसेत्॥ तंत्रांतरे॥ गत्वा शवस्य सान्निध्यं धारयेत्कटिदेशतः॥ यद्युपद्रवयेत्तस्य दद्यान्निष्ठी
वनं शवे॥ पुनः प्रक्षालनं कृत्वा जपस्थाने समानयेत्॥ ततो द्वादशांगुलयज्ञकाष्ठानि दशदिक्षु प्रवेश्य
त्संस्थाप्य इंद्रादिदेवताः संपूज्य स्वाभिधानेन बलिं दद्यात्॥ तदुक्तं॥ तंत्रांतरे॥ द्वादशांगुलमानानि य
ज्ञकाष्ठानि दिक्षु च॥ संस्थाप्य पूजयेत्तत्र इंद्रादिदशदेवताः॥ तत्रायं क्रमः॥ ॐ लं इंद्राय सुराधिपतये
ऐरावतवाहनाय वज्रहस्ताय सांनिध्यपार्षदाय सपरिवाराय सवाहनाय॥ इति पाद्यादिभिः संपूज्य बलिं
दद्यात्॥ ॐ इंद्राय सुराधिपतये इमं बलिं गृण्ह २ गृण्हापय २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वा
हा॥ एवमाषत्वा बलिमिंद्राय स्वाहा॥ ॐ रां अग्नये तेजोधिपतये मेषवाहनाय सपरिवाराय शक्तिह
स्ताय सायुधाय॥ इति संपूज्य पूर्ववत् बलिं दद्यादनेन ॐ अग्नये तेजोधिपतये इत्यादि इमं बलिमित्यादि॥
ॐ यां यमाय प्रेताधिपतये दंडहस्ताय महिषवाहनाय सायुधाय इत्यादिना संपूज्य ॐ यां यमाय प्रेताधि

पतये सायुधाय इत्यादिना ॥ इमम् इत्यादिना बलिं दद्यात् ॥ ॐ क्षां निर्ऋतये राक्षसाधिपतये असिहस्ताय प्र
इत्यादिना बलिं दद्यात् ॥ ॐ वां वरुणाय जलाधिपतये पाशहस्ताय मकरवाहनाय सायुधाय इत्यादिना सं
ॐ३ पूज्य वं वरुणाय जलाधिपतये सायुधाय इत्यादिना इमम् इत्यादिना बलिं दद्यात् ॥ ॐ कुं कुबेराय यक्षाधि
पतये गदाहस्ताय नरवाहनाय सपरिवाराय इत्यादिना संपूज्य ॥ ॐ कुं कुबेराय यक्षाधिपतये सायुधा
य इत्यादि इमं बलिम् इत्यादिना बलिं दद्यात् ॥ ॐ सां सोमाय औषधीशाय मृगवाहनाय गदाहस्ताय इ
त्यादि संपूज्य ॥ ॐ सां सोमाय इमं बलिं बलिं दद्यात् ॥ ॐ हां ईशानाय भूताधिपतये शूलहस्ताय
वृषवाहनाय सपरिवाराय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यादनेन मन्त्रेण ॥ ॐ हां ईशानाय भूता
धिपतये इमम् इत्यादिना बलिं दद्यात् ॥ ईशानेन्द्रयोर्मध्ये ॐ ब्रह्मणे प्रजाधिपतये हंसवाहनाय प
द्महस्ताय सपरिवाराय इत्यादिना संपूज्य ॥ ॐ ब्रह्मणे लोकाधिपतये सायुधाय इत्यादिना इमं बलि
म् इत्यादिना बलिं दद्यात् ॥ निर्ऋतिवरुणयोर्मध्ये ॐ अनन्ताय नागाधिपतये सायुधाय इत्यादिना
बलिम् इत्यादिना बलिं दद्यात् ॥ ततः सर्वभूतबलिं दद्यात् ॥ सर्वत्र साभिषालेन ॥ तत्र श्वाधिष्ठात्
देवताभ्यो बलिं च स्मारयेत्तत्तु ॥ चतुःषष्टियोगिनीडाकिनीभ्योपि संदद्यात् ॥ अथ पूजा सामग्री ॥
द्वारे चोत्तर साधकं स्थाप्य भूतले श्रीपृथ्वी आसनाय ॥ इत्यादिना संपूज्य श्रीपूर्णं तत्र मन्त्रमुच्चार्य आरो
हणं क्रमेणाशयोपर्युपविश्य स्वपार्श्वतले कुर्यात् तत्ता ॥ श्राव केशाग्रपर्यायं जटि संचय श्री गुरुं गणपतिं दे
वीं च नमस्कृत्य प्राणायामं षडङ्गन्यासं कृत्वा पूर्वोक्तरीत्या हैन मन्त्रेण दशदिक्षु लोष्टं विनिःक्षिप्य सं
कल्पं कुर्यात् ॥ यथा ॥ ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्मा अमुकदेवतायाः संदर्शनका
मो मुकमन्त्रस्यामुकसंख्य जपमहं करिष्ये ॥ इति संकल्प्य ॥ ॐ ह्रीं आधारशक्ति कमलासनाय ॥
इत्यासनं संपूज्य स्ववामतः शवसमीपे अर्घ्यपात्रादिकं संस्थाप्य त्रटि कार्यां षोडशोपचारैः वाग्देवीं संपू

ज्यशवमुखे देवीं गंधादिना संपूज्य शवमुखे देवीं गंधादिना संतर्पयेत् ॥ ततः शवादुत्थाय संमुखे ग
त्वा मंत्रं पठेत् ॥ ॐ नमस्ते देवदेवेश मम वीरसिद्धिं देहि २ महाभाग कृतांजलिपरायणः ॥ ततः पद्
सूत्रस्य रज्वा शवचरणौ दृढं बंधयेत् ॥ ततोऽनेन मद्रूपो जय देवेश वीरसिद्धिं कृतां वद ॥ भीम भीरु
भयाभाव भव्य लोचन भावुक ॥ त्राहि मां देवदेवेश शवानामधिपाधिप ॥ इत्यनेन शवस्य पादतले त्रिको
णं यंत्रं मालिख्य ततः शवोपरि रूप विश्य हस्तद्वयं पार्श्वयोः प्रसार्य तदुपरि कुशान् दत्वा तत्र स्वपादौ नि
धाय पुनः प्राणायामं कृत्वा मूलमसि गुरुं विभाव्य हरिदेवीं ध्यात्वा ओष्ठौ संपुटौ कृत्वा विहितमाल
या मौनी भूत्वा विनिर्जपेत् ॥ तत्र चमत्कारान्साधनक्रमेण जपः कार्यः ॥ यद्यर्द्धरात्रिपर्यंतं किंचि
न्न लक्ष्यते तदा सर्षपतिल विकीर्णं संपद्गमनं कृत्वा जपं कुर्यात् ॥ भये जाते सति
एवं पठेत् ॥ तथा च ॥ न शवात्तु भयं वास्ति न पंजालेपरे ततः ॥ तत्प्रार्थयेत्स बलित्वेन हस्तिव्यं कुंज
रादिकं ॥ दिनांतरे पुरस्यामि स्वनाम कथयस्व मे ॥ इत्युक्त्वा संस्कृते नैव निर्भयः सन्पुनर्जपेत् ॥ ततस्त्वेन्मधुरं
वक्ति वक्तव्यं मधुरं ततः ॥ ततः सत्यं कारयित्वा वरं तु प्रार्थयेत्ततः ॥ यदि सत्यं न करोति वरं वा न प्रयच्छति ॥
तदा पुनर्जपेद्धीमान् एकाग्रमानसं यथा ॥ अस्यार्थः ॥ यदि जपकाले ओंकारागत्यावं जरादिकं प्रार्थयेत्तदा
दिनांतरे दास्यामि ममस्थाने स्वनाम कथय इत्युक्त्वा पुनर्जपेत् ॥ यदि स्वनाम मधुरं कथयति अमुक इति स
त्यं कुरु कृते सत्ये एवं प्रार्थयेत् ॥ यदि कदापि सत्यं न करोति वरं वा न प्रयच्छति ॥ तदा पुनर्जपेत् ॥ सत्ये कृते वरं
लब्ध्वा सत्यं जपादिकं ॥ फले जाते मितिहस्तोऽस्तुति मौन्मोचयेत्ततः ॥ शवं प्रक्षाल्य संस्थाप्य मोचयेत्सादरं
धनं ॥ पादबंधं मोचयित्वा पूजाद्रव्यं जले क्षिपेत् ॥ शवं जले वा गर्ते वा निक्षिप्य स्नानमाचरेत् ॥ ततस्तत्स्वगृ
हं गत्वा बलिं दद्याद्दिनांतरे ॥ बलिमंत्रस्तु ॥ अग्निमरात्रौ ये पायज मा चो हं ते गृह्णंतु इमं बलिं ॥ अथ ये यानि
तानि स्मान् नरकुंजरश्वकरान् ॥ दत्तापि ष्टमया लेपुकर्तव्यं समुपोषणं ॥ ततः परेद्युः क्रियानित्यक्रियां कृत्वा पं
चगव्यं पिबेत् ॥ ब्राह्मणान्भोजयेत्तत्र पंचविंशति संख्याकान् ॥ दिनानि संतर्पयेत्ततः ॥

ततः शवादुत्थाय संमुखे गत्वा मंत्रं पठेत्॥ ॐ वशो मे भव देवेश मम सिद्धिं देहि रे महाभाग कृताश्रयपरायण॥ ततः
पट्टसूत्रेण रज्ज्वा शवं चरणौ दृढं बंधयेत्॥ मूलेनाम द्वौ नवदेवेश वीरसिद्धिं कृतास्पद॥ ॐ भीम भीरु भया
भाव भोग्य लोचन नाथ मुक्ष॥ त्राहि मां देवदेवेश शवानामधिपाधिप॥ इत्यनेन शवस्य पादतले त्रिकोणं यंत्रं मुल्लि
खेत्॥ ततः शवोपरि उपविश्य हस्तद्वयं पार्श्वयोः प्रसार्य तदुपरि कुशान्दत्वा तत्र स्वपदौ विधाय पुनः प्राणायामत्र
यं कृत्वा शिरसि गुरुं विभाव्य हृदये देवीं भात्वा ऋष्यादिसंपुटी कृत्वा विहितमालया मौनी भूत्वा चीत्तनो जपेत्॥
अत्र श्मशाने साधनक्रमेण जपः कार्यः॥ यद्यर्द्धरात्रपर्यन्तं किंचिन्न लक्ष्यते॥ ततः पूर्ववत् तिलसर्षपवि
किरणं सप्तपदगमनं कृत्वा जपं कुर्यात्॥ भये जाते सत्यं पठेत्॥ तथा च॥ नाशयाश्च भयं नास्ति भये जाते वदेत्त
तः॥ यत्प्रार्थसि बलिं त्वेन दातव्यं कुंजरादिकं॥ दिनांतरे च दास्यामि स्वनाम कथयस्व मे॥ इत्युक्त्वा संस्कृते नैव नि
र्भयश्च पुनर्जपेत्॥ ततश्चेन्मधुरवाक्ति वक्तव्यं मधुरं ततः॥ ततः सत्यं कारयित्वा वरं तु प्रार्थयेत्ततः॥ यदि सत्यं न
करोति वरं वा न प्रयच्छति॥ तदा पुनर्जपेद्धीमान् एकाग्रमानसं यथा॥ अयमर्थः॥ यदि जपकाले आगत्य कुंज
रादिकं प्रार्थयेत्॥ तदा दिनांतरे दास्यामि मम स्थाने स्वनाम कथय इत्युक्त्वा पुनर्जपेत्॥ यदि स्वनाम न ब्रूते कथ
यति तदा अमुक इति सत्यं कुरु कृते सत्ये वरं प्रार्थयेत्॥ यदि कदापि सत्यं न करोति वरं वा न प्रयच्छति॥ तदा पुनर्ज
पेत्॥ सत्ये कृते वरे लब्धे संत्यजेद्धजपादिकं॥ फलं जातमिति ज्ञात्वा जटादि मोचयेत्ततः॥ शवं प्रक्षाल्य संस्था
प्य मोचयेत् पादबंधनं॥ पादबंधं मोचयित्वा हस्तात् द्रव्यं जले क्षिपेत्॥ शवं जले तु गर्त्ते वा निःक्षिप्य स्नानमाचरेत्॥
ततः स्वगृहं गत्वा बलिं दद्यात् दिनांतरे॥ मंत्रस्तु अग्निमरात्रो यथा यजमानो हं तेनगृह्णातु इमं बलिं॥ अथ ये या
चिता नस्माभिः कुंजरस्तुरगा नरान्॥ देतापि ष्टमयान् तेषु कृत्वा यत्समुपोषणं॥ ततः परेद्युः नित्यक्रियां कृत्वा पंचग
व्यं पिबेत्ततः॥ पंचविंशतिसंख्याकान् ब्राह्मणान् भोजयेत्॥ सप्तपंचतिथीनामद्यौ क्रमेणैव दक्षाणविधिः॥ ब्रा
ह्मणान् भोजयेत्॥ यथा॥ परेद्युः नित्यमाचार्य पंचगव्यं पिबेत्ततः॥ ब्राह्मणान् भोजयेत्तत्र पंचविंशतिसंख्य
कान्॥ सप्तपंचतिथीनां च क्रमेणैव दक्षिणाविधिः॥ ततः स्नात्वा चानुलिप्य च निवसेद्ध मस्थले॥ यदि न स्याद्दिप

नोज्यं तदा निर्द्धनतां व्रजेत्॥ तेन चेन्निर्द्धनत्वं स्यात्तदा देवी प्रकुप्यति॥ त्रिरात्रं वाथ षड्रात्रं नवरात्रं तु गोपयेत्॥
स्त्रीशय्यां यदि गच्छेत्तु तदा व्याधिं विनिर्दिशेत्॥ गीतेश्वरं तान्न बधिरो निश्चयं स्फूर्न्दयदर्शने॥ यदि वक्ति दिने वा
क्यं तदा स्य मुकता च वेत्॥ पंचदशा दिवसं यावत् देहे देवस्य संस्थितिः॥ नस्त्री कुर्यात् ऊर्ध्वपुष्पं वहिर्याति यदा तदा॥
तदा वस्त्रं परित्यज्य गृह्णीयाद्वसनांतरं॥ गोब्राह्मणविनिंदां च न कुर्याच्च कदाचन॥ दुर्जनं पतितं क्लीवं नस्प
र्शेच्च कदाचन॥ देवगोब्राह्मणारीश्च प्रसहं संस्पृशेत् शुचिः॥ प्रातर्नित्यक्रियां तेन बिल्वपत्रोदकं पिवेत्॥
ततस्नातो तु गंगायां ब्राह्मे षोडशवासरे॥ स्नातां ते मंत्रमुच्चार्य तर्पणं तेन मःपदं॥ एवं प्रातत्र याहूं दे वा
न संतर्पयेज्जलैः॥ स्नानं तर्पणश्चान्यस्य न देवस्य न तर्पणं॥ इयमेन नविधानेन सिद्धिं प्राप्नोति साधकः॥ इह
भुक्त्वा वरान् भोगान् अंते याति हरेः पदं॥ ततो दक्षिणां दत्त्वा ब्रह्मविद्राव धारणं कुर्यात्॥ इति द्राव साधनं॥
अथ मंत्रभेदाः॥ तत्र कुब्जिकातंत्रे॥ प्रणवं च ततो मायां कूर्चं वीजं समुच्चरेत्॥ क्रियायेति पदं तस्माच्चंड
योग्रं महामनुः॥ चंडोग्रेश्वरपाणीयो मंत्रः सर्वार्थसाधकः॥ अस्य ब्रह्मऋषिर्गायत्री छंदो मायाच वीजकं॥
कूर्चं तु कीलकं ज्ञेयं देवश्चंडोग्रईरितः॥ षड्दीर्घमायाबीजेन प्रणवाद्यैः षडंगकं॥ ध्यानं॥ शुद्धस्फटिकसंका
शं च तुर्बाहुं किरीटिनं॥ वरं चैव पाशं दक्षे तु वामे तु शक्तिमंकुशं॥ सुरापानरसाविष्टं साधकाभीष्टदायकं॥
ध्यात्वा संपूज्य देवेशं पंचसहस्रं मनुं जपेत्॥ दशांशं संस्कृते वह्नौ हुनेद् हुतात्मतेन च॥ अथात्र प्रयोगः
निमखण्डेन तलेनलेहविलोधनवान् चवेत्॥ रक्तपद्मस्य होमेन महतीं श्रियमाप्नुयात्॥ पायसस्य
तु होमेन शत्रुनाशाय चेन्निरात्॥ कुसुंभेन तैलहोमेन वश्याय दशितं जगत्॥ षट्कोणाष्टदलं पद्मं मध्ये
१५ क्रोध×रिपुनं हन्यात्संशयः॥ करवीरस्य होमेन राजवश्यं जायते ध्रुवं॥ शुक्लपद्मस्य होमेन ×क्रोधचु १५
श्वरं समावहल्पयेत्॥ रेखं तं शुद्ध जावेन हविष्याशी दिवा जपेत्॥ अस्य पुरश्चरणमात्रेण नचिरेण विलि
प्यते॥ अस्यैव जपमात्रेण सर्वसिद्धिमवाप्नुयात्॥ इति चंडोग्रेश्वरकल्पविधिः॥ वामकेश्वरतंत्रे॥ अथ मा

तंगी मंत्रः॥ अथ वक्ष्ये महादेवी मातंगी सर्वसिद्धिदां॥ अस्योपासनमात्रेण साधकः सिद्धिं लभते ध्रुवं॥
प्रणवं च ततो माया कामबीजं च कूर्चकं॥ मातंगी ङेयुतास्त्रं च वह्निजायावधिर्मनुः॥ ऋषिस्त्वाहु क्षिरेणानं
त्रिविराट् छंदः प्रकीर्तितं॥ मातंगी देवता देवी सर्वसिद्धिप्रदायिनी॥ अंगन्यास करन्यासौ कुर्यान्मं
त्रीसमाहितः॥ षड्दीर्घ जाजा बीजेन प्रणवाद्येन कल्पयेत्॥ षट्कोणाष्टदलं पद्मं लिखेद्यंत्रं मनोहरं
तन्मध्ये जापकः कुर्याज्जपपुष्पेन मंत्रवित्॥ अष्टशक्तिश्चाष्टदले पूजयेत्सुसमाहितः॥ रतिप्रीतिर्मनोभ
वा क्रिया च शुद्धा चैरास्मृताः॥ अनंगकुसुमानंगमदना मदनालसा॥ इत्यष्टशक्तीः संपूज्याद्युपहारस
मन्विता॥ ततो देवीपरां ध्यायेत्साधकः स्थिरमानसः॥ श्यामांगी शशिशेखरां त्रिनयनां रत्नसिंहासन
स्थां वेदैर्बाहुदंडैरसिखेटकपाशांकुशधरां एवं ध्यात्वा महादेवीं गंधपुष्पैर्मनोहरैः॥ नैवेद्यस्तु महादे
व्यै पायसं शर्करान्वितं॥ पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत्॥ तद्दशांशं हुनेदाज्यैः शर्करामधुभिः
सह॥ ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह॥ एवं पुरस्कृया संतोष्य योगविधिमाहरेत्॥ चतु
ष्पथे श्मशाने वा कृत्वा मध्ये च मांत्रिकः॥ मत्स्यं मांसं पायसं च दद्याद्धूपं च गुग्गुलं॥ रात्रियोगेन कर्त्तव्य
म्सदा पूर्णेश्च साधकः॥ एवं प्रयोग मंत्रेण कविता जायते ध्रुवं॥ अग्निस्तंभं जलस्तंभं वाक्स्तंभं प्रायये
ध्रुवं॥ मंत्री जयति शास्त्रं च ताक्ष्यों जोगी कुलं यथा॥ शास्त्रे वादे कवित्वे च वृहस्पतिरिवापरः॥ अनेनैव वि
धानेन मातंगीसिद्धिदायिनी॥ नरे नेत्र कृहै मागत्य कुबेरेद्धीर्यतेवसु॥ विंनाम से विना मांसे नार्चयेत्सुरदेव
तां॥ इति मातंगी मंत्रः॥ अथ आईपेटी॥ प्रणवो हरये तु ततो भगवति चामुंडे रक्तवाससे अप्रतिहतरूप
पराक्रमे असुरवधाय चिन्ते तस्से वह्निवल्लभो॥ ॐ नमो भगवति चामुंडे रक्तवाससे अप्रतिहतरूप
पराक्रमे असुरवधाय विचेतसे स्वाहा इति मंत्रः॥ आईपेटनवारके नावले समुद्रगामिनीनदीतीरेतु
स्वर नैमौ वा दक्षिणामुखो ऊर्ध्वबाहुर्जपेत्॥ यावत् पटः शुष्यति तावत्प्राणाः शुष्यंति शत्रोः॥

अथ मातंगीभैरवी॥ वाङ्मायाकमलास्तारं नमो भगवत्यथ॥ श्रीमातंगेश्वरि वदेत् सर्वजनम
नोहरि॥ सर्वारिस्मुखराज्यं ते सर्वारिस्कखरंजिनि॥ सर्वराजवशं पश्चात् करि सर्वपदं वदेत्॥
स्त्रीपुरुषवशं प्रोक्ता नेत्रमग्न्यासनं ततः॥ सर्वदुष्टमृगवशंकरि सर्वशत्रुवशंकरि॥ स्यात् सर्व
लोकममुकं मे वश्यमानय॥ अग्निजायावधिप्रोक्तः शाकीयक्षरो मनुः॥ ऐं ह्रीं श्रीं ॐ नमो भग
वति श्रीमातंगेश्वरी सर्वजनमनोहरि सर्वमुखराज्य सर्वमुखरंजिनि सर्वराजवशंकरि सर्वस्त्री
पुरुषवशंकरि सर्वदुष्टमृगवशंकरि सर्वशत्रुवशंकरि सर्वलोकममुकं मे वशमानय स्वाहा ९९
ऋषिः स्याद्दक्षिणामूर्तिश्छंदो गायत्रीमीरितं॥ सकलाभीष्टफलदा श्रीमातंगेश्वरी देवता॥ न्यासा
न्मंत्रीततो कुर्यात् वक्ष्यमाणान् यथाक्रमं॥ शिरोललाटभ्रूमध्यतालुकंठगलोरसि॥ नवा
हते भुज हृद्ग्रहे जठरे नाभिमंडले॥ स्वाधिष्टाने गुह्यदेशे पादयोर्दक्षिणवामयोः॥ मूलाधारे गु
देच्यसे सरान्वेष्टादशार्णमालया॥ गुल्फे कृत्वा तु षष्ट्वं चसृ षट्पर्वेतार्णमिः॥ दशापश्चाष्टवेदाग्नि
नेत्रेंद्रपूर्णमगुणाक्षिरभिः॥ पदक्लृप्तिरियं प्रोक्ता मंत्ररत्नेषु ध्यानके मालं॥ रत्नाघाम्बरलहृदयभूम
ध्ये पुविन्वक्षणा॥ राकृताक्षिलक्ष्मीबीजाद्या मातंग्यताः प्रविन्यसेत्॥ शिरोवदनहृद्गुह्यपादेषु विधि
नान्यसेत्॥ हृल्लेखां गगनां रक्तां भयो मंत्री करालिनी॥ महोछ्यांस्वरस्वनामादि प्रणवौ जपुरः सराः
मातंग्यताः षडंगानि ततः कुर्वीत साधकः॥ रत्नैश्चलुर्बिंदुमायस्यात् हृन्नेत्रैपादयुग्मभिः शिरः॥
शिखाक्षादशाग्निभिः प्रोक्ता क्रमेता वर्म्मीरक्षरैः॥ स्याभ्रेपोदयाभिर्नेत्रेद्वाभ्योमस्त्रसमीरितं॥ नि मे
म्रेल मेन्नाष्टौ वर्णन्यासमथाचरेत्॥ ब्रह्मरंध्रे स्वगुह्येषु हृदस्त्रोजेषु विन्यसेत्॥ द्राविणी क्षोभिणी च
पोवे धनी मोहनी पुनः॥ आकर्षिणी स्वनामादि बीजाद्याः स्तदर्पणाः॥ मातंग्यंतास्ततो न्यसेत्स
म्भोवरदं नाशयोः॥ पार्श्वयोर्नाभिदेशे कटिपार्श्वे सकृत्पुनः॥ बीजेत्र वादिका न्यंत्रीमन्मथं मकर

ध्वजे॥ मदनं पुष्पधन्वानं पंचसत्कुसुमायुधं॥ षष्ठं कंदर्पनामानं मनोभवरतिप्रियो॥ मातंग्यंतास्ततो
न्यसेत् स्थानेष्वेतेषु मंत्रवित्॥ प्रथमानंगकुसुमा द्वितीयानंगमेखला॥ अनंगमदनानंदा तत्रानं
गमदनातुरा॥ अनंगमदनावेगी तृतीयानंगसंभवा॥ सप्तमानंगभुवनपालनीस्यादष्टमीअनं
गशशिरेखा स्यान्मातंग्यंताः समीरिताः॥ विन्यस्तव्यास्ततो मूलेऽधिष्ठाने मणिपूरके॥ हृत्कंठमस्यके
वोमे ध्येमस्तके मंत्रिणा मम॥ आद्या लक्ष्मीः सरस्वत्यै रतिः प्रीतिश्च कीर्तिसिद्धा॥ कांतिः पुष्टिः पुनस्तुष्टि
र्मातंगीपदशोरवराः॥ मूलमंत्रं प्रविन्यस्येन्निजमूर्धि च मंत्रवित्॥ आधारदेशेऽधिष्ठाने नाभौप
श्चाद्द नाहते॥ कंठे च ककुदे वोमे ध्येमस्तके विन्यसेत् क्रमात्॥ आद्याद्याः पूर्वमुद्दिष्टा मातंगीपद
पश्चिमाः॥ एषु स्थानेषु विन्यसेत् सितागारिजैरवान्॥ मातंग्यंतान्न्यसेन्मंत्री मूलमंत्रं स्वमूर्द्ध
नि॥ आधारदेशेऽधिष्ठाने नाभौ पश्चाद्द नाहते॥ कंठदेशेऽथ वोमे ध्येललाटविवरे न्यसेत्॥ पर
विरोधिकायामे द्व्योनादनादालयोः पुनः॥ ऊर्ध्वमाविशुद्ध्यां चक्रे च चक्रे मंडले कैलासे॥ मातंग्यंताः
प्रविन्यसेत् प्रामा ज्येष्ठा मलेः परं॥ रौद्री प्रशांतिनी चांद्री पुनर्माहेश्वरी मथ॥ क्रिया शक्तिं च लक्ष्मी
चरतिं संरक्षां च मोहिनी॥ प्रमथांनाविनीविद्युल्लता चित्तशक्तिमन्मथा॥ ततश्च संहारानंदानं
दबुद्धिमिमाः क्रमात्॥ ह्रींदोमालहराधारे घेलावीजत्रयोरिकाः॥ ऐं ह्रीं श्रीं मातंगी मातंग्यै नमः॥
२ पता मातंगी मातंग्यै॥ ३ महालक्ष्मी मातंगी मातंग्यै॥ ४ सिद्धलक्ष्मी मातंगी मातंग्यै॥ मातंग्यंताः प्रवि
न्यसेद् यथावद्देहिकोत्तमैः॥ मातंगी महंदाद्यां तां महालक्ष्मीपदादिकां॥ सिद्धलक्ष्मीपदाद्यां तां कल
माधारमंडले॥ न्यस्यते वैव कुंडली साव्यापके दे हृत्कोसमः॥ एवं न्यस्तशरीरो सो चिंतयेन्मंत्रदेवतां॥
ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामगात्रीं न्यस्तैकांघ्रिं सरोजे शशिशकलधरां वल्ल
कीं वादयंतीम्॥

कह्लारावद्धमालां नियमितविलसच्चूलिकां रक्तवस्त्रां ॥ मातंगीं शंखपात्रां मधुमदविवशां चि
त्रकोद्भासिभालां ॥ अयुतं प्रजपेन्मंत्रं तद्दशांशं मधूकजैः ॥ पुष्पैस्त्रिमधुरोपेतैर्जुहुयान्मंत्रसि
द्धये ॥ त्रिकोणबिंदुकोणं च पद्ममष्टपत्रं प्रकल्पयेत् ॥ अष्टपत्राद्बहिर्वाह्ये वृत्तं षोडशभिर्दलैः ॥ चतुर
स्रं समायुक्तं कोष्ठाद्या दृष्टिमनोहरं ॥ एतस्मिन्पूजयेत्पीठे नववर्ग्याः श्रीः क्रमादिमाः ॥ विभूतिरुन्नतिः
कांतिः पुष्टिः कीर्तिश्च संनतिः ॥ व्युष्टिरुत्कृष्टिरृद्धिश्च मातंगीपदपश्चिमाः ॥ सर्वा तेन शक्तिक
मलासनायनम इत्यर्थः ॥ वाक्शक्तिलक्ष्मीबीजाद्यो मनुरासनसंज्ञकः ॥ मूलेन मूर्तिं संकल्प्य
तस्यामावाहयेद्देवतां ॥ अर्चयेद्विधिनानेन वक्ष्यमाणेन मंत्रवित् ॥ इत्याद्यस्त्रिकोणे पूजयेत्पूर्व
वत्सुधीः ॥ हृल्लेखाद्याः पंच पूज्या मध्ये दिक्षु च मंत्रिणा ॥ पाशांकुशाभयाभीष्टधारिण्यो रक्तसे
प्रभाः ॥ अंगानि पूजयेत्पश्चाद्यथापूर्वं विधानवित् ॥ बाणान्मध्ये र्चयेद्दिक्षु पंच मंपुरतो यजेत्
रतमध्ये पुसंपूज्या अनंगकुसुमादयः ॥ पाशांकुशाभयाभीष्टधारिण्यो रुणविग्रहाः ॥ पत्रा
ग्रेषु पुनः पूज्या लक्ष्म्याद्या वनिताकराः ॥ बहिरष्टदलेष्वर्च्या ब्राह्म्याद्या मदाकुलाः ॥ अपरांगेनिषंगा
द्याः पुष्पास्त्रेक्षुधनुर्धराः ॥ पत्रस्था मातरः पूज्या ब्राह्म्याद्याः प्रोक्तलक्षणाः ॥ तदग्रेष्वर्चयेद्दि
क्षु असितांगादिभैरवान् ॥ पुनः षोडशपत्रेषु पूज्याः षोडश शक्तयः ॥ वामाद्याः रक्तवीणाभिगायेसः
श्यामविग्रहाः ॥ चतुर्दिक्षु चतस्रः स्युः शक्तयः पूजयेत्पुनः ॥ मातंग्याद्या मदोन्मत्ता वीणालालितपाण
यः ॥ आग्नेयकोणे विघ्नेशं दुर्गां नैर्ऋत्ये यजेत् ॥ वायव्ये बटुकं पश्चात् ईशाने क्षेत्रपं यजेत् ॥ लोक
पालान्बहिः पूज्याः स्वायुधैः सह ॥ मंत्रेस्मिन्साधिते मंत्री साधयेदिष्टमात्मनः ॥ मल्लिकाजाति
पुन्नागैर्होमाद्वाग्मी भवेत् ॥ फलैर्बिल्वसमुद्भूतैश्चतुरस्रे वा हुताद्भवेत् ॥ राजपुत्रस्य

राज्याप्तिः पंकजैः श्रियमाप्नुयात् ॥ लतपूलैर्वश्यायेद्रि पुंल क्ष्मी पुष्पैस्तथा नरः ॥ वंधूकपुष्पैर्वकुलैर्जपा
ख्यैः किंशुकरुद्भवैः ॥ वश्याय जुहुयान्मंत्री मधुना सर्वसिद्धये ॥ लवंगैर्मरीचरोपैतैर्हुत्वा कर्षति सुंदरी ॥ वंजुल
स्य समिधो मैरुदि विवितचुलैः चिरात् ॥ क्षीरार्कैरमृताखंडैर्होमो नाशयति ज्वरं ॥ दूर्वाभिरायुराप्नोति कदंबैर्वश्य
माप्नुयात् ॥ अन्नवान्नहोमेन लडुलैश्च नवान्नवेत् ॥ सर्वैस्त्रिमधुरोपेतं होमद्रव्यमुदाहृतं ॥ नन्द्यावर्तलवैः
पुष्पैर्होमो वाक्सिद्धिदायकः ॥ निंबप्रसूनैर्जुहुयादीप्सितं श्रियमश्नुते ॥ पलाशकुसुमैर्होमैस्तेजस्वी जायते न
रः ॥ चंदनागुरुकर्पूररोचनाकुंकुमादिभिः ॥ वश्याय जुहुयान्मंत्री वश्यायेदखिलं जगत् ॥ एलानिजद्वातिल
कं कुर्याल्लोकप्रियो भवेत् ॥ निर्गुंडीमूलहोमेन निगडान्मुच्यते नरः ॥ निर्गुंडी निस्कंदा ॥ निबलिलान्वितैर्लो
णैर्होमः शत्रुविनाशनः ॥ हरिद्राचूर्णसंमिश्रैर्लवणैस्तंभयेत्परान् ॥ रसवद्भिः फलैः पत्रैः पुष्पैः परिमलान्वि
तैः ॥ हुत्वा सम्यगवाप्नोति साधकः सर्वमीप्सितं ॥ देवतां जगतामाद्यां मातंगीमिष्टदायिनीं ॥ आवाहमिष्ठ
तां वन्नेसयेद्रत्नमालया ॥ आराध्य मालश्वरणौ भजे ते प्रसादयो विश्रुतसीमायुः ॥ अन्ये परे वाग्भिन
वं मुनीन्द्रः परां श्रियं न लिनरेण चाप्ये ॥ नमामि देवीं नवचंद्रमौलेर्मातंगिनीं चंद्रकलावतंसां ॥ आम्नायवाग्भिः
प्रतिपादितार्थं प्रबोधयंतीं शुकमादरेण ॥ विनम्रदेवासुरमौलिरत्नैर्नीराजितं ते चरणारविंदं ॥ भजंति ये दे
वि महीपतीनां व्रजंति ते संपदमादरेण ॥ मातंगिनी लीलागमने भवत्याः सिंजानमंजीरमिषाद्भजे ते ॥ मातस्त्वदी
यं चरणारविंदमकृत्रिमाणां वचसां विगुल्फं ॥ पदात्पदं सिंजितनूपुराभ्यां कृतार्थयंतीं विबुधान पद्माने
आस्फालयंतीं कलवल्लकीं तां मातंगिनी मद्धृदयं धिनोतु ॥ नीलांशुकां बुद्धविलंबबिंबां तालीदलेनार्पितक
र्णभूषां ॥ माध्वीमदाघूर्णितनेत्रपद्मां घनस्तनीं शंभुवधूं नमामि ॥ तडिल्लतां तं लमनि घनर्षचिरेण लक्ष्यं
नवरोमराज्यं ॥ स्मरामि भक्त्या जगतामधीशे वलित्रयाढ्यं तव मध्यबिंबं ॥ नीलोत्पलानां श्रियमावहंतीं कांत्या
कटाक्षैः कमलाकराणां ॥ कदंबमालांचितकेशपाशां मातंगकन्यां हृदि भावयामि ॥ ध्यायेयमारक्तकपोल
बिंबं बिंबाधरन्यस्तललामरम्यं ॥ आलोललीलालकमायताक्षं मंदस्मितं ते वदनं महेशि ॥ स्तुत्यानया शंकर

रथम्मपि ऽनीमातंगिनीमागधिदेवता ॥ स्तवं तिले चक्रिफलामनुष्याः पराश्रियं नित्यमुपाश्रयंति ॥ इति मातंगी
प्रयोगः ॥ अथोच्छिष्टचांडालिनीमंत्रः ॥ लदुत्ते फेत्कारिण्यां ॥ ठु साप्युच्छिष्टरूपे तु लथा चांडालिनी तिच ॥
सुमेरवेति ततो देवी कीर्तये लदनंतरं ॥ महापिशाचिनी पश्चात् लठ जो बीजं ततः परे ॥ नादबिंदुसमायुक्तं ठकार
रहितं यबिंदु ॥ सविसर्गं महादेवी सर्वसिद्धिप्रदायकं ॥ मंत्रोत्तरं तदुत्तलं मंत्रांतरे ॥ अथोच्छिष्टचांडालिमा
तंगी परमीरयेत ॥ ततः सर्ववशीचातेमूरिहृहृद्क्लिवल्लुभा ॥ एकोनविंशत्यावर्णैः सर्वाभीष्टकरो भवेदिति
मंत्रोत्तरे ॥ मंत्रदेवप्रकाशिकायां ॥ वाग्भवं मोथाः कामः सोः ऐं ज्येष्ठमातंगी नमामि उच्छिष्टचांडालि त्रैलो
क्यवशंकरी स्वाहेति ॥ इमां विद्यां महेशानि चापराह समाश्रिता ॥ इयं विद्या महाविद्या सर्वपापापहारिणी ॥ स्व
र्गदा मोक्षदा चैव राज्यसौभाग्यदायिनी ॥ यां यां प्रार्थयते सिद्धिं हठात्तां लामवाप्नुयात् ॥ विधानं च प्रवक्ष्यामि शृ
णु देवि वरानने ॥ भोजनानंतरं देवि नचैवाचमने कृते ॥ बलिं दद्यात्प्रथमतो मूलमंत्रेण साधकः ॥ ततो
मंत्रं जपेद्बाला देवी तामिष्टसिद्धये ॥ बलिमप्युच्छिष्टेन ॥ तथा च ॥ न तिथिर्न च नक्षत्रं नचांगन्यासमेव
च ॥ नारिदोषो नवाविघ्नं नाशौचं नियमो न च ॥ यस्य लिप्तति मंत्रोयं नच विघ्नैः स बाध्यते ॥ ध्यानं ॥ गु
ञ्जापरि समासीनां रक्तांबरपरिच्छदाम् ॥ रक्तालंकारसंयुक्तां गुंजाहारविभूषितां ॥ षोडशाब्दां च युव
तीं पीनोन्नतपयोधरां ॥ कपालकर्तृकाहस्तां परंज्योतिस्वरूपिणी ॥ वामदक्षिणयोगेन ध्याये मंत्रविदु
त्तमः ॥ उच्छिष्टेन बलिं दत्वा जपेत्तत मानसः ॥ उच्छिष्टेन च कर्तव्यो जपोस्या सिद्धिमिच्छता ॥ उच्छि
ष्ट जपमानस्य जायंते सर्वसिद्धयः ॥ अपरं च प्रवक्ष्यामि शृणु देवि फलप्रदं ॥ होमं च तर्पणं चैव सर्व
कामार्थसिद्धये ॥ स्थंडिले मंडलं कृत्वा चतुरस्रं समंततः ॥ रजये मंडले देवि मूलमंत्रेण साधकः
ततो मूलमुच्चार्य मंडलाय ॥ इति मंत्रेण ततो वह्निस्वरूपेण देवतां ध्यात्वा होमं च येत् ॥ तथा च ॥ ततो
देवीं समाधाय वह्निरूपव्यवस्थितां ॥ देवीं ध्यात्वा चरेद्धोमं दधिसिद्धार्थतंडुलैः ॥ सहस्रमात्रहोमेन
रीजा तु वशगो भवेत् ॥ मार्जारस्य तु मांसेन दद्याद्धोमं समाचरेत् ॥ संप्राप्नोति परां विद्यां सर्वमा

स्मरद्रीफलं ॥ कृष्णच्छागस्य मांसेन होमं मधुसमन्वितं ॥ सहस्रैकविधानेन मंत्रवित्तिकुलसिद्धयः ॥ विधाय मन्त्र रक्त्यै मं शर्करायुतपायसैः ॥ नं तस्य मंत्रं स्यैव सर्वो विधाः चतुर्दिश ॥ बिल्वपत्रे स्थितिमध्ये कैर्मासिमेकं समाहितः ॥ वं आपिलमते पुत्रं चिरंजीविनमुत्तमं ॥ ककुकुस्मं हुत्वा चागारक्नसमन्वितं ॥ दुर्च्छं गाच्चेहता देवि सौभाग्यसुखदायकं ॥ रजस्वलायावस्त्रेण मधुना पायसेन च ॥ होमं कृत्वा मता देवि त्रैलोक्यं वशमानयेत् ॥ इत्येषा कथिता देवि सर्वपापप्रणाशिनी ॥ मंत्रस्योच्चारणा देवि सर्वपापप्रणाशिनी ॥ उच्छिष्टरूपणं सकृत्स पवित्रो जपेन्मनुं ॥ अन्नयद्यपि पुरश्चरणं नोक्तं तथाप्यष्टसहस्रजपः ॥ दशांशो न होमादिकं बोध्यं ॥ यथा ॥ येषां जपे च होमे च संख्या नोक्ता मनीषिभिः ॥ तेषामष्टसहस्राणि संख्या स्याज्जपहोमयोः ॥ इत्यभिधानात् ॥ अष्टसहस्रं अष्टोत्तरसहस्रमिति संप्रदायः ॥ आसां सिद्धविद्यात्वात् पुरश्चरणं नास्तीति निबंधारः ॥ अथ धूमावती मंत्राः ॥ तदुक्तं फेत्कारिण्यां ॥ शांतानपश्चिमार्द्धेंदुतो बीजं धूमवती स्थितः ॥ धूमावति मनुः प्रोक्तो वैरिनिग्रहकारकः ॥ अघशुद्धोरीर्पदुराव ॥ अस्याः प्रजा ॥ प्रातःकृत्यादिकं कृत्वा भूतशुद्धिं प्राणायामो च कृत्वा ऋष्यादिन्यासं कुर्यात् ॥ यथा ॥ शिरसि पिप्पलादऋषये ॥ मुखे निवृच्छंदसे ॥ हृदि धूमावत्यै देव्यै ॥ आंगिरसेतु ॥ ऋषिर्भगलको नाम छंदोनुष्टुप्प्रकीर्तितः ॥ देवी धूमावती चास्य शत्रुनिर्मूलकारिणी ॥ धूं बीजं कथितं चास्य स्वाहा शक्तिरुदाहृता ॥ मारणे चास्य वक्तव्यो विनियोगो मनेरितः ॥ षडंगान्यपि धूमिति बीजेनैव विदध्यात् ॥ ततः करांगन्यासौ ॥ धां अंगुष्ठाभ्यां नमः ॥ धीं तर्जनीभ्यां स्वाहा ॥ इत्यादि ॥ धां हृदयाय ॥ इत्यादि ॥ ततो ध्यानं ॥ विवर्णा चंचला दुष्टा दीर्घा च मलिनांबरा ॥ विमुक्तकुंतला रूक्षा विधवा विरलद्विजा ॥ काकध्वजरथारूढा विलंबितपयोधरा ॥ सूर्पहस्तातिरूक्षाक्षा धृतहस्ता वरान्विता ॥ प्रवृद्धघोणा तु भृशं कुटिला कुटिले

क्षणं॥ स्फुलिंगा सान्निध्यानि त्रये भं यराकुल हास्यदा॥ विरलद्विजा विरलदंतेत्यर्थः॥ आंगिरसे॥ पूर्वा
श्वत्थावरो उत्तमांगे धमाल्यैरलंकृतौ॥ श्मशाने यागमहने यावंतौ शत्रुमिच्छतौ॥ ग्रामे वह्निं पूपोला
श्वैरिप्रसार्चे निरीक्षतौ॥ क्षिपतौ स्वमिति मिसर्वं निशि चेरि बलं बलात्॥ मारयंतौ त्रिशूलेन द
क्षहस्तगतेन वै॥ ध्यानं परमावतीमित्थं ज्ञात्वा घंपातयेत्परमिति॥ जपेल्लक्षचतुर्दश्यां पुरश्चरणे
सिद्धये॥ उपवासरतो मंत्री अनागारे दिवानिशं॥ श्मशाने विपिने वापि जपेल्लक्षं तु वाग्यतः॥
सोऽस्ती वः साईरासा अपुरश्चरणं करमीति॥ अक्षोपरि लिखेद्यंत्रं तस्मिन् संस्थाप्य द्विवं जपेत्
अथवाधिवं शत्रुनाम्नालुप्तं जपेन्मनुः॥ अस्यार्थः॥ तत्तलमंत्रं लिखित्वा तदधः अमुकं मार
य इति शत्रुनामघटितं लिखित्वा तदुपरि द्विवं जपेदित्यर्थः॥ सहस्रमानः शत्रुश्च ज्वरेण
परिगृह्यते॥ पंचगव्येन शांतिः स्यात् ज्वरस्य पपसापिवा॥ इरवेवलपंचोपचारैः संप्रपूज्य
जपेत्॥ प्रभुरालरमाह॥ लभारुहा मंत्रे रिपोराख्या मरङ्गैर्यो मिनीलकंठस्य दोजाये
लेन्नात्रो मनोर पुलजापतः॥ दृष्ट्वोक्ता कृश्मशाना नाम्नो लङ्घस्या दापमंत्रितं॥ विशोधिना
मष्टाश्मा सकसघमुष्वाटनं रिपोः॥ मंत्रितमष्टोत्तरशतमिति॥ अष्टाशास्कृदिपदितिशेषः॥
श्मशाने भस्मना कृत्वा द्विवं तस्योपरि न्यसेत्॥ विशोधिना न संस्कृतं ... पक्षे समर्चयेत्॥ महि
षीक्षीर स्पंचपघते शत्रुर्विपद्यते॥ महिषीरूपमास्याय स्वपेत्तं शत्रुं विनाशयेत्॥ मंत्रेणाने
न निखनेत् लङ्घस्यारि पुमंदिरे॥ ओद्यमुष्वाटयेन्नलं नात्र कार्या विचारणा॥ श्मशाने भस्म
नालिंगं कृत्वा पुष्पादिनार्चयेत्॥ भगवन्तिति समाभाष्य मनसा कर्मो विलयेत्॥ लिंबशा

कृष्णदावेशीसमाचाष्टशतं जपेत् ॥ दग्धा द्रुपं साध्यनाम्ना सद्यो विद्वेषयेदरीन् ॥ अस्यार्थः ॥ निव
काकच्छदावेशीकृतं तत्र यतदुपरि ॥ अष्टोत्तरशतं सततं स्त्री राजवश्यालेन द्रव्येण अमुकं द्वेषय द्वेषय स्वल
मुच्चार्य धूपं दद्यात् ॥ तथा च ॥ चिति काष्ठानले क्षीरहोमाच्छोलिः सदा भवेत् ॥ प्रकारांतरं ॥
रजोऽयव प्रदाने नगच्छेतद्रूपेण कालिका ॥ मारयत्परि मागत्येत्रीतिर्भवति नान्यथा ॥ शांतिः सर्वाभि
चारस्य पंचगव्येन जायते ॥ क्षीरेण वापि देवेशि मधुरत्रितयेन वा ॥ कीलैः क्षीरतरोर्विरचे विलि
खेन्मंत्रेण नामाक्षरं ॥ जलाशयत्र पुगे विलिख्य विरचनेदुम्मादने विद्विषो लतादह्य प्रलिखीर्ण
लविषारघाद्धिजेष्ठोवलिम ॥ लजस्वाभि लिभिसमकीलि लभरेगेहितदुम्मादनं ॥ विपक्षस्य समु
द्भुतासमिधो जुहुयाद्बुधः ॥ अन्यत्ताकटु तैलेन कैवला सामिधोऽथ वा ॥ अयुतं वा भूतं वापि होमसं
ख्या प्रकीर्तिता ॥ धुर्त्तूरे वा सार्षपं तैलं सार्द्रं जपेत्स्फुटीः ॥ जपन्वा केवलं मंत्रं द्रावयेद्रिपुमाह
वे ॥ तस्माद्रमावती मंत्रं जेतुकामः सदाभ्यसेत् ॥ इति ॥ इत्यादि प्रयोगः ॥ अथ भद्रकालीमंत्राः ॥
प्रासादबीजमुद्धृत्य कालीपदं समुद्धरेत् ॥ महाकालि पदं चोक्तो कालियुग्मं मलः परं ॥ अस्त्र मग्नि
प्रियांतोऽयं भद्रकाली मनुर्मतः ॥ आराध्य प्रजपेत्तिस्रम् अष्टोत्तरशतं मनुं ॥ जपमाला विधात
व्याअष्टोत्तरशतेन च ॥ आतव्येयं महाभद्रकाली सर्वेजयापहा ॥ आराध्येति अत्र शुद्धि प्रा
णप्रामौकृत्वा पंचोपचारैः ह्रीं वलिं गेह्रजये दित्यर्थः ॥ ततो ध्यानं ॥ क्षुत्क्षामा कोटराक्षीम
सिमलिनमुखी मुक्तकेशी रुदंती नाहं तृप्ता वदंती जगदखिलमिदं ग्रासमेकं करोमि ॥ हस्ता
भ्यां धारयंती ज्वलदनलशिखासन्निभं पाशयुग्मं दंतैर्जंबूफलाभैः परिहरतु भयं पातु मां
भद्रकाली ॥ प्रयोगमात्रं कर्त्तव्यं वैरिनिग्रहकारकं ॥ इयं देवी महादेवी वाऽत्रैनिग्रहकारिणी

पत्रैश्चिंतयान्नित्यां यं धर्मकामार्थसिद्धिदां ॥ अस्यास्तु प्रजने काले शिवलिंगे समाचरेत् ॥
अष्टोत्तरसहस्रं हि पुरश्चरणमीरितं ॥ अत्र पुरश्चरणादिकं दक्षिणकाली मंत्रवदिति के
चित् ॥ वस्तुतस्तु पुरश्चरणं अष्टोत्तरसहस्रजपः ॥ इति चंद्रकाली ॥ अथांगिरसे ॥ अथ
देव्याश्चंद्रकाल्या मंत्रोयमभिधीयते ॥ योराह्लोजयत्कामस्य दश्यतिजयमीप्सितं ॥ प्रणवं पूर्वमु
द्धृत्य मायाबीजं समुच्चरेत् ॥ ततो महापदं प्रोच्य योगेश्वरिपदं वदेत् ॥ फडंतो मंत्रराजोयं चंद्रे दकारषोडशाक्ष
रः ॥ ॐ ह्रीं महायोगेश्वरि फट् स्वाहा ॥ प्रजाकाले नमोंतस्याद्धोमे स्वाहांतमिष्यते ॥ पिप्पलाद ऋषिः प्रो
क्तो छंदो नास्ति यजुष्टिलः ॥ देवता चंद्रकाली स्यात् अयं दुर्गेति ये विदुः ॥ प्रणवो बीजमेतस्य हल्लेखा
शक्तिरिष्यते ॥ जपे च विनियोगोस्यात् दर्थवमुनिभाषितम् ॥ नियमो नास्ति मंत्रेस्मिन्न ततः पुरश्चरणं न
वेदिति ॥ केवलं विहितं कृत्वा यथाशास्त्रं फलं लभेत् ॥ षडंगमाह ॥ सानुस्वारो यमाकोह्य हृदयं संनिगद्य
ते ॥ तथैकारः शिवः प्रोक्त रकारश्च शिखा स्मृता ॥ ओकारः कवचं ध्येयं औं च नेत्रत्रयं विदुः ॥ अस्त्रं स्यात्फ
ट्कारोयं संप्रयोज्य तु पूर्ववत् ॥ रागन्यासमेतस्य मंत्रस्यैतथं वदंति वै ॥ ध्यायामां बिंदुक्षरां देवीं मातान्नन
येनत्रयां ॥ वामे कपालं च त्रिशूलं दक्षिणे सितथा कुशं ॥ लंबोदरी रक्तवस्त्रा पीनस्तननितंबिनी ॥ पद्म
स्थां युवतीं ध्यायेत्स्मेरास्यामतिसुंदरीं ॥ चंद्रकाली महादेवी जगद्धात्री सुरूपिलतां ॥ प्रजयेदं जपीठे शुस्यु
स्तदावरणान्नित्य ॥ त्रियुतं वायुतं वापि घृतहोमाप्ययोजयेत् ॥ आज्येनाज्यपलाशस्य समिधो वा हुनेद्बुधः ॥
अथवा जपमात्रेण जपस्यां न च संशयः ॥ चंद्रकाली च वेतस्य गुरहस्यविधिं ब्रुवे ॥ पूर्ववत्सर्वमंत्रस्या
द्विनियोगोस्य मारणे ॥ जपे वा विनियोगस्याद्धोमे न च जपेन वा ॥ चंद्रकाली च वा जोष्टा नयसिद्धिप्रदायिनी
सपत्नान्मे हन हन दह दह शोषय पातय ॥ अरलोसिव जनरान्त्या चेन त्याया रुक्समारय ॥ महादेवि महाकालीर
क्षस्वान्नियतांबिके ॥ ऋषिर्भृगुस्यादेतस्य छंदोनुष्टुप्प्रकीर्तितं ॥ देवता चंद्रकाली स्युर्बीजं निर्व्याजनाविच ॥

स्वराः शास्त्रमुच्यते आज्यहोमाज्जयो भवेत्॥ मारणं कटुतैलेन होमेन भवति ध्रुवं॥ मायाबीजेन कूर्चमोन्या
सम्भैव करांगयोः॥ श्मशानस्थित्वाग्निस्थितिवन्याग्निशौरवच्छायनुः शुशान्॥ धारयंती महाकाली घोरविकटदंष्ट्रिकाम्॥
ललज्जिह्वामत्युत्तुंदालंबमानपयोधरां॥ सम्मुखीं वह्निवमंतीं च त्रासयंती जगत्त्रयं॥ धावन्ति पतिता चाक्रेन्तसा
ध्येयात्युद्धे हि लेखिनी॥ गजे वा वाजिने वापि समारूढो महारणे॥ ध्यायेद्देवीं भद्रकालीं जपेन्मंत्रैरिह त्वं जपेत्
अक्षता भावयेद्देलोस्वयमक्षतितो व्रजेत्॥ तृणं कूटं यथा वायुप्रेरितं संग्रामे नो भवेत्॥ जपतो ध्यायत
श्चापि परसैन्यं प्रलीयते॥ नचास्ति जपसंख्यानं नियमश्च न विद्यते॥ ध्यायन्नेतां जपन्मंत्रं परसैन्यं जय
यसो॥ तस्माद्यत्नेन भूपालो विद्यामेतां समभ्यसेत्॥ दुर्बलोपि बलं यस्याः प्रसादाद्रिपुं जयेत्॥ अथ मंत्रां
तरं चास्या भद्रकाल्या निगद्यते॥ यस्याः प्रसादान्नृपतिरेकच्छत्री भवेद्भुवि॥ भद्रकालीपदस्यांते जयं दे
हि पदं वदेत्॥ फडंतोयं महामंत्रो घोरयुद्धे जयप्रदः॥ अस्यांगिरा ऋषिः प्रोक्तो छंदो नुष्टुबुदाहृतं॥ देवता
भद्रकालीति जयदुर्गेति गीयते॥ ह्रीं बीजं फट् शक्तिः स्याद्विनियोगो जयेमतः॥ शास्त्रा कुर्यात्षडंगानि प्रत्यक्ष
रमथो न्यसेत्॥ मस्तके च ललाटे च मुखे कंठे उरस्यतु॥ उदरे च तथा लिंगे उरुद्वयपदद्वये॥ इत्यं प्रत्यक्षरं न्य
स्य भद्रकाली स्वयं भवेत्॥ ततः समस्तमंत्रेण व्यापकं विन्यसेत्॥ ध्यात्वा कालीं रक्तवस्त्रां कुपितां च
द्रंष्ट्राकरालां॥ दक्षिणोर्ध्वे च तीक्ष्णखड्गं वामे रुधिरखर्परं॥ पद्मे पद्मासनां देवीं भद्रकालीं स्मरेद्बुधः॥ एवं संचिं
तयेन्मंत्री यावन्मंत्रीविधायन॥ जपेदर्द्धं च जुहुयात् ज्ञानानामयुतं सुधीः॥ कृष्णाष्टमीं समारभ्य नवम्या
वन्मताष्टमी॥ तावद्देतां प्रसज्याज्यं जुहुयात्रिमधुसमन्वितं॥ सर्वान्वैरिपृथ्वि विजितायं नृपे राज्यमकंटकम्॥
कृतस्तु तोपुराद्राज्योत्प्रसूतान्जितवान्स्वयं॥ होमाद्राज्ञो चरेत्प्रज्ञा तेद्राज्ञो जपेद्बुधः॥ केवलं चिंतयेद्दे
वीं जपहोमस्त्रो रक्षेत्प्रजन॥ विमलं जयमाप्नोति नचिराद्यो विदंवचः॥ अथेषा पत्रमेते स्याहस्ताव ध्यारिपुंजे
येत्॥ हेमपद्मगते पद्मे मध्ये मायायाषडि अपि॥ दलेषु चिलिखेद्दिक्षो मंत्रवर्णान्पृथक्पृथक्॥ दलाते वर्म
वर्मबीजोनिमात्कवियवेष्टयेत्॥ यंत्रमेतत्करे बध्वा भूपालिनं जेतुमीश्वरः॥ रणे जयोद्भवं पिवं सहस्रं
जुहुयाद्धृतैः॥ तावद्देवजपं कृत्वा यंत्रं बध्वा रणे विजयते॥ दुर्गापीठे च यो दुर्गा विधिनाविधिवित्तमः॥

अथापरं महाबीजं भद्रकाल्या निगद्यते ॥ यत्प्रसादान्महीपालो ह्यमंत्रं राज्यमश्नुते ॥ हकारश्च सकारश्च खका
रश्च ततः परं ॥ फकारश्च तथा रेफ तथैकारः सबिंदुकः ॥ सप्तवर्णं महाबीजं भद्रकाल्या निगद्यते ॥ जयदो यो
महामंत्रः गणेशोऽस्य महामनुः ॥ ह्स्ख्फ्रें ॥ भद्रकाली महाबीजं भवस्यैव जयप्रदं ॥ भद्रं रक्षत्वमिति प्रोक्तं तत्परं ब्र
ह्म कीर्तितं ॥ काली तमोमया शक्तिः सा च संहारिणी स्मृता ॥ संहारशक्तिसंयुक्तं परं ब्रह्म यदुच्यते ॥ भद्र
काली परे नैतत् मुनिभिः परिगीयते ॥ भद्रकाली महाबीजमपि तस्याभिधायकं ॥ सकारो जीव इत्युक्तः ह
कारो ब्रह्म उच्यते ॥ तयोरैक्यं परं ब्रह्म खकारेणाभिधीयते ॥ फकारः संहारिणी शक्तिस्तत्प्रसादं हि चैतनं
भद्रकाली परे नापि महारेवी समुच्यते ॥ संहारः शक्तिसद्ब्रह्म महावाक्यार्थमिष्यते ॥ संहर्त्री च विकृती च
स्थिति कर्त्री च संस्थितिः ॥ हंसः सोहं महाबीजं जपार्थं परिभावनं ॥ महाबीजं जपेन्मंत्रं स्वयं संहारश
क्तिमान् ॥ परमात्मा न वै ह्यजो जयं चाप्नोति चाक्षयं ॥ अथवा भद्रकाल्यैव घोररूपस्वरूपं च वन्दे ॥ मह
बीजं जपेद्ध्यात्वा जयमेति न संशयः ॥ न होमो न बलिर्नार्चा न च तर्पणमिष्यते ॥ ध्यानमात्राद्वद्युक्तं चेष्टप
ति जयमश्नुते ॥ भद्रकाली महाबीज ध्यानं सम्यक् वदाम्यहं ॥ यत्प्रसादान्महादेवो ध्यात्वारिमजयेद्रुद्रः ॥ काली
रक्तांबरा श्यामा पीनपीनपयोधरा ॥ कृशोदरी महारौद्री त्रिजगद्भयभक्षणा ॥ मम [illegible] मुखी देवी चंडिका
चंडविग्रहा ॥ शीर्षमालाधरा [illegible] पदस्थिता ॥ पंचवक्त्रा चतुर्वक्त्रा च ताम्रस्त्रग्दशनेत्रिका ॥ ऊर्ध्व
बाहुतलहृदया [illegible] मुखी मुखं ॥ पंचवक्त्रा महादंष्ट्रा विषपापीडितं रिपुं ॥ [illegible] पीडयती महाकोप
नरेण च ॥ दक्षे च कमलं [illegible] ॥ खड्गं च [illegible] कमलस्तथा ॥ [illegible]
चापोस्तं च धनुः खेटकमेव च ॥ एवं [illegible] भद्रकाली जयप्रदा ॥ ध्यात्वा [illegible] संग्रामे ज
यमिच्छता ॥ भद्रकाली महाबीजं जगतां प्राप्यते जयः ॥ ध्यानात् [illegible] महीपालः [illegible] बीजमभ्यसेत् ॥ तथा
पि जयमाप्नोति नात्र कार्या विचारणा ॥ अथोच्छिष्टगणेशमंत्राः ॥ हस्तिपदं समुच्चार्य पिशाचीति पदं त
तः ॥ देवराजं [illegible] ॥ वह्निजायावधिर्मंत्रस्तारोद्यः सर्वकामदः ॥ प्रण
२ इति भद्रकालीविषये शातव्यं ॥

वस्थाने गमितियाके चित् हस्तिपिशाचिलिखेद्यान्निवनिता गलदादिनः॥ इतितद्धोधात्॥ तथाच॥
स्मरन्नेतं महामंत्रं नरदेवं यस्य कस्य चित्॥ मुखं सर्वांगमेव रहितं बुध्या प्रकाशितं॥ तथान्ये॥ अतिथि
नं च नक्षत्रे नोपवासो विधीयते॥ तथेष्टं चिंतया मंत्रः सर्वकामफलप्रदः॥ अस्य पूजाप्रातः स्नानादि
कं तथशुद्धिप्राणायामांतं ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि सुग्रीव ऋषये॥ मुखे निचृद्गाय
त्री छंदसे॥ हृदि उच्छिष्टगणपतये देवतायै॥ तथाच॥ सुग्रीवोस्य ऋषिः प्रोक्तो गायत्री निचृता पु
नः॥ छंदस्तूच्छिष्टगणेशो देवता परिकीर्तिता॥ विनियोगः सर्वकामे प्रणवेन षडंगकं॥ ततः प्र
णवेन करांगन्यासौ कृत्वा ध्यायेत्॥ चेदं॥ षट्दीर्घभाजा गकारेण॥ रक्तमूर्तिं गणेशानं रक्ताभरण
भूषितं॥ रक्तवस्त्रं त्रिनेत्रं च रक्तपद्मासने स्थितं॥ चतुर्भुजं महाकायं द्विदंतं सस्मिताननं॥ इष्टं
च दक्षिणे हस्ते दंतं च तदधः करे॥ पाशांकुशौ च हस्ताभ्यां धारयंतं गजाननं॥ वामे सोदकपात्रं च
मुखे तं वेष्टयं स्थितं॥ ललाटे चंद्ररेखाढ्यं जटामंडलमंडितं॥ एवं ध्यात्वा॥ करस्थपुष्पेण मस्तकेन
शिरसि संपूज्य॥ बहिः पूजामारभेत्॥ अष्टदलपद्मं लिखित्वा पूजयेत्॥ मत्तेनार्घ्यपात्रं संस्थाप्य
दृशा धाप्रजप्य॥ तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य॥ पुनर्ध्यात्वा॥ अष्टदलपद्मे स्थापयेत्॥ त
तोपंचोपचारैः संपूज्य॥ षडंगेन पूजयित्वा॥ दलेषु हि॥ ॐ वक्रतुंडाय॰ एकदंताय॰ लंबोदराय॰ विक
टाय॰ विघ्नाय॰ गजवक्त्राय॰ विनायकाय॰ गणपतये॰ मध्ये हस्तिमुखाय॰ ततो देवं त्रिः संपूज्य नैवेद्यं
दत्वा यथाशक्ति जप्त्वा समर्प्य बलिरूपनैवेद्यमुपनीय॥ ॐ उच्छिष्टगणेशाय महाकालाय एष बलिं
नमः इति बलिं दत्वा॥ आचमनीयादिकं दद्यात्॥ विशेषफलाकांक्षिभिः॥ पुनः॥ ...
...ं पढ स्वाहेति मंत्रेण बलिं दद्यात्॥ ततः पुष्पमेकं दक्षिणादिक्षु ... मस्त्वेति विसर्जयेत्
अस्य पुरश्चरणं चतुर्लक्षं जपः॥ नसिद्धादि निमित्तोत्र चतुर्लक्षं जपेद्बुधः॥ इति वा स्यात्॥

तथान्व॥ कृत्वान्नं तु थद्यमारभ्य यावत्कृतान्वलु थिंद्धि॥ सहस्रं प्रजपेन्नित्यं यो विन्तियमपूर्वकं॥ स्नाप
येन्मधुनानित्यं नैवेद्यं गुडपायसं॥ भुक्त्वोच्छिष्टो जपेन्नित्यं गणेशोहं सदाप्रियः॥ स्वेतार्कनालेर्लिं कृत्वा र
क्तचंदनकेनवा॥ अंगुष्ठमात्रो संस्थाप्य द्विजाग्निगुरुसंनिधौ॥ जपादिपाडशसाहस्रं सिद्धमंत्रो भवेध्रु
वं॥ तथो॥ वल्मीकमृद्भिः प्रतिमां कुल्लालेन च क्रमस्कृतां॥ राज्यं दत्वा नरेंद्र कल्पं गुडैर्भक्ष्यो नदंनरेणां॥ त
वलेन पुरःक्षोभं निंबेनारिनिग्रहं दने॥ योषिदिति॥ योषिदनुपगमे पुरः सेरभित्यर्थः॥ प्रसंगादनेनोच्चिता
दनागतइलिदर्शनात्॥ तथा॥ उच्छिष्टश्चाशुचिर्भूत्वा जपरजनमाचरेत्॥ तानुच्छिष्टेन सिद्धेत न
स्मादेवं समाचरेत्॥ केषांचिन्मते पूजा नास्ति मनसा जपेत्॥ केषांचिन्मते करागन्यासो न स्तः॥ गणे
शोहमिति प्रवीत्त्वमर्त्तिं विचिंतयेत्॥ गर्गमते विजने वने स्थित्वा रक्तचंदनलिप्तसर्वांगः उच्छिष्टमुखो
जपेत्॥ केचिन्मते सर्वालंकारभूषितः सर्वावस्थासु जपेत्॥ इंद्रमते संहृज्य मोदकं चर्वयन्॥ भृगु
मते फलमुखम्॥ विभीषणमते मांसनैवेद्यं दत्वा तदेव स्वादनं॥ अथ प्रयोगः॥ राजद्वारे तथारण्ये
समानां गोत्रसंसदि॥ विवादे व्यवहारे च संग्रामे शत्रुसंकटे॥ नौकायां विपिने वापि स्थले च व्यसने त
था॥ ग्रामदाहे चौरविद्धे सिंहव्याघ्रादिसंकटे॥ स्मरणादेवदेवस्य सर्वं वै विफलं भवेत्॥ तत्सर्वं नश्य
तिक्षिप्रं स्तत्र्यैलैव यथा तमः॥ स चोच्छिष्टो गणेशानन यक्षराजो महाबलः॥ आराधितः सोपहारैः स
म्यगिष्टफलप्रदः॥ एवं कृत्वा वायवस्यां स धनेश्वरतां गतः॥ नंदेन गोकुले जप्तो नंदः स्वर्गमवाग
मत्॥ भृगुजेनास्कर राज्यार्थं विभीषणेन धर्मिणा॥ इंद्रेण च स्वराज्यार्थं स्मृतलेनेंद्रतां गतः॥ पे
शाचिकायेविघ्नेशाः कृत्वाभीष्टफलप्रदः॥ उच्छिष्टमंत्रराजस्य प्रचारो वर्णितो मया॥ अपामार्गस
मिद्धोमे सौभाग्यं लभते ध्रुवं॥ अष्टोत्तरशतं मंत्री अभिमंत्राभिमंत्रितम्॥ तथा तानरास्थिस
मुद्भूतं कीलं मंत्राभिमंत्रितं॥ निखनेन्मंदिरे यस्य भवेदुच्चाटनं परं॥ अथ वीथ्यां खनेद्यस्य कृयं

विक्रयतां हरेत्॥ मानुषास्थि समुद्धृत्य कीलकं चाभिमंत्रितं॥ निखनेन्मंदिरे यस्य मरणं तस्य नि
श्चितं॥ उच्छेतेषु भवेत्सत्वा स्तम्भितिः सर्वस्य संभवं॥ यस्य नाम्ना जपेन्मंत्रं सहस्रं वशगो भवेत्॥ पं
चसहस्रहोमेन उद्वहेद्वरांस्त्रियं॥ सहस्रदशहोमेन राजा सद्यो वशो भवेत्॥ लक्षजापेन रा
जैव द्विलक्षे राजपत्न्ययः॥ दशलक्षेण लक्ष्मीर्वश्यं तस्य च सर्वदा॥ अणिमादि महासिद्धिः कोटि
जापान्न संशयः॥ खेचरत्वं भवेन्नित्यं सर्वेश्वरत्वं च जायते॥ मंत्रं लिखित्वा शिरसि कंठे वा धारयेद्य
दि॥ सौभाग्यं सर्वरक्षा च भवेत्तत्र सुनिश्चितम्॥ इत्युच्छिष्टगणेशमंत्रः॥ अथ कवचं देव्युवाच
देवदेव महादेव जगदानंददायक॥ विघ्नाधिपवंद्योऽपि सर्वदेवनमस्कृत॥ त्वमेव सर्वशास्त्राणां त्रै
लोक्यनायकः॥ एवमपि प्राणनाथस्त्वं कथमेकं जगद्गुरो॥ कथयस्व मयि स्नेहो यद्यस्ति तव शंकर॥ उच्छिष्ट
गणनाथस्य मंत्रः श्रीस्कोद्दशाक्षरः॥ कवचं नोदितं नाथ तं मे नो वक्तुमर्हसि॥ तमेव यदि भिन्नं स्वामी मम
सर्वांगभूषण॥ ईश्वर उवाच॥ वारितासि महादेवि कालेकाले पुनः पुनः॥ तथापृच्छसि देवि त्वं कोटिशः
स्त्रियोप्यपि ते॥ कथयामि तव स्नेहात्कौमप्यं मातृजोरवत्॥ न रत्नं [illegible] सर्वलोकेषु दुर्लभं॥ स्नेहा
दस्यामि तां ब्रह्मयत्नस्तं प्राणवल्लभो ना॥ [illegible] देवानां च हिताय वै॥ [illegible] धर्षियष्यामि
[illegible] विहितासती॥ इदं कवचमाराध्य देहं [illegible] तोगतः॥ [illegible] स्थितिः [illegible] कुबेरो [illegible] नाधि
पः॥ जलाधिपो [illegible] ताधिपः॥ एवं हि सर्वदेवाश्च सर्वे सिद्धीश्वराः प्रिये॥ कवचस्य
प्रसादेन तस्मात्कोप्यं प्रयत्नतः॥ परद्विष्याय दुष्टाय नास्तिकाय दुरात्मने॥ न दातव्यं त्वया देवी मम
ध्यानं गेभकारणात्॥ ॐ अस्य सर्वरक्षाकर कवचस्य॥ सुग्रीव ऋषिः॥ गायत्री छंदः॥ उच्छिष्टगणे
शो देवता॥ सर्वरक्षार्थे वि॥ शिरसि सुग्रीव ऋषये॥ मुखे गायत्रीछंदसे॥ हृदि उच्छिष्टगणेशा
य देवताये॥ सर्वांगे दशाक्षरमंत्रवर्णेभ्यो नमः॥ ॐ गणेशो मास्थिर क्षेत्रे तत्रोऽष्ट गणनायकः॥

चक्षुषी सर्वदा पातु देवी हृदयनंदनः ॥ उच्छिष्टगणनाथो मे नासाग्रं सर्वदावतु ॥ श्रोत्रे रक्तवर्ततनुः पातु गंडौ
मुंडासदावतु ॥ एकदंतो रदान्व्याद्विदंतो रसनां सदा ॥ गजकर्णस्य दीर्घौ औष्ठौ चिबुकं रुधिराकृतिः ॥ कं
ठं मे पंडितः पातु ग्रीवां चित्रश्वेतालेपकः ॥ स्कंधौ लंबमुखं पातु भुजौ योगीशार्चबलः ॥ उच्छिष्टः सर्वविघ्नेशो
हृदयं मे सदावतु ॥ पार्श्वे पार्श्वे विभक्तांश्च मध्यं मोदकधारकः ॥ अंकुशी मे कटी मध्या दंतधारी गुदस्थलं
जानुनी लंबोदरः पातु पादौ पाशसनप्रियः ॥ नखान्मे सर्वदा पातु सर्वदेवाभिपूजितः ॥ एकदंतो च नः पातु
स्तनौ पातु दिगंबरः ॥ रुद्राक्षरमयो देवः सर्वांगमभितोवतु ॥ वक्रतुंडस्तत्रकंच मध्यास्तु वीथिसाधकः ॥ एकद
तः सदावक्त्रे पातु मां विघ्नपूजितः ॥ लंबोदरो दक्षिणस्यां मां मुदा मोदकप्रियः ॥ नैऋत्यां विकटः पातु मां
सदा पार्वतीप्रियः ॥ विघ्नेशः पश्चिमे पातु अविघ्नो वायवे तथा ॥ उत्तरे कौवेरके पातु मां सदा शान्तुनाद्य
नः ॥ ईशान्ये गजवक्त्रो मां मध्ये अत्रौ लोक्यपूजितः ॥ ऊर्ध्वं विनायकः पातु मामहो जगदीश्वरः ॥ अयोध्या
योगणपतिरंतरिक्षे तथापरे ॥ दिविनक्तं च वारे पुनर्मे हस्तिमुखोवतु ॥ पक्षे मासे च वर्षेरे च पलेदंडे च या
मके ॥ दिवारात्रौ गणेशो मां जन्मद्वारे च दुर्गमे ॥ शयने भोजने गेहे विवादे द्यूतक्षु विग्रहे ॥ उच्छिष्टगणनाथो
मां सर्वदा परिरक्षतु ॥ इति ते कथितं दिव्यं सर्वरक्षाकरं स्तवणं ॥ गोपितं कोटितंत्रेषु लक्ष्मणेहादिशोदिते ॥
यः पठेन्मानवः स्नात्वा पूजयित्वा गणाधिपं ॥ रात्रौ पाम हृये पाते विपिने पर्वते पि वा ॥ न तस्य दुरितं किंचिन्न
रोगाणां न भयं भवेत् ॥ नशान्तु भीर्न भयं तस्य न च मारी न यं तथा ॥ पुत्रवान् धनवान् श्रीमान्नानाविद्यानिधि
र्भवेत् ॥ बृहस्पतिसमो वक्ता पुलस्त्यो लिवेगवान् ॥ सत्यवीर्यवतेजस्वी धरणीसहस्राक्षेमी ॥ समुद्र इव गं
भीरो धीरो दानपराक्रमः ॥ वह्निरिव रिपुं हंता यक्षाधिप इव स्वरान् ॥ न विघ्नस्तिन संदेहो भन्नं वल्लादपि ताहृशः ॥
मातः कालेच मध्याह्ने संध्यायां वा समाहितः ॥ यः पठेत् कलितत्तस्य करस्थाः सर्वसिद्धयः ॥ एतत् पठितांगमव
र्त्यं लोक्य विजयी भवेत् ॥ शतवर्षाश्वदेवेति फलं वक्तुं न शक्यते ॥ इत्थाधापठय मानस्य कवचस्य महेश्वरि ॥

राजानो दासतां यांति किं पुनर्मानवादयः॥ इदं जपेत्समालिख्य ग्रंथे नैराष्ट्रचेपिच॥ स्वर्णपट्टे कृते शलागंध
चंदनकुंकुमैः॥ पूजयित्वा विधानेन धारयेद्दक्षिणे करे॥ मारयेच्छात्रवं वंशं कालरुद्र इव प्रजाः॥ उच्चाटन
वशीकार मोहनस्तंभनादयः॥ भवंति सततं तेस्य नात्र कार्या विचारणा॥ श्रीरः कृतो सन्निधौ लायमलो कृंनप
श्यति॥ जवत्सोराक्षवत्साबालवत्सारजःप्रजाः॥ वत्सराहूतं ते पुत्रं नाम धाहृ विधारणात्॥ न शाता कृत्स्नं
रिव्यं पदुपिष्ट गणाधिपं॥ पूजयेति नरा भक्त्या स्तेषां दुःखं पदे पदे॥ तस्मात्सर्वप्रयत्नेन कवचं मन्नुरस्तो दि
ते॥ पठितव्यं न संदेहो नरैः सर्वार्थसिद्धये॥ शिष्याय जन्मलि पुनःस्तायपरेयं रेदि मनाक्ष्मया॥ यत्र शिष्यो पदेयं
स्यात्तदा मयाप्य भाजनः॥ वस्त्रालंकार नैवेद्यैर्गुरुमभ्यर्च्य यत्नतः॥ गृह्णीयात्कवचं दिव्यमन्यथा निष्फ
लं भवेत्॥ इति रुद्रयामले ईश्वरपार्वतीसंवादे सर्वरक्षाकवचं संपूर्णम्॥ अथ वक्रतुंड मंत्रः॥ वक्ष्यामि
परमं गुह्यं कलौ सिद्धिकरं नृणां॥ विनायकं महामंत्रं यथा व्यासात्पुरा मया॥ वक्रतुंडाय हुं वर्णैः दीर्घमेवं षडक्ष
रः॥ वक्रतुंडाय पाद्यो हुंकाराष्टाक्षरो भवेत्॥ वक्रतुंडाय भुवनी तथा षडक्षरो परः॥ सिद्धाश्रमे समासीनं
सकरास्करं नमस्कृतं॥ सर्वे शुकं समागत्य मुनयो वाग्यंततः॥ तेषां जपो मूला नमस्यतः सुदुर्लभं॥ जग
त्कलिदोषेण हीनसत्वाः प्रविद्धुताः॥ श्रियावहि स्वृताः सर्वे तपःस्वाध्यायवर्जिताः॥ अथै होमादिपुर
स्स्वाध्यायस्य जपस्य च॥ न च वैदीर्घिहोत्रस्य लभो पापवरस्य मे॥ एवं मुनिवरैः पृष्टो शुको वेदविदांवरः॥
चिंतयामास सकलोत्मा प्रसन्नवांश्च मंत्रमनुः॥ प्रादुर्बभूव मनसो मंत्रराजः षडक्षरः॥ चिंतयमानस्य शु
कस्य जपतस्य षडक्षरं॥ षडंगानि क्रमेणैव प्रादुरासन्मुनीश्वराः॥ वं अंगुः क्रतजं· तुं मध्य· डां अना· मं
कनि· हुं कर· एवं हृदयादि॥ नमोलमंत्रेण हुं नमः भस्मात्मपूरं॥ ऋषिर्भृगुः कोस्य मंत्रस्य छंदोनुष्टुबुदाहृ
तं॥ वक्रतुंडाख्य विघ्नेशो देवता परिकीर्तिता॥ वं बीजं कथितं चास्य हुं शक्तिः समुदाहृता॥ इष्टप्राप्तौ विनियो
गः स्यान्मूलेन करशोधनं॥ मूलमंत्राक्षरैः षड्भिः षडंगपरिकल्पते॥ तथा॥ मुस्तके चक्रतुवो मध्ये
हृदि नाभौ च लिंगके॥ आधारे चक्रमेण स्यमेत्र वर्णान्न्यसेद्बुधः॥ ततः सर्वेण मंत्रेण व्यापकं न्या

समाचरेत्॥ अथ ध्यानं॥ पाशांकुशाभयवरान् धारयंतं गजाननं॥ लंबोदरं त्रिनयनं चिन्तल
त्कर्णचामरं॥ पद्मे पद्मासनासीनं वक्रतुंडं विचिंतयेत्॥ एतस्य वेदिके तेन पुरश्चर्या वि
धेत॥ यदि वा द्वादशसाहस्रजपमात्रपुरस्क्रियां॥ विशेषपूजामाह॥ अंगिरसे॥ अथ पूजां
प्रवक्ष्येहं वक्रतुंडमहात्मनः॥ विशोध्य स्नानेन शुद्धः प्राङ्मुखः समुपाविशेत्॥ अस्त्राय फट्
च संशोध्य तालत्रयमथाचरेत्॥ छोटिकाभिर्दिशो बध्वा भूतशुद्धिं समाचरेत्॥ प्राणाया
मं समुच्चार्य मातृकान्यासमाचरेत्॥ ऋषिश्छंदो देवतं च न्यसेच्छिरोजिह्वाहृदि क्रमात्॥ बीजं
शक्तिश्च संस्मृत्य विनियोगस्ततः स्मरेत्॥ स्वबाहू व्यापकं न्यस्य करन्यासं समाचरेत्॥ ष
डंगानि ततो न्यस्य ततः प्रत्यक्षरं न्यसेत्॥ विधाय व्यापकं न्यासं ध्यायन्तं यजेद्धृदि॥ हृत्पद्मं
विधिवध्यात्वा तत्रानंतादि चिंतयेत्॥ तस्योपरि स्थिता ध्येया तीव्रा चानंदशक्तयः॥ तीव्रा च
ज्वालिनी नंदा भोगदा कामरूपिणी॥ ततो तेजोवती सत्या विघ्ना विघ्नविनाशिनी॥ सर्वशक्ति
समुच्चार्य डेंतं च कमलासनं॥ ततो नमः परं दत्वा पीठमंत्रं समुच्चरेत्॥ अनेन कल्पितं पी
ठं कल्पिकापांगणेश्वरं॥ मनसा कल्पितैर्द्रव्यैरिष्ट्वा जप्त्वा बहिर्यजेत्॥ तारेण वार्घ्यपात्रं च कु
त्वा प्रोक्षणमाचरेत्॥ स्वदेहे मंडपे देवद्रव्ये सर्वत्र निक्षिपेत्॥ आत्मनेन मइस्फत्कालतारं
तिलकं न्यसेत्॥ कुसुमं शिरसि सिद्धिस्वाभ्यस्थाणस्वासने न्यसेत्॥ पूजादिक्रमतो मंत्री पीठपू
जां समाचरेत्॥ कर्णिकायां गणेशानं पूजयित्वा यथाविधिः॥ गणाधिपं गणेशानं गणना
यकमेव च॥ गणक्रीडं चतुर्दिक्षु केसरेंगानि पूजयेत्॥ दलमध्येषु विघ्नाधारं वक्रतुंडाद्ययोदले
दलोलेमातरः पूज्या बहिरष्टौ दिगीश्वराः॥ ततो बहिस्तदस्त्राणि वज्रादीनि समर्चयेत्॥ विश्वा
विश्वाविश्वधात्री भोगदा विघ्ननाशिनी॥ निधिः प्रदीपा पापघ्नी तथा पूर्णशशिप्रभा॥ वक्रतुंडैक

दंष्ट्रो च महोदरः गजाननो ॥ लंबोदराख्यविकटौ विघ्नराड् धूम्रवर्णकौ ॥ ब्रह्माणी चैव माहेशी कौमारी वैष्णवी
तथा ॥ वाराही चैव चामुंडा महालक्ष्मीश्च मातरः ॥ इंद्राद्याश्च दिगीशाना स्कंदसिद्धास्तथैव च ॥ एवमिष्ट्वा
गणेशानं जपहोमौ समाचरेत् ॥ अथ काम्यानि ॥ काम्यानां च पदार्थीनां पुत्रप्रथममुच्यते ॥ यदुत्प
न्नोत्तरोत्तरैः कैः सतार्थी भवति ध्रुवं ॥ ततः पुत्रार्थिनं कर्म मुख्यं काम्येषु उच्यते ॥ सौवर्णे विधिवच्चंद्रता
लमानेन कारयेत् ॥ तालमानं तालयुग्मं ॥ त्रिकोणमंडलं मध्ये ततः षट्कोणमंडलं ॥ ततश्चाष्टद
लं पद्मं च चतुरस्रं ततो लिखेत् ॥ त्रिकोणे देवतां लेख्या मंत्रबीजेन संयुता ॥ षट्सु वर्णान् षट्सु दले लेख्या
न्नेशार्णान्नष्टपत्रके ॥ एवं यंत्रं विनिर्माय संस्कुर्याद्विधिनाबुधः ॥ गणेशं तत्र संपूज्य वह्निं कुंडे पि प्रज
येत् ॥ ततः पलाशसमिधो मधुरत्रयसंयुते ॥ जुहुयाच्चायुतं मंत्री हुनेत्तावच्च सर्पिषा ॥ अथवा समि
धाज्यस्य जुहुयादयुतं बुधः ॥ ततः पुत्रमवाप्नोति कृतार्थो येन वै भवेत् ॥ इति धारणं यंत्रं पुत्रदं ॥ तथा
धनार्थी बिल्वसमिधा सर्पिषा चैव होमयेत् ॥ विद्याकामोश्वत्थसमिद्घृते वापि होमयेत् ॥ जयार्थी
प्लवदरिद्धाधिरणं जयमश्नुते ॥ अश्वकामो वटानां च गजार्थी उपसर्पिषा ॥ आयुष्कामश्च दूर्वाज्यं
नैस्यार्थी चेदने घृतं ॥ धन्यार्थी केवलाज्यं च यमधिरे कुरु सर्पिषा ॥ त्रैलोक्यं सकामश्च कैवल्याज्ये
न होमयेत् ॥ अष्टद्रव्यैस्त्रिमधुरैः गजार्थी होममाचरेत् ॥ अष्टद्रव्याण्यहं नारदाय ॥ मोदकैः पृथुकैर्ला
जैः सक्तुभिश्चेक्षुपर्वकैः ॥ नारिकेलैस्तिलैः शुद्धैः सूपक्वैः कदलीफलैरिति ॥ सर्षपै राजप्रजार्थी ब्राह्म
णार्थी घृतं हुने ॥ स्त्रीकामो गरुसर्पिश्च श्रीकामः पद्मसर्पिषा ॥ अश्वत्थाज्ये शांतिकामो द्रव्यार्थी वेतसाज्यकं ॥
धान्यार्थी धान्यसर्पिश्च गवार्थी वाज्यसर्पिषा ॥ सस्यार्थी सस्यसर्पिश्च करनार्थी न्विकुंडे ॥ धात्रीघृतेन च
द्रार्थी रस्यार्थी पद्मकाष्ठकैः ॥ अन्नकामश्चान्नघृते सहिताहोमयेद्बुधः ॥ सर्वोपद्रवशांत्यर्थं मभिषेकविधिं
चरेत् ॥ नारसिंहाभिषेकस्य विधिवत्सर्वमाचरेत् ॥ अथाभिषेकं गौरीस्नेन चक्रे तु उमतामनो ॥ असाध्येन
हि मयेस्य जपहोमं न मान्त्ररूम् ॥ तथा ॥ अथ सत्येन मन्यस्मिन्नपामार्गसमिद्वरैः ॥

मधुरत्रयसंयुक्तैरयुतंजुहुयाद्बुधः ॥ अत्रामुकस्तंभयेति मंत्रास्यांतेनियोजयेत् ॥ त्रासयेवंतेन मं
त्रस्यवा स्यन्तेन प्रयोजयेत् ॥ कृतोऽस्य महाशुंडोवक्रतुंडोरिपोर्मुखं ॥ स्तंभयंति संचिंत्य साधकैः
र्द्दशयीमता ॥ एवं संमुखमानीयांतं स्तंभयित्वा महारिपुं ॥ विद्रावयति तद्दृष्ट्वा विनिर्विसोगणनायकः ॥
अथवा केवलैराज्यैर्जुहुयाद्विलायस्क ह्रदरस्यवे ॥ अपामार्गसमिद्भिर्वा पलायेतरिपुस्स्वयं ॥ मध्येवं
नपलायेत परविद्यानिवारकः ॥ तत्सलायन सिद्ध्यर्थं परविद्यान्निवारयेत् ॥ पुनर्विद्रावणं कुर्याद्य
थाशास्त्रमनन्यधीः ॥ अथ शविजयस्याथ बलवाहनसंयुतः ॥ ततो नयामि महारूपांतिं मारयेच्च वि
धानतः ॥ तेनापिजय कामेन प्रयोगं क्रियते क्रियते यदि ॥ तन्निवारणकामोयं कुर्यात्प्रतिकृतिं क्रिया
यदि सोपि प्रकुर्वन्नप्रतिघातं निवारयेः ॥ कुर्यात्प्रतिघातं तु प्रतिघातनिवारणे ॥ एवं विजयमासा
घरोजामंत्रवेत्ततः ॥ प्रदद्यादक्षिणाभिर्वा तोषयित्वा गुरुमिप्रदायकं ॥ विद्वेषणं यदिच्छेच्च शत्रुराज्यवि
नाशनं ॥ नारिकेलं तदा हुत्वा कुलेविद्वेषणं भवेत् ॥ मोहनेवरदलं हुत्वा संमोहयति मंत्रवित् ॥ रिपुरंत
निरुत्साहसंस्कतोविवशो न भवेत् ॥ रिपुवशागतं आतोलतत्कार्यं यदीच्छति ॥ तमेपंकर्मकुर्वेत यथा
हसोद्धा नोक विः ॥ नारिकेलस्य शावलैर्मधुरत्रयसंयुतैः ॥ अयुतं वायुतं वापि जुहुयात्प्रवदेवित् ॥
रिपुपाशोनसंवव्यञ्जकुशोनानयद्भशं ॥ गणेशोरक्तवर्णस्त्वध्येयोध्याकर्षणे सदा ॥ प्रतेन्नत्र अमुकं त्रे
याकीघ्रमाकर्षयेति च ॥ योजयित्वाग्निकुंडेतं संमुखं चिंतयन्नहुनेत् ॥ अथचेद्यजमानस्य दुर्व्यसंप
पतेनहि ॥ तदाचैतुर्गुणोजप्याशाचुमाकर्षयेत्कवं ॥ द्रव्यहीनेवद्धक्तव्येस्तलेपलविपर्ययः ॥ द्रव्यवै
गुण्यदोषेण संतमप्यकृतं भवेत् ॥ तस्मान्मंत्रप्रशांसतिमानांसंजपमुत्तमं ॥ अथरचोच्चाटनेवांछ
न्मैरं कारयेन्नरः ॥ राजिकाभिस्तिमधुराक्तामिस्त्व्ययुतं हुनेत् ॥ मंत्रांते अमुकं शीघ्रमुच्चाटय
पदद्वयं ॥ योजयहोमकालेतु संमुखंप्रविचिंतयेत् ॥ धुन्वतं गणपं विघ्नो ध्यायेदुच्चाटने सदा ॥

एवमुद्वेषितं शत्रुं सम्यक् भीतो महीपतिः॥ विद्वारणस्य सिद्ध्यर्थं कारयेद् ब्राह्मणैर्द्विजैः॥ मरीचैस्त्रिम
धुरोपेतैः कटुतैलेन संयुतैः॥ जुहुयात्सर्वतन्मंत्री सर्वत्र ध्यानतत्परः॥ विप्राय स्वकृती राजा सं
तुष्टो महीं निवेदयेत्॥ वेदशास्त्रार्थनिष्ठाय सदाचारसमन्विताः॥ राजभिः पूजितो विप्रो जपेद्
ध्यानपरायणः॥ रिपूच्चाटनविद्वेषे कुर्वन्नेन स पापभाक्॥ अस्य पुरश्चरणं द्वादशसहस्रजपैः
होमं च कुर्यात्॥ तत्प्रशस्यात्तं महामंत्रं गुरोर्लब्ध्वा समाहितः॥ ब्रह्मचर्यरतः शांतः सत्यवाग्गुरुपूज
कः॥ शुद्धात्मा करणो दांतहविष्याशी समाहितः॥ जपेन्नु द्वादशसाहस्रं तत्पुरश्चरणं भवेत्॥ अंगा
रकदिने प्राते चतुर्थ्यां वा समाहितः॥ अमितोऽपि श्वेता लक्ष्मीर्लभते नात्र संशयः॥ अभ्यर्च्य गंध
पुष्पाद्यैर्हविषान्नायसेन च॥ भोजयेन्मंत्रसिद्ध्यर्थं मंत्रदैवं परं गुरुं॥ तदेकदशांशेन (?) वै जुहुया
त्तेन वै द्विजः॥ तथा॥ गणेशाराध्य॥ अथाग्निकुंडं च तुरस्रं लेपसमाश्रितो हस्तसमं समं चा॥
शिरालयो वा यथा गृहे स्वकीये कुंडं प्रकुर्यात् शुचिप्रदेशे॥ कैलासनिष्ठाग्निमथादधीत हरेद्बन्धनान
गृहान् स्वपा॥ शुचिष्विद्धितुः॥ इति वकुंडविधानम्॥ अथ कवचं॥ रोगाघाघः समनेसः सर्वा
र्थानामुपक्रमे॥ यत्नतो केलनसास्यस्तं नमामि गजाननं॥ ब्रह्मोवाच॥ नंदिकेशं च सर्वेशं नत्वा
नुग्रहकारकं॥ भुक्तिमुक्तिप्रदं नंदेशं सर्वरक्षाकरं परं॥ त्रिशूली च भूविरव्यातं मायुष्कारकमुत्त
मं॥ कवचं ब्रूहि मे देव शंकरे रमितोजसः॥ येन सर्वा नरी देवपिशाचोरगराक्षसान्॥ अजयं स्ता
न् रणे सिद्धस्तनुत्राणं करं परं॥ तदहं श्रोतुमिच्छामि धर्मकामार्थसिद्धिदं॥ आधिव्याधिहरं श्राव्यं
कमलावासकारकं॥ वाक्सिद्धिं लभते मर्त्यो ज्ञानकारणमुत्तमं॥ वक्तुमर्हसि देवेश नंदिकेश्वरस्य
तोत्तम॥ नंदिकेश्वरः॥ शृणु ब्रह्मन् प्रवक्ष्यामि गुह्याद्गुह्यतरं परं॥ विघ्नेशकवचं पुण्यं पवित्रं

पापनाशनं ॥ सर्वलोकहितार्थाय तुष्टेन चंद्रमौलिना ॥ भूतप्रेतपिशाचादिब्रह्मराक्षसनाशनं ॥
अग्निचोरभये चैव वशाकुमव्येगतोरणं ॥ सिंहव्याघ्रवराहादिभयकाले तु पस्थिते ॥ उक्तं कूट
दुष्टकादिदुष्टसत्वनिवारणं ॥ भेतापस्मारकुष्ठादिचातुर्थिकनिवारणं ॥ महारोगप्रशमनं राजय
क्ष्मनिवारणं ॥ अपमृत्युहरं दिव्यं शरीरारोग्यदायकं ॥ दुःस्वप्ननाशनं नित्यं सुस्वप्नफलदा
यकं ॥ इत्येवमादिसर्वेषु भयकाले तु पस्थिते ॥ एवं विघ्नेशकवचं जपित्वा स्तोत्रमारभेत् ॥
विघ्नेशकवचं गुह्यं परं नास्ति न संशयः ॥ तस्मात्पृणु प्रयत्नेन गणनूचलु मुखमहाशय ॥ शुचि
र्भूत्वा द्विराचम्य प्राणायामं मुखतेजसः ॥ शांतः सुपवित्रश्च मंत्रं तु सर्वे राजपेत् ॥ अयेन वि
धुवेचैवेचं दुस्सपोपरागयोः ॥ नित्यशेषे जपेद्धीमान् मुहूर्ते स्वकालये ॥ अस्य विघ्नेश्वरकव
चस्य ॥ आदिपुरुषऋषिः ॥ त्रिष्टुप् छंदः ॥ श्रीगणपतिर्देवता ॥ हं बीजं ॥ घं शक्तिः ॥ जं कीलकं ॥
ममाभीष्टसिद्ध्यर्थे विनि ॥ विघ्नेशं विश्ववंद्यं विमलसुयशसं विश्वरक्षासुदक्षं साक्षात्सर्वापदर्थ
प्रकटितसुगति पार्वतीप्राणसूनुं ॥ पायात्सर्वान्सुदानः स्वसुरमुनिगणान्साधके सिद्धिदं तं
कारुण्येनालया प्रहरणविरलेम्बविभ्राजं नमामि ॥ १ ॥ ॐ विघ्नेशः पूर्वतः पातु गणाध्यक्षः
सुदक्षिणे ॥ पश्चिमे गजवक्त्रस्तु उत्तरे विघ्ननाशनः ॥ आग्नेय्यां पित्रवत्सश्च नैरृत्यां स्कंदपू
जितः ॥ वायव्यामाखुवाहश्च ऐशान्यां देवपूजितः ॥ ऊर्ध्वतः पातु सुमुखो अधरायां गजाननः ॥ एवं
दशदिशो रक्षेत्कार्स्यः पापनाशनः ॥ जिह्वायां कपिलः पातु भर्कुटीचाकुशास्तु पृष्ठकः ॥ चक्षुर्मध्ये त्रि
नयनश्च वर्णौ गजकर्णकः ॥ कपोलयोर्मेहनिधिः कर्णमूले मेदोत्कटः ॥ स्कंदं तो देलयम्बेलु घदो
पातु महाशयः ॥ चिबुके नासिके चैव पातु मां पुष्करोदरः ॥ उत्तरोष्ठे जगद्व्यापि त्वधरोष्ठेमृतप्रदः ॥ जि
ह्वा विद्यानिधिः पातु तालु गृहसहायकः ॥ किन्नरैः पूजितः कंठं स्कंधौ पातु दिशांपतिः ॥ चतुर्भुजो भुजौ

पातु बाहू महालेमराधिपः ॥ हस्तयोरंघ्रिकास्तु हस्तांगुलिहरात्मजः ॥ हनुं पातु स्कंदपूर्वस्तु मनः प्रल्हा-
दकारकः ॥ प्राणापानौ तथा व्यानउदानं च समानकं ॥ यशो लक्ष्मींच कीर्तिंच पातु नः पार्वतीसुतः ॥ हृदये
मम परं ब्रह्मस्वरूपो जगतः पतिः ॥ स्तनौ मे दरपो धस्तु स्तनमध्यं तु शंकरी ॥ उदरं तुंदिलः पातु नाभौ
पातु स्वनाभिकः ॥ कटिं मे वामनो नित्यं पातु मध्यं तपावनः ॥ मेढ्रं पातु महायोगी लिंगं पार्श्वौ सिवर्दरच्छकः ॥
जितेंद्रियः पातु गंडौ गुह्यं पातु गुहाग्रजः ॥ शुक्रं पातु स्कंदशुक्रं स्कंदतु वै पातु स्कंदपरः ॥ जंघा देहीम-
गजं घो जानुयुग्मं जगद्गुरुः ॥ गुल्फौ रक्षाकरः पातु पादौ मे नंदिनः प्रियः ॥ सर्वांगं सर्वसंधौ च पातु दे-
वारिमर्दनः ॥ पुत्रमित्रकलत्रादीन् पातु पाशांकुशायुधः ॥ धनधान्यपशूंश्चैव गृहक्षेत्रं निरंतरं ॥ पा-
तु विश्वात्मको देवो वरदो भक्तवत्सलः ॥ रक्षाहीनं यद्घरं गं कवचेन विना स्थलं ॥ तत्सर्वं रक्षयेद्देवो माय-
तो विश्वात्मजितेंद्रियः ॥ अवद्यां पर्वताग्रे च मार्गे यानादुपद्रवे ॥ जलस्थलगतं वापि पातु मां पापहारकः ॥
सर्वतः पातु देवेशः सप्तलोकैकसंस्थितः ॥ य इदं कवचं पुण्यं पवित्रं पापनाशनं ॥ प्रातः काले जपेन्म-
र्त्यः सदा भयविनाशनं ॥ कुक्षिरोगप्रशमनं लूतास्फोटनिवारणं ॥ मूत्रकृच्छ्रप्रशमनं बहुमूत्रनि-
वारणं ॥ बालग्रहादिरोगाणां नाशनं सर्वकालिकं ॥ यः पठेद्धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥ यत्र य-
त्र गतश्चापि तत्र तत्रार्थसिद्धिदः ॥ यः शृणोति जगतीह मानवो यक्षरक्षसुरसिद्धपूजितः ॥ अग्र-
ग एव कवचेन संस्तुतो सर्वकामफलभाक् सदा रः ॥ पं ब्रह्मरूपिणमचिंत्यमनेकरूपं ध्यायेज्जगत्कवि-
यतं त्रिमुखा मुनींद्रः ॥ सर्वार्थसिद्धि तरुचिरं लभते मनुष्यो विघ्नेशलोकवसतिं क्षपितावसाने ॥ इति च
विघ्यो॰ कवचं ॥ अथ प्रणदावंत्रः ॥ तत्त्रयं विंदुसंयुक्तं लज्जाबीजं सविंदुकं ॥ लक्ष्मीबीजं ललाटे तु रीसं-
युक्तं च रतिप्रिया ॥ स्वाहांतो मनुराख्यातो मंत्रराजोत्तमोत्तमः ॥ तं चांते रे ॥ तत्त्रयं विंदुसंयुक्तं ल

स्वीप्रणवमेवच ॥ मायाबीजं समुध्दृत्य सेतुध्याच्चरतिप्रिया ॥ यद्दिजापायविप्रोक्तो मंत्रराजोत्तमोत्तमः ॥
लक्ष्मीप्रडार्थं श्रीबीजौ कुबेरमते ऽयं मंत्रः ॥ अस्य प्रजापालः ऋष्यादि न्यूलमुद्दिप्राणायामौ कृत्वा ऋष्या
दिन्यासं कुर्यात् ॥ यथा ॥ शिरसि कुबेराय ऋषये ॥ मुखे पंक्तिछंदसे ॥ हृदि धनदायै देवतायै नमः ॥
ततः करांगन्यासौ ॥ श्रां अंगुष्ठाभ्यां नमः ॥ श्रीं तर्जनीभ्यां स्वाहा ॥ इत्यादि एवं हृदयादिषु ॥ ततो ध्या
नं ॥ कुंकुमोदरगर्भाभां किंचिद्यौवनशालिनीं स्तनालकोमलभुजां चैव पराङ्गदविभूषितां ॥ तुलाको
टिपारिजात पादपद्मद्वयान्वितां ॥ पालिस्य हारमुकुटकुंडलादि विभूषितां ॥ नीलोत्पलद्वयं किं
चिदुद्यत्कुच विराजितां ॥ कराभ्यां भ्राम्यकमलौ रत्नवस्त्रां गरावनिर्णीं ॥ हेमप्राकारमध्यस्थां रत्न
सिंहासनोपरि ॥ आयेत्कल्पतरोर्मूले देवीं तां धनदायिकां ॥ एवं ध्यात्वा मानसैः संपूज्य बहिः पूजा
मारभेत् ॥ अस्याः पूजायंत्रं ॥ नवयोन्यात्मकं चक्रं चिलिखेत्कर्णिकोपरि ॥ दिग्दलं पद्ममालिख्य चतुर
स्रं लिखेद्बहिः ॥ कोणेषु वज्रान् संलिख्य मध्ये बीजं समुद्धरेत् ॥ ततो अर्घ्यस्थापनं ॥ पूर्ववत्पात्रमक्षा
ल्यन मद्रस्य वेनापूर्य तत्र प्रणवेन गंधपुष्पं निक्षिप्य तीर्थमंत्रेण तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य तदुप
रिमूलं दशधा जप्त्वा तज्जलं किंचित्प्रोक्षणीपात्रे संस्थाप्य तेनोदकेनात्मानं पूजोपकरणं मूलेन
शिरः स्वुक्ष्य आधारशक्त्यादि ह्रीं इति नाम्ने नमः ॥ इत्यंतं पीठपूजां विधाय ॥ ॐ पद्मासनाय नमः ॥
इति मध्ये संपूज्य पुनर्ध्यात्वा पीठे आवाह्य पंचोपचारादिना संपूजयेत् ॥ ततो योनिमुद्रां प्रदर्श्य
केशरेषु अग्न्यादिकोणे मध्ये दिक्षु च ॥ श्रां हृदयाय ॥ इत्यादिना षडंगेन पूजयेत् ॥ ततो दले पुर
वादि ॥ ॐ लक्ष्म्यै नमः ॥ एवं पद्मायै पद्मालयायै श्रियै हरिप्रियायै तारायै कमलायै अंजायै चं
चलायै लोलायै मध्ये पुनर्देवीं च पूजयेत् ॥ ततो यथाशक्ति जप्त्वा जपं समर्प्य क्षमस्वेति वि
सर्जयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तथा च ॥ प्रजपेद्दशलक्षं त्रिणारजादि फलकेन तु ॥

लक्षजपेन मंत्रसिद्धिः पुरश्चर्यां समाचरेत् ॥ विनियोगान् यथा कुर्यात्साधकः स्वमनोरथा
न् ॥ शतमौन्वे जप्यते चाष्टसहस्रं सप्तवासरान् ॥ एतेनैव च सिद्धिः स्यात् पुरश्चर्यादिको विधिः
किमिह दुर्लभं देवि साधये यदि मानवः ॥ भुक्त्वा वाप्यथवा भुक्त्वा पायसान्नं प्रदापयेत् ॥ दूर्वाङ्कु
तोथवा शौन्चमके ताऽपि कुर्वेत लतां ॥ यः स्मरेद्दिविविधालां दारिद्र्यं नाधिगच्छ्यते ॥ कामदेवं यजेत्
पार्श्वे देव्या प्रत्यहमादरात् ॥ तेन देव्या महाप्रीतिर्वाञ्छितार्थं ददाति च ॥ पूजान्ते च समायाति रा
त्रौ देवी धनेश्वरी ॥ सर्वालंकारसंयुक्ता त्वरिता याति निजालये ॥ धनं च विपुलं दत्वा साधकस्य
मनोरथान् ॥ पूरयित्वा महेशानि वशगा जायते ध्रुवा ॥ पद्मानन्या महेशानि चंदनेनानुलेपनं ॥ दातव्यं
सर्वदा तस्यै नित्यं दारिद्र्यशान्तये ॥ नैवेद्यं च प्रदातव्यं नित्यं दारिद्र्यशान्तये ॥ स्वयमाहेति यक्षिणी यो
मोऽस्य रतिमानवः ॥ तस्य दारिद्र्यसंन्यासं नास्ति संदासीव त्वकुर वाण्यहं ॥ सहस्रं सप्ततियावत् पुरश्चर
णमुच्यते ॥ तथाष्टलेन खंडेन मधुनाञ्चदशांशतः ॥ होमोऽपि चाविधातव्यः क्षणात् दारिद्र्यशान्तये
पूजा कार्या महादेव्याः भक्त्या दत्वेनानुलेपिता ॥ ताम्रपात्रे तथा कार्यं मंडलं सुमनोहरं ॥ तत्र पूजावि
धानं यादेव्या एवं मनीषिणा ॥ कृतो दारिद्र्यचक्रं कास्या सप्तकोटीश्वरो नरः ॥ अंगन्यासं करन्यासो
नागं चैव सम्परेवता ॥ कुबेरस्य मतेनास्याः पूजापि क्रियते तथा ॥ अथ स्मशानकाली ॥ लदुक्ते तत्तं
त्रे ॥ वाणी मायां ततो लक्ष्मीं कामबीजमतः परं ॥ कालिके संपुटं ते न च तुर्थं बीजमालिखेत् ॥ ऐं कास्यां
एीम तारे विचतुर्वर्गप्रदायिनी ॥ अस्या यंत्रं ॥ पद्ममष्टदलं पत्रे लक्षा से परणीत्रयं ॥ चतुर्द्वारसमा
युक्तं मध्ये मन्त्रं समालिखेत् ॥ दलेष्वष्टस्वविलिखेत् कवर्गादष्टवर्गकं ॥ परण्यां विलिखेद्दापं
चतुष्कं चैव चतुष्कके ॥ पूर्वादि उत्तरान्तं च मध्ये देवी प्रपूजयेत् ॥ अस्याः पूजाप्रयोगः ॥ प्रातः

कृत्वादिप्राणायामांते कर्म कृत्वा ऋष्यादिन्यासं कुर्यात्॥ शिरसि भैरव ऋषये॥ मुखे उष्णिक् छंदसे॥ हृदि श्म
शाने कालिकायै देवतायै॥ गुह्ये क्रीं बीजाय॥ पादयोर्मायाशक्तये॥ सर्वांगे श्रीं कीलकाय॥ ततः कृतांग
न्यासो॥ ऐं अंगुष्ठा॥ क्रीं तर्जनी॥ श्रीं मध्यमा॥ क्लीं अनामि॥ कालिके कनिष्ठा॥ ह्रीं आदिनाभ्यां तं करतलपृष्ठा॥
एवं हृदयादि॥ ततो ध्यानं॥ अंजनाद्रिनिभां देवीं श्मशानालयवासिनीं॥ रक्तनेत्रां मुक्तकेशीं शुष्कमांसा
तिभीषणां॥ पिंगाक्षीं वामहस्तेन मद्यपूर्णं समांसकं॥ सद्यः कृत्तशिरो दक्षहस्तेन दधतीं शिवां॥ स्मित
वक्त्रां सदा शवमांसचर्वणतत्परां॥ नानालंकारभूषांगीं नग्नां मत्तां सदाशवैः॥ एवं ध्यात्वा यजे
द्देवीं श्मशाने तु विशेषतः॥ गृहे वापि गृहस्थश्चापि मत्स्यमांसैः सुभोजनैः॥ नग्नो नेत्वा महादे
वीं पूजाराग्रे विशेषतः॥ पूजनं तु॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पुनर्ध्यात्वा पंचो
पचारैः संपूज्य पत्रे पुष्पाक्षतादिमात्रैः पूजयेत्॥ तद्दक्षिणे सिंतांगादीन् भैरवान् पूजयेत्॥ अ
स्य पुरश्चरणे एकादशलक्षजपः॥ तथोक्तं॥ वर्णलक्षं जपेन्मंत्रं तद्दशांशेन होमयेत्॥ मंत्रांत
रं॥ तत्रैव॥ कामबीजं समालिख्य कालिकायै समालिखेत्॥ नमोन्तेन चेद्देवेशि सैषा एकोनमनुर्नमः
क्लीं कालिकायै नमः॥ मंत्रः॥ षडंगं कालिकादेवी अन्यत्सर्वं तु पूर्ववत्॥ अथ बगलामुखी॥ अथा
स्त्रं संप्रवक्ष्यामि सद्यः प्रत्ययकारकं॥ साधकानां हितार्थाय स्तंभनाय च वैरिणां॥ यस्याः स्मरण
मात्रेण पवनोपि स्थिरायते॥ ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं स्तंभय जिह्वां कीलय पर बुद्धिं ना
शय ह्लीं ॐ स्वाहा॥ प्रणवं स्थिरमायां च ततश्च बगलामुखि॥ तदंते सर्वदुष्टानां ततो वाचं मुखं पदं॥
स्तंभयेति पदं जिह्वां कीलयेति पदद्वयं॥ बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत्॥ लिखेच्च
पुनरोंकारं स्वाहेति पदमंततः॥ षट्त्रिंशदक्षरा विद्या सर्वसंपत्करी मता॥ स्थिरमाया ह्लीं॥ वह्निहीनं
भृगुर्माया॥ स्थिरमाया प्रकीर्तिता॥ तथोक्तं॥ तंत्रांतरे॥

ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा॥ बुद्धिहीनं
हूं मायापुरुषं बगलामुखी सर्वभुक्॥ दुष्टानां वाच विस्फोटक मुखं स्तंभय वीर्त्यं यैतत्॥ जिह्वां कीलय बुद्धिं
तु विनाशाय परं वरेतत्॥ पुनर्वस्त्रं जैलतस्तारं बुद्धिं जायावधि चर्चयेत्॥ ताराद्रिकाच तुल्यं हादसरा बग
लामुखी॥ इति मंत्रोत्तरं॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादि प्राणायामांतं विधाय ऋष्यादिन्यासं कुर्यात्
ध्रुवसि नारद ऋषये॰ मुखे त्रिष्टुप् छंदसे॰ हृदि बगलामुख्यै देवतायै॰ लिंगे ह्लीं बीजाय॰ पादयोः स्वा
हा शक्तये॰॥ ततश्च न्यासं कृत्वा लौ दृशोः श्रोत्रयोः गंडयोः नासिकयोः पुनः॥ ॐ ष्ठयोः मुखवृत्ते च दक्षिणांसे
च कूर्परे॥ मणिबंधे गुलिमूले ग लेच कुचयोर्हृदि॥ नाभौ कट्यां गुह्यदेवो रोमांसे कूर्परे तथा॥ मणि
बंधे गुलिमूले तत्र विन्यसेत् पुनः॥ दक्षे वामे चोरुजानोर्गुल्फयोः॰ गुलिमूले रूः॥ क्रमेणामं
त्रवर्णास्तु न्यस्तो ध्याये समाहितः॥ ततः करांगन्यासो॥ ॐ ह्लीं अंगुष्ठा॰ बगलामुखि तर्ज॰ सर्वदुष्टानां म
ध्यमा॰ वाचं मुखं स्तंभय अनामा॰ जिह्वां कीलय कनिष्ठा॰ बुद्धिं नाशय करतल॰॥ एवं हृदयादिषु॥ ततो
मूलांते आत्मतत्वव्यापिनी बगलामुखी श्रीपादुकां पूजयामीति मूलाधारे मूलांते विद्यातत्वव्यापि
नी बगलामुखी श्रीपादुकां पूजयामि हृदि शिरसि॥ मूलांते सर्वतत्वव्यापिनी बगलामुखी श्रीपादुकां पूज
यामि सर्वांगे॥ गंभीरांच मदोन्मत्तां स्वर्णकांतिसमप्रभां॥ चतुर्भुजां त्रिनयनां कमलासनसंस्थितां
मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकं॥ पीतांबरधरां देवीं दृढपीनपयोधरां॥ हेमकुंडलभूषां च
पीतचंद्रार्द्धशेखरां॥ पीतभूषणभूषां च स्वर्णसिंहासनस्थितां॥ एवं च परविध्यायां न्यासः स्यात्सर्व
समंततः॥ अथ ध्यानांतरं॥ ततो ध्यानं॥ मध्ये सुधाब्धि मणिमंडपरत्नवेदीसिंहासनोपरिगतां प
रिपीतवर्णां॥ पीतांबराभरणमाल्यविभूषितांगीं देवीं नमामि धृतमुद्गरवैरिजिह्वां॥ जिह्वाग्रमा

दायकरेण देवी वामेन शत्रून्परिपीडयंती ॥ गदाभिघातेन च दक्षिणेन पीतांबराढ्यां द्विभुजां न
मामि ॥ एवं ध्यात्वा मानसैः संपूज्य बहिः पूजामारभेत् ॥ तत्र प्रथमम् अर्घ्यस्थापनं ॥ यथा स्वगुरुक्तं
चतुरस्रं विधाय हरिद्रावारि कलशे पूर्ववारि दिक्षु च कुंकुमाक्षतचंदनैः ग्लौं गणपतये नमः इ
त्यनेन गजदानेन संपूज्य तेन मंत्रेणार्घ्यपात्रमापूरयेत् ॥ ततो वारत्रयं विघ्नांगानि संपूज्य
विन्यसेत् ॥ ततो धेनुयोनिमुद्रे प्रदर्श्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य अस्या यंत्रमू
त्मस्य षडस्रं च तच्चाष्टदलं भूपुरान्वितं ततो मूलमुच्चार्य आधारशक्तिकमलासनाय ॥ एवं मूले
पद्मासनाय ॥ ततः पूर्ववत् पीठे आवाह्य षडंगानि विन्यसेत् ॥ ततो मुद्राः प्रदर्श्य पुरतः षडंगे
मंडलं यजेत् ॥ ततो मूलमंत्रेण मंत्रयित्वा धेनुयोनिमुद्रां प्रदर्शयेत् ॥ ततो आत्मविद्याशिवैस्त्व
तैर्बिंदुत्रयं मुखं कक्षि शोत तर्जन्यंगुष्ठयोगेन सांगां सावरणां बगलामुखीं तर्पयेत् ॥ ततो यथासंभ
वोपचारैः पूजयित्वा आवरणपूजामारभेत् ॥ षट्कोणेषु पूर्वे ओं स्तंभनायै ॥ एवमग्निकोणे
जगसर्पिण्यै ॥ ईशाने जगारताये पश्चिमे जगसिद्धायै नैर्ऋते जगन्निपातिन्यै वायौ जगमालि
न्यै अष्टपत्रेषु ब्राह्म्याद्याः पूजयेत् ॥ पत्राग्रेषु जयायै विजयायै अजितायै अपराजितायै जंभि
न्यै स्तंभिन्यै मोहिन्यै आकर्षिण्यै ततो द्वारेषु ओं भैरवाय ॥ तद्बाह्ये इंद्रादीन् वज्रादींश्च पूजयेत् ॥
ततो मूलेन पाद्यादिकं दत्वा यथाशक्ति जपादिकं विधाय त्रिशूलमुद्रां प्रदर्श्य पुष्पांजलित्रयं दत्वा दे
व्यायोनिमुद्रे प्रदर्श्य ॥ ततो भैरवाय बलिं दत्वा विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्ष
जपः ॥ तथा च ॥ पीतांबरधरो भूत्वा पूर्वाशाभिमुखः स्थितः ॥ लक्षमेकं जपेन्मंत्रं हरिद्राग्रंथिमा
लया ॥ ब्रह्मचर्यरतो नित्यं प्रयतो ध्यानतत्परः ॥ प्रियंगुकुसुमेनापि पीतपुष्पैश्च होमयेत् ॥ २६

२

अथ प्रयोगः॥ कुर्वते वा कृपतिस्तंभं दुष्टानां बुद्धिनाशनं॥ जयहोमप्रयोगेन मंत्रं सम्युक्तं जपेत् हरिद्राहरितालाभ्यां लवणेन जुहुयात्त्रिभिः॥ स्तंभयेत्परसेनां निनाच्च शापीविचारणा॥ अथ चापि तपुष्पैः त्रिमध्वक्तैः होमयेत्॥ स्तंभनेषु च सर्वेषु प्रयोगे प्रययावह॥ ॐ शारयोः संमुखयो र्मूर्धि चः द्विरसोलिखेत्॥ मध्यमं नाम साध्यस्य तद्बहिश्चाक्षरद्वयं॥ बीजं द्वितीयवर्गस्य तृतीये विंदुभूषितं॥ चतुर्दशस्वरोपेतं संलिखेत्पृथिवीगतं॥ तद्बहिः ठकारश्रेणी चतुर्दिक्षु लिखेदित्यर्थः॥ तादृशाक्षरद्वयं ठकारद्वयमध्यस्थितं कुर्यादित्यर्थः॥ ठकारेण समावेष्ट्य चतुष्कोणपुटं बहिः॥ तत्कोणरे खासंसक्तैः वज्राष्टकं लिखेत्॥ त्रिशूलं मध्यरेखायां पृथ्वीबीजानि पार्श्वयोः॥ अष्टधापि च कोणे षु तद्बहिर्वसुकं लिखेत्॥ पृथिव्यं लरिलं यादृमात्कोपरिमंडलं॥ आवेष्ट्य चाष्टधा पश्चात्तद्बा ह्ये स्थिरमायया॥ निरुद्धां कुंभबीजेन नादसंमीलितां घृणा॥ लिखेत्पृथ्वीदानवेष्ट्य पश्चात्स्व बगलामुखी॥ पद्मपाषाणपट्टे वा हरिद्रोन्मलद्रित्यर्थः॥ रअधः रुलनादविंदुइत्यर्थः॥ त्रि शूलं मध्यांपार्श्वे द्वयेलकारं समालिखेदित्यर्थः॥ स्थिरमायया अष्टधावेष्ट्य तोत्तकैः॥ दि त्वक्रस्य मलाविपरीतलतः॥ मृत्तिकां समुपादाय वृषभं कारयेत्ततः॥ यंत्रं तदुपरि न्यस्य ताल चारतः॥ दुष्टस्य स्तंभयस्येवमुखं वाचस्पतेरपि॥ इति बगलामंत्रः॥ चामुंडातंत्रे॥ काली तारा छिन्नविद्या च मातंगी कमलात्मिका॥ एतादशमहादेवी महाविद्याप्रकीर्तिता॥ बगला सि द्धिविद्या च मातंगी कमलात्मिका॥ एतादश महादेवी महाविद्याप्रकीर्तिता॥ अथ करणी पिशाचीमंत्रः॥ तत्र मंत्रोद्धारः॥ चामुंडातंत्रे॥

कर्णस्येक्षणज्ञोहितोवक्रगलोनंताश्चकूरोग्रदातीलानागतमर्णयुक्तनुवनेश्रीवह्निजायान्विता॥
ताशयामनुरेषलक्षंजपतोव्यासेनसंसेवितः॥ सर्वज्ञं लभते चिरेण नियतं पैशाचिकीमर्चितः॥
ततो ध्यानं॥ रक्तांरुक्षविलोचनांत्रिनयनांखर्वांचलंबोदरींवं धूम्रारुणजिह्विकांवरखरांभीमत्करा
मुन्मुखीं॥ रक्तांचिर्जटिलांकपालविलसत्पाणिद्वयांचंचलांसर्वज्ञांशवहृत्कलाधिरूढांपैशाचि
कींतांनमः॥ इति ध्यानं॥ अथ पूजा॥ निशायामर्धरात्रौ च हरिद्रन्यस्य पिशाचिकीं॥ दग्धमीनबलिंदत्वा
रात्रौ संपूज्य संजपेत्॥ ॐ कर्णपिशाचि दग्धमीनबलिंगृह्णगृह्णममसिद्धिंकुरुकुरुस्वाहा इत्यनेन दे
ग्धमीनबलिंदद्यात् रक्तचंदनं प्रकुजेवापुष्पादिकंचयत्॥ अम्लं कुरु देवि त्रिः स्वाहा इति प्रोक्षये
ज्जलैः॥ मध्याह्ने एकभुक्तं निरामिषं कृत्वा यत्किंचिज्जपरात्राविपि तत्संख्यं जपेत्॥ अन्यत्किंचि
मानुक्तं तां रतानिहितः॥ जपस्य दशांशतर्पणं॥ ॐ कर्णपिशाचीं तर्पयामि॥ एवं कृते मेण लक्षमेकं पु
रश्चरणं कृत्वा दशांशं होमयेत्॥ तद्दशांशं तर्पणं कृत्वा वरं प्रार्थयेत्॥ ततः रक्तचंदने
नलिखित्वा यंत्रो यदि इष्टदेवतां पूजयेत्॥ सिद्धिलक्षणमुच्यते॥ गगनमंडले हंकारादि अवेपा
दीपाग्नि त्रिशरारूपसंदर्शनात्॥ सिद्धिर्भविष्यतीति ज्ञात्वा यथाविधि समाचरेत्॥ प्रभावं माया
कर्णपिशाचिनि मे कर्णे कथय हुं फट् स्वाहा॥ प्रदीपतैलं पादयोर्दत्वा रात्रौ लक्षं जपेत्ततः॥ सर्व
श्रोतव्यति॥ नास्य पूजा ध्यानं॥ तथा तारं कामबीजं जया देवि स्वाहा॥ अस्यापि न्यासादेतनावः॥
रवीक्षं लक्षं जप्त्वा गृहमोपिकं॥ निपात्य तदुपरि जपाद्देवि यथाशक्ति संपूज्य तावज्जपेत् याव
तू साजीवति॥ ततः सिद्ध्यति॥ सिद्धिस्तु मानसादि प्रश्नोत्तरं कर्णे सा आयाति तस्याः पृच्छेस्सर्वं भूतल क
विद्यादि क्षुद्र्यति॥ इति कर्णपिशाचीमंत्रः॥ अथ मंजुघोषमंत्राः॥ जाड्यौघतिमिरध्वंसं संसारा
र्णवतारकः॥ श्रीमंजुघोषो जयतां रवाधकानां जयावहः॥ एतागमोत्तरे॥ मात्रकादौ समुद्धृत्य
वह्निबीजं समुद्धरेत्॥ वामांशे कूर्मबीजं च ततो मेषं समुद्धरेत्॥ मीनेशं च ततः कुर्यात् वामने

त्रेंदुसंयुतं ॥ षडक्षरो मनुः प्रोक्तो मंजुघोषस्य धीमता ॥ मात्रकादिः अकारः वामांगुष्ठ तस्याश्च तुर्थः कु
मंश्च कारः मेषेन कारः मीनीनूपोथ कारः ॥ इदं तु दीपनी प्रोक्ता मूले मंत्रस्य कथ्यते ॥ अंकुशं शक्ति वी
जं च रमाबीजं ततः परं ॥ बीजत्रयात्मको मंत्रो जाड्यौघध्वांतनाशकः ॥ शक्तिबीजं रमाबीजं कामबीजं
तथा प्रिये ॥ विद्याकृतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ॥ हकारो वह्निमारूढो वामनेत्रेंदुभूषितः ॥ प्रोक्ता
सर्वेश्वरि विज्ञेय एकवर्णात्मिका प्रिये ॥ ह्रीं इत्येकाक्षरो मंत्रः ॥ सिद्धिः साध्यस्य सिद्धो वा साधकस्य रिपुः स
दा ॥ तदा मंत्रो जपेद्धन्या शुभदो बुद्धिदो भवेत् ॥ मध्याह्ने सलिले चैव भोजये भोजने तथा ॥ गोम
ये तु बहिर्देशे मैथुने रमणीकुचे ॥ गोष्ठे तु निम्बे गोमुंडे यंत्रं डमरु संनिभं ॥ विलिख्य मंत्रवर्णांश्च
त्रिंशदूर्ध्वं अधस्तथा ॥ लिखेद्यंत्रं दने लेखिन्या प्रयत्नात्साधकोत्तमः ॥ उच्चाटने लिखेद्यंत्रं गो
चर्मणि विशेषतः ॥ सलिले चिजयी नित्यं भोजने च महेश्वर ॥ गोमये रावटकं स्यात् गोष्ठे सर्वहस्तां
व्रजेत् ॥ कुचे श्रीतिधरो नित्यं गोमुंडे च महाकविः ॥ गोमूत्रं च हरिद्रान्नं चंदनं पौष्पमेव च ॥ एभी कला
६९ ध्वाजेहातिलकं धारयेत्सदा ॥ नमस्कृत्य वरं श्रेष्ठं प्रार्थयेद्भक्तिमत्परः ॥ वरं प्राप्य तु तस्मात् दे
विचरेत्तु यथा सुखं ॥ नास्य दैर्गार्चनं स्नानं प्राणरोध्यारणं न तु ॥ यस्त्रोच्च लेनदं तानां धावने तर
नेन वा ॥ रात्रिवासोन मुंचेत्तु नैशुचिः स्यात्कदाचन ॥ एवं कृते प्रयत्नेन शालां गुरुमुखात् सुधीः ॥
मासेकेन कवीन्द्रः स्यात् द्विमासे नेव ईश्वरः ॥ त्रिभिर्मासैर्भवेन्मर्त्यः सर्वज्ञः सर्वविशारदः ॥ पुत्रार्थः
लभते पुत्रं धनार्थी लभते धनं ॥ आयुरारोग्यविभवान् सर्वान्कामानवाप्नुयात् ॥ संवर्तको वकेशश्च
वर्णौ ह्यौ कथितौ प्रिये ॥ षड्दीर्घभाग्भ्यामेताभ्यां षडंगानि समाचरेत् ॥ संवर्तकः क्षकारः ॥ अथ ध्या
नं ॥ शशधरमिव शुभ्रं खड्गपुस्तांकपाणिं सुरुचिरमतिशांतं पंचचूडं कुमारं ॥ पृथुतरवरमुख्यं
पद्मपत्रायताक्षं कुमतिदहनदक्षं मंजुघोषं नमामि ॥ पीठपूजां ततः कुर्यात् आधाराद्याश्च शक्ति
भिः ॥ मूलमंत्रादिभिः कुर्यात् पीठासनमनंतरं ॥ ज्ञानदात्रे नमः पाद्यात् बुद्धिकृत्ते तथा चैव नमः ॥

जाउन्नानाद्याय गंधः स्यात भर्यस्याद्यक्षपायसैः॥ सर्वसिद्धिं प्रदद्येति पुष्पद्याद्युद्घोषतः॥ कुंदपु
ष्पं समादाय भैरवान् पूजयेत्ततः॥ असितांगो रुरुश्चंडः क्रोधश्चोन्मत्तसंज्ञकः॥ कपाली भीषण
श्चैव संहारश्चाष्टमस्मृतः॥ ततो धूपादिकं दत्वा प्रसूनानि विसर्जयेत्॥ तैः पुष्पैः पूजयेद्दृष्टौ
यक्षिणी श्वविन्नाबलः॥ सुरादिसुंदरी चैव मनोहारी अनंतरं॥ पूज्यास्तास्तु योगिन्यो हृदि रवा
वीजपूर्विका॥ एवं संपूज्य देवेशं लक्षमेकं जपेन्मनुं॥ घृताक्तकुंदपुष्पैश्च दशांशं होमयेत्तानि
च॥ जुहुयाद्दधिलेवक्रोकालरेपितृवेश्मानि॥ एवं सिद्धिमनुर्मंत्रो महावागीश्वरो भवेत्॥ तथा
कुक्कुटेश्वरतंत्रे॥ मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुं॥ शंकरं परिपप्रच्छ पार्वती परमेश्वरं
॥ पार्वत्युवाच॥ भगवन् सर्वधर्मज्ञ सर्वशास्त्रागमादिषु॥ वांछितार्थप्रदं लोके मंत्रं वागीश्वरं ब्रूहि मे॥ वि
शेषतोपि जप्ता वै कवित्वप्रदं नृणां॥ सर्वकामप्रदं चैव मनःसिद्धिप्रदं नृणां॥ भक्तानां कामदं मंत्र
कृत्यन्वक्षमि वापरं॥ श्रीशंकर उवाच॥ शृणु देवि महामंत्रं साधकानां शुभावहं॥ यज्ञस्य वाजउधी
प्रायो वान्वयस्यति समो भवेत्॥ अंगन्यासं करन्यासं वर्णन्यासं समन्वितं॥ जपात्सिद्धिप्रदं मंत्रं विनापि हो
मार्चनादिभिः॥ जपित्वा जापयित्वापि साधको विधिपूर्वकं॥ सर्वशास्त्रमवाप्नोति सत्यं सत्यं इति पार्वति॥
कार्तिकेयमुखं यावत्तावल्लक्षं जपेन्मनुं॥ सर्वशास्त्रेषु सोप्युच्चैर्वक्ष्यति समो भवेत्॥ पार्वत्युवाच॥
कोप्यत्रापि ऋषिश्छंदः पूज्यते वा मदेवता॥ ध्येयः को वात्र तत्सर्वं ब्रूहि मे तत्त्वतस्तत्॥ ईश्वर उवाच॥
दशाक्षरस्य को नाम मंत्र ऋषिर्विराट् छंद एव च॥ स एव मंत्र वागीश्वरो मामुक्तिदः॥ ध्यात्वा मे रवतूयेण
जपेन्मंत्रमनन्यधीः॥ तदा मुक्तिप्रदो मंत्रो नात्र कार्या विचारणा॥ ध्यानं तत्र प्रवक्ष्यामि भैरवस्य
महात्मनः॥ यथा ध्यात्वा जपेन्मंत्रं तन्मे निगदतः शृणु॥ सात्त्विकं राजसं चैव तामसं तदनंतरं॥
ध्यानं वक्ष्ये महादेवि क्रमेण हि तवाम्ब्यया॥ सद्यः सिद्धिकरं रूपं ध्यात्वा जपेच्च सात्त्विकं॥ सिद्धि

प्रदं साधकानां भक्तानां चिंतितप्रदं ॥ मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभं ॥ अप्रकाश्यं परं गु
ह्यं नदेयं यस्य कस्यचित् ॥ मंत्रोद्धारं प्रवक्ष्यामि गुह्याद्गुह्यतरं प्रिये ॥ विष्णुग्निवाह्निहूह्नियुकूर्च
नधी स्वरूपं षडर्णमंत्र उद्दितो जपतां सकरवमोक्षदः ॥ सर्वेश्वरलां सदसिवाकु षट्तां प्रसूलवेरालवे
दनिरतस्य वर्षप्रदस्यात् ॥ विष्णुः अकारः अग्नी रेफः पाञ्जीबकारः ह्रांह्रीं अर्धचंद्रश्च नधीरिति
स्वरूप ॥ आशुमंत्रं जपेन्मंत्री अयुतं यदि साधकः ॥ वलिनैवेद्यमुकूसाक्षात् बृहस्पतिर्द्विपरः ॥
मासत्रयेण यः कुर्यात् पुरश्चरणविधान्तरः ॥ तस्यापि वदनाद्वाणीनिःसरेद्रससर्वर्णिनी ॥ मासमा
त्रेण सततं भुवि रचने संशयः ॥ गोमुंडे गविष्टेच्च च कुगोष्टेच्च गामये ॥ यंत्रे मंत्रं लिखित्वा दीपश्रा
न्यासे समाचरेत् ॥ ध्यानमात्रं विधायादौ चावयित्वा चिरस्थधी ॥ निर्जने स्थानमासाद्य जपेन्मंत्र
मघोमुखः ॥ पौर्णमासी समासाद्य कुंदस्य कुसुमैः शुभैः ॥ अष्टाधिकश्च संप्रज्य जपेन्मंत्रं च तुष्य
थे ॥ त्रिमुंडारोहणं कृत्वा निशीथे मुक्तकुंतलः ॥ षण्मास मात्रं जपति यदि कृतो विधानवित् ॥ बृह
स्पति समोवक्ता नात्र कार्या विचारणा ॥ कुक्कुरस्य तु मुंडे कं मुंडं क्रोचुर्टपेस्यच ॥ त्रिमुंडमेतद्विख्या
तं साधकानां सुखावहं ॥ आसनं चैव गोमुंडे वामे कुक्कुरमुंडकं ॥ दीक्षणे चाश्विवामुंडे कृत्वा प्रजोस
माचरेत् ॥ अर्धचंद्राकृतिं साक्षात् बालचंद्रोपमं स्फुटं मृ ॥ यंत्रं लिखेत्तत्र प्रज्ञाकुंदस्य कुसुमस्य च ॥
सव्येन पालि कमलेन जपादि प्रजाश्च गारकीलनाय धौरवतु दक्षिणेन ॥ राकस्थधाकरमरीचितुष
रगौरं ध्यातान्वलुष्पथ लटेढषमत्तकस्थ ॥ संचिंत्य कुक्कुरशिवाह्निरसाधितरं ॥ कुंदेन साधकृतभोज
यति प्रकामं ॥ गोचर्मणाचरचितं वसुकोणमात्रं च कृतलतोपिनवकुंकुमरोचनाभिः ॥ निर्माय स्वावि
धिना विजने श्मशाने संपूजयेद्धनतनैश्वसरैः पलाशैः ॥ संपूर्णपिंडुलतुषारमरीचिमध्यवालंवि
चिंत्य धवलं नररखड्गहस्तं ॥ तद्धामकेशनिरहद्वरपुस्तकाढ्यं लग्नं जपेत्लक्षतजपयद्दत्तायताक्षं ॥
अरिष्टगेहे निद्रितैलमेन आदाययस्नानकरपल्लवेन ॥ तेनांचितं कांचनपुष्यमेव निवेद्य तस्मै ज

पतिप्रकामं ॥ अङ्कोलकुत्राघोटलरोमज्जलेविलिप्यपादौ वदनाम्बलेन ॥ त्रिमुंडमात्राग्निलए वशात्तौ जपे
यथाशक्ति तु पौर्णमास्यां ॥ लकुचतरुतलस्थो मुंडमात्रे कैरटोहिमकरवरगौरं चिंतयित्वा निशीथे ॥
यदि जपति जडात्मा मंत्रमेनं त्रिपक्षं भवति जपति साक्षाल्लगीर्पतिर्निरात्र चित्रं ॥ भुक्तान्तशेषकदली
तरुमूलसंस्थस्वात्ती र्ण पुष्परचितासनसंनिविष्टः ॥ राकाविधूकुसुममुपरस्करोति प्रजाप्य तः सोप्य
जयइह वाक्पतिविश्ववस्यात् ॥ जित्वा विस्तृत्य निजपाणिसरोरुहाभ्यां बालाप्रसूनशलकैः परिप्र
ज्य गोष्ठे ॥ यो वै जपेदनुदिनं रसलक्षमात्रं ईशं स जेतुकि मुतवाक्पतिरेव चित्रं ॥ वासिष्ठलानिशीथ
कोद्भिनिः सरतिगीरम्बलायमानायोदलयौवनशालेभ्र करंजकाष्ठैः तस्यापिगीष्पतिवचोनियतंस्फ
लन्त्यं ॥ तिलतैलेन मथितमानकुंदकेरवपुष्पकैः ॥ यजतो जुहुयान्मंत्री सर्वसिद्धिमुपालभेत् ॥ मंजि
ष्ठतोयकुचत्वासितचानुमलैः स्त्रीयोगजातिलयुतैः सम्मकुष्टकैश्च ॥ कृत्वा ललाटफलके तिल
कं पवित्र मानकुपयिपियो ॥ धनवेशाप्रदं रम्यं सर्वदेशे नागमितापरं ॥ अदोषकविताम्लमनस्प्रतिभापदम् ॥
देव्यूवाच ॥ भगवन् गिरिजानाथ केय स्वयमथोदितं ॥ मंजुघोषः स कः कीदृक् तस्यानुष्ठानमेव हि ॥ ईश्व
र उवाच ॥ श्रृणु तां देवि मेवाक्यं नात्रकार्या विचारणा ॥ मंजुघोषस्त्वयोरेवः सोहं देवि न संशयः ॥ एको
हं शंकरो देवि नाना मूर्तिधरस्वयं ॥ तस्यानुष्ठानमधुना श्रृणुतां ममतत्वतः ॥ मंत्रः षेडक्षरः सारः सर्वः
कुमतिनाशकः ॥ रसलक्षावधिस्तस्य जाप्यात्रस्करेस्सिलः ॥ त्रिपक्षजपनादेव वाग्मीभवति मानवः ॥
स्त्रवित्तं भवेत्तस्य प्रतिभा दिग्विजित्वरी ॥ शासन्त्रयेजपेयस्तु पंडितो पांडितो यदि ॥ षण्मासं यस्तु ज
पतिस सर्वज्ञः कृशानुधीः ॥ भ्रजनेसिद्धयुः सर्वा न वंति सस्यमीश्वरी ॥ आहारेस्यन्दणां वचोमि
वेधनेत्र यामले ॥ पुत्रैः पाष्यं ददेत्तस्य भंगो विदुरवदिरो भवः ॥ आरण्यापूर्वतिपत्राणि पुष्पाण्येव स्तु

निश्चितं ॥ एरंडमूलैः कार्पासवीजमध्यं प्रवक्ष्यते ॥ कुंडकीनालदानेन भवेदाचमनीयकं ॥ ध्यानं वक्ष्येम
हेशानि सर्वसिद्धिप्रदायकं ॥ शशिधरमिव शुभ्रं खड्गपुस्तांकपाणिं ॥ सुरुचिरमतिशांतं पंचचू
डं कुमारं ॥ पृथुतरवरमुख्यं पद्मपत्रायताक्षं कुमतिदहनदक्षं मंजुघोषं नमामि ॥ मंत्रो
द्धारं प्रवक्ष्यामि नमस्कारायदेशतः ॥ शृणु देवि महाभाग वक्ष्ये सर्वफलप्रदं ॥ मंत्रं सर्वार्थदं
सारं रक्षाकरणरूपकं ॥ अमलं निर्गुणं सारं गुणिनं सर्वकामदं ॥ तं नमामि हि लिंगाथं मंजु
घोषं महात्मकं ॥ दिव्यद्वीपपरं सारं स्फटिकं प्रत्नादिभिः स्फुरेः ॥ रत्नाकर मां गुणैर्युक्तं मंजुघोष
नमाम्यहं ॥ यच्च नेत्र जानाति ब्रह्मयेन च न कोविदः ॥ तं सांतं ततमसा युक्तं पीतवस्त्रं नमाम्यहं
चरणे पतितादेवा देवानां जपहेतवे ॥ चरणे पतितो वीरो बुद्धये तं नमाम्यहं ॥ न जानंति सुरा यस्य त
त्वं तत्वगुणेन वै ॥ कलंकं समस्तसारं च मंजुघोषं नमाम्यहं ॥ धीशं विश्वेश्वरं चैव प्रतिपत्त्यादि हेतुकं ॥
सकलं निष्कलं चैव तं नमामि हि तत्पदं ॥ ऋषिः कण्वो न वेदः पंक्तिः छंदो गायत्रिषडक्षरैः ॥ दक्षिणांशु
क्तिदेवोदयाल गुरुर्भक्ति येदीनवैव ॥ गुरोः संतोषमात्रेण सिद्धिर्भवति निश्चितं ॥ पिता गुरुर्न
कार्यो वै दीक्षाकर्म शिष्यार्नते ॥ यावत्कालं कृतो दुःखी पितालु नरकं व्रजेत् ॥ अथ मंत्रोत्तरं वक्ष्ये स
सिद्धं मंत्रनायकं ॥ शृणु देवि महाभोगं सप्ताक्षरं च षडक्षरं ॥ सकृदुच्चारणाद्देवि मूकोभवति
पंडितः ॥ रविविंशतिसमायुक्तो जांतो वांतोऽग्निशूलियुक् ॥ क्षकारः पृथिवी चाग्निविंदुतुल्यं तिश्च
उद्धृतः ॥ सप्तवर्णो मनुः प्रोक्तो मंत्रिणां कविताकरः ॥ यस्य संकीर्तनान्मंत्री वाचस्पतिरिवापरः ॥ द्वि
भुज रवरद्दौ तिर्यालनीलांबुदाभं ॥ दिनकरसरसिजाभ्यां पुस्तकं खड्गं च ॥ स्मितसकविसदवक्त्रं पंचचू
डं त्रिनेत्रं ॥ कुमतिदहनदक्षं मंजुघोषं नमामि ॥ षड्दीर्घभाजा वीजेन कुर्यादंगानि साधकः ॥ र
विमंत्रारो विष्णुः ॥ ओंकारः जांतात् कारोवांतो भकारः अग्निरेफः शूलिरीकारः क्षकारः स्वरूपं

थिवी लकारः अग्नी रेफः बिंदुश्चालियुक् एवं मंड्री श्रीक्षं लं री॥ इति मंत्रः॥ मंड्रीं रीक्षं लंरी इति वा षड्वर्णं
इति तांत्रिकाः॥ एवं ध्यात्वा जपेद्देवि वर्णलक्षं समाहितः॥ ततोद्दशांशं जुहुयात् सर्षपैर्लौणमिश्रि
तैः॥ ऋषिः कमो विराट् छंदो देवता बटुकः स्मृतः॥ मात्रकोक्ते यजे देवं वागीशां देवमन्वहं॥ आदावं
गानि संपूज्यं पश्चात् दशास्त्रीरिमा यजेत्॥ योगासमाच विमलाद्याना बुद्धिः स्मृतः पुनः॥ मेधा प्रश्रा
च पत्रे पुमुद्रा पुस्तक धारिणी॥ लोकपालाः बहिः पूज्यास्तेषामस्त्राणि तद्बहिः॥ पीतालमंत्रितं तो
यं सहस्रं प्रसहं जपेत्॥ महाकवित्वं नेत्रमंत्री नासेन न त्तु संशयः॥ आश्चरेत्तु लिलारंत्र क्षये हाम
धुवाहुना॥ प्रदीपो विशिष्टलैलेन प्रलीयज्ञात्र मन्वहं॥ परिधानं सदा कुर्यात् केवलं रात्रिवाससं॥ नि
भूनि भ्रिवलिमस्त्रै मुक्त मन्नं प्रदद्यात् हृदयमनुगतो ते मंत्रजायं वितत्रं ने मन लिन्टपति पूज्यो या
षितां प्रीतिपात्रः॥ नरतिरवल कवीणां मग्रणीः पालुनश्व॥ सकल्मानं सदा कुर्यात् स्नानं जपनं हितत्॥
काव्यार्थकुरले काव्यं घनाथवपा प्तुयाद्धनं॥ कविता माहरेत् पुंसा मनं गलविस्टंभिनी॥ सर्व वेदा
गमादीनां व्याख्याता जायते चिरात्॥ मनोरस्य मनुगणं लिडशानेश्वर्यप्रदः परः॥ श्रद्धया जायते सि
द्धिरिह लोके परत्र च॥ श्रद्धाहीनेन देवेशी सिद्धिर्जन्मशतैर्नहि॥ एतासामपि विद्यानां जपहोमो
च तर्पणं॥ स्वेच्छा विचलितं कर्म तत्सबोधात्ति बोधेन॥ तत्त्वबोधस्य हृदये यथा संप्रतिपद्यते॥ त
त्तद्देवि विज्ञानीयाद्देवता पारिव्यरीविले॥ अंगन्यासकरन्यासबहिन्यसविवर्जितः॥ जपात् सिद्धि
प्रदो मंत्रो विना होमार्चनादिभिः॥ विध्वुम्निपाद्ग्री दक्षिणा युक् पहरस्वलतरं॥ मंत्रः सर्व मनुश्रेष्ठो
जगतां जडनाशकः॥ गोमुंडे च गरां मध्ये यज्जे नापि च गोमये॥ यंत्रमस्य लिखितादौ वश्यामंत्रं ज
पेज्जनः॥ निर्जनं स्थानमासाद्य जपेन्मंत्रमघोमुखः॥ एवं ध्यात्वा जपेन्मंत्रं ततः संख्यसमाहितः
वामहस्ते जपेन्नित्यं मैथुने च पुनः पुनः॥ चतुर्दशसहस्रं तु दंमोरीयत्नेन जपेत्॥ न्पवल्लभतो या

तिसभां च वशमानयेत् ॥ आकर्षणं भवेत्तस्त्री एणां त्रिपथे चालितन्मुखं ॥ उच्चाटनं च वज्रास्त्रोश्च मारणं च
भवत्यपि ॥ रात्रौ रक्तं चतुर्दश्यां जपेत् पित्रवने मनुं ॥ गजवाजिनमानां च तत्र लक्षेण मारणं ॥ इम
शानांगारमादाय लिखेन्मंत्रं च मारणं ॥ भौजनाशमपादेन शत्रुपीतिर्यमालयं ॥ त्रिकोणं विलि
खेद्यंत्रं तन्मध्ये शत्रुनामकं ॥ मंत्राक्षराणि तत्पार्श्वे प्रतिलोमविलोमिकं ॥ रिपुनामविलोमं च त
न्मध्ये साध्यसंयुतं ॥ विलिखेत्प्रणवं पश्चात् मंजुघोषं स्मरेद् बुधः ॥ रक्तानु पिंडमादाय तन्मंत्रेण
निवेशयेत् ॥ स्वदेहनं ततो रक्तात् रुधिरं वांग संचनं ॥ मांसमंत्स्यं ततो रक्तात् भुक्तोच्छिष्टं सुसि
द्धये ॥ एतद्रहस्यं परमं कथितं च सुदुर्लभं ॥ तरक्षाद्भक्तिहीनाय नास्ति काय कदाचन ॥ इति भै
रवतंत्रे मंजुघोषपरिच्छेदः ॥ अथ तारिणीकल्पः ॥ तारिणीतंत्रे ॥ ईश्वर उवाच ॥ श्रृणु तां शैलतनये
जाड्यनाशकरीपरा ॥ चतुर्वर्गप्रदा विद्या सर्वसिद्धिप्रदायिका ॥ वर्गाद्यां वह्निसंयुक्तं रामाक्षिपरि
भूषितं ॥ नादबिंदुसमायुक्तं सर्वसिद्धिप्रदायकं ॥ पुनश्चतुर्मुखं देवि लकारेण विभूषितं ॥ स्वरे
णैव च चतुर्थेन चंद्रखंडेन च प्रिये ॥ तांच्छिवैवं महाबीजं चतुर्वर्गफलप्रदं ॥ ततः स्पष्टपदं चोक्त्वा त
तो लेविपदं स्मृतं ॥ ह्रीं कारं च ततो रक्तात् खर्वं भुद्धरेत्ततः ॥ हूं कारेण च रेफेण मकारेण विभूषि
तं ॥ ततो वाग्भवं मुच्चार्य मंत्रमेनं समुच्चरेत् ॥ नवाक्षरो मनुर्देवि तारिण्याः समुदीरितः ॥ दुर्ह
सेवमता विद्या स्वर्गमर्त्येषु दुर्लभा ॥ अष्टसिद्धिप्रदा देवि चतुर्वर्गफलप्रदा ॥ अनयासदृशी विद्या
अनयासदृशो मनुः ॥ अनयासदृशी सिद्धिर्न भूतं न भविष्यति ॥ यो विद्यां लभते देवि रिद्धिशालस्य न
विद्यते ॥ अचिरात् लभते वाणीं गद्यपद्यप्रमोदिनीं ॥ ज्ञानमात्रेण विद्याया क्षिप्रं कुलेश्वरि भवेत् ॥ वि
ना छंदो विना शिक्षां विना भ्यासेन पार्वति ॥ विना ध्यानं विना यत्नं विना जापं कवेरपि ॥ जिह्वायां जायते
तस्य कवित्वं रससंमिश्रितं ॥ तत्र पूजाक्रमः ॥ प्रथमं जलमानीय पादप्रक्षालनं स्मृतं ॥ हृदिशा च मध्यद्रि

रवां बध्वा ततो न्यस्मिन् विशोधनं ॥ विघ्नस्योत्सारणं कृत्वा ततः पुष्पाणि शोधयेत् ॥ करौ संशोध्य देवेशि
चास्त्रमंत्रेण तत्परः ॥ गुरुं च गणपतिं नत्वा न्यस्य शुद्धिं समाचरेत् ॥ स्वाधिष्ठाने स्थितं बीजं वाग्भ
वं सर्वसिद्धिदं ॥ तदुद्भूतामृतचलित्भिः शरीरं दग्धलेवुधैः ॥ तद्भस्मपुष्पमुत्सार्य क्लीं समद्भूतवायु
ना ॥ ललाटे कामबीजं तु तदुद्भूतामृतानि च ॥ तदेव स्थित्प्लावितं कृत्वा ददीप्त तं च रेचतः ॥ नित्ये पेन नि
र्गुणं शुद्धमात्मानं देवतामयं ॥ सर्वपापविनिर्मुक्तो देहं संचिंत्य साधकः ॥ शरीरस्य विशोधनेन प्रा
णायामं चरेत्ततः ॥ आद्येन मूलबीजेन प्राणायामे स्मरेत्त्रयेः ॥ मंत्रं न्यासं ततो देवि शृणु यत्तां मंत्र
सिद्धिदं ॥ शक्तिरस्य ऋषिः प्रोक्तो बृहती छंद ईरितं ॥ तारिणी देवता प्रोक्ता क्रीं कारं बीजमुच्यते ॥ वाग्भ
वं शक्तिरिष्टं कमिलितिं ऋष्यादिकं चरेत् ॥ बीजेन तु षडंगेषु षडंगानि प्रकल्पयेत् ॥ धर्मादि विन्य
से न्मंत्री ततो धर्मादि विन्यसेत् ॥ ऊर्ध्वपद्मं परि मध्ये च क्रमेणैव न्यसेत्ततः ॥ कल्पवृक्षं समुद्धार्य मणि
पीठं समुच्चरेत् ॥ शवमुच्चारयित्वा तु ततो परि कपालनं ॥ चतुर्दिक्षु न्यसेद्देवि चिंतामणिसमन्वि
तां ॥ हृत्पद्माष्टदले तत्र चाष्टशक्तिं न्यसेत्ततः ॥ दुर्गा जया ततो मेधा विजया रूप्रभा मता ॥ काली गो
री द्विवाचैव इत्यष्टौ शक्तयः स्मृताः ॥ अतएव स्वदेहेषु पंचयोनिं न्यसेत्ततः ॥ क्रों एं ततो दक्षिणे
भागे योनि बीजान्न्यसेत्ततः ॥ दें शंत वाम भागे च योनि मिश्रां ततो न्यसेत् ॥ नासामूले च देवेशि योनि
रूपां विभागतः ॥ योनि कामां योनि हारां नेत्रयोः सव्यवामयोः ॥ योनिरूपां न्यसेदोष्ठे सर्वकामार्थसिद्धये ॥ मु
खवृत्ते च देवेशि दक्षवामादिभेदतः ॥ चिबुके च महादेवि विन्यसेत्साधकोत्तमः ॥ योनिछायां योनिमायां
योनिरूपां ततः परं ॥ वाकुमूले दक्षवामे हृदि चैव वरानने ॥ योनिचिंतां योनिनित्यां योनिरूपां स्मरेद्बुधः ॥
स्तनयोर्नाभिदेशे च योनिस्थाने सदा स्मरेत् ॥ योनिसिद्धां योनिनित्यां योनिरूपां स्मरेत्ततः ॥ एतास्सर्वा
श्चतुर्थ्यंता नमो तान्यविचक्षणैः ॥ देहपीठे ततो देवी ध्यायेत्तत्र स्थिरमानसः ॥ लंबोदरीं भीमा
नागकुंडलभूषितां ॥ मुक्तकेशीं ललजिह्वां करकां वरे धरां कृत्वा ॥ पीनोन्नतस्तनीं मुग्धां महानागेन वेष्टितां ॥

शवस्योपरि देवेशि तस्योपरि कपालके ॥ नासाग्रध्याननिरतां महाघोरां वरप्रदां ॥ चतुर्भुजां दीर्घकेशीं दक्षि
णस्यां हि वाहनां ॥ बिभ्रतीं नलिनीमेकां वामो ह्यपानपात्रकं ॥ वराभयधरां देवीं मध्ये स्तातु कुक्षवामयोः ॥
पिबन्तीं शैवरीं धारां पानशत्रे सदा सवे ॥ सर्वसिद्धिप्रदां देवीं निर्जागिरिनिवासिनीं ॥ लोचनत्रयसंयुक्तां
नागयज्ञोपवीतिनीं ॥ दीर्घनासां दीर्घजंघां दीर्घांगीं दीर्घजीह्विकां ॥ चंद्रसूर्याग्निनेत्रेण त्रिलोचनसमन्वितां
शत्रुनाशकरीं देवीं महाभीमां वरप्रदां ॥ व्याघ्रचर्मकृतिरोबद्धां जगत्त्रयविनाशिनीं ॥ साधकानां सुखं
करीं सर्वलोकभयंकरीं ॥ एवं तां महादेवीं तारिणीं प्रणमाम्यहं ॥ एवं ध्यात्वा मानसैः संपूज्य
अर्घ्यस्थापनं तारावत्कार्यं ॥ अस्य पूजायंत्रं ॥ यंत्रं निर्माय देवेशि स्थापयेन्मंत्रमध्यतः ॥ रक्त
मलयजेनापि वस्त्रपत्रे लिखेत्ततः ॥ तद्बाह्ये चाष्टपत्राणि लिखित्वा साधकसत्तमः ॥ वह्निमंडलयुग्मं
च यंत्रमध्ये लिखेत्ततः ॥ पूर्वदले च देवेशि आद्यबीजं लिखेत्ततः ॥ द्वितीयं दक्षिणपत्रे तृतीयं प
श्चिमे दले ॥ उत्तरपत्रे देवेशि पूर्णाणी च लिखेत्ततः ॥ चतुर्द्वारसमायुक्तं अष्टरज्जसमन्वितं ॥ त
त्र रवौ क्रमेण पीठं संपूज्य ॥ तत्रावाह्य महादेवीं यजेद्धि मंत्रमुच्चरन् ॥ षडंगेनैव देवेशि पूजयि
त्वा तु पार्वती ॥ क्षेत्रपालं भैरवं च गणनाथं महालेकं ॥ एतत्स्वचतुष्टयं देवि यजेद्द्वारिचतुष्टये ॥ पूर्वादि
ष्टदले देवि एतान् संपूज्य साधकः ॥ अणिमा च लंगमर्दना लघिमा मदनातुरा ॥ अनंगकुसुमा देवि
ललौष्टकर्णिकान्तथा ॥ कापालिका च रेवेशि ललोष्टयोगिनी तथा ॥ तथो षोडशपत्रेषु पूजयेत्सदिवा
रिकां ॥ सुखदां मोक्षदां तत्र भुक्तिदां भोगदां तथा ॥ मुक्तिदां सिद्धिदां चैव कामदां धनदां तथा ॥ क्षे
मदां ह्रीवदां चापि वरदा मालसदां तथा ॥ योगदां भोगदां देवि भुक्तिदां सर्वसिद्धिदां ॥ अणिमाद्यष्ट
सिद्धिं च पूर्वद्वारे यजेत्ततः ॥ वटुकं शावकं देवि द्वारे च दक्षिणे ततः ॥ पाश्चात्यद्वारे देवेशि कलां
चंद्रस्य पूजयेत् ॥ उत्तरे च तथा देवि रावेरपि कलौ ततः ॥ षडंगेन यजेद्देवीं ततोऽस्त्राणि च पूजयेत् ॥

एतानि देवदेवेशि चतुर्थ्यंताः समीरिताः ॥ नमोंताश्च महाविद्याः प्रोक्ताः सकलसिद्धिदाः ॥ पुष्पैर्बहुविधै
श्चैव रक्तैश्चंदनैश्चर्चितैः ॥ रक्तपुष्पैर्महादेवि नानागंधसमन्वितैः ॥ बिल्वपत्रैस्तथा गंधैर्जपापु
ष्पैर्विशेषतः ॥ श्वेतरक्तपरागैश्च करवीरैर्मरूचकैः ॥ कुंटिपुष्पैः बिल्वपुष्पैः कुंदपुष्पैर्लिंगपुष्पैः
सुगंधैर्मनैः ॥ अपराजितपुष्पैश्च चंपकैः केतकैस्तथा ॥ एभिः पुष्पैर्महादेवि पूजयेत्त्रिपुरसुंदरि
ईं ॥ मालतीकरपुष्पैश्च स्तवैर्नार्चयेत्तथा ॥ कर्दंबैः श्वेतकुसुमैः कुंकुमैः कांचनैस्तथा ॥ एवं सं
पूजयित्वा तु एभिर्द्रव्यैर्महेश्वरि ॥ लक्षमेकं जपेन्मंत्रं हविष्याशी जितेन्द्रियः ॥ इति तारिणीकल्पः
अथ सारस्वतकल्पः ॥ केनोपायेन देवेशि विद्यासक्तिर्भवेन्नृणां ॥ वेदविद्याप्रदात्री च तन्मे ब्रूहि जगन्मो
ब्रह्मोवाच ॥ साधु साधु त्वया पृष्टं लोकानां हितकारणं ॥ एतदेव पुरा पृष्टं कृत्वा दोषविवस्वते मया ॥ ब्रह्मन्
हाद स्वरूपेण प्रसन्नेनांतरात्मना ॥ यत्प्रोक्तं तेन मे ब्रह्मन्नतुलं वक्ष्याम्यहं यत्नतः ॥ शृणु ब्रह्मन्न परं गु
स्वं कल्पं सारस्वतं मम ॥ यस्य विज्ञानमात्रेण जाड्यापहरणं भवेत् ॥
यते चिरात् ॥ अभ्यासाच्च भवेद्यस्य वाचस्पतिर्भवेल्लिखि ॥ सर्वशास्त्रप्रकाशश्च सर्वज्ञो जा
ति ॥ द्वैपायनोपि यां ज्ञात्वा वेदव्यासो भवेन्मुनिः ॥ मंत्रोद्धारं प्रवक्ष्यामि दक्षराज्यं वागीश्वरं वटहस्त
बिंदुनोयुक्तं वामगंडांतमर्पितं ॥ जपेद्वादशलक्षाणि सांगावरणपूजनैः ॥ अनंतं
च ध्यायेद्द्वादशांशधीः ॥ तन्मध्ये भावयेन्मंत्री मंडलानां त्रयं चिरं ॥ मूकोपि वाचस्पतिर्भवेत् ॥ नाभौ शुभ्रां दविरं
ज्योत्स्नां जोलचिकांतिनीं ॥ मुक्ताहारयुतां शुभ्रां चंद्रखंडविमंडितां ॥ रत्नसिंहासने ध्यायेद्दशभि
र्भुजां व्याख्यां वर्णस्य मालिकां ॥ अभयेन तथा पूर्णां घटं दिव्यं च पुस्तकं ॥ बिभ्रतीं दक्षहस्ता
रान्वितां ॥ मध्ये क्षीणां तथा स्वच्छां नानाभरणभूषितां ॥ आत्माभेदेन ध्यात्वैवं ततः संपूजयेत्क्रमात् ॥ दधतीं वामहस्ताभ्यां योनिस्तनम
नदीर्घयुक्तेन कुर्यादंगानि हस्तयोः ॥ हृदयादौ तथा कुर्याद्बीजेनांगक्रियां पुनः ॥ आद्ये भ्रुवोर्मध्ये तथाना

भौ गुह्ये च देशिकस्तथा॥ न्यसेद्बीजं पुनर्दृष्टो व्यापकं विन्यसेत्ततः॥ पीठन्यासं॥ हृदये च ततो कुर्यात्तद्दे
वतावाससिद्धये॥ मालाकूर्मांबुजप्रोक्तं पीठमभ्यर्च्य येत्ततः॥ नगणेनैव नाम्नानं कुर्यात् मूर्तिं संमिलेन कल्प
येत्॥ आवाह्य प्रजनेन स्यादेवी वागीश्वरी ततः॥ अंगैः प्रथमावृत्तिः स्याद्द्वितीया शक्तिभिस्ततः॥ दलाग्रे
पुसंमभ्यर्च्य त्र्यस्रा एषा यायेच्चाविधिः॥ लोकपालावहिः प्रज्यास्तेषामस्त्राणि तद्बहिः॥ एवं संप्रजयेन्मंत्री
जपहोमरतः सदा॥ कवित्वं लभते वाग्मी लक्षैर्द्वादशभिर्ध्रुवं॥ प्रयोगांतरं॥ प्रातर्जप्त्वा सहस्रं च पिवेद्ब्रा
ह्मी वचान्वितां॥ नविस्मरति मेधावी कवीनां वेदागमानपि॥ प्रयोगांतरं॥ कुंडमौलीं दक्षेस्थितां व्या
यन्मार्तंडमंडले॥ ज्योतिःपुंजनिभां देवीं परिवारसमन्वितां॥ वराभययुतां हस्ते मुद्रापुस्तकधारि
णीं॥ जपस्सहस्रमानेन षण्मासं विजितेंद्रियः॥ धीमान्संप्राप्य वाक्सिद्धिं कवीनामग्रणीर्भवेत्॥
अथ योगं प्रवक्ष्यामि जाड्यनाशकरं परं॥ रात्रिशेषे समुत्थाय शुचिर्भूत्वा समाहितः॥ शुद्धभावे
न चात्मानं द्रव्यं च परिकल्पयेत्॥ ततश्चापटलं ध्यात्वा जगत्सर्वं विचिंतयेत्॥ मूलाधारस्थितां
देवीं कुंडलीं परदेवतां॥ समुत्थाप्य तां ज्ञानरूपा स्वरूपाणि भेदयेत्॥ ततः परशिवेन तां योजयी
तां॥ ब्रह्मस्वरूपो च देवी तां चिंतयेत्पुनः॥ ततश्चापटलं ध्यात्वा शरीरं चिंतयेत्सितं॥ नियुतं सहस्रमा
नेन जपेत्संवत्सरं यदि॥ ततः संजायते मंत्री वाचस्पतिरिवापरः॥ छंदोलंकारमंत्रस्य नानाशास्त्रा
र्थविद्भवेत्॥ कवित्वं ... पांडित्यमधिकं भवेत्॥ अथापरं प्रवक्ष्यामि प्रयोगं भुवि दुर्लभं॥
नाभिचक्रेस्थितां रम्यां रक्तां सारां विचिंतयेत्॥ क्षोभावद्दलितं वांचंर ... भूषितां॥ पाशांकु
शाधरांरिव्यां वराभययुतां पुनः॥ दृष्ट्वाचामृतवर्षिण्या ... ती मनोरथान्॥ एवं ध्यात्वा जपेल्लक्षं म
नुजो विहितं ततः॥ होमं कुर्यात्त्रिमध्वक्तैः रक्तोत्पलमुकुलैर्द्विजः॥ ततः संतर्पयेद्देवीं दुग्धयुक्तेन सर्पिषा

पायसेन बलिं दद्यात् दधिपिष्टमधुप्लुतैः ॥ एवं कृतादि ध्यानं तु साक्षाद्देवगणो न वेत्ति ॥ सिद्धार्थै
स्त्रिमधुरोपेतैर्हुत्वा जगद्वशं नयेद्ध्रुवं ॥ पद्महोमेन महतीं प्राप्नुयाच्छ्रियमूर्जितां ॥ देवी हृदयविद्या
यानास्ति किंचित्सुदुर्लभं ॥ स्नेहभावेन संप्रोक्तं न देयं यस्य कस्यचित् ॥ एतत्ते कथितं गुह्यं विद्या
त्पत्ते अवधारणं ॥ विष्णुना दत्तमस्मभ्यं मया तुभ्यं द्विजोत्तम ॥ लिखित्वा यंत्रं यदा मंत्री शालिग्रास्या
षिमर्दनि ॥ हस्तद्वयोरिन्द्रोसोपि सोधीशत्वमनंगतो ॥ इति स्वायंभुवमातृकामंत्रे सारस्वतः
पटलः ॥ अथ कात्यायनीकल्पः ॥ अतिगुह्यतमं मंत्रं टष्ट वैयासिपावेलि ॥ भक्तिभावेन ते देवि कथ
यामि शुचिस्मिते ॥ प्रसन्नतां यदा याति देवी कात्यायनी तथा ॥ कवितामत्तनैश्वर्यं ददाति पदमु
त्तमं ॥ स्त्रीनामा कुर्वीत चैवं मारणोच्चाटने रिपोः ॥ टनां च वश्यतां चैव जायते च तथा प्रिये ॥ क
थ्यामि तथासनं च तस्याः कल्पयमंडनं ॥ आदौ शृणु महामंत्रं वाग्भवं वह्निनमोंतिकं ॥ क
वीलं बिंदुसंलिलि विभूषितं ॥ चकारं बिंदुनायुक्तं चतुर्दशस्वरान्वितं ॥ डे-युतां चंडिकां चैव मंत्रः प्रो
क्तो दशाक्षरः ॥ ऐं ह्रीं श्रीं चौं चंडिकायै नमः ॥ चिंतामणिरिति ख्यातो मया चापि प्रिये सले ॥ देवता चंडि
का छंदो गायत्री कपिलो मुनिः ॥ लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्ततः ॥ मातृकोक्ते जयेत्पीठे बीजे
नांगक्रिया मता ॥ आवरणानि संपूज्य शस्त्रप्रजो ततः परं ॥ लोकपालास्ततः पूज्यास्ततोस्त्रा
णि लवह्निः ॥ डाकिनी योगिनी चैव खेचरी शाकिनी तथा ॥ दिक्षु पूज्या इमा देव्याः सर्वसिद्धिप्रदायि
का ॥ सव्यपादसरोजेन लंबलोलमृगाधिपं ॥ वामपादाग्रदलितमहिषासुरनिर्भरां ॥ सुप्रसन्नां
चंद्रबिंबविभूषितां ॥ हारनूपुरकेयूरजटामुकुटमंडितां ॥ विचित्रपट्टवसनां अर्द्ध
सरोसहं ॥ बाहुभिर्नीलितैर्देवी कोटिचंद्रसमप्रभां ॥ धारयंती धनुः पाशां शंखघंटां
लेः ॥ स्तूयमानां प्रमोदमानैर्लोकपालादिभिः सदा ॥ समाहतैर्दिविसदैर्देवैराकाशसंस्थि

एवं संचिंतयेद्देवीं जायते नरपुंगवः ॥ क्षत्रियेषु यथा रामो देवेषु च पुरंदरः ॥ भुजंगेषु यथा तार्क्ष्यः
क्रूरकार्ये यथोद्रानिः ॥ शाकुंतलेषु यथा सेनो मंत्रे शो बलवांस्तथा ॥ इदं तु परमं गुह्यं संक्षेपात्कथितं
मया ॥ इदानीं जपहोमानां श्टणुष्व पार्वतीप्रिये ॥ मंत्रोयं त्रिदिवसतो देवि सर्वपापूरतो यदि ॥
कोटिसूर्यप्रतीकाशो दृश्यते वादिभिस्तदा ॥ पलायंते महादेवि साध्यसे नाक्षरणात्तलः ॥ ईषमा
स्य सितेपक्षे नवम्यां मारभेज्जपं ॥ सहस्रं प्रसहं जप्त्वा संप्राप्य नवमीसितां ॥ विजयं खङ्गमाद्दा
य पूजयित्वा यथाविधि ॥ अर्द्धरात्रे बलिं दत्वा पालजातां समाचरेत् ॥ रणभूमिं समासाद्य स
हस्रं प्रजपेन्मनुं ॥ तं दृष्ट्वा पुरुषं देवि दृश्यो जायते रिपोः ॥ सहत्त्वयममीषां तं सैन्यमानानराधिपाः
पलायंते महादेवि नात्र कार्या विचारणा ॥ शुक्लांबरधरो मौनी ब्रह्मचारी भवेत्स्थिरः ॥ शुक्लवर्णां
महादेवीं ध्यात्वा शुक्लविभूषितां ॥ सहस्रं मासमेकं तु जपेन्नित्यं यथाविधिः ॥ मालतीकुसुमैः कुंदैः
मंत्री मधुरसंप्लुतैः ॥ सहस्रं त्रितयं कुर्यात् वाग्मी भूत्वा जायते चिरात् ॥ हलया कृत्तिलांद्देवि विषदां कुर्वते
हुतं ॥ न पंचांकुरतेनिसंन्द्रालह्यो न स्वरा न्वधि ॥ वंध्यापि लभते पुत्रं कार्त्तिकेयमिवापरं ॥ दुर्जगान्वभ
वत्ययुः स्त्रू न गौतम मनोरमा ॥ रूपं धिंचियस्यद्वर्तत्केलक्षं जप्त्वा पुटं ततः ॥ नीलोत्पलसमो जेवा होता वैश्र
वणो भवेत् ॥ आद्यपरीधानां मुंडमालाविभूषितां ॥ रक्तवर्णां लमीमाक्षीं जिह्वया लालयासुरान् ॥ चर्वयंतीं महा
कालीं कालरात्रिमिवापरां ॥ शोभयंतीं जगत्सर्वं स सुरासुरपर्वतं ॥ एवं ध्यात्वा जपेद्देवीं स्मशाने वा चतु
ष्पथे ॥ सप्ताहं त्रिशतं कुर्याद्व्रतस्थः र २ न सः ॥ जपेद्घोनियतं रात्रि सिद्धिर्भवति मेधकं ॥ अनेनैव वि
धानेन बलिं दद्याच्चतुष्पथे ॥ दग्ध्वा मत्स्यसरक्तांतं पीठं कुर्यात्समाहितः ॥ आममांसं हरिद्राक्तं यंचि
त्वा सप्रदापयेत् ॥ सप्ताहात्तु भवेत्तेषां ज्वरो सर्वन संशयः ॥ हरिद्राञ्जं करोनापि नरास्के रक्षितं भवि
तं ॥

उमाबीजयुगं चाद्यं चामुंडाबीजयुग्मकं ॥ कालि कालि पदं चोक्त्वा स्वाहयेद्धितयं ततः ॥ वह्नीकुलमहा
रक्ता नारिं हृद् हृद् पुनर्वदेत् ॥ वह्निजायां ततः प्रोक्त्वा बलिमंत्रमुदाहृतः ॥ उमाबीजं हृल्लेखाबीजं ॥ ए
तानि नं परित्याय उपविश्य निजां मतौ ॥ आत्मानं घोररूपं च चिंतयेदासमाहितः ॥ अंगार
रुदिने चैव रात्रिं दिला सकलितिथिष्वपि ॥ पूजितं खड्गमादाय निशीथे बलिमाहरेत् ॥ प्रहारशोणितं चास्य
दद्याद्देव्यै यथाविधि ॥ अनेन ध्यानेन घरूयः स्यात्तु रिपुणां नात्र संशयः ॥ मंत्रोत्तरं ॥ मायाबीजं समुद्धृत्य स्मर
मोबीजं ततः परं ॥ कात्यायनीपदं ङेंतं वह्निजायां ततः परं ॥ अष्टाक्षरी महाविद्या सर्वकामफलप्रदा ॥ क्रीं
श्रीं कात्यायनीयै स्वाहा ॥ ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत् ॥ इति कात्यायनीकल्पः ॥ अथ दुर्गा
कल्पः ॥ विश्वसारे ॥ अथ दुर्गामनुं वक्ष्ये शृणुष्व कमलानने ॥ यस्याः प्रसादमात्रेण जायते विद्याधरः स्व
यं ॥ धांलबीजं समुद्धृत्य वामकर्णविभूषितं ॥ इंदुबिंदुसमायुक्तं बीजं परमदुर्लभं ॥ चतुर्वर्गप्रदं साक्षा
न्महापातकनाशनं ॥ एकाक्षरीसमा नास्ति विद्या त्रिभुवनप्रिया ॥ विनांगध्येर्विनायुष्यैः विना होमपुरःसरैः
विनायासैर्मतारे बीजपमात्रेण सिद्धिदा ॥ मंत्रस्यास्य ऋषिर्देवि नारदः परिकीर्तितः ॥ गायत्री छंद आ
ख्यातं जगद्धात्री च देवता ॥ चतुर्वर्गप्रदा दुर्गा दुर्गालये सुसंस्थिता ॥ त्रिविधा सा महाविद्या तत्रैणु
क्षगणेश्वरि ॥ कूर्चाद्यां वा जपेद्विद्यां तदंते वह्निवल्लभां ॥ लज्जाद्यां वा जपेद्विद्यां फडंतां वा जपेत्सुधीः ॥ वध्वबी
ज पुटां वापि स्वाहांतां वा जपेत्पुनः ॥ श्रीमबीजादिकां वापि चतुर्वर्गफलाप्तये ॥ वाग्भवाद्यां जपेद्वापि प्रण
वाद्यां जपेत्पुनः ॥ कामबीजादिकां वापि फडंतां वा जपेत्पुनः ॥ त्र्यक्षरी त्रिविधा विद्या कथिता ब्रह्मणो पुरा ॥
दीर्घस्वरसमायुक्तं निजबीजं निपार्वती ॥ विन्यसेदात्मनो देहे हृदयादिषु पूर्ववत् ॥ पूर्ववच्च ॥
पूर्ववत्कर्म चाचरेत् ॥ काली वदाचरेद्धि धांजपद्धिध्यानमहानिर्णं ॥ लक्ष्महारसुकेर्दे विपुरश्चरणमीरितं ॥ य
थास्थाने तथाकाले यथाचारविधानतः ॥ प्रजपेत्परया भक्त्या दुर्गां दुर्गतिहारिणीं ॥ मत्स्यैर्मांसैः स्वपपन्नैः
म्नैः शालिकादिभिः ॥ प्रजयेत्परया भक्त्या दुर्गां दुर्गतिहारिणीं ॥

स्वयंभुकुसुमैः शुक्लैः सुगंधिकुसुमान्वितैः ॥ जवाजारक्तसिंदूरैः रक्तचंदनसंयुतैः ॥ नानामांसैर्नानाद्रव्यैः प्र
जयेत्परमेश्वरि ॥ शाकस्य कैश्च महिषैर्मेषैश्छागैर्नरैस्तथा ॥ अजैश्च पक्षिभिर्गव्यैः प्रजयेद्विधिनामुना ॥ तदो
नावेन्महासिद्धिर्नात्र कार्या विचारणा ॥ ध्यानं तु ॥ सिंहस्कंधाधिरूढां तां नानालंकारभूषितां ॥ चतुर्भुजां
महाकालीं नागयज्ञोपवीतिनीं ॥ रक्तवस्त्रपरीधानां बालार्कसदृशीं तनुं ॥ नारदाद्यैर्मुनिगणैः सेवितां भ
वगेहिनीं ॥ त्रिवलीवलयोपेतनाभिनालमृणालिनीं ॥ रत्नद्वीपमहाद्वीपे सिंहासनसमन्विते ॥ प्रफुल्लकमलारू
ढां ध्यायेत्तां भवगेहिनीं ॥ दुर्गायंत्रं प्रवक्ष्यामि शृणुष्व हरवल्लभे ॥ त्रिकोणं विन्यसेदादौ नवकोणसमन्वितं
कैविंनसहितं सर्वं अष्टपत्रैर्विभूषितं ॥ भूरेखासहितं कार्यं वज्रभूपुरसंपुटं ॥ अमीसत्ययथोक्तेन वि
लिखेद्विधिनामुना ॥ नानारत्नसंयुतैर्लेख्यं चक्रमंत्रसमन्वितं ॥ तत्रैतां प्रजयेद्देवीं मल्लप्रकीर्तिरूपिणीं ॥
पक्षस्वधारजयेद्दुर्गां सिंहपृष्ठनिवेशिनीं ॥ प्राणायामः ऋष्यादयः प्राग्वा गंधो पंचभिर्मेरुणे रं ॥ प्राणमायाजया
स्तस्मानि शुद्धानि नितरां पुनः ॥ सूक्ष्मजो विजपास्वरीसिद्धिसमन्वितरूपः ॥ ह्रीं मायाः प्रजयेत्तां तु गंधचंदन
वारिणा ॥ ॐ ह्रीं हरिद्रेमुख्यार्थं क्लीं ह्रींकारं तदनंतरं ॥ अथापरं च तुर्थ्यंतं प्रजयेत्क्रमतः प्रिये ॥ क्लीं स्वरूपमनि
पीठेव्यावामदक्षिणायोगलः ॥ प्रजयेत्परमाभक्त्या रक्तचंदनदूर्वकैः ॥ अर्घ्यदानं सदा कुर्यात्प्रजांतेपर्व
तात्मजे ॥ श्रीगोटसिः पुनः प्रत्याः पत्रकोलेषु मालपुरः ॥ यंत्रोपायुधसंयुक्ताभ्रेपुरलोकनायिकाः ॥ इति दु
र्गामंत्राः ॥ अथ विशालाक्षी ॥ आदियामले ईश्वर उवाच ॥ प्रणवमाद्यमुत्समुद्धृत्य मायाबीजं समुद्धरेत् ॥
विशालाक्षीपदं ङेंतं हृदंतं मंत्रमुद्धरेत् ॥ अष्टाक्षरी महाविद्या अष्टसिद्धियुतांबिके ॥ प्रसंतात्कथिता
विद्या त्रैलोक्यदुर्लभापि प्रिये ॥ ऋषिरस्या महेशानि सदाशिवो महाप्रभुः ॥ ॐ ह्रीं विशालाक्ष्यै नमः ॥ पंक्ति
छंदस्त्वकथिता विशालाक्षी च देवता ॥ ह्रां ह्रीं प्रणवमित्युक्तं तु जायाबीजं च बीजकं ॥ धर्मार्थकाममो
क्षेषु विनियोगः प्रकीर्तितः ॥ अंगन्यासकरन्यासौ यथावद्विधिपूर्वकं ॥ षड्दीर्घजातिजायाबीजेन प्रणा
वाघेन कल्पयेत् ॥ न्यलेन व्यापकं कृत्वा ध्यायेद्देवीं परांशिवां ॥ ध्यायेद्देवीं विशालाक्षीं तप्तजांबूनदप्रभां ॥

द्विभुजामंबिकां चंडि खड्गखर्परधारिणीं ॥ नानालंकारसुभगां रक्तांबरधरां शुभां ॥ सदा षोडशवर्षीयां
प्रसन्नास्यां त्रिलोचनां ॥ मुंडमालावलीरम्यां पीनोन्नतपयोधरां ॥ शवोपरि महादेवीं जटामुकुटमंडि
तां ॥ शत्रुक्षयकरीं देवीं साधकाभीष्टदायिकां ॥ सर्वसौभाग्यजननीं महासंपत्प्रदां स्मरेत् ॥ एवं ध्या
त्वा महादेवीं उपचारैः प्रपूजयेत् ॥ पुरश्चरणकाले तु वर्णलक्षं जपेत्सुधीः ॥ यंत्रमध्ये समाराध्य प्र
तिष्ठां कारयेत्ततः ॥ त्रिकोणं चाष्टपत्रं च ततो वृत्तं समालिखेत् ॥ चतुरस्रं चतुर्द्वारमेवं मंडलमा
लिखेत् ॥ तत्रावाह्य यजेद्देवीं सर्वसौभाग्यसुंदरीं ॥ त्रिशूलाक्षीं त्रिशूलाख्यां यथाविधि प्रपूज
येत् ॥ त्रिकोणाले महादेवीं संपूज्य मातरः क्रमात् ॥ पंकजाक्षीं विरूपाक्षीं रक्ताक्षीं वक्रलोचनां ॥ ए
कनेत्रां द्विनेत्रां च घोरदंष्ट्रां त्रिलोचनां ॥ एताः प्रपूज्य महादेवि पत्राग्रे चाष्टयोगिनीः ॥ पश्चिमादि
क्रमेणैव चाष्टसिद्धिस्वरूपिणीं ॥ चतुरस्रे महादेवि लोकपालान्समर्चयेत् ॥ स्तद्बहिः श्वेतच
न्द्राद्यान्यजयेद्वाग्न्येहलने ॥ ततो ब्राह्म्यादि जपाद्वे विधिपमाचरेत् ॥ अथ गौरीमंत्रः ॥ तंत्रे ॥
क्लीं गौरी रुद्रदयिते योगेश्वरि सर्वमे फट् द्विठांतः षोडशार्णोयं मंत्रः सिद्धिप्रदीरितः ॥ अस्य पूजा
प्रातः स्नानादि प्राणायामांतं विधाय ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शिरसि परर्षये नमः
हृदि गौर्यै देवतायै नमः ॥ ततः करांगन्यासौ ॥ ह्रूं अंगुष्ठाभ्यां नमः ॥ इत्यादि ह्रूं हृदयाय नमः इत्या
दि ॥ ततो ध्यानं ॥ हेमाभां बिभ्रतीं रात्रिं दर्पणं जनसाधने ॥ पाशांकुशौ सर्वभूषां तां गौरीं सर्वदा
भजे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनादि जयादि पीठमन्वं तं संपूज्य पुनर्ध्यात्वावाह्य
वीं पूजयेत् ॥ ततोऽग्न्यादिकेसरेषु ह्रूं हृदयाय नम इत्यादिना पूजयेत् ॥ पत्रेषु पूर्वादिषु ॐ सुभगायै नमः
एवं रतिकामिनी कामदायिनी पश्चात्कुशार्पणं जनरालोकाः पूजयेत् ॥ ततः इंद्रादीन्पूजयेत् ॥ अस्य
पुरश्चरणं लक्षजपः ॥ आज्येन दशांशहोमः ॥ तथा च ॥ लक्षमेकं जपेन्मंत्रं हविष्याशी जितेन्द्रियः ॥

दूर्वाज्ञाहामयेदाज्यैः पुरश्चरणसिद्धये ॥ फलं तु ॥ पुष्पांजलमक्षचंदनादिकं मूलमंत्राभिमंत्रितं ॥ य
स्मै यस्मै दीयते स वश्यो भवति ॥ तथा रात्रौ हरिद्रया वामोरमध्ये स्निग्धस्त्रीनाम्नि जिलिख्य वामकरे
ण पिधाय सहस्रं राजपत्न्यादि स्त्रियमाकर्षयति ॥ एतेन जातिकं सौभाग्यवश्यसंपत्करं ॥ अथ ब्र
ह्मश्रीमंत्रः ॥ स च मंत्र देवप्रकाशिकायां ॥ हूं हूं रवाननमस्कारादि ब्रह्मश्रीः ॥ ह्रीं नमो ब्रह्मश्री इति मंत्रः ॥ रा
जिते राजप्रजिते जयविजये गौरी गांधारी त्रिभुवनवशंकरि कवचाय हुं ॥ सर्वस्त्रीपुरुषवशंकरि
सस्सु दुदु घोघ रारा स्वाहा ॥ अंगन्यासः ॥ राजिते राजप्रजिते हृदयाय ॥ जयविजये शिरसे ॥ गौरि गां
धारि शिखायै ॥ सर्वलोकवशंकरि कवचाय ॥ सर्वस्त्रीपुरुषवशंकरि नेत्रत्रय ॥ सस्सु दुदु घोघ रारा
स्वाहा ॥ अस्त्राय ॥ ततो ध्यानं ॥ अविकलशशिराजन्मौलि राबद्धपाशांकुशारुचिरकराब्जां व
धुजीवारुणांगी ॥ अमरनिकरवंद्या त्रीक्षणा नूनलेपा भुकुंकुममधुलाभ्यां संपदे पार्वती वः ॥ त्र
स्यां गैः मात्वत्रिलोकपालैस्त्रिदशाक्षणानि ॥ अस्या युतजपः पुरश्चरणं ॥ पायसेन दशांश होमः ॥ मधुरत्रय
युक्तैस्तिलतंडुलैर्वा ऐवा दिनत्रयं सहस्रहोमः स्त्रीवशीकरः प्रातःकाले सूर्यमंडलस्थां देवीं संचि
त्य त्रिभुवनवश्यकारः ॥ अथ इंद्रमंत्रः ॥ स च मंत्र देवप्रकाशिकायां ॥ इं इंद्राय हूं ॥ अस्य ब्रह्म ऋषिः इंद्रो दे
वता पंक्तिश्छंदः ॥ इं बीजं आयेति शक्तिः बीजेनांगन्यासः ॥ यथा इं अंगुष्ठाभ्यां नमः ॥ इं हृदयाय नमः ॥
इत्यादि ध्यानं ॥ पीतवर्णं सहस्राक्षं वज्रपद्मकरं विभुं ॥ सर्वालंकारसंयुक्तं नौमीन्द्रं दिक्पतीश्वरम् ॥
एवं ध्यात्वा पूजयेत् ॥ ततः इं इंद्राय हृदयाय ॥ इत्यादि षडंगेन पूजयेत् ॥ ततः पत्रे पूर्वादि क्रमार्चि
केयाय ॥ एवं रं अग्नये यं यमाय क्षं नैर्ऋतये वं वरुणाय यं वायवे सं सोमाय हं ईशानाय ततो वज्रादीन् पूज
येत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ आज्येन तिलैर्वा पुलहोमः ॥ ततः प्रयोगः ॥ चतुष्कोणस्थपद्मेन
व वस्त्रवेष्टितं कुंभं स्थापयित्वा गंधोदकेन संपूज्य तत्र सपरिवारमाराध्य सहस्रं जपात्तत्का
ले अभिषेकात् भ्रष्टराज्यस्य प्राप्तिः अन्येषां परमा प्रीतिर्भवति ॥ अथ महाकाली ॥

ॐ प्रें प्रें क्रों क्रों पशुं गृह्ण हा ण हुं फट् स्वाहा॥ अथ ज्वालामालिनी॥ ॐ नमो भगवति ज्वालामालिनि गृध्रग
णपरिवृते हुं फट् स्वाहा॥ अनेन भैरवीमंत्रेण यावत्क्रूरकर्माणि प्रयोगः कार्यः॥ अथ महाकाली मंत्रप्र
योगः॥ तत्र न्यासादिकं तु न कर्त्तव्यं॥ तथा च॥ न्यासमुद्रादिकं किंचिन्मात्र कार्या विचारणा॥ कृष्ण
तोयदसंकाशं स्फुरत्कुंभेषु कालिकां॥ पंचवक्त्रां महारौद्रीं आलिरक्तविलोचनां॥ शक्तिशूल
धनुर्बाणखड्गखेटवराभयां॥ दक्षांदक्षेषु भैरवीं बिभ्राणां त्रिनेत्रभूषणां॥ ध्यात्वैवं साधकः
साध्यं साधयेन्मन्त्रसिद्धितः॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथैवैंद्री
चामुंडा चंडिकाष्टमी॥ एवं देवीगणं पर्यंतं कुंभस्थाने स्थिता इमाः॥ तत्र क्रमः॥ देवीं ध्यात्वा यथावि
ध्युपचारेण संपूज्य आत्मायुधाष्टकान्तीः पूर्वादिक्रमेण पूजयेत्॥ नमो भ्यासर्वाणस्य रेध्यं वह्नौ प्रज्वलि
तां वरे॥ जुहुयाद्देविगणं सिद्धो देवीमंत्रजपस्तथा॥ समिधः पिचुमर्दस्य यथाविधिनीत काष्ठिका॥
गृत धूमस्मशानोत्तविभीतांगारहोमतः॥ सप्ताहाद्वैरिणं हंति कालिकामंत्रयोगतः॥ उच्चाट
नेऽपरोक्तसंध्यायां मारणं तथा॥ दक्षिणस्यां दिशि स्थितामारे दक्षिणामुखः॥ इति महाका
लीप्रयोगः॥ अथ ज्वालामालिनी प्रयोगः॥ तत्रांगन्यासः॥ ॐ नमो हृदयै प्रोक्तं भगवती तिशिरः स्व
लं॥ ज्वालामालिनि च शिखायां गृध्रगणपरिवृते तनुतः॥ वर्मस्वाहांत मिस्त्रं न्यसेत्तेनां प्रयोगस्तु॥ ॐ
नमो हृदयस्वादि॥ अंगुष्ठानि यतश्चैव जपेन्मंत्रं जपाज्जयी॥ स्मृतिमात्रेण वै मंत्री रिपून् सर्वान्
विनाशयेत्॥ प्रेतकारी ये॥ ॐ ठं ठां ठिं ठीं ठुं ठूं ठें ठैं ठों ठौं ठंठः॥ अनेन वाणसंस्थितमयं पंचांगुलप्र
माणकीलकं यस्याग्रे हेस्मशाने वा निखनेत्तस्य उच्चाटनो भवति॥ उच्चाटनकीलकमंत्रः॥ डं डां डिं डीं डुं डूं डें डैं डों डौं
डंडः॥ अविकेग्गणत्हुं ठः॥ अनेन मंत्रेण मनुष्यास्थिमयं कीलकं वितस्तिप्रमाणं सहनाभिमं
त्रितं यस्याग्रे ह स्मशाने वा निखनेत्तस्य समस्त परिवारो नश्यति॥ उच्चाटनकीलकः॥ तथा॥

ॐ सः सं सें हः अमुकस्य शांतिर्भवतु स्वाहा॥ अनेन मंत्रेण छलमधुक्षीरं हुनेत्तेन शांतिर्भवति॥
ॐ ढं ढां ढिं ढीं ढुं ढूं ढें ढैं ढों ढौं ढं ढः अमुकं मारय मारय ठः ठः अनेन मंत्रेण गर्दभास्थिमयं कीलकं त्रयोदशां
गुलं सहस्रेणाभिमंत्रितं कृत्वा चितामध्ये निखनेत् खलु स च ज्वरेण म्रियते॥ ॐ लं लां लिं लीं लुं लूं लें लैं
लों लौं लं लः॥ अनेन मंत्रेण खदिरकाष्ठमयं कीलकं सहस्रेणाभिमंत्रितं यस्य नाम्ना गृहे स्थाने वा नि
खनेत्तस्य सर्वनाशो भवति॥ अथ निगडबंधमोक्षणं॥ ॐ निकृंतले तिग्मतेजाय नमः यं विसेताबं धमेतं
यन्मेन दत्तं तस्मात्संविदानोत्तमेनाके अघोरे हवे रं अस्य निगडभंजनमंत्रस्य प्रजापतिऋषिर्नि
र्ऋतिर्देवता त्रिष्टुप्छंदः बंधादिव्यसनपरिहारे विनियोगः॥ एवं ऋष्यादिकं विन्यस्य अयुतं प्र
जपेत्सुधीः॥ ततो बंधाद्व्यसनाद्ये मुक्तो भवति नान्यथा॥ तारं चिदिति द्वयं पश्चाल्लिखेत् चांडालिनि त
तः परं॥ महराचाल ततो क्रमाल्लिखेत् अमुकं मे ततः परं॥ वशमानय ठ द्वं द्वं चिर मानउदाहृतः॥ स
मभिर्दिवसैर्नरं पातु न शायेहि भृष्चिनामुना॥ विधिमाह॥ वालिख्य तालपत्रे तं साध्यनाम विद
र्भितं॥ निःक्षिप्य क्षीरसंमिश्रे जले तु धारयेन्नित्यं॥ वशो भवति साध्यश्च नात्र कार्या विचा
रणा॥ तालेपत्रे लिखेदेवं भद्रकालीं दहेत्खनेनु॥ वश्याय सर्वजंतूनां प्रयोगोयमुदाहृ
तः॥ अथ त्र्यंबकमंत्रः॥ त्र्यंबकं यजामहेत्यादि वसिष्ठो मुनिप्रोक्तः छंदोनुष्टुबुदाहृतम्॥ दे
वतास्य समुद्दिष्टा त्र्यंबकः पार्वतीपतिः॥ त्रिनेत्रैर्मंत्रवर्णैः स्यात् षडंगानां च कल्पनं॥ तत्र
प्रयोगः॥ त्रलेषु कुंभादिपीठन्यासांतं कर्म समाप्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि वसिष्ठऋ
षये॥ मुखे अनुष्टुप्छंदसे॥ हृदि त्र्यंबकदेवतायै॥ अमुकस्य अमुकशांत्यर्थे विनि॥
अथ करांगन्यासः॥ तद्यथा॥ त्र्यंबकं अंगुष्ठा॥ यजामहे तर्जनी॥ सुगंधिं पुष्टिवर्ध
नं मध्यमा॥ उर्वारुकमिव बंधनान् अनामा॥ मृत्योर्मुक्षीय कनिष्ठा॥

मामन्तालकरतलपृष्ठान्॥ एवं हृदयादि॥ ततः पूर्वपश्चिमाद्याम्नातरपत्रेषु तदनंतरं॥ गुरोर्गलास्ये पु
पुनर्नाभिहृत्पृष्ठकुक्षिषु लिंगपायुस्वरूपं रुलोलजानुयुग्मेषु ततः परं॥ तेषु युग्मेषु स्तनयोः पार्श्वयोः
पादयोः पुनः पाण्योर्नासिकयोः श्रीषु मंत्रवर्णान्न्यसेत् क्रमात्॥ ततः पादान्ये मूर्द्धान्यसेत्॥ मूर्द्धरो
म्णोः पुगण्डाक्षिषु वक्त्रे गंडहृदयप्रयोः हृदयजठरे पुनः गुह्योरजानुपादेषु न्यसेदेवं समापयेत्
ततो ध्यानं॥ हस्ताभ्यां कलशद्वयामृतरसैः शाप्लावयंतं द्विरारुह्याभ्यां तोरघतं मृगाक्षवलये द्वाभ्यांच
हेतं परं॥ अंगन्यस्तकरद्वयामृतघटं कैलाससूरं तद्रिं स्वच्छांभोजगतं नवेंदुमुकुटज्वालं त्रिने
त्रं भजे॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः श्रीयोक्तपीठे पूजां विधाय पुनर्ध्या
त्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ ततोग्न्यादिकेशरेषु त्र्यंबकं
हृदयाय नम इत्यादि षडंगानि पूजयेत्॥ अष्टपत्रेषु॥ ॐ अमृतायनमः॥ एवं मानवेन स्कंधायै जलाय
वह्नये वायवे विष्णवे यज्ञमानाय लक्ष्म्यै रमारामाप्रभाज्योत्स्नापूर्णप्रभामृतास्वधा॥ वासंयु
ॐ रमायेनम इत्यादि तद्बाह्ये विश्वाविद्योद्भितामृतसारासंध्याद्भिरा निमाः वास्यंलु॥ ॐ विश्वा
येनमः॥ इत्यादि तद्बाह्ये ॐ ओं भूर्भ्यै नमः॥ एवं प्रकाशायै प्रज्ञायै मेधायै कान्त्यै शांत्यै ध्यै मत्यै॥ ततो धूपा
दि विसर्जनांतं कर्म समापयेत्॥ प्रयोगस्तु॥ शनैश्चरदिवसे ऽन्यदिवसे वा अश्वत्थमूलं स्पृष्ट्वास
हस्रं जपेत्॥ तथा च शनिवारदिने ऽश्वत्थमूलं संस्पृश्य संजपेत्॥ साक्षान्मृत्योर्विमुच्यते द्विम
न्याथवा इक्ष्वाक्रिया॥ तथा स्नात्वा सहस्रं वा आदित्याभिमुखो मनुं॥ आधिव्याधिविनिर्मुक्तो दीर्घमा
युरवाप्नुयात्॥ प्रत्यहं जुहुयान्मंत्री दूर्वाभिः युतावधिः॥ आमयानि तिलान्नं जितार्चितो दीर्घायुर
वाप्नुयात्॥ वटवृक्षस्य समिधैर्जुहुयाद् युतावधिः॥ धनधान्यसमृद्धिः स्यात् अचिरेणैव सि
ध्यति॥ अथ मृतसंजीवनीमंत्रः॥ आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृती श्रीप्रोच्चार्य
त्र्यंबकं यो जपति अनुदिनं भयं एवं तदंते॥

कृत्वा न्यासं षडंगं मनवदमलतरश्चिंमंडलांतं प्रविष्टं ध्यात्वा योरुद्रमंत्रं स जपति मरणं शुक्रविद्या
प्रसादात्॥ मृतिहरं अक्षरं मृत्युंजयमंत्रं अस्य जपात् सर्वसिद्धिर्भवति॥ अथ शुक्रोपासिता
मृतसंजीवनी॥ तद्यथा॥ गायत्री प्रथमं पादं त्र्यंबकस्यापि तं वदेत्॥ गायत्र्या द्वितीयं पादं त्र्यंबक
स्य द्वितीयकं॥ गायत्रीतृतीयं पादं अशेषं त्र्यंबकस्य च॥ मंत्रो यथा॥ ॐ तत्सवितुर्वरेण्यं त्र्यंबकं
यजामहे भर्गो देवस्य धीमहि सुगंधिं पुष्टिवर्द्धनं धियो यो नः प्रचोदयात्॥ उर्वारुकमिव बंध
नान्मृत्योर्मुक्षीय मामृतात्॥ ध्यानं॥ स्वच्छं स्वच्छारविंदस्थितमुभयकरे संस्थितौ पूर्णकुंभौ द्वा
भ्यामेणाक्षमाला निजकरकमले द्वौ घटौ नित्यपूर्णौ। द्वाभ्यां द्वौ स्रवंतौ शिरसि शशिकलाचामृतैः
प्लावयंतं देहं देवं दधानं प्रदिशतु विशदाकल्पजालं श्रियं वः॥ एवं ध्यात्वा बाह्यत्र्यंबकरुद्रायन
मइत्यनेन नरो जयेत्॥ अस्य जपात् सिद्धिर्भवति॥ अथाकर्षणविधानानि कथ्यामि समासतः॥ तदु
क्तं त्रिपुरतंत्रे यद्दृष्टं तडामरे॥ श्रीबीजमादौ प्रथमं बीजं लज्जाबीजं समुद्धरेत्॥ प्रथमं प्रणवं दत्वा त्रि
पुरादेवि पदं ततः॥ अमुकीमिति पदं हं हं आकर्षय द्विधा परं॥ स्वाहांतं मंत्रमुद्धृत्य जपेद्दासहस्रकं
ॐ ह्रीं क्लीं त्रिपुरादेवि अमुकीं आकर्षय स्वाहा इति मंत्रः॥ षट्कोणं च समालिख्य रक्तचंदनकुंकुमैः॥
षडंगं कारयेन्मंत्री लज्जाबीजसमन्वितं॥ षट्कोणे चाक्षरैः स्वरैरेव नादबिंदुसमन्वितं॥ रक्तपुष्पैस्तल
रपादिनैवेद्यैः परिपूज्य तां॥ भावयन्मनसा देवी त्रिनेत्रां चंद्रशेखरां॥ बालार्ककिरणप्रख्यां सिंदूरा
रुणविग्रहां॥ पंचदश सहस्राणि जपमालां च वामके॥ मंत्रस्यास्य प्रसादेन रंभामपि तथोर्वशीं॥ आ
कर्षयेत् स संदेहः किं पुनर्मानुषीमिह॥ भूर्जपत्रे समालिख्य कुंकुमारक्तवारिणा॥ कस्तूरीरागरुकस्तूरी
रोचनाभिर्लिलेनच॥ अनामारक्तमिश्रेण श्रीमल्लक्ष्मीमनुं लिखेत्॥ ॐ श्री श्रीमल्लक्ष्मी अमुकीमा
कर्षय २ ॐ फ्रूं ह्रूं ह्रमं मंत्रं जपेद्दासहस्रैकलतः पुनः॥ लक्षजं पत्रे भोदायगुलिकां कारयेत्सुधीः॥ ते
नैव साध्यपादोत्थं मृत्तिकापंकवेष्टितं॥ ज्वालयित्तं तेजसा भालो वेष्टयेत्कटुकैः पुनः॥

प्रतिमां स्त्री निर्मां कृत्वा तस्याः क्षिपेत्तथोदरे ॥ त्रुटिकां पालयेत्पात्रे प्रतिमां साध्यरूपिणीं ॥ ताडनाद्गाढमुद्गामु
खेभ्यस्तां निजे ने निद्धिं साधकः ॥ धारयेद्धलिखित्वा तावद्यजपेन्मनुं ॥ यावद्दायालिखितस्तां मर्द
नान्न सेविग्नता ॥ अथ विद्वेषणं वक्ष्ये अन्योन्यस्य समसंनारोपितो समरे युतौ ॥ तदीयनखरोमश्मशानधूलिमादाय
साधकः ॥ धूलिमात्रेण विद्वेषस्ताडनाद्दिनिजायते ॥ परस्परं रिपोर्वैरं चित्रेण सह निश्चितं ॥ महिषा
श्व पुरीषाभ्यां गोमूत्रेण समालिखेत् ॥ यमो नाम तयोर्मूत्री विद्वेषश्च परस्परं ॥ रक्तेन मार्जिषाश्वेन
श्मशानवस्त्रके लिखेत् ॥ यस्य नाम च वेत्तस्य विद्वेषंच परस्परं ॥ षट्कोणं चक्रमध्ये तु रिपोर्ना
म समन्वितं ॥ मंत्रं च संप्रवक्ष्यामि महाभैरवसंस्कृतं ॥ ॐ नमो महाभैरवाय श्मशानवासिने अमु
कामुकयोर्विद्वेषं कुरु २ हुं फट् एतन्मंत्रं लिखित्तत्र विद्वेषो जायते ध्रुवं ॥ अन्ययोगमहं वक्ष्ये दुर्लभं वसु
धातले ॥ तेन ध्यानेन शीघ्रेण विद्वेषो जायते महान् ॥ ॐ नमो भगवति श्मशानकालिके अमुकंमु विद्वेष
य र हन २ पच २ मथ २ हुं स्वाहा ॥ अमुना मंत्रराजेन होमयत्प्रयतः सुधीः ॥ वह्निकुंडे निंबपत्रैः कटु
तैलान्वितेन च ॥ प्रज्वाल्य खदिरं वह्निं श्मशानजं ततः पुनः ॥ दक्षिणहस्तसंयुक्तालिंग यवाक्षतान्वि
तं ॥ भवानी कालिकां देवीं इंद्रनीलमणिप्रभां ॥ व्योमनीलां महाचंडां स्फुरास्फुरविमर्दिनीं ॥ त्रिलोचनां र
क्तनेत्रां सर्वाभरणभूषितां ॥ कपालकर्तृकाहस्तां चंद्रसूर्यापरिस्थितां ॥ शारजातजगतां चैव भूतवैर
वेष्टितां ॥ वसंती पिलकांतारे सर्वसिद्धिप्रदायिकां ॥ होमयेद्विविधैः पुष्पैर्वलिच्छागोपहारकैः ॥ पूज
यित्वा महेशानीं भक्तिपुरःसरेण चेतसा ॥ तद्भस्म च समादाय धारयेद्दिनमंत्रितं ॥ तस्मिन्नोत्तेन यं हन्या
त्तद्विद्वेषं लक्षवेनन्दनं ॥ वह्निश्च शीलतां याति पतेद्भूमौ तथा रविः ॥ यदा शुष्यति पाथोधिः चंद्रमा पत
येद्यदि ॥ तथापि स्यान्महादेवि योगराजः स्फुटं दुर्लभः ॥ षट्कोणचक्रवार्त्तेषु षट्कोणनामटंकितं ॥ शत्रु
नाम द्व्यक्षरं मंत्रं द्व्यक्षरादिं क्रमेण लिखितं ॥ ईर्ष्या द्वयेण विद्वेषंकारयेद्ध्रुवं साधकः ॥ ॐ क्रां विद्वेषिणि
अमुकामुकयोः परस्परं विद्वेषं कुरु २ स्वाहा ॥ चक्रं था द्यलिखेन्मंत्रमिमं प्रयत्नैर्वस्तुभिः ॥

परस्परं च वेष्टयेद्योगी यं कुब्जिकामते॥ अथोच्चाटनं॥ अथोच्चाटनविधिं वक्ष्ये यथोक्तं श्रीमतोत्त
रे॥ निंबपत्रे लिखेन्नाम महिषाश्वखररुधिरकैः॥ काकपक्ष्या खलेखिन्या लेखनीयमनेन मनुम्॥ ॐ नमः
क्रौं कुलुडि धरल मुखि अमुकस्योच्चाटय रहुंफट् इत्येतन्मंत्रं समभ्यर्च्य लिखित्वा सर्ववस्तुभिः निंब
वृक्षस्थितं सर्वं कालयहुनेत्ततः॥ श्मशानवह्निमानीय चत्वरराष्ट्रदीपितम्॥ वह्निं कृत्वा महातैले
रथ्याकूटवस्तुभिः॥ पूर्वोक्तमनुनालस्य पत्रं राजीकटुपुलं॥ संपूज्य धेवलामुरवीं पंचोपचारपूज
या॥ हुनेदिंसन्वयः॥ तद्भस्म प्रक्षिपेद्यत्नो यदि शिरोपरि मंत्रवित्॥ ध्यानयुक्तेन मनसा शत्रोरुच्चाट
नं भवेत्॥ धूम्रवर्णां महादेवीं त्रिनेत्रां शशिशेखरां॥ जटाजूटसमायुक्तां व्याघ्रचर्मपरिच्छदां॥
कृशांगीमस्थिमालां च कर्तृकाचकरांबुजां॥ कोटराक्षीं स्वरं ध्वाच पालालसन्ति भोरसां॥ एवं वि
धांघिंधाभाव्य कार्यमुच्चाटनं रिपोः॥ एवं प्रयोगविधिः प्रोक्तो वीरतंत्रे महेश्वरि॥ गोपनीयं प्रय
त्नेन न प्रकाश्यं कदाचन॥ इत्युच्चाटनं॥ तथा॥ सौरावयोर्दिनेगाध्यं नरास्थि सुतुरंगुलं॥ निखारसे
न संलिख्य प्रधाने भवने क्षिपेत्॥ सप्ताहाभ्यंतरे शत्रोरुच्चाटनं भवेत्॥ मंत्रस्तु॥ ॐ अमुकस्यो
च्चाटनं कुरु कुरु स्वाहा॥ ॐ अमुकं हन हन स्वाहा॥ रिपोर्मलं व्रीहिं च भुवि निक्षिपेत्॥ प्रियं लेमलरो
धेन उद्धलेत्तु स्करवान् हं॥ मंत्रस्तु॥ स्तंभिनि अमुकस्य मलं स्तंभय रहुं फट्॥ अथ सूखप्रसव मंत्रः॥
ॐ मन्मथ रवाहिर ॐ वो दूर मुंच रस्वाहा॥ ॐ मुक्ताः पाशा विपाशाश्च मुक्ताः सूर्येण रश्मयः॥
अथास्त्रान प्रयोगः॥ अर्कस्य न्मनिकापासपद पुं कुज तत्तुभिः॥ पंचभिर्वर्तिकाभिस्तु नरकपाले
तु पंचसु॥ नरतैलेन दीपास्तु कुजे लं न्नरकपालकैः॥ न्नाहये पंचभिर्यं नाम पूर्वं च्वद्विपालये॥
दीपोपरि तथा नरकपालं पंच वेदेयं॥ यथा कुंजतं पलतिपंचसु॥ इदं कर्म द्विबाहुलये कुर्यादिसर्थः
पंचस्थानीयजालं तु एकीकुर्याच्चेतं पुनः॥ मंत्रयित्वा जपेन्मंत्रं देवपृरेन द्दश्यते॥ मंत्रस्तु यथा॥

ॐ फ्रूं कालि कालि महाकालि मांसशोणितं खं खं खादय खादय देवि मा पश्यतु मानुषेति हुं फट् स्वाहा ॥ इति मं
त्रेण शोत्तरशतं जपेन मंत्रयेत् ॥ अथ मूलमंत्रोत्तरसहस्राभिमंत्रितं कृत्वा ॥ तत्कज्जलं नेत्रे दत्वा त्रै
लोक्यादृश्यो भवति ॥ अथ योगिनीसाधनं ॥ लडुक्षं मूलडामरे ॥ अथातः संप्रवक्ष्यामि योगिनी
साधकोत्तमे ॥ सर्वार्थसाधनं नाम देहिनां सर्वसिद्धिदं ॥ अतिगुह्या महाविद्या देवानामपि दुर्लभा
यासामभ्यर्चनं कृत्वा यक्षेशो नरपुंगवोधिपः ॥ तासामाद्यां प्रवक्ष्यामि सुराणां सुंदरीं प्रिये ॥ अस्याश्चाभ्य
र्चनेनैव राज्यं लभते नरः ॥ अतः प्रातः समुत्थाय कृत्वा स्नानादिकं शुभं ॥ प्रासादे च साधकुर्यात् आचम
नं ततः ॥ प्रणवं तेसहस्रार हुं फट् दिग्बंधनं चरेत् ॥ प्राणायामं ततः कुर्यात् मूलमंत्रेण मंत्रवित् ॥ षडं
गमायया कुर्यात् पद्मं स्वेष्टदैवलिखेत् ॥ तस्मिन् पद्मे महामंत्रे जीवन्यासं समाचरेत् ॥ पीठे देवीं समभ्य
र्च्य ध्यायेद्देवीं जगत्प्रिये ॥ पूर्णचंद्राननां गौरीं विचित्रांबरधारिणीं ॥ पीनोत्तुंगकुचां वामां सर्वेषामभ
यप्रदां ॥ इति ध्यात्वा ॥ मूलेन दद्यात् धारिकं शुभं ॥ पुनः धूपं निवेद्यैव नैवेद्यं मूलमंत्रतः ॥ गंधं चंदनतांबूलं स
कर्पूरं सुकुमं नमं ॥ मंत्रस्तु ॥ प्रणवं ते भुवनेशी आगच्छ सुरसुंदरी ॥ वह्निजायां जपेन्मंत्रं त्रिसंध्यं च दिने
दिने ॥ सहस्रैकप्रमाणेन ध्यात्वा देवीं मुदा बुधः ॥ मासांते ध्याप्य दिवसं बलिपूजां सुकुर्यान्नां ॥ कृत्वा च प्रज
पेन्निशि यं निशीथे जाति सुंदरी ॥ सुदृढं साधकं ज्ञात्वा यातिसा साधकालये ॥ सुप्रसन्ना साधकाग्रे सदास्मे
र सुरवीतवतः ॥ दृष्ट्वा देवीं साधकेंद्रो दत्वा पाद्यादिकं शुभं ॥ सुचंदनं सुमनसो दत्वा अभिलिखितं वदेत्
मातरं भगिनीं वापि भार्यां वा नर्तकी भावतः ॥ यदि माता तदा नित्यं द्रव्यं च सुमनोहरं ॥ नृपतित्वं प्रार्थितं
यत्तद्ददाति दिने दिने ॥ पुत्रवत् पालितं लोके सत्यं सुनिश्चितं ॥ स्वसा तदा ददाति दिव्यं वस्त्रं तथै
व च ॥ दिव्यकन्यां समानीय नागकन्यां दिने दिने ॥ भ्रातृवत्पालितं लोके कामना नित्य मनोरमैः ॥ भा
र्या स्याद्यदि सा देवी साधकस्य मनोहरा ॥ राजेंद्रः सर्वराजानां संसारे साधकोत्तमः ॥ स्वर्गे लोके
च पाताले गतिः सर्वत्र निश्चितं ॥ यद्यद्ददाति सा देवी कथितुं नैव शक्यते ॥ तया सार्द्धं च संभोगं

करोति साधकोत्तमः॥ अन्यस्त्रीगमनं त्यक्त्वा अन्यथा नश्यति ध्रुवं॥ ततो न्यसाधनं वक्ष्ये निर्मितं ब्र
ह्मणा पुरा॥ नदीतीरं समासाद्य कुर्यात्स्नानादिकं ततः॥ पूर्ववत्सकलं कार्यं चंदनेन मंडलं लिखेत्
स्वमंत्रं तत्र संलिख्य आवाह्य ध्यायेन्मनोहरां॥ कुरंगनेत्रां शरदिंदुवक्त्रां बिंबाधरां चंदनगंधलिप्तां
चीनांशुकां पीनकुचां मनोज्ञां श्यामां सदा कामदुघां विचित्रां॥ एवं ध्यात्वा यजेद्देवीं अगरुधूपदीप
कैः॥ गंधपुष्पैर् संभवैर् लतांबूलाद्यैश् च मूलेन ततः॥ तारं मायां तत आगच्छ मनोहरे पाद्यं कल्पयामि॥
ॐ ह्रीं आगच्छ मनोहरि स्वाहा इति मंत्रः॥ ततो मूलं प्रतिदिने जपेन्मंत्रं प्रसन्नधीः॥ मासं तु ध्या
त्वा दिनं संकुर्यात् पूजनं यत्नतः सुमे॥ आनिशीथं जपेन्मंत्रं दत्वा तत्र साधकोत्तमः॥ गत्वा च साधकः मासे सु
प्रसन्ना मनोहरा॥ वरं वरय शीघ्रं त्वं यत्ते मनसि वर्तते॥ साधकेन्द्रो पितां नत्वा पाद्यादिभिः स्वयं मु
दा॥ चंदनोदकपुष्पेण पूजयेच्च मनोहरां॥ ततो निर्मिता प्रसन्ना सा पुष्पाति प्रार्थितं च यत्॥ स्वर्णशतं सा
धकाय प्रदाति सा दिने दिने॥ सा च शेषव्ययं कुर्यात् स्थिते ततो न दास्यति॥ अन्यस्त्रीगमनं तस्य नभुवे
ससमीरितं॥ अथो हलेगतिर् स्वस्य नरनीति निसंशयः॥ इयं तेनाथितानि ध्यात्वा गोप्याद्गोप्यतरा परे॥
तव स्नेहेन न मन्तव्या च वेद्योहं परमेश्वरि॥ ततो नत्वा महाविद्यां शृणु सौम्य मनाप्रिये॥ गत्वा वटतले देवीं पूज
येत् साधकोत्तमः॥ प्राणायामं षडंगं च मायया चाथ समाचरेत्॥ सद्यो मांसबलिं दत्वा शजयेत्तां समोदितः
अर्घ्यमुच्छिष्टरक्तेन रत्वा स्वयं दिने दिने॥ प्रचंडवदनां गौरीं पक्वबिंबाधरां प्रियां॥ रक्तांबरधरां बालां
सर्वाभरणभूषितां॥ एवं ध्यात्वा जपेन्मंत्रं अयुतं साधकोत्तमः॥ सप्तदिनं समभ्यर्च्य पूजयेत् विधिव
च्चरेत्॥ कायेन मनसा वाचा प्रजपेद्वै दिने दिने॥ तारं मायां तथा पुष्पं वरं कामिनि लदृशि॥ आगच्छ
कनकाले च रति स्वाहा मनु महामनुः॥ ॐ ह्रीं ओं पुरुष कामिनि आगच्छ कनक लति स्वाहा इति मंत्रः॥
आनिशीथं जपेन्मंत्रं बलिं दत्वा मनोहरं॥ साधकेभ्य ह्य दद्यात् शालाम्भा यालि साधकालये॥ साधकेन्द्रो
पितां ह्लाद घाद्याद्यादिकं ततः॥ ततः सपदि याति ता भोज्य यस्या कामभोजने॥ वस्त्रभूषणादिकं दत्वा याति सा

निजमंदिरे ॥ एवं भार्या भवेन्नित्यं साधकस्यानुरूपतः ॥ आत्मभार्यां परित्यज्य भजेत्तां च विचक्षणः ॥
इति कामेश्वरी वश्या सर्वकामफलप्रदा ॥ प्रणवं भुवनेशानी चागच्छ कामेश्वरी ततः ॥ वह्निभार्यामि
हामंत्रं साधकानां सुखावहं ॥ ॐ ह्रीं आगच्छ कामेश्वरि स्वाहा इति मंत्रः ॥ पूर्ववत्सकलं कृत्वा च जि
पेत्सकूर्मजने ॥ गोरोचनाभिः प्रतिमां निर्माय सम्यलंकृतां ॥ शय्यामारुह्य प्रजपेन्मंत्रमेकमनो
त्सलः ॥ सहस्रैकप्रमाणेन मासमेकं जपेद्बुधः ॥ घृतेन मधुनादीपं दद्यात्सुसमाहितः ॥ ध्यानं ॥
कामेश्वरीं शशांकास्यां खेलत्खंजनलोचनां ॥ सदा लोलगतिं कांतां कुसुमास्त्रशिलीमुखां ॥ एवं ध्या
त्वा जपेन्मंत्रं निशीथे याति सा तदा ॥ गत्वा च साधकं ब्रूते किं करोमीति तं वदेत् ॥ स्त्रीभावेन मुदा
तस्येद्दद्यातायाति कृततः ॥ सुप्रसन्ना मुदा देवी साधकं तोषयेत्सदा ॥ अन्यास्त्रीरतिभोगेन परिवे
पालयेत्सदा ॥ नीता रात्री सुरैश्वर्यैः रतौ च विपुलं धनं ॥ दत्वालंकारद्रव्याणि प्रभाते याति निश्चि
तं ॥ एवं प्रतिदिनं तस्य सिद्धिः स्यात्कामरूपतः ॥ ततः परे विनिर्माय पुत्तलीं ध्यानतत्परः ॥ सुवर्णेन
एणां गोरांगीं सर्वालंकारभूषितां ॥ नूपुरांगदहाराढ्यां लसच्चपुष्पुरेक्षणां ॥ एवं ध्यात्वा जपेन्मं
त्रं दत्वा च पाद्यमुत्तमं ॥ चंदनेन च पुष्पेण जातीपुष्पेण पततः ॥ गुग्गुलं धूपदीपं च दद्यान्मृल्लेन
साधकः ॥ मंत्रस्य ॥ तारं मायां तथा गच्छ रतिसुंदरि पदं ततः ॥ वह्निभार्यावधि सहस्रं जपेन्मंत्रं दिने
दिने ॥ ॐ ह्रीं आगच्छ रतिसुंदरि स्वाहा इति मंत्रः ॥ मासैकेदिव संप्राप्य कुर्यात्संज्ञादिकं शुभं ॥ घृतं
दीपं च धूपं गंधपुष्पं ताम्बूलमेव च ॥ तावन्मंत्रं जपेद्धीमान् यावदायाति सुंदरी ॥ सा तां दृष्ट्वा साधके
न्द्र निशीथे याति निश्चितं ॥ तत्सस्ता मर्चयेद्युक्त्या जातीकुसुममालया ॥ सा संतुष्टा साधकेन्द्रं लो
कं येज्ञीति नो जने ॥ भवेद्भार्या च सा तस्मै ददाति वरवांछितं ॥ शारीरं परित्यज्य प्रभाते याति सा
ध्रुवं ॥ साधकस्यानुरूपेण प्रयाति सा दिने दिने ॥ निर्जने प्रांतरे देवी सिद्धा स्यान्नात्र संशयः ॥
सत्ये भार्यां भजेत्तां च अन्यथा नश्यति ध्रुवं ॥ ५ ॥ ततोन्यसाधने वक्ष्ये स्वेच्छ हे द्रविसन्निधौ ॥

वेशाद्यं भुवनेहूं च गच्छ यक्षिणी वलुभा ॥ पावकस्य महामंत्रं इर्वीरसकलं ततः ॥ मंडलं चंदनैः कृत्वा
मूलमंत्रं लिखेत्ततः ॥ प्रधाननांगाभरणां पीनोत्तुंगपयोधरां ॥ श्यामलांगीं स्मरमुखीं रक्तोत्पलदलेक्ष
णां ॥ एवं ध्यात्वा जपेन्मंत्रं सहस्रं च दिने दिने ॥ मासांते प्रतिमां प्राप्य विधिवत्पूजयेत्सदा ॥ आनिर्हीथं
जपेन्मंत्रं दशमासेन साधकः ॥ सर्वत्र कुशलं दृष्ट्वा यातिस्यास्साधकालयं ॥ भेला भार्यास्साधकं हितो
षयेद्विविधैरपि ॥ भोगैर्द्रव्यैर्न्नपैर्णाद्यैः यक्षिणीसा दिने दिने ॥ पतिरत्नालितं कौ सुविविधं स्वर्गेन्विसेव
दा ॥ त्यक्त्वा भार्यां निजे तां च साधकः सदा प्रिये ॥ ५ ॥ ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता ॥ इत्थं तौ
यास्साधिता विद्या वरला चालिवला प्रिये ॥ प्रणवांते महामाया नटिनी पावकप्रिया ॥ ॐ ह्रीं नटिनि स्वाहा इति
मंत्रः ॥ महाविद्येत कथिता गोपनीया प्रयत्नतः ॥ अशोकस्य तटे गत्वा स्नानं पूर्ववदाचरेत् ॥ मूलमंत्रेण
सकलं कुर्यात्सकलस्समाहितः ॥ त्रैलोक्यमोहिनीं गौरीं विचित्रांबरधारिणीं ॥ विचित्रालंकृतां रम्यां नर्त्त
कीवेषधारिणीं ॥ एवं ध्यात्वा जपेन्मंत्रं सहस्रं च दिने दिने ॥ मांसोपहारैः संपूज्य धूपदीपनिवेदयेत् ॥ गंध
चंदनतांबूलं दद्यात्तस्यै मुदा बुधः ॥ मासमेकं तु तां नित्यं पूजयेत्साधकोत्तमः ॥ मासांते दिवसं प्राप्य कु
र्यात्पूजनं महत् ॥ अर्द्धरात्रे गते देवी किंचित्साधकसत्तमः ॥ दृष्ट्वा दृढं साधकं मत्वा यातिसा साधकाल
यं ॥ विद्याभिः सकलोनिश्चैः किंचित्स्मेरमुखी ततः ॥ वरं वरय शीघ्रं त्वं यान्तु मनसि वर्तते ॥ ततः कृत्वा सा
धकश्रेष्ठो भावयेन्मनसा धिया ॥ मातरं भगिनीं वापि भार्यां वा धीतिभावतः ॥ कृत्वा संतोषयेत्तस्या नटि
नीतत्करोत्यलं ॥ मातास्याद्यदि सा देवी पुत्रवत्पालितं मुदा ॥ स्वर्णद्रोलं सिद्धद्रव्यं ददाति सा दिने दिने ॥ भगि
नी यदि सा कन्यां देवस्य नागकन्यकां समानीय सा ददाति दिने दिने ॥ अतीतानागतां वार्त्तां सुवेजानाति सा
धकः ॥ भार्यास्याद्यदि सा देवी ददाति विपुलं धनं ॥ अन्नाद्यैरुपहारैश्च ददाति काम भोजनं ॥ स्वर्णद्रोलं
सदा तस्मै ददाति साधकं प्रिये ॥ यं घट्टं छंति लत्सर्वं ददाति नात्र संशयः ॥ ७ ॥ महाविद्यां प्रवक्ष्यामि सा
वधाना वधोरय ॥ कुंकुमेन समालिख्य भूर्जपत्रे स्त्रियं मुदा ॥ ततो दलमालिख्य कुर्यान्न्यासादिकं
प्रिये ॥ जीवन्यासं ततः कुर्याद्ध्यायेत्तत प्रसन्नधीः ॥ शुद्धस्फटिकसंकाशां नानारत्नविभूषितां ॥ मंजीर

हारकेयूररत्नकुंडलमंडितां ॥ एवं ध्यात्वा जपेन्मंत्रं सहस्रं च दिने दिने ॥ प्रतिपद्दिनमारभ्य पूजयेत्कुसु
मादिभिः ॥ धूपदीपविधानैश्च त्रिसंध्यं पूजयेन्मुदा ॥ पूर्णिमां प्राप्य गंधाद्यैः पूजयेत्साधकोत्तमः ॥ घृ
तधूपं प्रदद्यान्नैवेद्यं च मनोहरं ॥ रात्रौ चेद्दिवसे प्राप्ते कुर्याच्च सुसमाहितः ॥ प्रभातसमये याति सा
धकस्यांतिकं ध्रुवं ॥ प्रसन्नवदना भूत्वा लोभयेदतिभोजनैः ॥ देवदानवगंधर्वविद्याध्यक्षराक्ष
सां ॥ कन्यानीरत्नभूषाभिः साधके तु मुहुर्मुहुः ॥ चर्व्यचोष्यादिकं द्रव्यं ददाति साधकं ध्रुवं ॥ स्वर्गे भ
र्वे च पाताले यद्वस्तु विद्यते प्रिये ॥ आनीय दीयते सापि साधकायानुरूपतः ॥ स्वर्णस्थाली सदा लक्ष्मीर्ददा
ति सा दिने दिने ॥ साधकाय वरं दत्वा याति सा निजमंदिरं ॥ तस्यानुग्रहदानेन चिरंजीवी निरामयः ॥ से
वेदः स्वेदरः श्रीमान् सर्वगो नवेलि ध्रुवं ॥ रमेत्साद्धं तया देवि सा कन्द्रो दिने दिने ॥ तारमायालथागच्छा
नुरागिनि मैथुनप्रिये ॥ ब्रह्मचर्यमिनुमोक्षः सर्वसिद्धिप्रदायकः ॥ अस्या मधुमती तस्याः सर्वसिद्धिप्रदा
प्रिये ॥ गुह्याद्गुह्यतरा विद्या तव स्नेहात्प्रकाशिता ॥ देव्युवाच ॥ कुलं च साधने पुण्यं च यक्षिणीनां कुलव मर्द ॥
कस्मिन्काले प्रकर्तव्यं विधिना केन वा प्रभो ॥ अन्याधिकारिणः के वा समासेन वदस्व मे ॥ ईश्वर उवाच ॥
वसंते साधयेद्धीमान् हविष्याशी जितेंद्रियः ॥ सदा ध्यानपरो मंत्री तद्गतमनहोतवकः ॥ तेऽतटप्रांतरे
वापि विजने वनेः ॥ स्थाने स्वे कृतमंत्राप्यत्साधयेत्सुसमाहितः ॥ अनेन विधिना साक्षात्तत्र सेवन संज्ञा
यः ॥ देवाश्च सेवकाः सर्वे परं चात्राधिकारिणः ॥ तारके ब्राह्मणोऽयं विनाप्यत्राधिकारिणः ॥ इति योगि
नीप्रकरणं समाप्तम् ॥ अथ पूजाधारो निरूप्यते ॥ नारदीये ॥ आपोऽग्निर्हृदयं चैव विष्णोः सत्र समुद्भवम् ॥
यंत्रं च प्रतिमा स्थानमर्चने सर्वदा हरेः ॥ गौतमीये ॥ शालग्रामे मणौ यंत्रे प्रतिमामंडले पुरा ॥ नित्यं पूजा ह
रेः कार्या न तु केवलभूतले ॥ शालग्रामशिलास्पर्शात्कोटिजन्माघनाशनं ॥ किं पुनश्चार्चनेनात्र हरिसा
न्निध्यकारणं ॥ बहुभिर्जन्मभिः पुण्यैर्यदि लभ्येत शिलां ततः ॥ गोष्पदेनैव चिह्नेन तेनजन्मसमाप्य
ते ॥ एतेन विष्णुपूजायां शालग्रामस्य प्राधान्यं ॥ मंडलादीनां तु सर्वसाधारणत्वं ॥ योगिनीतंत्रे ॥ लिंगस्थं

पूजयेद्देवीं पुस्तकस्थां तथैव च ॥ मंडलस्थां महामायां यंत्रस्थां प्रतिमासु च ॥ जलस्थां च शिलायां वा पूज
येत्परमेश्वरीम् ॥ कौलार्चनीये ॥ पत्रापराजितापुष्पं जपापुष्पं च विघ्नले ॥ पूरवीरे शुक्लरक्ते द्रोलं च प
त्रे तिष्ठति ॥ तंत्रे देवी वसेन्नित्यं तद्यंत्रे वह्निकूर्चनं ॥ एतत्सर्वं यंत्राभावे तथा च ॥ यंत्रं मंत्रमयं
प्रोक्तं मंत्रात्मा देवतेति च ॥ देहात्मनोर्यथा भेदो यंत्रदेवतयोस्तथा ॥ तथा ओदोल्लिरवे घं यंत्रं राज
देवतायाश्च विग्रहमिति ॥ कामक्रोधादिदोषोत्थ सर्वदुःखनियंत्रणात् ॥ यंत्रमित्याहुरेतस्मिं
देवः प्रीणाति पूजितः ॥ विना यंत्रे तु पूजा यो पांदे देवता न प्रसीदति ॥ दुःखनियंत्रणाद्यंत्रमित्याहुस्त
त्त्ववेदिनः ॥ इति यंत्रे पूजा प्राधान्यमिति ॥ अथ यंत्रसंस्कारः ॥ तत्रैवामकेश्वरतंत्रे ॥ भैरव उवाच ॥
चक्रं भैरव महाभैरव त्वत्प्रसादाच्छ्रुतं ॥ इदानीं श्रोतुमिच्छामि प्रतिष्ठाकर्मनिर्णयं ॥ श्रीशंकर उवाच ॥ शृणु
देवि महाभोगे जगत्कारिणि कौलिनि ॥ तस्याधापनकर्माणि सर्वतंत्रविनिर्णयं ॥ स्नात्वा संकल्पयेन्मंत्री
गुरोर्वचनमाचरेत् ॥ पंचगव्यं ततः कृत्वा शिवमंत्रेण मंत्रितं ॥ तत्र चक्रं क्षिपेन्मंत्री प्रणवेन समाकुलं ॥
तदुद्धृत्य ततश्चक्रं स्थापयेत्स्वर्णपात्रके ॥ पंचामृतेन दुग्धेन मूलेन जलेन च ॥ चंदनेन सुगंधेन
कस्तूरीकुंकुमेन च ॥ पयोदधिघृतक्षौद्रशर्कराघैरनुक्रमात् ॥ ताय रुपांतरैः कुर्यात् पंचामृतविधिं
बुधः ॥ हाटकैः कलशैर्देवी पृष्ठमिवारि पूरितैः ॥ कषायजलसंबंधैः कारयेत्स्नानमुत्तमं ॥ स्नानं स
माप्य तां देवीं स्थापयेत्स्वर्णपीठके ॥ यंत्रराजाय विद्महे महायंत्राय धीमहि ॥ तन्नो यंत्रः प्रचोदयात् ॥
स्पृष्ट्वा यंत्रं कुशाग्रेण गायत्र्या चाभिमंत्रयेत् ॥ अष्टोत्तरशतं देवि देवता भावसिद्धये ॥ आत्मशुद्धिं त
तः कृत्वा षडंगे देवतां यजेत् ॥ तत्रावाह्य महादेवीं जीवन्यासं च कारयेत् ॥ उपचारैः षोडशभिर्महामुद्रा
दिभिः सदा ॥ फलतांबूलनैवेद्यैर्दीपतंत्रैः समर्चयेत् ॥ पद्मसूत्रादिकं दद्याद्वस्त्रालंकारमेव च ॥
मुकुरं चामरं घंटां यथायोग्यं महेश्वरि ॥ सर्वं तत्पद्यतेन दद्यात्सम्भिलेरतः ॥ ततो जपेत्सह
स्रं तु सकलेप्सितसिद्धये ॥ बलिदानं ततः कृत्वा प्रणमेत्तु चक्रनायिकां ॥ अष्टोत्तरशतं कृत्वा सपाद्यो
ज्यं विनिक्षिपेत् ॥

होमकर्मण्यशक्तश्चेत्तद्द्विगुणं जपमाचरेत्॥ धेनुमेकां समानीय स्वर्णशृंगाद्यलंकृतां॥ गुरवे दक्षि
णां दद्यात्ततो देव्या विसर्जनं॥ तंत्रप्रदीपे॥ फलेमित्तो तथा पदं स्थापयेत् यंत्रमीश्वरि॥ धनधान्यपु
त्रपौत्रयशआयूंषि मुंचति॥ अन्यत्रापि॥ नमित्तो स्थापयेद्यंत्रेन पदप्रतकृतथा॥ यस्यैवेममलादेवि
पुत्रपौत्रगृहादिषु॥ अथात्र प्रयोगः॥ कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात्॥ यथा॥ ॐमम
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मा अमुकदेवतायाः प्रजार्थं अमुकयंत्रसंस्कारमहं करिष्ये॥ इतिसंक
ल्पं पंचगव्यमानीय हौं इति मंत्रेणाष्टोत्तरशतमभिमंत्र्य प्रणवेन यंत्रं तत्र क्षिपेत्॥ तस्मादुत्तोल्य पात्रां
तरं संस्थापयेत्॥ ततः शीतलजलचंदनगंधकस्तूरीकुंकुमैः स्नापयित्वा पंचामृतमानीय हौमिति
मंत्रेण पूर्ववत्तत् शोधयित्वा स्नापयेत्॥ प्रथमं क्षीरेण स्नापयित्वा पुनर्जलेन स्नापयित्वा धूपं दद्यात्॥ ए
वं दध्ना घृतेन मधुना शर्करया स्नापयेत्॥ ततोऽष्टभिः स्वर्णकलशैः कुंकुमरोचनादिमिलितैः स्नाप
येत्॥ सर्वत्र स्नाने मूलमंत्रेण॥ ततो यंत्रमुत्तोल्य कुशाग्रेण ताडयेत्॥ ॐ ह्रां यंत्रराजाय विद्महे महायं
त्राय धीमहि॥ तन्नो यंत्रः प्रचोदयात्॥ इत्यष्टोत्तरशतमभिमंत्र्य॥ प्राणप्रतिष्ठां कुर्यात्॥ अस्य प्राण
प्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः॥ ऋग्यजुःसामानि छंदांसि चैतन्यरूपा प्राणशक्तिर्देवता
प्राणप्रतिष्ठायां विनियोगः॥ ओं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुकदेवतायाः प्राणाः इह प्राणाः॥ एवं ओं
१३ अमुकदेवतायाः जीव इह स्थितः॥ ओं १३ अमुकदेवतायाः वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहा
गत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणान्प्रतिष्ठाप्य तत्र प्रकृतदेवतामावाह्य षोडशोपचारैः पंचोपचा
रैर्वा पूजयेत्॥ ततः पद्हस्त्रवारि षोडशहस्तमिते दत्ता अष्टोत्तरसहस्रं जपं यथाशक्तिश्चेत्कारं दद्यात्॥ यथा
यच्छिद्रं जपाच्छिद्रं यच्छिद्रं पूजने मम॥ तत्सर्वं मोदक्षमस्तु नास्तु रस्य प्रसादतः॥ इति यंत्रसंस्का
रपद्धतिः॥ इति श्रीमहामहोपाध्याय श्रीकृष्णानंदवागीशभट्टाचार्यविरचिते तंत्रसारे तृतीयः प
रिच्छेदः॥ अथ प्रकीर्णकं॥ तत्रादौ स्नानादिविधानं॥ विष्णुविषये नारदीये॥ स्नानः शुक्लांबरधरः
आचांतः पूर्वदिङ्मुखः॥ कुशासनं समासाद्य नरो लौ साररणमाचरेत्॥ अन्यत्र तन्निबंधे॥ उपविश्यास
ने मंत्री प्राङ्मुखो वाप्युदङ्मुखः॥ बद्धपद्मासनो मंत्री समाहितो जितेंद्रियः॥ सारसमुच्चये॥

प्रागानतो धानदं दिग्वनोथ वंतिरात्रौ पूजयेन्नायं नियमः ॥ तथा च स्मृतिः ॥ रात्रौ चोदङ्मुखः कुर्यात् दे-
वकार्यं सदैव हि ॥ शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः ॥ अथ पूजापात्रविहितत्वेन सिद्धानि ॥ मंत्रतंत्रे
प्रकाशे लिंगद्वयं तथा नार्च्यं गणेशद्वयमेव च ॥ शालिग्रामद्वयं तथा सूर्यद्वयमेकत्र नार्चयेत् ॥ द्वे चक्रे द्वार-
कायास्तु शालग्रामशिलाद्वयं ॥ एतेषामर्चनान्नित्यं उद्वेगं प्राप्नुयाद्गृही ॥ लिंगे एकैकस्य चालिंगानि दश-
पंचशतानि वा ॥ प्रत्येकं नाथवा देवि बिल्वपत्रैः प्रपूजयेत् ॥ एकं पाशुपतं लिंगं मच्छिलादि विनिर्मि-
तं ॥ शालग्रामशिलामेकां गृहस्थोपि प्रपूजयेत् ॥ यामले ॥ नाक्षतैरर्चयेद्विष्णुं न तुलस्या विनायकं ॥ न दू-
र्वया यजेद्दुर्गां बिल्वपत्रैर्दिवाकरं ॥ उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः ॥ गौतमीये ॥ न रक्तचंदनं जातु गृह्णीयो-
द्रक्तपुष्पकं ॥ बिल्वपत्रैस्तुलसीदलैर्नार्चयेद्देवकीसुतं ॥ यत्तु तत्रैव ॥ कमले करवीरे द्वे तुलस्यो जातिकेतके ॥ ना-
गकेशरमारतीकं ह्लारं चंपकोत्पले ॥ नंद्यावर्तं च यूथीं च मल्लिका वनमल्लिका ॥ कुंदमंदारकं चैव सौगंधिकं च
कैरवं ॥ कुरंडकं कल्हारं जीनि शालपुष्पा बिल्वं च मुनिपुष्पकं ॥ पद्ममामलकं चैव द्रोणं द्वारं पलाशकं ॥ एतान्यन्या-
नि पुष्पाणि यथालाभं समर्चयेद्दितियेत् ॥ बिल्वैर्विघ्नं लक्षं हितल पुष्पाभावे तं भोतरे ॥ देवीनां चार्कमंदारं आ-
दित्ये तगरं तथा ॥ गणेशाय च सूर्याय रक्तपुष्पमतिप्रियं ॥ सारकुंदमरंतीच यूथीवयूककेतके ॥ जपारक्तात्रि-
संध्ये हमालती केतकी तथा ॥ छमष्टं कुमुदं रक्तं हयारी वर्वरी यजेत् ॥ तथा ॥ उग्रागंधमगधं च कृमिकेशा-
दिदूषितं ॥ वासोभिसंस्पृष्टं नेष्टं मतिमन्नोपयेत्प्रभावे ॥ प्राप्ते इत्यपलक्षणं ॥ तथा कालिकाभिस्तथा त्याज्यं
विनोचंपकमपकैः ॥ तथा ॥ पुष्पैश्च नार्चयेद्विष्णुं पत्रैः पुष्पैः फलैरपि ॥ स्नात्वानीतैः पर्युषितैः याचितैः कृष्ण-
वर्णकैः ॥ स्वयं विकसितैः पुष्पैः स्वयं च पतितं शुचि ॥ वर्जयेद्गृहली पुष्पं च गंधं विशोषलः ॥ स्नात्वानीतेषि
तिसहनीयर्थः ॥ स्वयं विकसिते स्वयं पुरुषेणाविकसितमित्यर्थः ॥ त्रिपत्रान्यतुकुसुमैर्नार्चयेत् कदाच-
न ॥ भूगतं चांगसंस्पृष्टं केशकीटादिदूषितं ॥ कुमुदं पाटलिं चैव शिरीषं परिवर्जयेत् ॥ भूगतं वर्जयेत्पुष्पं
सेफालीवकुलं विना ॥ तथा बिल्वस्य खदिरस्य च तथा धात्रीदलस्य च ॥ तमालस्य च पद्मस्य छिन्नभिन्नेन नद-
ष्यति ॥ गौतमीये ॥ मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितं ॥ पर्युषितानि पुष्पाणि वर्जयेद्देवतार्चने ॥

तिष्ठेद्दिनत्रयं शुद्धं पद्ममामलकं तथा॥ तुलसी सर्वदा शुद्धा तथा बिल्वदलानि च॥ दिनैकं करवीराणि यो
ग्यानि च तदर्चने॥ शतानाणि वै॥ पुष्पैः पर्युषितैर्देवि नार्चयेत्स्वर्णजैरपि॥ निर्माल्यभरैतैः कुसुमैरछिद्रैः
परमेश्वरि॥ त्रिपुरामधिकृत्य वाराहीये॥ पलाशं शोणकं कुसुमैर्नार्चयेद्दूरतस्त्यजेत्॥ धात्रीतमालजैः पत्रै
स्तुलसीबिल्वजैस्तथा॥ प्रजनोत्पालकी च स्याज्ञाकस्यापि प्रियं हरेत्॥ तथा त्रिपुरार्चने वर्ज्या तुलसी
सर्वथा बुधैः॥ तुलसीगंधमात्रेण क्रुद्धा भवति सुंदरी॥ कुलार्णवे॥ वत्समाध्यं श्वेतदूर्वां नीलकंठकुरं
टकं॥ न दद्याच्च महादेव्यै यदीच्छेच्छुभमात्मनः॥ योगिनीतंत्रे॥ देवीमधिकृत्य झिंटीपुष्पेण पीतेन तगरेण
महेश्वरि॥ श्वेतद्रोणेन च वल्कैन वर्जयेदर्चनं तथा॥ तुलसीद्वं च मंदारं कल्हारं च तमालकं॥ नार्चये
च्च महालक्ष्मीं कुशकाशौ न वैन च॥ तथा सर्वमधिकृत्य॥ बकुलस्य तु शाकस्य अर्जुनस्य महेश्वरि॥
प्रजमैहं तवजैरण सविटलेन विवर्जयेत्॥ विष्णुक्रांता जपा नागकेशरं नागवल्लुनं॥ वंशबूकं चैव मंदा
रं सवेटलेन समर्चयेत्॥ च-- दोहं दवर्ज्यं च भगतं च न संस्पृष्टं तु॥ सेफाली वकुलं भद्रे न गलेन सम
र्चयेत्॥ मात्हरं गलेन समर्चयेत्॥ चंदनं॥ बिल्वस्य मूलकं वर्ज्यं कदल्या वत्रकं तथा॥ तथा॥ बिल्वपत्रं च
माध्यं च तमालामलकीदलं॥ कल्हारं तुलसी चैव पद्मं च मुनिपुष्पकं॥ एतत्पर्युषितं न स्याद्यच्चान्यत्
कर्निकारकं॥ विरजस्य च बिल्वस्य तुलसीदलमेव च॥ मल्लिकात्रितयं जातिकेशरपुष्पं न यति दुं॥ बिल्वप
त्रं कुलवकं मुनिपुष्पं च केतकं॥ वासंतिद्विलयं चैव शतपुष्पमरुवकं॥ मदनं च लवंगं च यथासंभवकालिकास्त
थां॥ सुगंधिश्वेतलोहित्यकुसुमैरर्चयेद्दलैः॥ बिल्वैर्मरुबकाद्यैश्च तुलसीदलवर्जितैः॥ यद्यपि तुलसीवर्जि
ता पूजा तु न फलदा भवेत्॥ इति तथापि तंत्रिये मस्तके न त्रिपुरादौ तथा च॥ भैरवीसुंदरीकालीबलाविद्यासुविद्यास्वतां॥ तुल
सीवर्जिता पूजा सा पूजा विफला भवेत्॥ इति अविद्वत्तासम्पूर्णा इत्यर्थः॥ भैरव्याः पूजायां तु तुलसी सदैवं सांप्रवंच
नोत॥ इतरासां तु पूजायां तदसत्वे वा न दोषः॥ वाक्षतैरर्चयेद्विदुमिति पुष्पाणावेरलिदेशप्राप्तस्यतं तुलस्य
त्रिवेधपरं॥ तथा पुष्पाणां वै जलेनापि दूर्वयातंडुलेन च नित्यपूजा प्रकर्तव्या मार्जितकांचनसुंदरि॥ नतपादिनीषे
धपरं॥ तथा च॥

गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ॥ सदूर्वैः सर्वदेवानां एतदर्घ्यमुदाहृतं ॥ एवं न कुर्वीयापि पार्वतीयपि ॥ एवं
चक्रेत्तोद्देवोया अवश्यकं ॥ विनार्घ्येण च पूजा नास्तीह कर्हिचित ॥ तस्मात् हविर्गृहीत्वा सर्वपुष्पमयीं शिवे ॥
इति श्री कमनीयवाक्यात ॥ तथाच राघवभट्टः ॥ सर्वपुष्पैः सदा पूजा विहिताविहितैरपि ॥ कर्त्तव्या सर्वदेवानां न
त्वियोगोपचारणं ॥ तथाच तंत्रांतरे ॥ देवीपूजा सदा कार्या जितजैर्जलजैरपि ॥ विहितैरविहितैर्वापि भक्ति
युक्तेन चेतसा ॥ इदं तु विहिताभावे स्पष्टपरं ॥ तथा कालीतंत्रे ॥ अपामार्गदलैर्देवी नैसक्तलसीराजतेस्तमैः ॥
मुंडमालातंत्रे ॥ धत्तूरार्कबकुलश्वेतरुकापराजिता ॥ इत्यादि पुष्पनियमो बोद्धव्यः ॥ अथ जपविधि
षः ॥ होतुर्विना जपस्य व्यर्थत्वात ॥ तन्निरूप्यते ॥ तत्र कालिकापुराणे ॥ ज्ञात्वा प्राणप्रणवः सेतुर्मंत्रे तु प्र
णवः स्मृतः ॥ श्रवत्यनोद्धतः पूर्वं परस्ताच्च विशीर्यते ॥ निःसेतु सलिलं यद्वत्क्षणान्निन्नप्रसर्पति
मंत्रस्तथैव निःसेतुः क्षणात्क्षरति यज्वनां ॥ चतुर्दशः स्वरो योसौ स्पतुरीं कारसंज्ञकः ॥ सचानुस्वा
रनादाभ्यां शूद्राणां सेतुरुच्यते ॥ अथ पूजायां पंचशुद्धिः ॥ पंचशुद्धिं विना पूजायाः फलाजनकत्वात्तन्निरू
प्यते ॥ तदुक्तं श्रीयामले ॥ आत्मस्थानमंत्रद्रव्यदेवशुद्धिस्तु पंचमी ॥ यावन्न कुरुते देवि तस्य देवार्चनं कुतः
पंचशुद्धिविना पूजाभिचाराय कल्पते ॥ स्नानात्तीर्थशुद्धश्च प्राणायामादिभिः प्रिये ॥ षडंगाद्यैश्चिव
तन्यासैरात्मशुद्धिरितीरिता ॥ पंचशुद्धिं विधायेत्थं पश्चात्पूजनमाचरेत ॥ अथ मंत्रसिद्धिरुपायः ॥ तदुक्तं
गौतमीये ॥ सम्यगनुष्ठितो यदि सिद्धिर्न जायते ॥ पुनस्तेनैव कर्त्तव्यस्ततः सिद्धिर्भवेद्ध्रुवं ॥ पुनरनुष्ठितो मं
त्रो यदि सिद्धिर्न जायते ॥ पुनस्तेनैव कर्त्तव्यं ततः सिद्धो न संशयः ॥ पुनः सुनिष्ठितो मंत्रो यदि सिद्धिर्न जायते ॥
उपायास्तत्र कर्त्तव्याः सप्त शंकरभाषिताः ॥ भ्रामणं रोधनं वश्यं पीडनं पोषशोषणे ॥ दहनांतं क्रमात्कुर्यात्ततः सि
द्धो भवेद्ध्रुवं ॥ भ्रामणं वायुबीजेन ग्रथनं क्रमयोगतः ॥ तन्मंत्रं यंत्र आलिख्य सिद्धकर्पूरकुंकुमैः ॥ उशीरचं
दनाभ्यां तु मंत्रं संग्रथितं लिखेत ॥ क्षीराज्यमधुतोयानां मध्ये तं लिखितं भवेत ॥ पूजने जपने हो
मे त्वामितो सिद्धिदो भवेत ॥ भ्रामितो यदि नः सिद्धेत् बोधनं तस्य कारयेत ॥ सोरसचंदनबीजेन संपुटी
कृत्य संजपेत ॥

एवं रुद्धोपि चेत्सिद्धो न चेदेतद्द्विगुणं कुरु ॥ अलक्तं चंदनं कुष्ठं हरिद्रां मादनं शिलां ॥ एतैस्तु मंत्रमालिख्य
भूर्जपत्रे सुशोभने ॥ धार्यं कंठे मनो सिद्धः पीडनेनास्य वीर्य येत् ॥ अधरोत्तरयोगेन पदानि परिजप्य वै ॥
ध्यायेच्च देवतां रुद्ध घोरतररूपिणीं ॥ विद्यामालिख्य दुग्धेन लिखीताक्रम्यचांद्रिणां ॥ तथा भूर्जे तेन मं-
त्रेण होमः कार्यो दिने दिने ॥ पीडितो लज्जयाविष्टः सिद्धिः स्यादथ पोषयेत् ॥ यातयाम्नस्थितं यवीजं माघ-
तैलस्य योजयेत् ॥ गोक्षीरमधुनालिख्य विद्यां पालौ विदारयेत् ॥ योपि तोयं न चेत्सिद्धो न चेत्तु वशतः इ-
घणं ॥ द्वाभ्यां च वायुवीजाभ्यां मंत्रं कुर्याद्विदर्भितं ॥ एवं विद्यागले ध्यापालिखित्वा वरभस्मना ॥ शोषितो
पिन सिद्धश्चेद्दहनीयोग्निवीजतः ॥ अग्निवीजेन तु वीजेन मंत्रस्यैकैकमक्षरं ॥ माघतैलमधकुंडे च योज-
येद्दाहकर्मणि ॥ ब्रह्मवृक्षस्य तैलेन मंत्रमालिख्य धारयेत् ॥ कंठदेशे ततो मंत्रः सिद्धः स्यात्तं शिरोदि-
तं ॥ इत्येवं कथितं सम्यक् केवलं तव भक्तितः ॥ एकेन तु रुतार्थः स्यात्तद्यहृन्निःकिमुस्पृतः ॥ अथो
न्यत्संप्रवक्ष्यामि मंत्रसिद्धेस्तु कारणं ॥ मातृकापुटितं कृत्वा स्वमंत्रं प्रजपेत्सुधीः ॥ क्रमोत्क्रमाघ
तावत्स्याल्लदत्तो वक्तेमनुं ॥ एवं तु प्रत्यहं कुर्यात्तु यावत्तत्सर्वं संप्राप्यते ॥ निश्चितं मंत्रसिद्धिः
स्यात्तु शस्यं मंत्रवेदिभिः ॥ अथ मंत्रसिद्धिलक्षणं ॥ मनोरथानामक्लेशात्सिद्धिरुत्तमलक्षणं ॥
मृत्यूनां हरणं तद्वद्देवतादर्शनं तथा ॥ प्रयोगाकुशलः सिद्धिः सिद्धेस्तु लक्षणं परं ॥ परकायप्रवेशपु-
रप्रवेशनं तथा ॥ उड्डीनं च मनमवं हि चराचरं प्रवेशितं ॥ खेचरीमेलनं चैव नलतेथा श्रवणादिकं ॥ न-
छिद्रापाताळगमनं नाडिश्छिद्राणि प्रयत्स्येत लेदुत्कंमजनं लक्षणं ॥ ख्यातिवातनभेषादिलाभः स्वचिरजीविनं ॥
सर्वत्र सर्वलोकेषु चमत्कारकरः स्मरवी ॥ सो जापहरणं द्वाविशापहरणं तथा ॥ पांडित्यं लज्जनं मंत्री चतु
विषमयत्नतः ॥ वैराग्यं च मुमुक्षुत्वं स्त्र्याभिलाषसर्ववश्यता ॥ अष्टांगयोगाभ्यासनं जोभेच्छापरिवर्जनं ॥
सर्वभूतेषु नुकंपा सर्वज्ञत्वादिगुणोदयः ॥ इत्यादिगुणसंपत्तिर्मध्यसिद्धेस्तु लक्षणं ॥ ख्यातिर्वाहनभूषा
दित्वं चिः स्वचिरजीविनं ॥ नृपाणां तत्कुलानां च वात्सल्यं लोकवश्यता ॥

महैश्वर्यं धनितं च पुत्रदारादिसंपदः ॥ अधमाः सिद्धयः प्रोक्ता मंत्रिणां प्रथमं मया ॥ सिद्धमंत्रस्त्वयं साक्षा
त्सिद्धिरेनात्र संशयः ॥ इदानीं मंत्राणां दोषादि निरूप्यते ॥ श्रीभैरव उवाच ॥ शृणु देवि महाविद्या देवराजेन या पु
रा ॥ आराधिता महाविद्या वीर्यहीना भवेत्तदा ॥ एकाक्षरी वीर्यहीना वाग्भवेनोज्वला परा ॥ कामराजाख्या वि
द्याया विद्धा सा पुष्पधन्वना ॥ शापेनापीडिता हृद्वै भुवनेश्या प्रतिष्ठिता ॥ कुमारी या पिपिघ्ये यंद्र्यास्य मा पतिव्रता
दूरलंघिवरूपेण शक्तिरूपेण दूरलं ॥ षया प्रतिष्ठिता विद्या तारा चंद्रस्वरूपिणी ॥ भैरव्यादिमधिकरय ॥ स्कमादग
ग्यादी लीला च सैव संहाररूपिणी ॥ मदोन्मत्ता मूर्छिता च हीनवीर्या त्रस्तजिता ॥ छिंनारुद्धा चेद्दग्धा च निवृश्या शक्ति
हीनका ॥ तथा च विश्वसारनिबंधे ॥ छिंनो रुद्धः शक्तिहीनः पराङ्मुख उदीरितः ॥ बधिरो नेत्रहीनश्च कीलितस्तं
भितस्तथा ॥ दग्धस्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः ॥ भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्छितः ॥ हृतवीर्य
श्च हीनश्च प्रध्वस्तो बालकः पुनः ॥ कुमारश्च युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा ॥ निर्वीर्यसिद्धहीनश्च मंदः कूटस्तथा
पुनः ॥ निरंशकः सत्वहीनः केकरो बीजहीनकः ॥ धूमितो लिंगितो स्यात्तो मोहितस्तु क्षुधार्तकः ॥ अतिदृप्तोंगही
नश्च स्यादतिक्रुद्धः समीरितः ॥ अतिक्रूरश्च सव्रीडः शांतमानस एव च ॥ स्थानभ्रष्टश्च विकलो निःस्नेहः परिकी
र्तितः ॥ अतिवृद्धः पीडितश्च वक्ष्याम्येषां च लक्षणं ॥ मनो यस्यादिमध्यांते धाविलं बीजमुच्यते ॥ स्वयुक्तं वा वि
युक्तं वा स्वराक्रांतं त्रिधा पुनः ॥ चतुर्धा पंचधा वाथ स मंत्रश्छिन्नसंज्ञकः ॥ आदिमध्यावसानेषु भूबीजद्वयलां
छितः ॥ रुद्धो मंत्रः स विज्ञेयो भुक्तिमुक्तिविवर्जितः ॥ मायात्रितत्वबीजं श्रीरावहीनस्तु यो मनुः ॥ शक्तिहीनः स
कथितो यस्य मध्ये न विद्यते ॥ कामबीजं मुखे माया शिरस्यंकुशमेव च ॥ असौ परांमुखः प्रोक्तो हकारो बिंदुसं
युतः ॥ आद्यंतमध्यसंदुर्वा स भवेद्बधिरः स्मृतः ॥ पंचवर्णो मनुर्यस्याद्रेफार्केंदुविवर्जितः ॥ नेत्रहीनः स
विज्ञेयो दुःखशोकामयप्रदः ॥ आदिमध्यावसानेषु हंसः प्रासादवाग्भवैः ॥ स एव कीलितो मंत्रः सर्वसिद्धिविव
र्जितः ॥ एकं मध्ये द्वयं मूर्ध्नि यस्मिंन्नस्त्रपुरंदरौ ॥ नादंघते समस्तोत्र स्तंभितः सिद्धिवर्जितः ॥ वह्निर्वायुसमायुक्तो
यस्य मंत्रस्य मूर्द्धनि ॥ सप्तधा दृश्यते तं तु दग्धमंत्रः प्रचक्षते ॥ अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टभिर्दृश्यतेऽक्षरैः ॥ त्र
स्तः स कथितो मंत्रः सर्वसिद्धिविवर्जितः ॥ यस्य मुखे नास्ति माया प्रणवं वा विधानतः ॥

भीतः स कथितो मंत्रः सर्वसिद्धिविवर्जितः ॥ आदौ मध्ये तथा चांते यस्य मायाग्निलुग्द्वयं ॥ स एव मलिनो
मंत्रः सर्वविघ्नसमन्वितः ॥ यस्य मध्ये दकारो वा क्रवर्णं मूर्ध्नि दृश्यते ॥ त्रिविधं दृश्यते चास्त्रं तिरस्कृत
उदाहृतः ॥ वाहद्वयं हृदयं शीर्षे वषट् वौषट्द्वयं मध्यतः ॥ स एव भेदितो मंत्रः सर्वशास्त्रविगर्हितः ॥ त्रि
वर्णो हंसहीनो यः स सुषुप्त उदाहृतः ॥ मंत्रो वाप्यथवा विद्या सप्ताधिकदशाक्षरः ॥ फट्कारपंचकादिर्या
मदोन्मत्त उदाहृतः ॥ सप्तदशाक्षरो मंत्रो मध्ये स्त्रं च यदा भवेत् ॥ मूर्छितः कथितो मंत्रः सर्वसिद्धिवि
वर्जितः ॥ पंचफट् यस्य मंत्रस्य विरामस्थानसंयुतः ॥ हृतवीर्यः स कथितो मंत्रो नास्ति तस्य प्रयोजनं ॥ स
प्तवर्णान्वितो ह्यतः कुमारोष्टाक्षरः स्मृतः ॥ षोडशवर्णो युवा मंत्रः सर्वसिद्धिविवर्जितः ॥ चतुर्विंशतिलिपिर्यः
स्यात् प्रौढः स परिकीर्तितः ॥ आदौ मध्ये तथा चांते चतुरस्त्रायुतो मनुः ॥ स एव हीनवर्णः स्यात् तथा चाष्टद
शाक्षरः ॥ एकोनविंशद्वर्णो यो मंत्रस्तारसमन्वितः ॥ हल्लेखांकुशबीजाद्यः प्रध्वस्तं तं प्रचक्षते ॥ द्वात्रिंशद्यस्त
री विद्या फडंतास्त्रविवर्जिता ॥ धस्त्ररूपा च सा विद्या सर्वसिद्धिविवर्जिता ॥ मूर्छिता कथिता विद्या मंत्रिणां
हानिकारिणी ॥ त्रिंशद्वर्णश्चतुःषष्टिवर्णो मंत्रस्तु तामसः ॥ चतुःपंचाक्षरश्चापि वृद्धः स परिकीर्तितः ॥
नवाक्षर ध्रुवयुतो मनुर्निस्त्रिंशः ईरितः ॥ यस्यावसाने हृदयं द्वारो मंत्रोऽत्र मध्यतः ॥ शिखा वर्म च संपु
टं फट्कारं वौषडेव च ॥ शिवशक्त्या हीनो यः स निर्बीज उदाहृतः ॥ एषु स्थानेषु फट्कारः षोढा यस्मिन्न
दृश्यते ॥ स मंत्रः सिद्धिहीनः स्यात् सर्वतंत्रविवर्जितः ॥ द्विवर्णः सत्त्वहीनश्च चतुर्वर्णस्तु केकरः ॥ षडक्षरो वी
जहीनः स्तब्धः सप्ताक्षरो मनुः ॥ सार्धद्वादशवर्णो यो निर्मितः स तु निंदितः ॥ सार्धबीजत्रयं तद्वदेकविंश
तिवर्णकः ॥ विंशत्यर्णस्त्रिंशदर्णो यस्यालिंगितः स्मृतः ॥ द्वाविंशत्यक्षरो मंत्रो मोहितः परिकीर्तितः ॥
चतुर्विंशतिवर्णो यः सप्तविंशतिवर्णकः ॥ क्षुधार्तः स तु विज्ञेयः सर्वतंत्रसमन्वितः ॥ चतुर्विंशतिवर्णो
यः सप्तविंशतिसंख्यकः ॥ एकादशाक्षरो वापि पंचविंशतिदेववा ॥ त्रयोविंशतिवर्णश्च स मंत्रस्त्वंगहीनकः ॥
षड्विंशत्यक्षरो मंत्रः षड्विंशद्वर्णकस्तथा ॥ त्रिंशद्वेकोनवर्णो वांगहीनः प्रकीर्तितः ॥ अष्टाविंशत्यक्षरो यः

एकविंशाक्षरोपि वा ॥ अतिक्रुद्धः स विज्ञेयो निंदितः सर्वकर्मसु ॥ त्रिंशादक्षरको मंत्रस्त्रयस्त्रिंशादथापि वा
अतिक्रूरो समाख्यातो निंदितः सर्वकर्मसु ॥ चत्वारिंशत्समारभ्य त्रिषष्टिर्यावता भवेत् ॥ ते सर्वे मंत्रवर्गास्तु
व्रीडिताः सर्वकर्मसु ॥ पंचषष्ठ्यक्षरा ये तु मंत्रास्ते शांतमानसाः ॥ एकोनशतपर्यंतं पंचषष्ट्युत्तरादितः ॥
ते सर्वे कथिता मंत्राः स्फोनशाप्तानेनोऽमनाः ॥ त्रयोदशाक्षरो येस्तु मंत्राः पंचदशाक्षराः ॥ ते सर्वे विफला
ज्ञेयाः शतं साऽष्टशतं तु वा ॥ शतद्वयं द्विनवतिरेकहीना तथापि वा ॥ यावत्सहस्रं त्रयं संख्या निस्त्रिंहास्ते
प्रकीर्तिताः ॥ चतुःशतमथारभ्य यावद्वादशसहस्रकं ॥ अतिवृद्धः स मंत्रस्तु सर्वशास्त्रविवर्जितः ॥ सह
स्रैणाधिका मंत्राः दंडकाः पीडिता ध्रुवा ॥ द्विसहस्राक्षरा मंत्राः खंडशः सप्रधाः कृता ॥ शतव्यास्तोत्ररूपास्ते
मंत्रा एते यदा स्थिताः ॥ एता विद्यास्वभोऽद्व्या मंत्रज्ञैः काम्यकर्मसु ॥ दोषानिमानविज्ञाय यो मंत्रं भजते तु
धः ॥ सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ अथ मंत्राणां दोषशांतिः ॥ तत्रैव ॥ छिन्नादिदुष्टा ये मंत्रास्ते
त्रैलं त्रैविलपिताः ॥ ते सर्वे शुद्धिमायांति मातृकार्णप्रभावतः ॥ मातृकार्णैः पुटीकृत्य मंत्रं विद्यां विशेष
तः ॥ शतमष्टोत्तरं पूर्वं प्रजपेत्फलसिद्धये ॥ तदा मंत्रो महाविद्या यथोक्तफलदा भवेत् ॥ मातृकापुटितं कृ
त्वा मध्ये वर्णं भुजापत्रे ॥ मंत्रवर्णं ततः कुर्यात् षोधयेत्तत्र संमतं ॥ वह्निस्तु योनिमुद्रांतां संबोध्याधारपंक
जे ॥ तदुत्तम्ना मंत्रवर्णान् कुर्वीत च गतागतान् ॥ ब्रह्मरंध्रावधि यावत्तावत्पार्यकुंचयेत् ॥ सहस्रं
प्रजपेन्मंत्रं मंत्रदोषोपशांतये ॥ तथा एकुदोषेषु प्राप्तेषु मायां रामं तथापि वा ॥ क्षिप्त्वाद्योऽन्त्ये यं चैव तद्दूष
णविमुक्तये ॥ तथा तारासंपुटितो वापि दुष्टमंत्रोपि सिध्यति ॥ यस्य मंत्रे न वेद्भक्तिः सोपि मंत्रेपि सिध्य
ति ॥ तथा प्रणवो मातृकाद्देवीह हृल्लेखस्य मलत्रयं ॥ अमलत्रयसंयोगो तद्दुष्टमंत्रोपि सिध्यति ॥ अथ हो
मार्थं कुंडादिनिर्णयः ॥ तत्र तावद्गृहनिर्णयः ॥ तत्रापि प्रथमं भूमिनिर्णयः ॥ गौतमीये ॥ भूमेः परिग्रहं
कुर्यात् यावदायतनं न भवेत् ॥ शुद्धवेणी च वा न्ते मिश्रास्मी सापरिकीर्तिता ॥ कृष्णान्त्रमिश्रवेध्रध्रान्च तु द्वि
ब्राह्मी तु सर्वसिद्धिः स्यात्क्षत्रिया राज्यदा मता ॥ धनधान्यकरी वैश्या शूद्रा तु निंदिता भवेत् ॥ गणेशा
विमेधि एयां ॥ वास्तोः संग्रह चिह्नर्वस्यात् ऐशान्यां उत्तरे तथा ॥ यदि संग्रहत्यये मैत्रीमंडपे पंचविभागतः ॥

नवहस्तप्रमाणं वा सप्तहस्तमथापि वा ॥ पंचहस्तप्रमाणं वा चतुर्हस्तसमुन्नतं ॥ पंचहस्तस्त
एककुंडपक्षे ॥ तदुक्तं तंत्रैव ॥ एककुंडमतेनाप्यतु पंचहस्तं गृहं भवेत् ॥ तदेककुंडं गृह
स्योत्तरभागे प्रशस्तं ॥ यथा अथोत्तरे तथा कुंडमेकं वेदास्त्रमुद्धरेत् ॥ लक्षहोमे तु तत्कार्यं त
गृहमध्येन दूषणं ॥ तथा वसिष्ठसंहितायां ॥ वास्तोरीशानभागे तु मंडपं पंचहस्तकं ॥ षट्
द्वादशाष्टमिहस्तैः षोडशैर्वीक्ष्यमंडलं ॥ चतुर्द्वारसमायुक्तं तोरणैश्च रलंकृतं ॥ तंत्रिभागमिति
क्षेत्रैरत्निमात्रसमुन्नता ॥ चतुस्तालततो वेदी मंडपाय प्रकल्पयेत् ॥ अथ प्रसंगात्तत्र कुंडानि ॥ त
त्रशारदायां ॥ प्राकुपोक्ते मंडपे विहितान्त्र वेदिकायां बहिः क्रिया ॥ स्वत्रं विनज्यमध्यांशे रवीदिपरिवृत्ययेत्
अष्टास्वाशासु कुंडानि रम्याकाराण्यनुक्रमात् ॥ चतुरस्रं योनिमर्धचंद्रं त्र्यस्रं सुवर्तुलं ॥ षडस्रं पंकजा
कारमष्टास्रं शिलिनामतः ॥ आचार्यकुंडं मध्ये स्याद्गौरीपतिमहेंद्रयोः ॥ हस्तमात्रमितां भूमिं सर्ववित्
परिस्तरयेत् ॥ समंतात्कुंडमेतत्तु चतुरस्रं शुभावहं ॥ चतुरस्रीकृतं क्षेत्रं पंचधा विभजेत्सुधीः ॥
न्यसेत्पुरस्ताद्वांशं कोणार्धेन प्रमाणतः ॥ भ्रामयेत्कोणमानेन तदान्यद्दीपमंत्रवित् ॥ सूत्रयुग्मततो
दद्यात्कुंडं योनिनिभं भवेत् ॥ चतुरस्रीकृतं क्षेत्रं दशधा विभजेत्सुधीः ॥ एकं त्यजेद्भ्रामयेद्द्वे च तंत्रवित्
ऽधोऽस्त्रं पातयेदग्रे तन्मानात् भ्रामयेत्ततः ॥ अर्धचंद्रनिभं कुंडं रमणीयमिदं भवेत् ॥ अग्रे संमुखे प्र
क्षिप्रशराकारं चतुरिव ॥ इति मद्व्याख्यानात् ॥ तद्भाज्यास्त्रं पातयेदग्रे शरो बाह्यगतो यथा ॥ चतुर्द्ध
हिते क्षेत्रे न्यसेद्युग्मं पार्श्वयोः ॥ एकैकमंशं तन्मानात् भ्रामयेत्ततः ॥ सूत्रे युग्मं बुधः कुर्यात्तन्मे
स्रं कुंडमुदाहृतं ॥ अष्टादशांशे क्षेत्रे तु न्यसेद्द्वे द्वे बहिर्बुधः ॥ भ्रामयेत्तेन मानेन षडस्रं कुंडमुदाहृतं ॥ अष्ट
धा विभजेत्क्षेत्रं मध्ये सूत्रस्य पार्श्वयोः ॥ भागं न्यसेद्द्वे कुंभे वं भाने नाने न मध्यतः ॥ कुर्याल्लाशर्ध्ये मत्स्यचं
लुष्कं मंत्रवित्तमः ॥ सूत्रे षट्कृततो दद्यात्षडस्रं कुंडमुत्तमं ॥ चतुरस्रीकृतं क्षेत्रं विभज्याष्टदशांशतः ॥
एकं भागं बहिर्न्यस्य भ्रामयेत्तेन वर्तुलं ॥

दत्तानि कर्णिकाशादीनां बहिस्त्रीणि प्रकल्पयेत् ॥ पद्मकुंडमिदं प्रोक्तं त्रिलोचनमनोहरं ॥ बहिरिति मध्ये वंहि
शरोमध्येन वाच्यकः ॥ अव्ययानामनेकार्थत्वादिति गुरवः ॥ नाकर्णिकाशादीदत्तानि वंहिर्बहिः कुर्यादिति भेदः
तथोक्तं ॥ चतुरस्रे अष्टधा भक्ते कुर्याद्वृत्तचतुष्टयं ॥ कर्णिकाकेशरयोर्द्वितृतीये पत्रकं अन्यथा ॥ ऊर्ध्वा
शिच(?)तुर्थं स्युः दत्तान्येवं प्रकल्पयेदित्यपि भेदः ॥ पूर्वोक्तं विभजेत्क्षेत्रं चतुर्विंशतिभागतः ॥ एकं भागं
बहिर्न्यस्य चतुरस्रं प्रकल्पयेत् ॥ अंतस्थश्चतुरस्रस्य कोणाद्वृद्धिप्रमाणतः ॥ बाह्यस्य चतुरस्रस्य को
णान्यापरि(?)लौख्य तु ॥ दिक्षु प्रतियथान्यायमष्टस्रत्राणि पातयेत् ॥ अष्टास्रं कुंडमेतद्धि मंत्रविद्भिरुदीरितं
कुंडानां यादृशं रूपं मेखलानां च तादृशं ॥ एवं प्रोक्तानि कुंडानि कथ्यते ... ॥ प्रकल्पयेत् ... यागे
वक्ष्यमानेन वर्त्मना ॥ श्रीपर्णिसिंसपाक्षीरवृक्षाश्वत्थकृते मंगुलः ॥ गृहीत्वा विभजेद्धस्तमात्रं षड्विंशत्यंगुलापु
नः ॥ हस्तमात्रं वाहुमात्रं ॥ तथा चागमस्य ॥ ...वंशाहुप्रमाणेन होमार्थं विदधीत वै ॥ विंशत्यंगुलोन्नवेत्कुंडो वे
दिस्ते रेष्टच्छिन्नवेत् ॥ एकांगुलेन मिलः कूर्मसप्तभागमितं मुखं ॥ वेदीत्र्यंगुलेन विस्तारः कंठस्य परिकीर्तितः ॥
अग्रे कंठसमानं स्यान्मुखं भागं प्रकल्पयेत् ॥ कनिष्ठांगुलिमानेन सर्पिषो निर्गमाय च ॥ वेदिमध्ये विधातव्या
भागेनैकेन कर्णिका ॥ विदधीत न हि हस्तस्याष्टांगुलोन्मितो वटं ॥ तस्य खातं त्रिभिर्भागैर्वृत्तमंगुलोन्नतः ॥ अंगुलेने
केन परितो दलानि परिकल्पयेत् ॥ मेखलामुखवेधोस्यात् परितो द्व्यंगुलोन्नतः ॥ दंडमूलाग्रयोः कुर्याज्जुगुणवेशांगु
लैः क्रमात् ॥ गंडीयुगं यमांसे स्यात् दंडस्यानाहइरितः ॥ खड्गं वंद्यः षष्ठभागेन वेधः कूर्माकृति भवेत् ॥ हं
सस्य वा हस्तिनो वायोन्त्रिणो वा मुखं बलिरेवं तु ॥ मुखस्य षष्ठभागेः स्याः संप्रोक्तं लक्षणं श्रुचेः ॥ श्रुचश्चतुर्विंशति
भिर्भागैर्वीरर्चयेत् श्रुवं ॥ द्वाविंशत्या दंडमानं संख्यातं तस्य कीर्तितं ॥ चतुर्भिर्वंशो वाताहः ... ज्यगाहितच्छिरः ॥ अं
शद्वयेन निखनेत्पंक(?)म्लग(?)मुखाकृतिः ॥ दंडमूलाग्रयोर्गंडी च वेष्टं कर्णभूषिता ॥ श्रुवस्य विधिराख्यातः सनीतंत्र
समन्वितः ॥ गंडीकुंचः ... यथा गंडो ... कुर्यादिति भाष्यकृत् ॥ तयोरभावे तु वा ... ॥ पलाशपत्रेनि
च्छिद्रेण ... ॥ विदध्यादाश्वत्थपत्रे संक्षिप्ते होमकर्मणि ॥ अथ कुंडानां विशेषफलानि ॥ निबंधे ॥
सर्वसिद्धिकरं पुंसां चतुरस्रमुदाहृतं ॥ पुत्रप्रदं योनिकुंडमर्धचंद्रं शुभप्रदम् ॥ शत्रुक्षयकरं त्र्यस्रं वर्तुलं

शांतिकर्मणि॥ षट्कोणं मारणयोः कुंडं षडस्रं पद्मसंनिभं॥ वृष्टिरोगघ्नामनं कुंडमष्टास्रमीरितं॥ अथ काम्यहोमा
र्थं कुंडनियमः॥ तदुक्तं सिद्धिसारस्वते॥ शांतौ पुष्टौ तथारोग्ये कुंडं च चतुरस्रकं॥ आकर्षणे त्रिकोणं स्यादुच्चाटे
वर्तुलं यथा॥ मारणे च तथा योज्यं वर्तुलं मंत्रिभिः सदा॥ तंत्रांतरे॥ उद्यापने पौष्टिके कुंडं वारणे शांतिकादिषु॥
उच्चाटे चानिले कुंडं याम्ये च मारणे भवेत्॥ तथा विप्राणां चतुरस्रं स्याद्राज्ञो वर्तुलमिष्यते॥ वैश्यानामर्द्धचं
द्रं च शूद्राणां त्र्यस्रमीरितं॥ चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः॥ चतुरस्रे महेशानि सर्वकर्माणि साध
येत्॥ तथा सर्वाधिकारिकं कुंडं सर्वदं चतुरस्रकमिति॥ गृहादिकरणे हस्तनियमो यथा गौतमीये॥ रथा
दिदोलिकाश्चैव पोतं शकटमेव च॥ मात्रांगुलेन कर्त्तव्यं नान्येनापि कदाचन॥ मुष्ट्यरत्निप्रमाणानि यत्नात्कं
चित्कथितानि हि॥ यजमानस्य कर्त्तव्यं नान्यस्यापि कदाचन॥ तथा मानक्रियायामनुक्तमानकर्त्तरि॥
मानकृत् यजमानस्यादिदुषामेष निर्णयः॥ चतुर्विंशत्यंगुलाढ्यं हस्तं तंत्रविदो विदुः॥ कर्त्तुर्दक्षिणहस्तस्य
मध्यमांगुलिपर्वणः॥ मध्यस्य दैर्घ्यमानेन मात्रांगुलमुदाहृतं॥ यजमानासंनिधौ पुनः॥ यवानां तंडुलैरष्टां
गुलं चाष्टभिर्भवेत्॥ आदीर्घयोजिते हस्ते चतुर्विंशतिरंगुलैः॥ वधसोनुक्रमे पुनः॥ अष्टभिर्हस्तैर्भवेज्ज्ये
ष्ठं मध्यमः सप्तभिर्यवैः॥ कनिष्ठं षड्भिरुद्दिष्टं अंगुलं मुनिसत्तम॥ सहस्रे खलु होतव्ये कुर्यात्कुंडं करात्मकं॥
द्विहस्तमयुते लक्ष्ये लक्षहोमे चतुःकरं॥ षट्करं वेदलक्षं वाष्टकरे दशलक्षके॥ दशहस्तं तु कोट्यां वै हस्तसंख्या
व्यवस्थिता॥ दशहस्तात्परं कुंडं नास्ति होमे महीतले॥ शारदायां॥ कोट्यामष्टकरं स्मृतमिति॥ द्रव्यस्य गुरुत्वागु
रुत्वेन बोद्धव्यं॥ तथा एकहस्तमितं कुंडं लक्षहोमे विधीयते॥ अत्रापि आज्यहोमे लघुद्रव्याकरवीरादिहोमे च बोद्ध
व्यं॥ तथा मुष्टिमात्रं मितं कुंडं शतार्द्धे च प्रचक्षते॥ शतहोमे रत्निमात्रं हस्तमात्रं सहस्रके॥ द्विहस्तमयुते लक्षे चतु
र्हस्तमुदाहृतं॥ दशलक्षं तु षड्ढस्तं कोट्यामष्टकरं स्मृतं॥ एकहस्तमिते कुंडे लक्षमेकं विधीयते॥ लक्ष्याणां दश
कं यावत्तावद्धस्तेन वर्द्धयेत्॥ द्विहस्तादि कुंडमानं तु गौतमीये॥ पूर्वपूर्वस्य कुंडस्य कोणसूत्रं तु यद्भवेत्॥ उत्तरोत्तरकुं
डानां मानं तत्रोदीरितं॥ तथा करणसूत्रप्रमाणेन द्विहस्तं कुंडमुद्धरेत्॥ सर्वकुंडेषु सर्वत्र वर्द्धयेद्विधिनामुना॥

कुंडकरणे विशेषमाह ॥ गौतमीये ॥ ततः कुंडं खनेन्मंत्री यथाशास्त्रं विधानतः ॥ यत्रास्य सर्पस्य गात्रं च शिरोदेशं प्रयत्न
तः ॥ शिरोघाते भवेन्मृत्युः पिंडपातनं ॥ पुच्छे तु दुःखसंभूतिः कुंडे सर्वार्थसाधनं ॥ नागशिर आदि निर्णयो यथा
वास्तुप्रमाणेन तु गात्रकेन वामेन शेते खलु नित्यकालं ॥ त्रिभिस्त्रिमासैः परिवर्तयन्मौलं वास्तुनागं प्रवदंति सिद्धाः ॥
भाद्रादिके वासवदिक्शिरास्यात् याम्यादिकेषु त्रिषु याम्यमूर्द्धा ॥ प्रत्यक्शिरः स्यात् खलु फाल्गुनादौ ज्ये
ष्ठादिके कौबेरशिराः स नागः ॥ यावान् कुंडस्य विस्तारः खननं तावदीरितं ॥ खातोऽधिके भवेद्रोगी खातही
नेधनक्षयः ॥ चक्रकुंडे कृते जापो मरणं छिन्नमेखले ॥ मेखलारहिते शोको ह्यधिके वित्तसंक्षयः ॥ भा
र्याविनाशकं कुंडं प्रोक्तं योन्या विना कृतं ॥ अपस्ध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितं ॥ सात्विकी मेखला प्रथमा
द्वितीया राजसी स्मृता ॥ तृतीया तामसी प्रोक्ता मेखलानां तु निर्णयः ॥ कुंडानां मेखलास्तिस्रो मुष्टिमात्रे तु ताः
क्रमात् ॥ उत्सेधायामतो ज्ञेया द्व्यंगुलसंमिता ॥ अरत्निमात्रकुंडस्य ताः त्रिद्व्येकांगुलात्मिकाः ॥ एकहस्त
मिते कुंडे वेदाग्निनयनांगुलाः ॥ कुंडे द्विहस्ते ताश्चैव रसवेदगुणांगुलाः ॥ चतुर्हस्ते तु ताश्चैव वसुतर्कयु
गांगुलाः ॥ कुंडे रसकरे तास्तु पंक्त्यष्टाब्ध्यंगुलक्रमात् ॥ वसुहस्तमिते कुंडे भानुपंक्त्यष्टकांगुलाः ॥ दशहस्त
मिते कुंडे मनुभानुदशांगुलाः ॥ विस्तारोत्सेधतो ज्ञेया मेखलाः सर्वतो बुधैः ॥ होतुरग्रे योनिवासो मुपर्यश्व
त्थपत्रवत् ॥ मेखलानां च वेदलः परितो नेमिकांगुलाः ॥ एकहस्तस्य कुंडस्य वर्द्धयेत्तां क्रमात्सुधीः ॥ दशहस्ता
लमन्येषामर्द्धांगुलवर्द्धात्स्थके ॥ एकहस्तस्य एकहस्तात्मकस्य नाभियोन्योरेकमानस्य इष्टत्वात् ॥ गौत
मीये ॥ प्रथमे मेखले योनिं कुंडोर्ध्वे होतुरग्रतः ॥ कुर्याद्गजोष्ठवत्तां तु कुंडविस्तरलक्षणं ॥ मुष्ट्यरत्न्येकह
स्तानां कुंडानां योनिरीरिताः ॥ षड्चतुर्थ्यंगुलायामविस्तारोन्नतिशालिनां ॥ एकांगुलं तु योन्यग्रं कुर्याद्दीर्घ
दधो मुखं ॥ एकैकांगुलतो योनिं कुंडेष्वन्येषु वर्द्धयेत् ॥ यवद्वयप्रमाणेन योन्यग्रमपि वर्द्धयेत् ॥ गणेशावि
मर्शिन्यां ॥ मेखलानां बहिःस्थानं स्थलमित्यभिधीयते ॥ चतुरस्रस्य तारव्यं नालं मध्ये सरंध्रकं ॥ स्थूलत
लं तु सूक्ष्माग्रं तं नालं स्यान्मनोहरं ॥ बाह्यस्थमेखलाबाह्यस्थलादारस्य कारयेत् ॥ यथा स्थलादार
भ्य नालस्यो योन्या मध्ये सरंध्रकं ॥ सरंध्रकर्मिस्यन्नयन्नं संबंधयेत् ॥ तदुक्तं गौतमीये ॥ स्थलादारभ्य नालं

स्यात्तु सरंध्रं योनिमध्यतः ॥ रत्नभागस्य द्वितयं च सरंध्रं नालमिष्यते ॥ योन्यां मध्ये विलं कुर्यात् तदाज्यगा
हि संस्रवः ॥ मध्यतो मध्यपर्यंतमित्यर्थः ॥ तथा च वासिष्ठे ॥ पृष्ठे नालं गजोष्ठीव सच्छिद्रं मध्यमोन्नतं ॥ सरं
ध्रमिति मध्यमेखलायामिति शेषः ॥ तथा च ॥ नालमेखलयोर्मध्ये परिधिस्थापनाय च ॥ रंध्रं कुर्यात्त्रिधा
विद्वान् द्वितीयमेखलोपरि ॥ परिधिस्था बाहुमात्राः परिधयः ऋजवः सत्वचोऽव्रणाः ॥ मुष्टिपर्वत्रैक हस्तानां ना
भिरुत्से च तावतः ॥ नेत्रवेदांगुलो येन कुंडे स्वेष्टे प्रवर्तयेत् ॥ यवद्वयक्रमेणैव नाभिरेष्वथ मुद्रारचीः ॥ यो
निकुंडे योनिमग्र कुंडे नाभिं च वर्जयेत् ॥ नाभिक्षेत्रं त्रिधा कृत्वा मध्ये कुर्वत [illegible] कर्णिकां ॥ वहिः [illegible] येना
ष्टौ पत्राणि परिकल्पयेत् ॥ नवकुंडपक्षयोनिर्नियममाह ॥ सिद्धांतशेखरे ॥ इंद्राग्नियमदिक्कुंडे योनिः
सौम्यमुखी स्मृता ॥ योनिः पूर्वमुखान्येषु पूर्वेशान्ये महास्मृता ॥ हस्तमात्रं स्थंडिलं वा संक्षिप्ते होमकर्मणि ॥
अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततः ॥ आदाय दक्षिणे पाणौ स्रुवं त्रिमधुरं दरिः ॥ प्राङ्मुखो वह्निजा
यां तं जुहुयात्तु न पाणिना ॥ नमोंतेन नमो [illegible] घात्स्वाहांतेन [illegible] ठमेव च ॥ प्रजायामो हुतो चापि सर्वत्रायं वि
धिः स्मृतः ॥ नमोंते पि पौराणिपरं ॥ तथा च ब्रह्मपुराणे ॥ ॐकारादिसमायुक्तं नमस्कारांतकीर्तितं ॥
स्वनाम सर्वदेवानां मंत्र इत्यभिधीयते ॥ यथा ॥ इदं पाद्यं ॐ आदित्याय नमः ॥ इदमर्घ्यं ॥ ॐ आदित्याय
नमः इत्यादि नेतु ॐ आदित्याय इदं पाद्यं ॐ सूर्याय नम इत्यादि तांत्रिके नायं नियमः ॥ अर्घ्यादौ वैसम्य (?)
स्यात् ॥ ह्रीं चामुंडा नमः ॐ गुं नमः ॥ इत्यत्र द्रव्यादेशे तु वस्यानस्य वक्तव्यात् ॥ मंत्रेणोंकारप्रतेन स्वाहांतेन वि
चक्षणः ॥ स्वाहावसाने जुहुयात् ध्यायेवै मंत्रदेवतां ॥ ॐकारप्रतेनेति इदमपि वैदिकमंत्रपरं ॥ अन्य
था मंत्रांतरप्रसंगात् ॥ तेन स्वाहांतमंत्रे स्वाहांतरं नैव कर्तव्यं ॥ अवस्कं पंचांगुलं यत्कारोरवमुद्रया धार्यं ॥
तथा च पंचांगुलं बाहिस्सत्वाधारयेच्छंखमुद्रया ॥ यंत्र होमे संख्या नोक्तात्र च संख्यानुक्तौ हुनेत् ॥ साष्ट
सहस्रं वाज्यपाशिषु ॥ अथ होमप्रयोगः ॥ आचार्यो लंकृतो होममंडपद्वारमागत्य सामान्यार्घ्यं विधाय
द्वारपूजां विधाय च ॥ गृहं प्रविश्य [illegible] देवतां ऐशान्यां दिशि हस्तप्रमाणां ॥ वेदिकां विधाय तदुप
रि घटं संस्थाप्य यथाशक्ति संपूज्य वीक्षणादिभिः कुंडं संस्कुर्यात् ॥ तथा च [illegible] ॥ होमकुं

डोऽग्न्यां वेदिकां हस्तविस्तारों त्रिशालिनीं ॥ कलास्मिन्स्थापयेत्कुंभं यथोक्तक्रमयोगतः ॥ तत्र संपू
जयेद्देवं यथाविध्युपचारकैः ॥ ततो होमं प्रकुर्वीत देवतासंनिधानतः ॥ वीक्षणं मूलमंत्रेणास्त्रेण ता
डनं मतं ॥ तेनैव प्रोक्षणं कार्यं वर्मणाभ्युक्षणं मतं ॥ ततो मूलमुच्चार्य कुंडाय नमः इति कुंडं संपूज्य त
तः कुंडमध्ये प्रागग्रोदगग्रास्तिस्रः तिस्रो रेखाः कुर्यात् ॥ प्रागग्रे मुकुंदेशपुरंदरान् प्रादक्षिण्येन
संपूज्य उदगग्रेषु ब्रह्मवैवस्वतेंदून्संपूजयेत् ॥ सुंदरीपक्षे सर्वत्र षट्कोणादि प्रयोगः ॥ ऐं ह्रीं श्रीं ऐं क्लीं सौः त्रि
कोणाय नमः इत्यादि ॥ ततः कुंडमध्ये षट्कोणं वृत्तं त्रिकोणं तद्बहिः रष्टदलपद्मं तद्बहिश्चतुरस्रं चतुर्द्वारि
समेतं लिखित्वा तदुपरि मूलेन पुष्पांजलिं दत्वा ॥ सुंदरीपक्षे तु वा तेयाततः सर्वाणि प्रणवेनाभ्युक्ष्य
योगपीठं समर्चयेत् ॥ तद्यथा कर्णिकोपरि आधारशक्त्यादीन् संपूज्य अग्न्यादिकोणेषु ॐ धर्माय नमः ॥
ॐ ज्ञानाय ॐ वैराग्याय ॐ ऐश्वर्याय ॥ पूर्वादिदिक्षु ॥ ॐ अधर्माय ॐ अज्ञानाय ॐ अवैराग्याय
ॐ अनैश्वर्याय ॥ मध्ये ॥ ॐ अनंताय ॐ पद्माय ॥ ॐ अर्कमंडलाय द्वादशकलात्मने ॥ उं सोममंडला
य षोडशकलात्मने ॥ मं वह्निमंडलाय दशकलात्मने ॥ ततः केशरेषु ॥ पीता श्वेतारुणा कृष्णा धूम्रा ती
व्रा स्फुलिंगिनी ॥ रुचिरा ज्वालिनी एताः पूर्वादिषु मध्ये च पूजयेत् ॥ ततो रं वह्न्यासनाय ॥ सुंदरीपक्षे
तु कामेश्वरीं कामेश्वरं पूजयेत् ॥ वैष्णवे तु होमे तु लक्ष्मीयुतमतीतत्र प्रजोनीशायणस्य च वामेण
न्यग्धर्मेण संजातमग्निं तत्र विचिंतयेत् ॥ इति लक्ष्मीनारायणयोरेवार्चाख्यायोऽन्यत्र वागीश्वर्यादे
रिति ॥ ततः वागीश्वरीं मरतुस्नातां नीलेंदीवरसन्निभां ॥ वागीश्वरेण संयुक्तां इति ध्यात्वा ॥ ॐ ह्रीं वा
गीश्वराय ॥ ह्रीं ॐ वागीश्वर्यै ॥ इति मंत्रेण पंचोपचारैः स्वर्णकूलादि संभूतं श्रोत्रियगेहजं वा वह्नि
मानयेत् ॥ गोलमीये ॥ पाषाणजं वह्निमग्निं च यद्दिवारणिसंभवं ॥ श्रोत्रियागारगेहजं च वनस्थस्याथवाह
येत् ॥ यद्दृष्टालाभसंप्राप्तो योग्यो यागस्य कर्मणि ॥ निरग्निब्राह्मणात्तद्ध्वोढाद्विधवात्तथा नकरोमवेत् ॥
क्षत्रं वैश्यो श्वतु अंरिंघ्र कुलं दद्याद्भुजातानः ॥ वेश्याशूद्राश्च विप्रकुलं जायते होमकर्म तत् ॥ तस्मात्सर्वप्रयत्नेन

वह्निं युक्तं समाहरेत्॥ एवं वह्निपात्रं विधाय क्रव्यादांशं परित्यजेत्॥ तंत्रे हि जालिमवनाद्यपि वह्निमानीय सा
धकः॥ वौषडंतेन मूलेन मंत्रितं तं विलोकयेत्॥ अग्निमावाहयेदस्त्रमंत्रेणानेन तं तरं॥ हुं फडंतेन मूलेन क्रव्या
दांशं परित्यजेत्॥ ततोग्निं निरीक्षणादिभिः संस्कृत्य ॐ रं वैश्वानरं वाग्नीभ्यां सोमस्य वह्नेः रूपं विभाव्य रे वह्निं चैत
न्यं कल्पयामीति पावके चैतन्यं निधाय ॐ कारेनाष्टोत्तरशतमभिमंत्र्य धेनुमुद्रयामृतीकृत्य फडिति संवीक्ष्य
हुमित्यनेनावगुंठ्य गंधपुष्पादिभिः रं वह्निमूर्तये नमः॥ इति तमभ्यर्च्य कुंडस्योपरि प्रदक्षिणं त्रिः परिभ्राम्य
प्रणवोच्चारणपूर्वकं जानुभ्यामवनीतले स्थितः॥ शिवबीजधियात्मनोग्निमुखं देव्यायोनावेनं निक्षिपेत्॥ ततो वा
गीश्वरवागीश्वरीभ्यां आचमनीयादिकं दत्वा लयागर्भं घृतं ध्यायेद्वह्निरूपं तु देवता॥ पश्चाद्गर्भस्य र
क्षार्थं प्रदद्याद्गर्भभूषणं॥ चित्पिंगल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा इति मनुना वह्निं ज्वालयेत्॥ त
तो बद्धांजलिः सन् अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं॥ सुवर्णवर्णममलं समिद्धं विश्वतो मुखं॥
इत्यनेन वह्निमुपतिष्ठेत्॥ ततो देहे जिह्वान्यासं कुर्यात्॥ तद्यथा॥ लिंगे द्वारं युक्तिरण्यायै॥ पायौ यर
रूपायै॥ सर्वत्र सप्तवर्ण अतिरक्तायै॥ वक्त्रे वरं कृष्णायै॥ घ्राणे लरं सुप्रभायै॥ नेत्रे ववरं बहु
लाभ्वेतारं चिनीकरालिकाए ता राजस्य क्रूर कर्मसु॥ विश्वमूर्त्ति स्फुलिंगिनी धूम्रवर्णा मनोजवा लो
हिता करालाकाली एतास्तामस्य॥ न्यासं तु बीजयोगेन सर्वं वर्णमेते न सर्वत्र वोद्धयं॥ सरं इत्यादि मंत्रो
त्कृतांगन्यासौ॥ सहस्रार्चिषे अंगुष्ठा॥ स्वस्तिपूर्णाय तर्जनी॥ उत्तिष्ठपुरुषाय मध्यमा॥ धूमव्यापिने अ
नामिका॥ सप्तजिह्वाय कनिष्ठा॥ धनुर्धराय करतल॥ एवं सहस्रार्चिषे हृदयाय॥ इत्यादि॥ ततो मूर्त्ति
न्यासः॥ मूर्ध्नि ॐ अग्नये अश्वोदरजाय॥ लिंगे ॐ अग्नये वैश्वानराय॥ वामकट्यां ॐ अग्नये कौमा
रतेजसे॥ वामपार्श्वे ॐ अग्नये विश्वमुखाय॥ वामांसे ॐ अग्नये देवमुखाय॥ ततो वह्नेरास

नं कृत्वा चिंतामणिं तत्र विचिंतयेत् ॥ इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतं जपाभं ॥ हेमाकल्पं पद्म
संस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः ॥ ततो मेखलानामुपरि वालुकया विशुद्धस्तोयैः परिषिच्य मध्ये स्व
लायां गन्धैर्दर्भैरग्नेलमष्टलमाच्छादयन्भिः परिस्तरेत् ॥ ततः प्राचीवर्जं दिक्षु परिधानं विनिक्षिप्य तत्र
प्रादक्षिण्येन ब्रह्मादिदेवताः संपूज्याः पुनर्वह्निं ज्वालालं तत्पीठे आवाहनेन मंत्रेण गंधादिभिः संपूजयेत् ॥
ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इदं पाद्यं वह्नये ॥ इत्यादि मध्ये षट्कोणे
पुसरपं हिरण्यायै ॥ लरपं गगनायै ॥ रारपं रं रक्तायै ॥ वरपं कृष्णायै ॥ लरपं सुप्रभायै ॥ वरपं बहु
रूपायै ॥ वरपं अतिरक्तायै ॥ एतासामधिष्ठात्री देवतास्तत्रोत्तरे ॥ अमर्त्यपितृगंधर्वयक्षनागपिशाच
काः ॥ राक्षसः सप्तजिह्वानां इरिता अधिदेवताः ॥ दर्भैर्नैर्दक्षिण्ये सरपं पद्मरागाय ॥ इत्यादि क्रूरेकर्माणि सरपं वि
श्वमूर्त्यै ॥ इत्यादि ॥ यह्वागणेक्षु विमर्षिण्यो हिरण्या तप्तहेमाभा श्वेतपाणिरिन्द्रदिक्संस्थिता ॥ वैडूर्यवर्णा गगना प्राच्यां
दिशि समाश्रिता ॥ तरुणादित्यसंकाशा रक्ताग्निजिह्वाग्नेसंस्थिता ॥ स्रुह्मा नीलाभसंकाशा नैरृत्यां दिशि संस्थि
ता ॥ सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता ॥ अतिरक्ता जपाभासा वायव्यां दिशि संस्थिता ॥ बहुरूपा यथा मुख्या
दक्षिणोत्तरतः स्थिता ॥ मेखलायां वामांज्येकांरोढ्रीं अविकासं पूज्य केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च ॐ सहस्रा
र्चिषे हृदयाय ॥ ॐ स्वस्तिपूर्णाय शिरसे ॥ ॐ उत्तिष्ठपुरुषाय शिखायै ॥ धूमव्यापिने कवचाय ॥ ॐ सप्तजिह्वाय ने
त्रत्रयाय ॥ ॐ धनुर्धराय अस्त्राय ॥ ततः पूर्वादिदलेषु ॐ अग्नये जातवेदसे ॥ ॐ अग्नये सप्तजिह्वाय नमः ॥
ॐ अग्नये हव्यवाहनाय ॥ ॐ अग्नये अश्वोदरजाय ॥ ॐ अग्नये वैश्वोदरजाय ॥ ॐ अग्नये कौमारतेजसे ॥
ॐ अग्नये विश्वमुखाय ॥ ॐ अग्नये देवमुखाय ॥ इति बहिर्मंडले शक्तिस्वस्तिकधारिणीः संपूज्य लोकपा
लान् स्वस्वदिक्षु पूजयेत् ॥ ततो हस्ताभ्यां स्रुवं स्रुचौ गृहीत्वा अधोमुखौ कृत्वा वह्नौ त्रिवारं प्रतप्य दर्भैर्नाशयय
थाक्रमं दर्भाग्रमूलमध्यानि स्पर्शयित्वा वामहस्ते गृहीत्वा दक्षिणे ततो संप्रोक्ष्य पुनः प्रतप्य दर्भानग्नौ वि
निःक्षिप्य आत्मनो दक्षिणे भागे कुशोत्तरे स्थापयेत् ॥ ततो आज्यस्थालीं आत्मसंमुखे आनीय अ
स्त्रजेमेन वारिणा तं संप्रोक्ष्य तस्यामाज्यं निनिःक्षिप्य वीक्षणादिभिस्तत्संस्कुर्यात् ततो वायव्ये
गारमुद्धृत्य तेषु नमः इति मंत्रेणाज्यस्थालीं विनिवेशयेत् ॥

ततो दर्भमुष्टिं संदीप्य आज्ये क्षिप्त्वानले क्षिपेत्॥ नम इति मंत्रेण पुनरुपेन दर्भयुग्मेनाज्यं
वाहृभिराज्यं तद्दर्भयुग्ममसौ विसर्जयेत्॥ ततः फडिति मंत्रेण घृतेन प्रज्वलितान्दर्भान्प्रदक्षि
तानूदर्भान्तवह्नौ विनिक्षिपेत्॥ ततो घृतं गृहीत्वा पुनरंगारान्वह्नौ संपोष्य जलं स्पृष्ट्वा दक्षिणहस्ता
परिचोवेनाधोमुखेऽङ्गुष्ठेन निष्ठाभ्यां प्रादेशमात्रं संभिन्नौ दर्भौ धृत्वा अनेन घृतं पवित्रीकृत्य नम इति मं
त्रेण तलकुशाभ्यां मत्वसंस्कृत्य घृतसंप्लवनं कुर्यात्॥ ततः प्रादेशमात्रे समग्रे छिन्ने दर्भयुग्मं घृतमध्ये क्षि
यादौ चागौरुत्वा शुक्लकृष्णपक्षौ स्मरेत्॥ ततो वामे इडानाडीं दक्षिणे पिंगलां मध्ये सुषुम्नां ध्यात्वा होमं कुर्यात्
लेघथानम इति मंत्रेण स्रुवेण दक्षिणभागादाज्यमादाय अग्नेर्दक्षिणे लोचने ॐ अग्नये स्वाहेति जुहुया
ततस्तामल आज्यमादाय अग्नेर्वामलोचने सोमाय स्वाहा इति हुतोत्तदध्य आज्यमादाय अग्नेर्मध्ये लोच
ने॥ ॐ अग्नीषोमाभ्यां स्वाहा इति जुहुयात्॥ ततो नम इति मंत्रेण स्रुवेणाज्यं दक्षिणभागादादाय वह्निमुखे
ॐ अग्नये स्विष्टकृते स्वाहेति जुहुयात्॥ स वैश्वाहुतिसंख्यातः ततो व्याहृतिरेभिः॥ ॐ भूः स्वाहा॥ ॐ भुवः स्वा
हा॥ ॐ स्वः स्वाहा॥ ततो वैश्वानर जातवेद इत्यादि मंत्रेण त्रिवारं दत्वा अग्ने गर्भाधानादिक्रियाः संपादयेत्
तेयथा गर्भाधानं पुंसवनं सीमंतोन्नयनं जातकर्म नाम अन्नप्राशनं चूडाकरणं उपनयनं महाव्रतं उप
निरास्तानं गोदानं उद्वाहकार्यं चूडाकरण कर्माणि भरणाल॥ तथाच श्रुते पुंसुवर्गिता होतामरणांताः कर्मसंस्
ततः क्रमः॥ ॐ अग्नेर्गर्भाधानं कर्म संपादयामि स्वाहेति प्रतिकर्म लिङ्गमेष्टाहुतिं जुहुयात्॥ एवं पुंसवनादी
वपि पुंसवनकर्म संपादयामीत्यस्ततेऽवं संस्कारीपक्षे अग्नेर्गर्भाधानं कल्पयामि ऐं नमः ए के आहुतीर्दद्यात्
इति कृत्वा स्वतंत्रेण नामकरणे लुप्तेत्तरे वीर्यमप्यत्तन्नामकरणाय च हुनेत्॥ पंचमहाले नैव आहुतीनां
नेयतथा कामाग्निसंहुताशनेति नाम कुर्यादनंतरं॥ ततो वह्नेः पितरौ संस्मरज्यालाभियोजयेत्ताग
मध्ये घृतस्नुताः समिधः पंच मनसा ध्यात्वा जुहुयात्॥ ततो वह्नेः परविक्लिन्नं जिह्वां गभस्तिनामेके आहुतिर्द
तास्रुवेण चतुरज्यमादाय सर्वविनिभ्यायेत् सर्वेषां तापिभ्यायउत्तिष्ठन्नवैश्वानर जातवेद इहावहलोहि
ताक्षर सर्वकर्माणि साधय स्वाहा यो बडिशनेन जुहुयात्॥

ततो विघ्नेश्वरमंत्रेण दशांशहुतीर्जुहुयात् तद्दशं गणेशाद्विमर्षिण्यां महागणेशमंत्रेण शर्करायुतेन च ॥ ता
शाद्विनीजपदशकेषु करणे घृतद्विवर्णकैः ॥ मंत्रैः पुरश्चर्यां कृत्वा समस्तेन कुरेश्वरि जुहुयाच्च चतुर्वर्णं साधकः
स्वेष्टसिद्धये इति तद्यथा ॥ ॐ ॐ स्वाहा ॥ ॐ श्रीं स्वाहा ॥ ॐ श्रीं ह्रीं स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं
ग्लौं स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये
वरवरद स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये व
रवरद सर्वजनं मे वशमानय स्वाहा ॥ तथाच प्रपंचसारे ताराद्यैर्दशभिर्दीपैर्वर्णैः पूर्वसमन्वितैः ॥ मनु
नागालोपयेन हुनेत्सर्वां दशांशहुतीः ततो देवतायाः पीठं वह्नौ समभ्यर्च्य वह्निरूपां तां विधिवत्पंचोपचारादिभिः
संपूजयेत् ॥ स्कंदरीपक्षे तु षडासनमंत्रेण अंगमंत्रेण च संपूज्य ऐं ह्रीं श्रीं समस्तप्रकटगुप्तगुप्ततरसंप्र
दायकुलकौलिनिगर्भरहस्यातिरहस्यपरमातिरहस्ययोगिनी च क्रीं श्रीपादुकां पूजयामि ॥ तारादेर्ब्राह्म्या
दिलक्ष्म्यादि इंद्रादीन् वज्रादींश्च पूजयेत् इति विशेषः ॥ वह्निमुखे मूलमंत्रेण घृतेन पंचविंशतिं जुहुया
त् ॥ ततो वह्नौ देवतां परात्मना सह ऐक्यं विभाव्य मूलेनाज्येन एकादशाहुतीर्जुहुयात् ॥ ततस्तत्तद्दे
वतायाः षडंगानावरणदेवतायाः एकैकाहुतीर्जुहुयात् ॥ पुनर्व्याहृतिहोमं कुर्यात् ॥ ततः संकल्पितं तत्त
त्कल्पोक्तविहितद्रव्यैर्होमं कुर्यात् ॥ तद्यथा वह्निरूपाक्षि जिह्वायां जुहुयात् सर्वकर्मणि फलः समस्तसि
द्धीनां सात्त्विकी बहुरूपेति ॥ पालने कुडमध्ये हिरण्या रक्ता वृष्या कृषीण कर्मणि ॥ कनकाख्या स्तंभनादौ
रक्ताख्या द्वेषणे मता ॥ लेलिहाख्या मारणेऽग्रास्ता शुभे भाकृतिकर्मणि उच्चाटने रक्ताख्या वह्निरूपा ससि
द्धिदा ततः ॐ भूरग्नये पृथिव्यै महते स्वाहा ॥ ॐ भुवो वायवेऽन्तरीक्षाय दिवे महते च स्वाहा ॥ ॐ सूर्याय चंद
मसादिभ्यो नक्षत्रेभ्यो महते च स्वाहा ॥ ॐ भूर्भुवः स्वः अग्निचंद्रमसे नक्षत्रेभ्यो दिग्भ्यो महते स्वाहा ॥ साम्यहो
मेऽगुलीनियमस्तु ॥ तर्जन्यंगुष्ठयोगात् अभ्युदयार्थं जुहुयान्नरः ॥ दाहच्छेदाभिचारेषु शमने वामांगुष्ठमु
द्रया ॥ विद्वेषोच्चाटने चैव मारणे च प्रदेशस्थले ॥ प्रदेशिनी मध्यमाभ्यां वा योपशमनं महत् ॥ वश्ये पौ
ष्टिकं शांति एतानि पुष्पादिके तथा ॥ आकर्षणानि सर्वाणि निर्द्वंद्वाद्यागतानि च ॥ तर्जन्यनामिकायोगात्
ससएवमनवंलिहि ॥

मोहनं चत्रयकामं च प्रीतिसंवर्द्धनं तथा ॥ प्रदेशिन्यौ कनिष्ठाभ्यां सर्वमेतत्प्रसिद्धति ॥ मोहनाकर्षणं चैव क्षो
भणोच्चाटने तथा ॥ कनिष्ठामध्यमांगुष्ठसंयोगेन तु लीलया ॥ विधियुक्तेन होमेन तथा द्रव्यानुयोगतः ॥
सर्वे मंत्राः प्रसिद्ध्यंति मुद्रामंत्रप्रयोगतः ॥ ततो होमद्रव्याणि स्रुवेण स्रुक् विनिधाय तेनाज्यं घृतेनाज्यसंस्था
प्य द्रव्यमित्यादि मंत्रेण मूलमंत्रेण च पूर्णाहुतीं दत्वा संहारमुद्रया देवतामात्मनि तु द्वास्य पुनर्व्याहृतिभि
र्वा योजयित्वा परिधान परिस्तरणं अग्नौ निःक्षिपेत् ॥ विशेषस्तु नैमित्तिके कर्मणि एतान् देहे तु नित्यकर्मणि
न कुर्यात् ॥ तथा च ग्रहराशौ नैमित्तिके देहे मंत्री नित्ये तु न देहे दिमान् ॥ ततो दक्षिणा यदि दीक्षांगहोमस्यात्तदा
देवताया आवरणदेवताया होमानंतरं आज्यान्वितैः तिलैः कल्पविहितद्रव्यैर्वा अष्टोत्तरसहस्रं शतं वा जु
हुयात् ॥ ततः स पौतरं तास्यं शिष्यं स्नानं कुंडांतिकमानीय दिव्यदृष्ट्यावलोक्यत स्थेतन्यं गुरुरात्मनि संयो
ज्यात्र विशोधनं कुर्यात् ॥ तद्यथा कुशाग्रेण शिष्यस्य पादे संस्पृश्य ॐ शोधयामि अश्वानं स्वाहेति आ
ज्यान्वितैस्तिलैरष्टाहुतीर्जुहुयात् ॥ ॐ घ्रस्पृष्ट्वा ॐ शोधयामि तत्त्वाध्वानं स्वाहेति आ
नं स्वाहा एवं हृदयं स्पृश्य स्वाहा ॐ शोधयामि वर्णाध्वानं स्वाहा ॐ शोधयामि भुवनाध्वा
नं स्वाहा एवं शिरः स्पृष्ट्वा ॐ शोधयामि मंत्राध्वानं स्वाहा
सर्वत्राष्टाहुतीर्जुहुयात् ॥ एवं क्रमेण परशिवे संहृत्य पुनः सृष्टिवर्त्मना तद्वारा हुतिभिः क्रमेण जनयेत् ॥ तद्य
था मंत्राध्वानः पदाध्वा वर्णाध्वा वर्णाध्वानो भुवनाध्वा भुवनाध्वानः तत्त्वाध्वा तत्त्वाध्वनिः कलाध्वा
न ॥ एवं क्रमेण पूजयेत् ॥ ततो दिव्यदृष्ट्या तं शिष्यं विलोकयन् आत्मस्थितं तच्चैतन्यं शिष्ये निवेदये
त् ॥ ततश्च पूर्णाहुतिं दत्वादि कर्म समाप्य प्रवेशिकं मे दीक्षां कारयेत् ॥ इति होमपद्धतिः ॥ अथ नित्य
होमः ॥ तदुक्तं सोमभुजंगावल्यां ॥ नाजप्तः सिध्यते मंत्रो नाहुतश्च फलप्रदः ॥ नानिष्टाय फलं कामानाने
स्यात् त्रितयमाचरेत् ॥ पूजया लभते कामान् जपात्सिद्धिर्न संशयः ॥ विन्नतीवाग्निकार्येन सर्वं सि
द्धिं च विंदति ॥ नीलतंत्रेपि ॥ नित्यहोमं प्रवक्ष्यामि सर्वार्थं येन विंदति ॥ सपर्यां सस्य गायाघवलिं पूर्वव
दाचरेत् ॥ ततो जपं तत्पर्णं च चरेत्साधकसत्तमः ॥ वलिवैश्वानरादिकं चैव ब्राह्मणः समुपाचरेत् ॥ विधि
वद्ग्निमानीय क्रव्यादिभ्यो नमस्तथा ॥ मूलमंत्रं समुच्चार्य कुंडे वा स्थंडिलेपि वा ॥

न्नमो वा संस्तरेद्दर्भैर्व्याहृतिभिस्त्रयेन तु ॥ स्वाहान्तेन त्रिधा हुत्वा षडंगहृतनेन च ॥ ततो देवीं समावाह्य
मूलेन षोडशाहुतीः ॥ हुत्वा स्तोत्रान्नमस्कृत्य विसर्जेद्धृदि मंडले ॥ क्रियामादौ तु विज्ञेयः ॥ नैरवां श्रहु
नेदृष्टो आज्यान्विते स्थिते ॥ श्रुचेः ॥ पूर्वादिके क्रमेणैव ततो होमं समाचरेत् ॥ अथात्र होमद्रव्या
णां प्रमाणमभिधीयते ॥ कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं ॥ उक्तानि पंचगव्यानि त
त्समानि मनीषिभिः ॥ तत्समं मधु दुग्धान्नमिक्षुमात्रं सदा हुतं ॥ दधिः प्रसृतिमात्रं स्यात् लाजा
स्युर्मुष्टिसम्मिताः ॥ पृथुकास्तत्प्रमाणाः स्युः शक्त्या पिण्याकतथोदिताः ॥ गुडं पलार्द्धमानं स्यात् शर्करापि त
था स्मृता ॥ ग्रासार्द्धं चरुमानं स्यात् इक्षुपर्वावधिः स्मृतः ॥ एकैकं पत्रपुष्पाणि तथा पूर्वोदि कल्पये
त् ॥ कदलीफलनारंगफलान्येकैकशो विदुः ॥ मातुलिंगं चतुःखंडं पनसं दशधा कृतं ॥ अष्टधा
नारीकेलानि खंडितानि विदुर्बुधाः ॥ त्रिधा कृतं फलं बिल्वं कपित्थं खंडितं द्विधा ॥ उर्वारुकफलं
होमे चोदितं खंडितं त्रिधा ॥ फलान्यन्यान्य खंडानि समिधः स्युर्दशांगुलाः ॥ दूर्वात्रयं समुद्दि
ष्टं गुडूचीचतुरंगुला ॥ व्रीहयोऽष्टिमात्राः स्युर्मुद्गमाषयवा अपि ॥ तंडुलाः स्युस्तद्द्विगुणा
कोद्रवा मुष्टिसम्मिताः ॥ गोधूमा रक्तककोलाविलिता मुष्टिमानतः ॥ तिला श्वेतकमात्राः स्युः स
र्षपास्तत्प्रमाणकाः ॥ शुक्तिप्रमाणं लवणं मरीचान्यपि विंशतिः ॥ पुरं बदरमानं स्यात् द्राक्षामेलं समं
स्मृतं ॥ चंदनागरकर्पूरकस्तूरीकुंकुमानि च ॥ तिंतिणीबीजमानानि समुद्दिष्टानि देशिकैः ॥ वै
श्वानरं स्थंडिलं ध्यायेत्समिद्धोमेषु दीक्षितः ॥ ध्यानमाज्यहोमेषु निषण्णं शेषवस्तुषु ॥ अस्यां तु जु
हुयाद्धुत्वा विपश्चित्सर्वकर्मसु ॥ कर्णहोमे भवेद्व्याधिर्नेत्रेऽन्धत्वमुदीरितं ॥ नासिकायां मनःपीडा
मस्तके धनसंक्षयः ॥ यतः काष्ठं ततः श्रोत्रं ततो यमोत्र नासिका ॥ यत्राल्पज्वलनं नेत्रं यत्रांगारस्त
तः शिरः ॥ यत्र प्रज्वलिता ज्वाला जिह्वा सो जातवेदसः ॥ स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसंनि
भः ॥ सुवर्णरेतसो वर्णः शोभनः परिकीर्तितः ॥ भेरीघोषोदि कुस्तीद्र लिनदोग्निः शुजारहः ॥ नोगन्धय

कपुन्नागपाटलीचम्पककान्तिभः ॥ फुल्लेन्दीवरकह्लारसर्पिर्गुग्गुलसन्निभः ॥ पावकस्य शुभो गंधः इष्ट
कृत्स्नत्वदेहिनः ॥ प्रदक्षिणास्यलक्षपाः स्वधाभोः शिखिनः शिखाः ॥ शुभदा यजमानस्य राज्यस्यो
पि विशेषतः ॥ कुंदेंदुधवलो प्रेमोनक्लः प्रोक्तः शुभावहः ॥ कृष्णः कृष्णगलेवर्णा यजमानविनाशकृ
त् ॥ श्वेतो राष्ट्रं निहंत्याशु रायसेः स्वरसन्निभः ॥ खरस्वरसमो वह्नेर्ध्वनिः सर्वविनाशकृत् ॥ प्र
तिगंधो हलमंजो हो तुदुः स्वपरो भवेत् ॥ छिन्नावर्ता शिखा कुर्यान्नष्टं धनपरिक्षयं ॥ शुक्लप
क्षे निभो रमः पारावतसमप्रभः ॥ हानिं तुरगजालीनां गवाचकुरुते विराट् ॥ एवं विधेषु दोषेषु
प्रायश्चित्तोयरे शिवः ॥ मूलेनाज्येन जुहुयात् पंचविंशतिमाहुतीः ॥ इति होमप्रकरणम् ॥
अथ संक्षेपहोमप्रयोगः ॥ कुंडे वा स्थंडिले वापि वीक्षणादिभिः संस्कृते वीक्षणं मूलमंत्रेण शरेण ता
डनं मतं ॥ तेनैव प्रोक्षणं चोक्तं वर्म्मणाभ्युक्षणं मतं ॥ प्रागग्रा उदगग्रास्तिस्रो रेखाः समुल्लिखेत् ॥
प्रागग्रे मुकुंदेशपुरंदरानप्रपूजयेत् ॥ उत्तराग्रे पुत्र ब्रह्मवैवस्वतेंद्रानप्रपूजयेत् ॥ ततो वह्नेर्योगि
पीठाय ॥ चतुर्दैवतादे पांचरतुमतीं ध्यात्वा वा संपूज्य यथोक्तं वह्निमानीय वीक्ष्य दिक्षु ॐ वामायै नमः
एवं ज्येष्ठायै रौद्र्यै अंबिकायै ततो मूलमुच्चार्य ॐ अमुकदेवताकुंडाय ॥ ततस्तन्मध्ये वागीश्वरीं तत्र
देवतां पंचरतुमतीं ध्यात्वा संपूज्य यथोक्तं वह्निमानीय वीक्षणादिभिः ॥ संस्कृत्य रमिति तस्मा
द्वह्निमुद्धृत्य हुं फट्कारेभ्यः स्वाहा इत्यनेन क्रव्यादांशं परित्यज्य वह्निमस्त्रेण संरक्ष्य हुमिति अव
गुंठ्य मिति धेनुमुद्रयामृतीकृत्य बाहुभ्यां समुद्धृत्य कुंडोपरि भ्रामयन् महीपृष्ठजानुः शिवबीजं ध्या
त्वात्मनोभिमुखं देव्या योनौ एवं विनिःक्षिपेत् ॥ ततो वह्निमर्चयेत् ॥ इत्थं पूर्वं वह्निचैतन्याय
इति चैतन्यं संयोज्य ॐ चित्तपिंगल हन २ दह २ पच २ सर्वज्ञाज्ञापय स्वाहा इति ज्वालयेत् ॥ ततः
अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं ॥ सुवर्णवर्णममलं समिद्धं विश्वतोमुखं इत्युपतिष्ठेत् ॥ ॐ अग्ने
संवरद नामासि इति नाम कृत्वा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा
इत्यनेनाघारादिभिः संपूज्य ॐ अग्नेस्त्वं रिपवादिसप्तजिह्वाभ्यो ॥ ॐ सहस्रार्चिषे हृदयाय नमः ॥ १७२

ॐ अग्नये जातवेदसे इत्यष्टमूर्त्तिभ्यो॥ तद्वाह्ये ब्राह्म्याद्यष्टशक्तिभ्योन॥ तद्वहिः श्रीरवाद्यष्टनिधिभ्यो॥
तद्वाह्ये इंद्रादिदशदिक्पालेभ्यो॥ तद्वाह्ये वज्राद्यस्त्रेभ्यो॥ ततः प्रादेशमात्रं कुशद्वयं घृतमध्ये निःक्षि
प्य सव्यापसव्यमध्यभागेषु इडां पिंगलां सुषुम्नां ध्यात्वा होमं कुर्यात्॥ स्रुवेणादक्षिणभागादाज्यं गृहीत्वा
ॐ अग्नये स्वाहा इत्यग्निदक्षिणनेत्रे जुहुयात्॥ तथा वामभागादाज्यं गृहीत्वा ॐ सोमाय स्वाहेति वाम
नेत्रे जुहुयात्॥ ततो मध्यभागादाज्यं गृहीत्वा ॐ अग्निषोमाभ्यां स्वाहा इत्यग्निललाटे जुहुयात्॥ पुनर्दक्षि
णतः घृतं गृहीत्वा ॐ अग्नये स्विष्टिकृते स्वाहा इति अग्निमुखे॥ ततो व्याहृतिहोमः ॐ भूः स्वाहा ॐ भुवः स्वा
हा ॐ स्वः स्वाहा ततः वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेति अनेन त्रिवारं
जुहुयात्॥ ततोऽग्नौ मूलेन पीठदेवं कृत्वा मूलदेवतां संपूज्य तन्मुखे घृतेन मूलमंत्रेण पंचविंशतिवारं जु
हुयात्॥ वह्निदेवतयोरात्मना सह ऐक्यं विभाव्य मूलेन एकादशाहुतीर्जुहुयात्॥ ततो मूलस्यांगदेवताभ्यः स्वा
हा एवमावरणदेवताभ्यः स्वाहा इत्येकैकाहुतीर्जुहुयात्॥ ततः संकल्पं विधाय तत्तत्संकल्पद्रव्येण हो
मं कुर्यात्॥ ततो मूलेन पूर्णाहुतिं दत्वा संहारमुद्रया स्वेष्टदेवतां हृदयमानीय क्षमस्वेति अग्निं विसृज्य द
क्षिणां दत्वा छिद्रावधारणं कुर्यात् इति संक्षेपः॥ इति संक्षेपहोमप्रकरणं समाप्तम्॥ अथ दर्शयाम्यत्र आचितो
क्तं तंत्रेऽस्मिन् सम्यक् षट्कर्मलक्षणं॥ सर्वतंत्रानुसारेण प्रयोगं फलसिद्धिदं॥ शांतिवश्यस्तंभनानि विद्वेषोच्चा
टने तथा॥ मारणांतानि संशंति षट्कर्माणि मनीषिणः॥ रोगकृत्याग्रहादीनां निवारः शांतिरीरिता॥
वश्यं जनानां सर्वेषां विधेयत्वमुदीरितं॥ प्रवृत्तिरोधः सर्वेषां स्तंभनं तदुदाहृतं॥ स्निग्धानां द्वेषजननं
मिथो विद्वेषणं मतं॥ उच्चाटनं स्वदेशादेर्भ्रंसनं परिकीर्तितं॥ प्राणिनां प्राणहरणं मारणं तदुदाहृ
तं॥ स्वदेवतादिदिक्कालान् ज्ञात्वा कर्माणि साधयेत्॥ रतिर्वाणी रमा ज्येष्ठा दुर्गा काली तथाक्रमात्॥
षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत्॥ ईशचंद्रेंद्रनैर्ऋत्यवाय्वग्नीनां तु दिशो मताः॥ सूर्योदयं
समारभ्य घटिकादशकं क्रमात्॥ ऋतवः स्युर्वसंताद्या अहोरात्रं दिने दिने॥ वसंतग्रीष्मवर्षाख्यशरद्धेम
तशैशिराः॥ यद्वा अर्धरात्रे शरत्कालो हेमंतश्च प्रभातके॥ पूर्वाह्णे च वसंतः स्यान्मध्याह्ने ग्रीष्म एव च॥
प्रावृट्कालोऽपराह्णः स्यात् प्रदोषः शिशिरः स्मृतः॥ अथवा षड्योगे च हेमंतः प्रभाते शिशिरागमः॥ प्रत

रात्रे वसंतश्च ग्रीष्मो मध्यंदिनागमे ॥ तृतीये यामे च वर्षा स्याच्छरदस्तंगते रवौ ॥ हेमंतः शांतिके प्रोक्तो वसंतो वश्यक
र्मणि ॥ शिशिरस्तंभने ज्ञेयो विद्वेषे ग्रीष्म ईरितः ॥ प्रावृडुच्चाटने ज्ञेयो शरन्मारणकर्मणि ॥ अथ तिथिनिय
मस्तु ॥ पंचमी च द्वितीया च तृतीया सप्तमी तथा ॥ बुधजीववारसंयुक्ता ज्ञेया विद्वेषकर्मणि ॥ कृष्णा चतुर्दशी
यत्र अष्टमी मंदवारकृ ॥ उच्चाटने तिथिः शस्ताः प्रदोषे च विशेषतः ॥ चतुर्दश्यष्टमी कृष्णा त्वमावास्या तथै
व च ॥ मंदभौमदिनोपेता शस्ता मारणकर्मणि ॥ बुधचंद्रदिनोपेता पंचमी द्वादशी तथा ॥ पौर्णमासी च विहिते
या तिथिः स्तंभनकर्मणि ॥ शुभग्रहोदये कुर्यात् सन्मानि च शुभोदये ॥ रौद्रकर्माणि रिक्तार्केम्युक्तयोगे च मार
णं ॥ जपेत् पूर्वमुखो वश्ये दक्षिणे चाभिचारके ॥ पश्चिमे धनदं विद्यादुत्तरं शांतिकं भवेत् ॥ तथाभिचारे का
र्या च दक्षिणा त्वन्यनामती ॥ वसनं लोहितं प्रोक्तं मुद्रीशो लोहितं स्थलं ॥ भषणं लोहद्रव्येण वाचेन पूजनादि
कं ॥ नवेस्त्रायुविशेषेण मोरणे वजरीरितासत्रमीरितं ॥ स्थलस्येयुद्धश्चन्यस्य दंतेन गर्द्धवेस्य च ॥ रुद्राक्षमालां
जलव्यं शत्रुनां वधमिच्छता ॥ भग्ने भस्टगमेलि जिजपेदाकृषे कर्मणि ॥ साध्यकेशस्त्रयोगैतु रंगद
शनोद्भवेः ॥ अक्षमालां समालोक्य विद्वेषोच्चाटने जपेत् ॥ पद्मा स्वस्वस्तिकं भयोरिकटं कुकुटं पुनः
वज्रं भद्रं मिसाहुरासनानि मनीषिणः ॥ पद्मासनं च संयोज्य जानोर्घोरलरे करौ ॥ विन्यस्य भमोसं
स्थाप्य व्योमस्थं कुकुटासनं ॥ अन्यानि च कूर्मयानि ॥ षण्मुद्राक्रमतो ज्ञेयाः ॥ पयसा सगदाद्धयो ॥ मु
सत्कानि स्वखड्गाख्यो शांत्यादिषु च कर्मसु ॥ जलं शांतिविधौ शस्तं वश्ये वह्निरुदीरितः ॥ स्तंभने पृथिवी शु
स्ता विद्वेषे व्योम कीर्तितं ॥ उच्चाटने स्थलो वायुर्भयोपि मारणे मतः ॥ तत्तद्भूतोदये सम्यक् तत्तत्पल्लवसं
युतं ॥ लेखकर्म विधातव्यं मंत्रिणा निश्चितात्मना ॥ ह्रीं लां शु सलिलं क्षौं णीं व्योम यायु हविर्भुजां ॥ वर्णाः
स्युर्मंत्रबीजानि षट्कर्मसु यथाक्रमं ॥ अथ नंदिरं भश्च संपुटो बोधनं तथा ॥ योगः पल्लवरसोले विन्या
साः षट्सु कर्मसु ॥ मंत्रार्णांतरितान् कृत्वा साध्यवर्णान् यथाविधिः ॥ अथ नंतद्विजानीयाल्ले प्रशस्तं
शांतिकर्मणि ॥ मंत्रांते हृदयमध्यस्थं साध्यनामाक्षरं लिखेत् ॥ विदर्भं परि पविज्ञेयो मंत्रो त्रिभिर्वेद्रय
कर्मणि ॥ आदावंते च मंत्रैः स्यान्नाम्ना सो संपुटः स्मृतः ॥ एषः स्यात्स्तंभने शस्तद्रुक्तो मंत्र
वेदिभिः ॥

नाम्नामद्यंतमध्येषु मंत्रस्याद्रोधनं मतं ॥ विद्वेषणविधाने तु प्रशस्तमिदमुत्तमं ॥ मंत्रस्यांते च
वेंनामयोगः प्रोच्चाटने मतः ॥ अंते नाम्नामवेंमंत्रे पल्लवो मारणे मतः ॥ सितरक्तपीतमिश्राः कृष्णाश्च
त्राः प्रकीर्तिताः ॥ वर्णतो मंत्रसंयुक्ता देवताः षट्सु कर्मसु ॥ फट्कारं वेदने हूं च फट् विघ्नग्रहपात
ने पुष्टोच्चाटयने न ॥ मंत्राणां ते स्वद्रव्यं च चंदनं रोचनं निरूप ॥ गृह धूमचिताङ्गारो मारणे द्वि
षणे च कृष्णाग्नितैलपिष्टानि धत्तूरे करसः स्मृतः ॥ गृह धूमास्थि कटुकं विषाष्टकमुदीरितं ॥ देव
ताकालमुद्रादीन्सम्यक् ज्ञात्वा विचक्षणः ॥ षट्कर्माणि विधिवत् फलसिद्धये ॥ अथ कुलार्णवे ॥
उच्चाटने वषट् प्रोक्तो हुं फट् डं लश्च मारणे ॥ स्तंभने च नमः प्रोक्तः स्वाहा शांतिके पौष्टिके ॥ होमतर्पण
योः स्वाहा न्यासमूलेन योर्नमः ॥ मंत्रांते योजपेन्मंत्री जपकाले यथास्थितिः ॥ अस्यार्थः ॥ एतानि तत्त
त्कर्मणि जपकाले मंत्रांते योजयित्वा मंत्रं जपेत् ॥ होमादिषु नायं नियमः ॥ इत्याह होमेति केचित् ॥ त
त्रे अग्निकार्ये नदेत्स्वाहा नमः ॥ सर्वत्र चार्चने ॥ शांतिपुष्टिवशाद्व्यापारस्तु ध्याहृते मारणे ॥ स्वधा स्वा
हा वषट् हुं च वौषट् फट्योजयेत्क्रमात् ॥ वश्याकर्षणसंतापे ज्वरे स्वाहा प्रकीर्तितं मतं ॥ क्रोधोपशमने शां
तौ प्रीतौ योज्यं नमो बुधैः ॥ वौषट् संमोहने दीपपुष्टिमृत्युंजयेषु च ॥ वौषड्वाचनेनिरतौ तथा ॥
हुंकारं प्रीतिनाशे च छेदने मारणे तथा ॥ उच्चाटने च विद्वेषे कूरोकरणेव षट् ॥ [illegible] दीपनकार्य्य
पुलाभालाभे वषट् स्मृतं ॥ इति विशेषवचनाद्धोमेप्येवं विधिः ॥ शांतिकादौ पात्रे नियमस्तत्रैव ॥ शां
तिके राजसं ताम्रं [illegible] जपत्रं तु वश्यके ॥ सर्वकार्येषु सौवर्णं क्रूरे स्यात्पैतलकं पुटं ॥ त्रिगंधं शांतिके पा
ले पंचगंधं तु वश्यके ॥ सर्वकार्येष्टगंधं स्यात् क्रूरे चाष्टविषाणि च ॥ शांतिके लेखनी दूर्वा वश्यारो
[illegible] पुष्टिका ॥ हेमासनि कार्याणि क्रूरे स्यात्काकपुच्छिका ॥ गृहे पुंस्यां लिकर्मस्यात् वश्यं च
चैत्रिकागृहे ॥ देवालये च सर्वाणि स्मशाने क्रूरकर्म च ॥ अथ मंत्राणामुदयः ॥ हं डकारो गतिर्न
भिः पुटयोरनयोरपि ॥ तोयस्य पावकस्याद्ध गतिस्तीर्य्यक्ननच स्वलः ॥ गतिर्व्योम्नो मवं मध्ये

भूतानामुदयः स्मृताः ॥ धरणीं रिपवे कुर्यात् स्तंभनं वश्यमाश्रितः ॥ कुंतलिकं पीठे कं कूर्मलोयस्य
समये वसोः ॥ मारणादीनि मरुल्लोचि पक्षोच्चाटनादिकं ॥ क्षेडादिनाशनं शस्त्रमुदये च विहाय सः
भूतानां मंडलानि वक्ष्ये तं दिव्य स्तन्नू षद्दिंडं लांछितं मालेरिश्वनः ॥ त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयु
तं ॥ अंभोजमंत्र सोमस्य मेश्वेलुरस्तं सवज्रकं ॥ लसद्धूलसमानानि मंडलानि विदुर्बुधाः ॥ वर्णैः स्वैरं जि
तान्याहुः स्वस्वनामाष्टलान्यपि ॥ स्वच्छं विपत्र मरुत्ते कल्कोरको चिषदं पयः ॥ पीताभ्रूनि रिसादिप्रयो
गानं लरं कुलाणीवे एकूलक्ष्रंजपेन्मंत्रं ध्यानन्याससमन्वितः ॥ प्रयोगदोषशांत्यर्थं मात्मरक्षार्थ
कारणं ॥ नैवेत्फलं समाप्नोति देवताश्रयमाप्नुयात् ॥ यत्र नष्टास्तं मारणं कर्म कुर्यात् च्चेदमुलं जपे
त् ॥ तस्माय श्वित्रं यरं ॥ अथ मृत वत्सा वंध्या प्रशमन विधिः ॥ अथेदानीं प्रवक्ष्यामि कुक्षिकालंत्र
मुत्तमं ॥ रक्तमातृची चयष्टीवडांकुरो जलकुमारकः ॥ चतुर्विधो वाधकस्यान्मुनिभिः परिकीर्तितः ॥ तेषां
स्वनावं वक्ष्यामि यथाशास्त्रं नितू मयएतेषां सकलं कार्यं जनैः ॥ संतति को रक्ष्ययानिः सारणं स्थाप
नं च यति हानं विद्वेषलः ॥ कर्तव्यं गुरुवाक्येन ज्ञातावागास्त्रस्य लक्षणं ॥ चतुर्विधो बाधकः स्याज्ज्ञा
यते करलु कालतः ॥ व्यथोक्त स्तथा नाने रघं पार्श्वे स्तनेलथा ॥ रक्तमातृप्रदोषेण जायते फल
हीनता ॥ नैत्रे हस्ते न वेलज्वालायो मोवैव विदूषलः ॥ नानासं मुक्तरक्तं च षष्टीदोषणो भवेत् ॥
उदुहे गोगुरलाटे हे रक्तभावो न वेद्धतु ॥ नानेरयो न वेतेश्वलं डांकुरः सलुवाध्वकैः ॥ सश्वलान्न स
गर्भोन्चिस्तुक्ष्मदेहा त्यरक्तता ॥ जलकुमारस्य दोषेण जायते फलहीनता ॥ मासे रवा हृदये चापि ज्वर
लुहीनाम वेघुदि ॥ रक्तमातृप्रदोषेण जायते फलहीनता ॥ मासैकेन भवे घस्या ज्वरलुस्तानेहृयतथा
मलिमारक्तयोनिः स्याः षष्टीलां दूषणं भवेत् ॥ मासत्रये चतुर्थे वा ज्वरलुहीनाम वे च्चदि ॥ कृशां
गा क्रूरयोनिः स्यात् ज्वाला डांकुर दूषणं ॥ सदा कुक्षभवेन्नेत्रे वहुकालं ज्वरलुस्तथा ॥ लुगस्तनीस्व
ल्परक्ता जलकुमारस्य दूषणं ॥ अथ प्रशमन विधिः ॥ त्रिकोणमथ षट्कोणं नवकोणं मंडलाकृतिं ॥

यंत्रानेतानसमालिख्यवाहयेन्मंत्रहर्नकः॥षष्ठिमात्रकयोर्ध्यानं॥गौरांगीद्विभुजोरक्तपुत्रदांचभु
जद्वयां॥ध्यायेत्रिजगतांधात्रींस्तलिशात्यवासिनीं॥अथडांकुरकुमारयोर्ध्यानं॥शुक्लवर्णंद्विबा
हुंचसर्लिशाग्रहसंस्थितं॥स्त्रीरजःपापिनेशांलंचजेत्तत्रिभुवनेश्वरं॥षोडशोत्तरपञ्चाशैस्तूपजये
त्रिदिनावधि॥स्वर्णरौप्यताम्रादिपट्टवस्त्रादिभूषणैः॥अष्टोत्तरशतंमंत्रंसहस्रंवापिजेद्वा॥
एवंपूजादिकंकृत्वाबलिंदद्याद्विचक्षणः॥बलिंतुत्रिविधंदद्यात्स्वर्णंजलंचरंतथा॥बलिंद
त्वाप्रयत्नेनभक्षयेदोषधंशुचिः॥ॐमायातथालक्ष्मीहुंफट्स्वाहांतिकोमनुः॥जपेदष्टोत्तरश
तेरक्तामाद्रींविधिंविदुः॥तारंकामबीजयुग्मंफट्स्वाहांतोमनुर्मतः॥मंत्रोयंषष्ठिकादेव्याःपुत्र
सिद्धिप्रदायकः॥ॐक्लूंवाग्विमलाबीजयुग्मंदेविवजयोगिनीमनुः॥स्वाहांतोयंमहामंत्रोडांकु
रस्यनैर्जपेत्॥तारंरत्नापरज्जेलिहत्तायतरंनंतरं॥स्वाहांतोयंमनुर्देविजलकुमारस्य
निश्चितं॥स्नानेशालेसमुपत्रेदेयमौषधमुत्तमं॥रक्तकापीषेमूलंचनागेशानालथैवच॥
विटकृतापार्श्वमूलंचमरीचेनसमन्वितम्॥देयंदिनत्रयंयावदृशुचिस्याद्वृंगणा॥स्नाना
परिचुशालयोनार्त्ताक्याःकोटमुत्तमं॥एकविंशतिदिनेमृयावलदुग्धेनविमिश्रितं॥मूलंचलाम्र
लगत्रीशकूवध्यात्तथैवच॥पुत्रहीनाचवंध्याचपंचवंध्याप्रकीर्तिता॥संहरेत्सर्वदोषांश्चमथो
नक्षणमुत्तमं॥नाडीशुक्रायांस्त्रियाथामपरस्तलुवालेमिदमौषधंदेयं॥अश्वगंधावटीच्यालोमूलं
लक्षणमूलकं॥नक्षयेत्प्रमराज्ञाणिदुग्धंपिबेत्पुनःपुनः॥अवश्यंसंलतिलस्याःपुंहीनागर्भपो
रिणी॥इतिकुब्जिकातंत्रेभैरवभैरवीसंवादेवंध्याप्रशमनविधिः॥अथपुंवंध्याप्रशमनविधिः
जेजमूलीशालमूलीमिकुष्मांडमेवच॥अश्वगंधाचगोधूमःशाल्मलेःकुटजंतथा॥गोक्षरवी
नरीबीजंसम्यगानीयसाधकः॥कोकिलाक्षीचकाकोलीसमभागंत्रिभिःफलैः॥एतन्मामहिषेसं
पश्चिमोदकंशर्करायुतं॥माक्षिकेनसमायुक्तंगंधद्रव्यसमन्वितं॥मोदकंसम्मदनामपुंवंध्या
त्वविनाशनं॥अनुपानंघृतंदुग्धंपक्षिणोमांसभक्षणं॥क्षीणशुक्रोप्यशुक्रश्चमंददृष्टिस्तथै

वन्त॥ बलहीनोक्षीणदेहो वराकः पापव्याकुलः॥ वहुदारश्च वद्धश्च कन्यासंततिरेव च॥ नक्षये दोष
धं मासैरष्टौ पिलरएणायेत॥ इति श्रीभैरवीतंत्रे पुंवश्याप्रश्नमनो नाम विधिः॥ अथ स्त्रीपुंसोः शु
द्धिः सार्द्रहस्तपरिमितां वेदिं कृत्वा तत्र कूर्मपृष्ठं संस्थाप्य तदुपरि सिंदूरेण कूर्मं निधाय तत्र
ह्रूं ॐ ह्रूं इति वीजत्रयं लिखित्वा तत्र स्त्रियं पूर्वाभिमुखीं संस्थाप्य चतुर्दिक्षु कोडान चतुरः॥
समारोप्य सप्तधा सूत्रेण वेष्टयित्वा हुं इति श्वेतसर्षपै रक्षां विधाय पञ्चगव्यादिभिः॥ ॐ ह्रीं इ
ति गोमूत्रेण क्रौं इति गोमयेन ॐ इति डाधेन हं इति दधान इं इति दधा
कामिति कुशोदकेन तत्पुष्पजलेन च पंचरत्नधान्यौषधकेन दूर्वायाः पुनः सर्वमिश्रीकृत्य ॐ ह्रीं ह्रीं
इति मंत्रेण सहस्रधारया स्नापयेत्॥ ततस्तां स्त्रियं स्यानांतरे नीलां परिधापयित्वा पूर्वाभिमुखीं
होत्वा पंचगव्यं पाययेत्॥ एतदनंतरं सा औषधं पिवेत् ततो रक्तनारिकेलमादाय तत्र सिंदूरेण
ॐ ह्रीं ह्रीं इति वीजत्रयं लिखित्वा तस्याः क्रोडे स्थापयेत्॥ द्वादशदिनं यावत्॥ इति स्त्रीपुंसोः शुद्धिः
प्रयोगः समाप्तः॥ अथ स्तवकवचानि निरूप्यंते॥ वाराहीतंत्रे जप्यादोषप्रणवं यश्च स्तोत्रं वा संहि
तां पठेत्॥ अंते च प्रणवं दद्यादित्युवाचादिपूरुषः॥ एवं सर्वत्र विज्ञेयमन्यथा विफलं भवेत्॥ त्रि
पुरातंत्रे तु प्रथमं कवचं पश्चात् स्तोत्रं ततो रहस्यं हरिहस्तमासवे पठेत्साधकसत्तमः॥ अथ भु
वनेश्वरीकवचं॥ देव्युवाच॥ भुवनेशस्याश्च देवेश या या विद्याः प्रकाशिताः॥ श्रुताश्चाधिगताः सर्वा श्रो
तुमिच्छामि सांप्रतं॥ १॥ त्रैलोक्यमंगलं नाम कवचं यत्पुरोदितं॥ ईश्वर उवाच॥ पार्वति शृणु वक्ष्या
मि सावधानावधारय॥ त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहं॥ सिद्धिविद्यामयं देवि सर्वैश्वर्यप्र
दायकं॥ ३॥ पठनाद्धारणान्मर्त्यः त्रैलोक्यैश्वर्यवान् भवेत्॥ त्रैलोक्यमंगलस्यास्य कवचस्य ऋषिः
शिवः॥ ४॥ छंदो विराट् जगद्धात्री देवता भुवनेश्वरी॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः॥ ५॥
ह्रीं वीजं मे शिरः पातु भुवनेशी ललाटकं॥ ऐं पातु दक्षनेत्रं मे ह्रीं पातु वाम लोचनं॥ ६॥ ह्रीं श्रीं पातु द

क्ष कूलं मेत्रिवर्णात्मा महेश्वरी॥ वाम कर्णं सदा पातु ऐं घ्राणं पातु मे सदा॥७॥ ह्रीं पातु वदनं देवी ऐं पातु र
सज्ञां मम॥ वाक् त्रिपुटा त्रिवर्णात्मा कंठं पातु परांबिका॥८॥ श्रीं स्कंधौ पातु नितयं ह्रीं भुजौ पातु सर्वदा॥ क्लीं करौ
त्रिपुरेशानी त्रिपुरैश्वर्यदायिनी॥९॥ ॐ पातु हृदयं ह्रीं मध्यदेशं सदावतु॥ क्रौं पातु नाभिदेशं सा त्र्यक्ष
री भुवनेश्वरी॥१०॥ सर्वबीजं सदा पृष्ठं पातु सर्ववशंकरी॥ ह्रीं पातु गुह्यदेशं मे नमो भगवती कटिं॥११॥ माहे
श्वरी सदा पातु शंखिनी जानुयुग्मकं॥ अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयं॥१२॥ सप्तदशाक्षरी याभ्यो
न्नपूर्णात्मिका परं॥ तारं माया रमा काम षोडशार्णा ततः परं॥१३॥ शिरस्था सर्वदा पातु विंशत्यर्णात्मि
का परा॥ तारं दुर्गे युगं रक्ष स्वाहेति च दशाक्षरी॥१४॥ जयदुर्गा घनश्यामा पातु मां पूर्वतो मुदा॥ माया
बीजादिका चैषा दशार्णा च तथा परा॥१५॥ उत्तप्त कांचनाभासा जयदुर्गानलेवतु॥ तारं ह्रीं दुं दुर्गायै नमोऽष्टा
र्णात्मिका परा॥१६॥ शंखचक्र धनुर्बाण धरा मां दक्षिणेवतु॥ महिषमर्दिनी स्वाहा वसुवर्णात्मिका परा
॥१७॥ नैरृत्यां सर्वदा पातु महिषासुरनाशिनी॥ माया पद्मावती स्वाहा सप्तार्णा परिकीर्तिता
॥ पद्मावती पद्मसंस्था पश्चिमे मां सदावतु॥ पाशांकुशपुरा माया हि परमेश्वरी स्वाहा॥१९॥ त्रयोदशार्णा तारा द्या सा श्वा
रूढा निलेवतु॥ सरस्वती पंचशरा नित्य क्लिन्ने मदद्रवे॥२०॥ स्वाहा रव्यक्षरी विद्या मामुत्तरे सदावतु॥
तारं माया च कवचं खे रक्ष च सततो बुधः॥२१॥ हूं क्षें ह्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा॥ त्वरिता
ष्टाभिरिभिः पायाच्छिवकोणे सदा च मां॥२२॥ ऐं क्लीं सौः सततं बाला मामूर्ध्वदेशतो वतु॥ बिंद्वंता भै
रवी बाला भूमौ मां सर्वदावतु॥२३॥ इति ते कथितं पुण्यं त्रैलोक्यमंगलं परं॥ सारात्सारतरं पुण्यं म
हाविद्यौघविग्रहं॥२४॥ अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः॥ इंद्राद्याः सकला देवा धारणात्प
ठनाच्चतः॥२५॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पृथ
क् पृथक्॥२६॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात्॥ प्रीतिमन्योन्यतः कृत्वा कमला निश्च
ला गृहे॥२७॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः॥ यो धारयति पुण्यात्मा त्रैलोक्यमंगलाभिधं॥२८

कृत्स्नं परमं पुण्यं सोऽपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो नूनं त्वत्त्रैलोक्यविजयी भवेत् ॥ २९ ॥ पुत्रपौत्रादिसंलोकाहो नारी वा मनुजेऽथवा ॥ बहुपुत्रवती नूनं वन्ध्यापि लभते सुतं ॥ ३० ॥ ब्रह्मास्त्रादीनि शस्त्राणि नैव लेलिहति तत्तनुं ॥ ऐन्द्रं च वैभवं शान्तं योऽर्चयेद्भुवनेश्वरीम् ॥ ३१ ॥ दारिद्र्यं परमं प्राप्य सोऽचिरान्नष्टरूपमाप्नुयात् ॥ इति रुद्रयामले देवीश्वरसंवादे त्रैलोक्यमंगलं नाम भुवनेश्वरीकवचं समाप्तम् ॥

अथ भुवनेश्वरीस्तवः ॥ अथानंदमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीं ॥ ईडे सकलसंपत्त्यै जगत्कारणमंबिकां ॥ १ ॥ आद्यामशेषजननीमरविंदयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीं ॥ सृष्टिस्थितिक्षयकरीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाम्यहमंबिके त्वां ॥ पृथ्व्या जलेन शिखिना मरुतांबरेण होत्रेंदुना दिनकरेण च मूर्तिभाजः ॥ देवस्य मन्मथरिपोरपि शक्तिमत्ताहेतुस्त्वमेव खलु पर्वतराजपुत्रि ॥ त्रिस्रोतसः सकलदेवसमर्चितायाः वैशिष्ट्यकारणमवैमि तदेव मातः ॥ त्वत्पादपंकजपरागपवित्रितासु शंभोर्जटासु सततं परिवर्त्तनं यत् ॥ आनंदयेत्कुमुदिनीमधिपः कलानां नान्यामिनः कमलिनीमथ नेतरां वा ॥ एकस्य मोदनविधौ परमेकमीष्टे त्वं तु प्रपंचमभिनंदयसि स्वदृष्ट्या ॥ आद्याप्यशेषजगतां नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि ॥ त्रय्याः प्रसूरपि तया न समीक्षितासि ध्येयासि गौरि मनसो न पथि स्थितासि ॥ आसाद्य जन्म मनुजेषु चिराद्दुरापं तत्रापि पाटवमवाप्य निजेंद्रियाणां ॥ नाभ्यर्च्चयंति जगतां जनयित्रि ये त्वां निश्श्रेणिकाग्रमधिरुह्य पुनः पतंति ॥ कर्पूरचूर्णहिमवारिविलोडितेन ये चंदनेन कुसुमैश्च सुजातगंधैः ॥ आराधयंति हि भवानि समुत्सुकास्त्वां ते खल्वशेषभुवनाधिपताः प्रथंते ॥ आविश्य मध्यपदवीं प्रथमे सरोजे सुप्ताहिराजसदृशी विरचय्य विश्वं ॥ विद्युल्लतावलयविभ्रममुद्वहंती पद्मानि पंच विदलय्य समश्नुवाना ॥ तन्निर्गलामृतरसैरभिषिच्य गात्रं मार्गेण तेन विलयं पुनरप्यवाप्ता ॥ येषां हृदि स्फुरसि जातु न ते भवेयुर्मातर्महेश्वरकुटुंबिनि गर्भभाजः ॥ आलंबिकुंडलभरामभिरामवक्त्रामापीवरस्तनतटीं तनुवृत्तमध्यां ॥ चिंतोऽक्षसूत्रक

लसाक्लिखिताग्रहस्तामावर्त्तयाभिमनसा लवगैरिमर्त्तिं ॥ आस्थाय योगमवजित्य च वैरिषट्
कमावध्य चेन्द्रियगणं मनसि प्रसन्ने ॥ पाशांकुशाभयवराघकरांस्फवरक्तमालोकयंति भुवनेश्वरि यो
गिनस्त्वां ॥ उत्तप्तहाटकनिभा करिभिश्च लुभिरावर्जिताम्लघटैरभिषिच्यमाना हस्तद्वयेन नलिनेर
चिरेव हंती ॥ पुष्पापिसाभयवराभवलितंवमेव ॥ अष्टाभिरग्र्यविविधायुधवाहिनीभिर्दोर्वल्लरीभिर
धिरूढ्यम्रगाधिराजं ॥ दूर्वादलद्युतिरमर्त्यविपक्षअक्षालक्ष्मीकुर्वतींत्वमसिदेविभवानि दुर्गे ॥ आ
विर्निदाघजलशीकरशोभिवक्त्रां गुंजागलेनपरिकल्पितहारयष्टिं ॥ यत्रांशुकाममसिलकांलिमनंगत
त्रीं ॥ भाग्यौपुलिंदललनागणी मसलत्स्मराभिहंसे गलितघूर्णितलत्पुरद्वरदृष्टौ ॥ म्लत्तीरिवामवच्चनैरनुग
म्यमानौ यस्ताभिवाद्दमुखलरसजालनालौ ॥ श्रीकंठपत्रिद्वारसविदधेलवंप्रीहाभ्यासमीक्षितुम
लक्षिमलेवहाभ्यामुपाघभालेनयूनं ध्वपंकेजलेन ॥ सांद्रानुरागलरलेन निरीक्षमाणा घवन्ने अपि च
वानिलवानेजोस्मिहरस्मराभि ॥ जितिहात्क्लिकरावलेयो वेषोनमादवलयापरिन्तलरंजो ॥ श्रोणीन
रस्यस्कहवौपरि कल्पदतो संभाविरांव पसालवमध्यमेन ॥ श्रोन्यौस्तनौ न युगपत्प्रथयिष्यतो मे
र्वोल्यातपरेणनयसापरिकष्टसारः ॥ लोमावलीविलसितनविभात्यमूर्त्तिर्मध्यस्तवस्फुरलुमेहदय
स्यमध्ये ॥ साक्षाल्लसमरस्यहरनेत्रहुलाशाभ्रीरोलावण्यवारिभरितेन वयोवनेन ॥ आपाघदत्तमिव
पल्लवमप्रध्टव्यं ॥ नाभिकदोपि लवदेविन विस्मरेयं इक्षोपिगृहं पिशुनं नसितं दधाने कास्मीरकर्दम
मवस्त्रनपंकजेलेपाल्लोसिलस्यकरिणः क्षणलक्षपेणो ॥ सिंदूरितोस्मरयतः समदस्य कुंभो कंठालिरिक्तांग
लउज्वलमौलिधारकोनौ ॥ भुजौ निजरियोर्म्मकरध्वजेनं ॥ कंठाग्रहारपरविलोलितदीर्घपाणिभाज
मम स्खलितपथं न विलंघयेतां ॥ नासायलंरचितं कुंभविलासचौर्य्यं त्वमानरेणविविधेनविराजमानं ॥
कंठं मनोहरगुलं गिरिराजकन्ये संचिंतयत्रविमुपयाभिकृपापिनाहं ॥ आयतलाक्षमभिजातललाटप
हं मंदस्मितेनदरफुल्लकपोलरेखं ॥ विंबाधरप्रवरदन्तमुन्नलदीर्घनासं यस्तेस्मरत्यसमरूपलवंसमए
वजासेः ॥

। आविस्कृषारकरले खमनस्पगंधंपुष्पापरिभ्रमदलिव्रजनिर्विनोषं॥ यश्चेतसाकलयते तव केशपाशंतस्य स्वयंगलति देविपुराणपाशः॥ अतिसुचरितपाकं धीमतांस्तोत्रमेतत्पठतियइह मर्त्योनित्यमार्द्रांतरात्मा॥ सभवतिपदसंचैः संपदांपादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय॥ इति भुवनेश्वरीस्तवः॥ अथोत्त रणीकवचं॥ देव्युवाच॥ कथिताश्चोत्तरणीयायाविद्याः सुदुर्लभाः॥ रूपयाकथिताः सर्वाभक्ताश्चाधिगता मया॥ सांप्रतं श्रोतुमिच्छामिकवचं मंत्रविग्रहं॥१॥ ईश्वर उवाच॥ शृणुपार्वतिवक्ष्यामिसावधानावधार य॥ ब्रह्मविद्यास्वरूपं च महदैश्वर्यदायकं॥२॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यमाप्नुयात्॥ त्रैलोक्यरक्ष णस्यास्य कवचस्य ऋषिः शिवः॥३॥ छंदोविराट् देवता च भुवनेशी(?) सर्वार्थसिद्धिदा॥ धर्मार्थकाममोक्षेषु विनि योगः प्रकीर्तितः॥४॥ ह्रीं नमो भगवत्यं ते माहेश्वरिपदं ततः॥ अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी ॥५॥ पातु मामन्नपूर्णा स्यात्या(?)ख्याता भुवनत्रये॥ विमायाप्रणवाद्यैषा तथा सप्तदशाक्षरी॥६॥ पातु अन्न पूर्णा सर्वांगं रत्नकुंभान्नपात्रदा॥ श्रीबीजाद्या तथा चैषा द्विरष्टार्णा तथास्तु वः॥७॥ प्रणवाद्यान्नपूर्णा पा तु कंठं वाग्बीजपूर्विका॥ कामबीजादिका चैषा हृदयं वोदरं मम॥८॥ तारं ह्रीं श्रीं नमो ते च भगवति पदं त तः॥ माहेश्वरिपदं चान्नपूर्णे स्वाहेति पातु मे॥९॥ कोणोविंशाक्षराया(?)याया माहेश्वरी ततः॥ तारं मायारमाकामः षोडशार्णा ततः परं॥१०॥ जंघे सर्वे सदा पातु विंशत्यर्णातिमात्रया॥ अन्नपूर्णा महाविद्या ह्रींपातु भुवने शी सदा पातु रमा कामो सर्वं तथा॥ ह्रीं मायालुप्त(?) वेवविद्धि कोणे न लोवलु॥१३॥ यमो मां दक्षिणे पातु नैरृ त्यां निरृतिश्च मां॥ पश्चिमे वरुणः पातु वायव्यां पवनो वतु॥१४॥ कुबेरश्चोत्तरे पातु मामैशान्यां शिवो वतु ऊर्ध्वाधः सततं पातु ब्रह्मानंतो यथाक्रमात्॥१५॥ वज्राद्यायुधाः पातु दशदिक्षु यथाक्रमात्॥ इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परं॥१६॥ यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयु॥ ब्रह्मा विष्णुश्च रुद्र श्च पठनाद्धारणाद्यतः॥१७॥

स्ट जयवति हं तिंन्न कृत्यैन कृत्ये पठथ कृ पठथ कृ॥ पुण्यांजन्त्यष्टकं देव्यै मन्त्रे लै व पठेन्नरः॥१०॥ युगायुत
कृतायोस्तु प्रजायाः फलमाप्नुयात्॥ चोन्वत्यैरहिता लक्ष्मीः पुत्रपौत्रान्विचिस्थिरा॥ वाणीवक्त्रे वसेत्त
स्य सत्यं सत्यं न संशयः॥ अष्टोत्तरशतं चास्य पुरश्चर्याविधिः स्मृतः॥ भूर्जे विलिख्य गुलिकां स्वर्ण
स्थां धारयेद्यदि॥ कंठे वा दक्षिणे बाहौ सोपि सर्वं तमोमयः॥११॥ अन्नास्त्वादीनि दूष्याणि लग्नरात्रं
प्राप्य पावेति॥ मात्यारिकुस्कमान्मेव भवं येव न संशयः॥ इति भैरवतंत्रे अन्नपूर्णाकवचं॥ अथान्न
पूर्णास्तोत्रं॥ नमः कल्याणदे देवि नमः शंकरवल्लभे॥ नमो भक्तप्रिये देवि अन्नपूर्णे नमोस्तुते॥१॥
नमो मायागृहीतांगी नमः शंकरवल्लभे॥ माहेश्वरि नमस्तुभ्यं अन्नपूर्णे नमोस्तुते॥२॥ महामाये शि
वधर्मपत्निरूपे हरिप्रिये॥ वांछादात्रि सुरेशानि अन्नपूर्णे नमोस्तुते॥३॥ प्रोद्यत्सूर्यसहस्राभे ने
त्रत्रयभूषिते॥ चंद्रचूडे महादेवि अन्नपूर्णे नमोस्तुते॥४॥ विचित्रवसने देवि अन्नदाने सदानघे
शिवनृत्यकृतामोदे अन्नपूर्णे नमोस्तुते॥ साधकाभीष्टदे देवि भवदुःखविनाशिनि॥ कुचभारनते दे
वि अन्नपूर्णे नमोस्तुते॥६॥ षट्कोणमध्यपत्रस्थे षडंगयुवतीमये॥ ब्रह्माण्यादिस्वरूपे च अन्न०॥७॥
देवि चंद्रकृतापीडे सर्वसाम्राज्यदायिनि॥ सर्वानंदकरे देवि अन्न०॥८॥ इंद्राद्यर्चितपादाब्जे रुद्रादिरू
पधारिणि॥ सर्वसंपत्प्रदे देवि अन्नपूर्णे०॥९॥ पूजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः॥ तस्य गेहे स्थि
रा लक्ष्मीर्जायते नात्र संशयः॥१०॥ प्रातःकाले पठेद्यस्तु मंत्रजापपुरःसरः॥ तस्य चान्नसमृद्धिः स्या
द्वर्द्धमाना दिने दिने॥११॥ यस्मै कस्मै न प्रकाश्यं कदाचन॥ प्रकाशनात्कार्यहानिः स्यात्तस्माद्यत्ने
न गोपयेत्॥ इत्यन्नपूर्णास्तोत्रं॥ अथ त्रिपुराकवचं॥ श्रीदेव्युवाच॥ भगवन्सर्वधर्मज्ञ सर्वशा
स्त्रार्थपारग॥ त्रिशक्तिरूपलक्ष्याश्च कवचं यत्प्रकाशितं॥१॥ सर्वार्थसाधनं नाम कथयस्व मयि प्र
भो॥ ईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतं॥२॥ सर्वार्थसाधनं नाम त्रैलोक्ये चातिदु
र्लभं॥ सर्वसिद्धिमयं देवि सर्वैश्वर्यप्रदायकं॥३॥ पठनाच्छ्रवणान्मर्त्यः त्रैलोक्यैश्वर्यवान्भवेत्

सर्वार्थसाधनस्यास्य कवचस्य ऋषिः शिवः ॥ छंदो विराट् त्रिशक्तिरूपा जगद्धात्री च देवता ॥ धर्म्मार्थका
म मोक्षेषु विनियोगः प्रकीर्तितः ॥१॥ श्रीं बीजं मे शिरः पातु लक्ष्मीरूपा ललाटकं ॥ ह्रीं पातु दक्षनेत्रं मे
वामनेत्रं सुरेश्वरि ॥ क्लीं पातु दक्षकर्णं मे वामं कामेश्वरि तथा ॥ लक्ष्मी घ्राणं सदा पातु वदनं पातु केश
वः ॥७॥ गौरी तु दशनं पातु कंठं पातु महेश्वरः ॥ कटिदेशं रतिः पातु भुजौ तु मकरध्वजः ॥८॥ शं
खनिधिः करौ पातु पार्श्वकः पद्मनिधिः सदा ॥ ब्राह्मी मध्यं सदा पातु नाभिं पातु महेश्वरी ॥९॥ कौ
मारी पृष्ठदेशं मे गुह्यं रक्षतु वैष्णवी ॥ वाराही स्त्रिक्षिणी पातु ऐंद्री पातु पदद्वयं ॥१०॥ भार्यां रक्षतु चा
मुंडा लक्ष्मी रक्षतु पुत्रकान् ॥ इंद्रः पूर्वे सदा पातु आग्नेय्यामग्निदेवता ॥११॥ याम्ये यमः सदा पातु नै
रृत्यां निरृतिश्च मां ॥ पश्चिमे वरुणः पातु वायव्यां वायुदेवता ॥१२॥ सौम्ये सोमः सदा पातु ऐशान्यां
मीश्वरो वतु ॥ ऊर्द्ध्वं प्रजापतिः पातु अधस्तादनंतदेवता ॥१३॥ राजद्वारे श्मशाने च अरण्ये प्रांतरे त
था ॥ जले स्थले चांतरीक्षे शत्रूणां निचये तथा ॥ एताभिः सहिता देवि त्रिबीजात्मा महेश्वरी ॥ त्रि
शक्तिश्च महालक्ष्मीः सर्वत्र मां सदावतु ॥१५॥ इति ते कथितं देवि सारात्सारतरं परं ॥ सर्वार्थ
साधनं नाम कवचं परमाद्भुतं ॥१६॥ अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः ॥ इंद्राद्याः सकला
देवा धारणात्पठनाद्यतः ॥१७॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः ॥ पुष्पांजल्यष्टकं द
त्वा मूलेनैव पठेत्सकृत् ॥१८॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ प्रीतिमन्योन्यतः
कृत्वा कमला निश्चला गृहे ॥१९॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥ यो धारयति पुण्या
त्मा सर्वार्थसाधनाभिधं ॥२०॥ कवचं परमं पुण्यं सोपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भूत्वा त्रै
लोक्यविजयी भवेत् ॥२१॥ पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ॥ बहुपुत्रवती भूत्वा वंध्या
पि लभते सुतं ॥२२॥ ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनं ॥ एतत्कवचमज्ञात्वा यो जपे
द्भुवनेश्वरीं ॥२३॥ दारिद्र्यं परमं प्राप्य सोचिरान्मृत्युमाप्नुयात् ॥ इति श्रीरुद्रयामले तंत्रे

ज्ञात्वा सर्वार्थसाधनं नाम कवचं समाप्तं ॥ अथ त्रिपुरास्तवः ॥ वराभीतिहस्तां द्विबाहुं प्रसन्नां प्रका-
शास्वरूपं प्रियां वं स्वप्रसन्नां ॥ स्वबुद्ध्या सदा पविष्टप्रसन्नास्य पद्मं द्विरेफप्रभं च ध्येय गुरुं जो व यामि ॥ १ ॥ वकं
वह्निसंस्थं त्रिमूर्त्या प्रसन्ने शशांकेन युक्तं लवाद्यं स्वबीजं ॥ स्ववर्णप्रमेये जपं लिप्सितो त्रिमूर्त्ताङ्कभक्तिर्ययेसो
भगत्वं लभन्ते तेन नमस्ते ॥ २ ॥ न भोगाय मित्रं ललोवाम नेत्रं स्फुरद्धारविंदं नियोज्यैव युक्तं ॥ द्वितीयं
स्वबीजं स्फुरच्छ्रोणिवंसं तदीयं विभाव्यापि यं प्राप्नुवंति ॥ ३ ॥ विरिंचिं च दिरातिरं च लतो वाम नेत्रं विधुं ना-
द युक्तं हि नेहा नवबीजं ॥ विभाव्यैव संमोहयं लिप्त्रि लोकबीजयारीश्वरीत्वं लभंते न रे ज्ञाः ॥ ४ ॥ नमामि
त्वत्रियोज्यस्मरामि प्रियेयेत्रिसंध्यं जपं लिख्यदंगं विभाव्य ॥ न लेपो विपुर्यां कुप्रयोगं करोति स्मरास्तंग-
णा नागेहे श्रीस्थलेषां ॥ ५ ॥ मुखे भारती मघपघ प्रवं वामहिसंति हिंसाः स्फुरा स्लाम्न मन्ति ॥ तदंघ्रिद्व-
यं पद्मलेमूर्द्धि राज्ञां करे सिद्धयो दुर्गहा स्तस्य जाते ॥ ६ ॥ वने पादिजो तद्गुमानां पथिव्यां स्फुरद्रत्न-
यां मणिप्र हगेहे ॥ स्मरे हृदि कान्तां लसद्धंद्वसिंहासने पद्मपत्रार्धसं विचिंत्य ॥ ७ ॥ स्फुरत्कांतिका-
यां परं योनियुग्मं लसंद्लगीता मुखे हेमपत्रांतां ॥ लसत्कुंडलांभिंदुवक्त्रां त्रिनेत्रां स्फुरत्कंचुकाङ्गां स्फुरद्वक्षोजन-
म्रां ॥ ८ ॥ मतार्द्धनवेज्यो लसद्धाहुदंडैः स्फुरत्पद्मयं पाशकंका म्युकंच ॥ स्ववर्णाक्षरांपुष्पवाणार्द्रचाने-
क्षेहद्वन्नवंसासकमध्यां स्फुरत्कांचीमू ॥ ९ ॥ तुलाकोटिरम्यां स्फुरत्पादपद्मां किरीटाद्यलंकारसंयुक्तां प्रसन्नां
सिले चामरे दर्पणांतलरंडं संमुखं सखीभिः परिसर्पद्धटलालितां ॥ १० ॥ त्रिलोकीविधात्री जगत्तापहंत्री जग-
द्धोममत्री जगत्मोहपुत्री ॥ सदानंदपूर्णां हकाराद्धवर्णां बिंदुःस्वरूपां त्रिमूर्त्तिं भजामि ॥ ११ ॥ चिरं
चिंतयीत्वा यदेतत्स्वरूपां पुरोयंत्रमध्ये समावाघजस्त्या ॥ स्वयं मन्त्र पत्तनारिजिः प्रजयित्वा च तत्तु-
र्वर्गसिद्धिं लभन्ते लपामरोपि ॥ १२ ॥ श्रियं श्रीपतीं पार्वतीमीश्वरं च रतिं कामदेवं षडंगेन सार्द्धं ॥
स्वयोनो लथा मंत्रयुक्ता भवानी क्रमात्तज्जयित्वा नरेंद्रो भवेत्सः ॥ १३ ॥ निषिद्धे च पार्श्वद्वये सं-
विभाव्य प्रहृज्यामहिष्यस्तलोलोकपालाः ॥ तदंस्त्राणि तन्नारदेताग्नेप्रहृज्य भवस्यास्तसिद्धि

तनेभ्यानवोपि॥१४॥ क्षितिस्त्वं विधाता जगतः स्थितिकर्त्री त्वमाद्यो पि विष्णुर्जगत्पालिका च॥ त्वम
ग्निरुद्रो जगद्भक्षाणकर्त्री त्वमेश्वर्ययुक्ता जगद्दीप्युरूपा॥१५॥ त्वमात्मा हि यज्ञा मुक्तो लेशार एयेज
गद्व्यलरं प्रसेदा व भ्रमा सि निरा धारगम्या नवस्येक पुण्यात्समाकारा कल्याणवाणी प्रसीद १६
नवीन मौधिमध्ये निपात्यैवसर्वं स्वनीनाच गर्वं स्वस्वर्वं करोसि॥ अतस्त्वां न जाने चिदानंदरूपे प्रका
शस्वरूपे भवानी प्रसीदः॥१७॥ जपित्वा भवत्याजनो मंत्र चेतापरित्वेक लक्षं कवित्वं करोति॥ विचि
त्यस्वरूपे तदीयं त्रिलोक्यात लभेतदुर्लभं तं भवानी प्रसीदः॥१८॥ त्वमाधार शक्तिस्त्वमाद्यपरपा जग
द्व्यापिकात्वं जगद्व्याप्यरूपा॥ अजावस्त्वमेवोगुणातीतरूपोतमेया सि मायासो भवानि प्रसीद॥१९॥ अ
चुस्त्वं विभुस्त्वं त्वमेवासि विश्वस्तुतिः का भवत्या जगत्यां विजोति॥ तथापि त्वदीपा गुणामां दिशांति स्तुतिंक
र्तुमेवं भवानि प्रसीद॥२०॥ इदं स्तोत्रमत्यंतप्रसंतरायेपठंति त्रिसंध्यं कुकाले जपित्वो न तेषां मसा
ध्यं त्रिलोकी जनानां तत्र तेस्वरूपं च वानि प्रसीद॥२१॥ इति त्रिपुरास्तोत्रं समाप्तं॥ अथ दुर्गाकवचं॥
ईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदं॥ पठित्वा धारयित्वा च नरो मुच्येत संकटात्॥
अज्ञात्वा कवचं देवि दुर्गामंत्रं च यो जपेत्॥ सप्राप्नोति फलं तस्य परे च नरकं व्रजेत्॥ इदं गुह्यतमं देवि क
वचं तव कथ्यते॥ गोपनीयं प्रयत्नेन सावधानाव धारय॥ उमा देवी शिरः पातु ललाटं शूलधारि
णी॥ चक्षुषी खेचरी पातु कर्णौ चित्वरवासिनी॥ सुगंधा नासिकां पातु वदनं सर्वसाधिनी॥ जिह्वां च
चंडिका देवी ग्रीवां सौभद्रिका तथा॥ अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी॥ कंठं पातु महावाणी
जगन्माता स्तनद्वयं॥ हृदयं ललितादेवी उदरं सिंहवाहिनी॥ कटिं भगवती देवी द्वावुरू विंध्यवासि
नी॥ महाबलाजंघे द्वे पादौ भूतलवासिनी॥ एवं स्थितासि देवि त्वं त्रैलोक्यरक्षणात्मिके॥ रक्ष मां स
र्वगात्रेषु दुर्गे देवि नमोस्तु ते॥ इदं तत्कवचं देवि महाविद्याफलप्रदं॥ यः पठेत् तत्र स्थाय सर्वतीर्थ
फलं लभेत्॥ योन्यसेत्कवचं देहे तस्य विघ्नं न कुत्रचित्॥ भूत प्रेत पिशाचेभ्यो भयं तस्य न विद्यते॥

रणे राजकुले वादे सर्वत्र विजयी भवेत् ॥ सर्वत्र पूजामाप्नोति देवीपुत्र इव क्षितौ ॥ इति कुब्जिकातं
त्रे दुर्गाकवचं ॥ अथ दुर्गामंगलनामस्तोत्रं ॥ ईश्वर उवाच ॥ मंगलनाम प्रवक्ष्यामि शृणुष्व कमलान
ने ॥ यस्य प्रसादमात्रेण दुर्गा प्रीता भवेत्सती ॥ ॐ सती साध्वी भवप्रीता भवानी भवमोचिनी ॥ आर्या
दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी ॥ पिनाकधारिणी चित्रा चंडघंटा महातपा ॥ मनोबुद्धिरहं
कारा चित्ररूपा चिता चितिः ॥ सर्वमंत्रमयी सत्या सत्यानंदस्वरूपिणी ॥ अनंता भाविनी भाव्या भव्या
भाव्या सदागतिः ॥ शांभवी देवमाता च चिंता रत्नप्रिया सदा ॥ सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी
अपर्णानेकवर्णा च पाटला पाटलावती ॥ पट्टांबरपरीधाना कलमंजीररंजिनी ॥ अमेयविक्रमा क्रूरा
सुंदरी पुरसुंदरी ॥ वनदुर्गा च मातंगी मतंगमुनिपूजिता ॥ ब्राह्मी माहेश्वरी चैंद्री कौमारी वैष्णवी तथा
चामुंडा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा च बुद्धिदा ॥ बहुला ब
हुलप्रेमा सर्ववाहनवाहना ॥ निशुंभशुंभहननी महिषासुरमर्दिनी ॥ मधुकैटभहंत्री च चंडमुंडवि
नाशिनी ॥ सर्वासुरविनाशा च सर्वदानवघातिनी ॥ सर्वशास्त्रमयी सत्या सर्वास्त्रधारिणी तथा ॥
अनेकशस्त्रहस्ता च अनेकास्त्रस्य धारिणी ॥ कुमारी चैव ब्राह्मी च कैशोरी युवती यतिः ॥ अप्रौढा
चैव प्रौढा च वृद्धमाता बलप्रदा ॥ य इदं पठते नित्यं दुर्गानाममंगलाष्टकं ॥ नासौ दुःखं विपद्यते रिपुत्रिषु
लोकेषु पार्वति ॥ धनं धान्यं सुतं जायां हयं हस्तिनमेव च ॥ चतुर्वर्गं तथा चांते लभेन्मुक्तिं च शाश्वतीं ॥
पूजयेत्परया भक्त्या पठन्नाममंगलाष्टकं ॥ तस्य सिद्धिर्भवेद्देवि सर्वैः श्वर्यवरैरपि ॥ राजानो दासतां यांति
राज्यश्रियमवाप्नुयात् ॥ गोरोचनालक्तककुंकुमेन सिंदूरकर्पूरमधुत्रयेण ॥ विलिख्य यंत्रं विधि
नाविधिज्ञो भवेत्सदा धारयते पुमानिः ॥ भौमावास्यां निशाभागे चंद्रे शतभिषागते ॥ विलिख्य प
ठेत्स्तोत्रं स भवेत्संपदांपदं ॥ इति विश्वसारतंत्रे दुर्गामंगलनामस्तोत्रं ॥ अथ महिषमर्दिनीक
वचं ॥ ईश्वर उवाच ॥ अथ वक्ष्ये महेशानि कवचं सर्वकामदं ॥

यस्य प्रसादमासाद्य भवेत्साक्षात्सदाशिवः ॥ ॐकारं पूर्वमुच्चार्य मंत्री मंत्रस्य सिद्धये ॥ प्रपठेत्कव
चं नित्यं मंत्रवर्णस्य सिद्धये ॥ महिषमर्दिन्याः कवचस्य भगवान्महाकालऋषिरनुष्टुप् छंदः आ
द्याशक्तिर्देवता चतुर्वर्गफलप्राप्तये विनियोगः ॥ ह्रीं पातु मस्तके देवी कामिनी कामदायिनी ॥
मकारः पातु मां देवी चक्षुर्युग्मं महेश्वरि ॥ हिकारः पातु वदने हिंगुलास्करे नायिका ॥ षकारः पातु मां
श्वेताजिह्वायां चापराजिता ॥ मकारः पातु मां देवी महिनी स्कन्ध नायिका ॥ र्दिकारं पातु मां देवी सावित्री
कालनाशिनी ॥ निकारः पातु मां नित्या हृदये पार्श्वयोस्तथा ॥ नाभौ लिंगगुदे कंठे कर्णयोः पृष्ठके त
था ॥ शिरसोर्याकवचे पातु मुखे जंघायुगे तथा ॥ सर्वांगे पातु महेशानी कनका पातु सर्वदा ॥ नंदिनी पा
तु सकलं स्कंदप्रचा सर्वदावतु ॥ विजया पातु सर्वत्र देव्यंगे नचकालकः ॥ कालकः पातु सकलं मुद्राः
पातु सदा मम ॥ जया पातु सदा स्वस्मा विशुद्धा पातु सर्वदा ॥ डाकिन्यः पातु सकलं सिद्धायां तु रदा भ
म ॥ सर्वत्र सर्वदा पातु देवी महिषमर्दिनी ॥ इति ते कथितं दिव्यं कवचं सर्वकामदं ॥ यत्र तत्र न वक्तव्यं
गोपनीयं प्रयत्नतः ॥ गोपितं सर्वतंत्रेषु त्रिषु विश्वसारे प्रपंचितं ॥ सर्वत्र सकल भाविष्या कवचं दुर्लभं म
हत् ॥ ज्ञात्वा यच्चक्तितीर्थायां यं दद्यायम महेश्वरि ॥ उतो गेवार्ति दिक्कोगे कूरे मिथ्याभिभाषितं ॥ वस्त्वं
पंदत्वास्त्वदारलं ॥ अभुक्तं च जवे तस्य तस्मा घटनेन गोपयेत् ॥ गोरोचना कुंकुमेन भूर्जपत्रे महेश्वरि ॥
लिखित्वा शुभयोगेन ब्रह्मेंद्र वेष्टितो तथा ॥ आयुष्मत्सिद्धयोगे वा रवौ वा कौलकृतथा ॥ वेणि जेश्रवणायां
अष्टम्यां वा चतुर्दश्यां षष्ठ्यां वा पंचमीतिथौ ॥ कुहूवा पौर्णिमायां वा निशायां प्रातरेव वा ॥ एकलिंगे श्मशाने च
लेः ॥ शवांगारे श्वेतावस्त्रे लिखित्वा धारयेत्पुनः ॥

१८

तस्य सर्वार्थसिद्धिः स्याल्लक्षावर्तनेन च जापितं ॥ कुमारीं पूजयित्वा च देव्यै वस्त्रं निवेद्य च ॥ पठित्वा भोजये
द्विप्रान् धनवान् वेदपारगान् ॥ आवर्त्य कवचं पूर्वं कुमार्यै च दिनत्रयं ॥ तदा धरेत् आहारक्तां कव
चे सर्वं कामदं ॥ जाप्ययोग्या धयस्तस्य दुःखशान्तिं च येषु चितं ॥ वादीन्द्र गतेनैव तद्धत्वा राजानं च से
वकायते ॥ मासमेकं पठेद्यस्तु प्रत्यहं तिथये ततः शुचिः ॥ दिवा भवेत् हरिर्व्याघ्री रात्रौ तत्परायणः ॥ ष
ट्सहस्रप्रमाणेन प्रत्यहं प्रजपेत्सदा ॥ षण्मासे वा त्रिभिर्मासैः खेचरो भवति ध्रुवं ॥ अपुत्रो लभ
ते पुत्रं निर्धनो धनवान् भवेत् ॥ अरोगी बलवांश्चैव राजा च दासतामियात् ॥ रजस्वला न गोपि
त्यं जपेद्विद्यां विधानतः ॥ एवं यः कुरुते धीमान् स एव श्रीसदाशिवः ॥ इति विश्वसारतन्त्रे महिष
मर्दिनीकवचं ॥ तस्यास्तोत्रं ॥ मन्थिते च रचंडिचूर्णितरस्याचारप्रचंडास्फुरत्स्वैरं दारयद्रिपुदर्परजस्त्री
हो भ्रिमिमध्यास्पदं ॥ तेनायं निरपत्कुलो लितरूपमश्रीपादपद्मच्छवी प्राप्तानंदरसार्णवे ममलोहसन्निधिरं
ध्रेंदलं ॥ १ ॥ हित्वा चंडि रण्यदारणपंडप्रोद्दामहस्तांगुलिस्फायत्कर्मस्कमेरसोद्भरद्वाद्भोपतत्सिंहपु
टाः ॥ मालस्खलत्पृथुयाद्यायद्यायतश्रीपादसंसेवनं प्रेकरिवेदिर्णक्रिमरिनिनीलिनेवेसेविनः ॥ २ ॥
चंडित्वद्विषयांतरक्षरपरैर्धामस्फुरत् श्रीमत्पादपयोजचुंबनपरं मामद्य संभावय ॥ ३ ॥ मत्त्रिदा
शोध १२ दं श्रोत्रांतरं चेकृतं तन्तलं पुरुषप्रसनुगलं भ्रंसादिभिर्गम्यते ॥ तस्माद्देवि समस्तदैवतस्फुधा
सा× यदि वास्तु फलतत्कुलपथाचाराद्धरं मास्तु वा कीर्तिं कदान कोद्धिकाश्चैन च दीने वास्तु संसेव्य चिः
मातुर्व्रीत्स्ने हरिः स्मरौरिकुलचुंग्रेत्यादिसेवास्पदं श्रीमत्पादपयोजचुंबनविधौ चित्रं सदैवास्तु नः ॥ ४
निर्दिष्टोऽस्मि पदत्वदीयपदप्रवीपरीभावेतनिर्दिष्टस्य तदा ममापि विपुलं किं वास्तु सिद्धास्पदं ॥ तस्माद्दे
वि रयो न वाञ्छितत रं श्रीपादपद्मद्वयं मञ्चिन्ते क्षतसंपदं प्रवसतु तैमंगदिक्षम्यंतां ॥ ५ ॥ श्रोत्मानं परि
रभ्ये नतपतिरस्युन्मादसासादितः स्फारं जीवनरक्षणे सचरत्नी वेवानविष्यत्प्रभुः ॥ देवाद्विच्युतचं
द्रचंदनवनप्रागल्भ्यगन्धेभ्रमन् मोब्धीरुणेभिनेतपदे कक्कमलामोदेन नास्वादितः ॥ ६ ॥ हा हा मोतरणा

रिमोहजलधिव्याहारसिद्धाखिलप्रसानंदररसान्निषेकविवस्वद्ध्वांतोदरेलाहडिं ॥ युष्माकं सुरवंद्
निर्भरे मनस्तापाग्निर्जलक्ष्मीर्यश्रीमङ्क्तिरेसालिदुर्दिनपरीवाहः सदोपोलुनेः ॥७॥ स्वेताद् स्फुरद्
भुजालेजठरावभुवोरिस्वलल ध्वांतस्वांलविसंविभिर्मिलच्चिदानंदत्रयं देवतं ॥ सर्गसंस्टजले
स्थितिविलवुलेस्टष्टिं पुनलुप्यलेप्रोद्भिन्नांजननीरदमतचित्तेसदेवास्तुनेः ॥८॥ यानस्यत्महिषं छ
लस्फुरमिलतगजदृ घावेलस्टवललवत्कालः प्रसेनवत्तमस्तमेद्वीचोदेयसदालंवले ॥ साद्दुर्गानि
वदुर्गीलिहरिहवादुष्टोलरन्नाद्गिनीदप्यदेवलवैविदारणायदुलीयाज्जयोहोरिदिना ॥९॥ न्टल्पलेवेटक
घामरांचललवलवलच्चक्रापरवर्वावरस्पगपसैन्यद्विलीभुमुरवाछलदवलन्मोजिक्षितीशांबुघोम
मावालपिसर्पितिलह्विरः ॥ साटोपदुष्टासुरत्रुधरवंडविसंवडितारिवलदूकुंलक्षकेपिपासोज्वलेन्वंचल
कप्रविरामकालकलितीत्री—संपादकोन्मापयल्माहिषलिप्यंगानलाद्विरः श्टंगालरालस्थलेवस्वर्ली
वीसूपन्नमध्यकलिलैर्वाचाककुलीमाल्टेन्निः सेव्यांचारुवरांगणेरणसुरा घुर्णायमालांसमरेत ॥ उद्दीधः
कमसव्यवास्टकरयोश्चकेररंकर्तकासवेटवालधनुस्त्रिशूलं नयत्तेमद्रादधानांस्त्रीवाइयामांनीलघ
नाभकुललच्चपयोहृद्दुजुरांसवेलत्कारात्मवदनांघोराद्रहासानरा ॥ एवंपेलवदैविस्मर्तिमनघांध्यायंतिदु
गार्हित्निः ॥ शत्रूघैरजितप्रजितांपरपुरस्सोनारिकं कुर्वते ॥ राज्यंशत्रुजयः स्मरर्थविषड्ग्राव्यास्टतार
इनिरेलंनोभ्यारनमारणादिरुतिनांलेषांहस्तगतालवंतिजगतांयालनेमसेजय ॥ देव्यूनान ॥ स्तो
त्रेत्रवणसंतुष्टाप्रीतास्थिलवनैरव ॥ पश्यमूर्तिलव ध्यानयोग्यांममस्फरव वहां ॥ एषोमूर्तिःप्रधा
ने मेकालीमूर्तिस्थितिलथैस्व ॥ त्रिपुरापालनचामूर्तिर्वीमायासाप्रकीर्तिता ॥ इतिमहिषमर्दिनीस्तोत्रंस
मासं ॥ अथलक्ष्मीकवचं ॥ ईश्वरउवाच ॥ अथवक्ष्येमहेशानि कवचंसर्वकामदं ॥ यस्यविज्ञानमा
त्रेणभवेत्साक्षात्सदाशिवः ॥ नार्च्यनंतस्यदेवेशिमंत्रमात्रंजपेन्नरः ॥ सभवेत्पार्वतीपुत्रः सर्वशा
स्त्रपुरस्कृतः ॥ विद्यावतांभिनासेव्याविशेषेविष्णुवल्लभा ॥ अस्याश्चकुरश्चरीविष्णुवनितायाः क
वचस्य भगवान्‌श्रीशिवऋषिरनुष्टुपछंदोवाग्भवीदेवतावाग्भवंबीजंलज्जा शक्तिरमाबी

लकं कामबीजात्मकं कवचं मम सकलवितांडिय सर्वसिद्धिसमृद्धाय विनियोगः॥ ऐंकारो मस्तके
पातु वाग्भवी सर्वसिद्धिदा॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी॥ जिह्वायां मुखवृत्ते च
कर्णयोर्नेत्रयोर्नसि॥ ओष्ठाधरे दंतपंक्तौ तालुहनौ पुनः॥ पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्ण
रूपिणी॥ गंडयुग्मे भुजद्वंद्वे स्तनयुग्मे च पार्वती॥ हृदये मणिबंधे च ग्रीवायां पार्श्वयोः पुनः॥ पृ
ष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा॥ उपस्थे च नितंबे च नाभौ जंघाद्वये पुनः॥ जानुचक्रे पदद्वंद्वे
घुटिकेंगुलमूलके॥ स्वधारप्राणशक्त्यात्मसीमन्यां मस्तके पुनः॥ सर्वांगे पातु कामेशी महादेवी समुन्न
तिः॥ पुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु॥ ऋद्धिः पातु सदा देवी सर्वत्र शंभुवल्लभा॥ वाग्भवी सर्व
दा पातु पातु मां हरगेहिनी॥ रमा पातु सदा देवी पातु माया स्वराट् स्वयं॥ सर्वांगे पातु मां लक्ष्मीर्वि
ष्णुमाया सुरेश्वरी॥ विजया पातु भवने जया पातु सदा मम॥ शिवदूती सदा पातु सुंदरी पातु स
र्वदा॥ भैरवी पातु सर्वत्र भेरुंडा सर्वदावतु॥ पातु मां कालिका नित्यं कालरात्रिः सदावतु॥ नव
दुर्गाः सदा पातु कामाख्या सर्वदावतु॥ योगिन्यः सर्वदा पातु मुद्राः पातु सदा मम॥ मात्राः पातु महादेव्य
श्च कक्षा योगिनीगणाः॥ सर्वत्र सर्वकार्येषु सर्वकर्मसु सर्वदा॥ पातु मां देवदेवी च लक्ष्मीः स
र्वसमृद्धिदा॥ इति ते कथितं दिव्यं कवचं सर्वसिद्धये॥ यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितं॥ शठा
य भक्तिहीनाय निंदकाय महेश्वरि॥ न्यूनांगे अतिरिक्तांगे दर्शयेन्न कदाचन॥ न स्तवं दर्शयेद्दिव्यं
संदर्श्य शिवहा भवेत्॥ कुलीनाय महोच्छाय दुर्गाभक्तिरताय च॥ वैष्णवाय विशुद्धाय दद्यात्क
वचमुत्तमं॥ निजकन्यात्मव्यूहाय धनिने कुलिने तथा॥ दद्यात्कवचमित्युक्तं सर्वतंत्रसमन्विते
ज्ञानो मंगलवारे वा रक्तचंदनकेस्तथा॥ पीतचंदनलिखितमंत्रं सर्वतंत्रसमन्वितं॥ विलिख्य क
वचं दिव्यं स्वयंभुकुसुमैः शुभैः॥ स्वशुक्रैः परशुक्रैश्च नानागंधसमन्वितैः॥ गोरोचनाकुंकु
मेन रक्तचंदनकेन वा॥ सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने॥

अश्विन्यां स्वाति वा याम्यां वा फाल्गुन्यां च मघासु च ॥ पूर्वन्याद्रपदायोगे स्वासां मंगलवासरे ॥ विलिखेल्लपठे
त्स्तोत्रं शुभयोगे सुधालये ॥ आयुष्मान्प्रीतियोगे च ब्रह्मयोगे विशेषतः ॥ इंद्रयोगे शुभयोगे शुक्रयो
गे तथैव च ॥ कौलिके बालवे चैव वणिजे चैव सत्तमः ॥ अयायाशे सम्भूते वा विजने च विशेषतः ॥ कुमा
रीं पूजयित्वा च यजेद्देवीं सनातनीं ॥ मत्स्यैर्मांसैः सान्नूपैः पूजयेत्सर्वदेवतां ॥ घृताद्यैः सोपकरणैः प्र
पास्यैर्विशेषतः ॥ ब्राह्मणान्भोजयित्वा च पूजयेत्परमेश्वरीं ॥ अखंड मुपाख्यानं ततः कुर्याद्दिनत्र
यं ॥ तदाधरेन्महारत्नं शांकरेणच भाषितो ॥ मारणाद्युषणादीनि लभ्यतेनात्र संशयः ॥ सम्भवेत्सोवंती
पुत्रः सर्वशास्त्रपुरस्सरः ॥ गुरुर्देवोहरः साक्षात्पत्नी तस्य हरप्रिया ॥ अभेदेन यजेद्यस्तु तस्य सिद्धिरदूर
तः ॥ पठितिय इदमयं नित्यमार्द्रीतिरात्राजपफलमनुमेयं तस्य तेयद्धिचेयं ॥ सभवति परमुख्ये
संपदांपादनम्रः ॥ त्रिलिपमुकुटलक्ष्मीलक्षणानां चिराय ॥ इति विश्वसारे लक्ष्मीकवचं ॥ अथ ल
क्ष्मीस्तोत्रं ॥ त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे ॥ यथा त्वमाचलाकृष्णे तथा भव मयि स्थिरा ॥ ई
श्वरी कमला लक्ष्मीश्चलो भूति हरिप्रिया ॥ पद्मा पद्मालया संपदुच्चैः श्रीपद्मधारिणी ॥ द्वादशैतानि ना
मानि लक्ष्मीं संपूज्य यः पठेत् ॥ स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह ॥ इति लक्ष्मीस्तोत्रं ॥ अथ
सरस्वतीस्तोत्रं ॥ ह्रीं ह्रीं नित्यैकबीजे ह्याद्दिरुचिरकमलाकल्पविस्पष्टशोभे भव्ये भव्यानुकूले कुमतिवनदव
हरे विश्ववंद्यांघ्रिपद्मे ॥ पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्रि प्रोत्फुल्लज्ञानकूटे हरिनि
जदयिते देवि संसारसारे ॥ १ ॥ ऐं ऐं इष्टमंत्रे कमलभवमुखांभोजभूतिस्वरूपे रूपारूपप्रकाशे सक
लगुणमये निर्गुणे निर्विकारे ॥ न स्थूले नाति सूक्ष्मेप्यविदितविषये नापि विज्ञाततत्त्वे विश्वे विश्वांत
राले सुरवरनमिते निष्कले नित्यशुद्धे ॥ २ ॥ ह्रीं ह्रीं ह्रीं जापतुष्टे हिमरुचिमुकुटे वल्लकीव्यस्तहस्ते मा
तर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्तां ॥ विद्ये वेदांतगीते श्रुतिपरिपठिते मोक्षदे मुक्ति
मार्गे मार्गातीतप्रभावे भव मम वरदा शारदे शुभ्रहारे ॥ ३ ॥ धीं धीं धीं धारणाख्ये धृतिमतिनुतिभि

र्गमिभिः कीर्त्तनीये नित्ये नित्ये निभृते मुनिगणनमिते न्हलने वै पुराणे ॥ पुण्ये पुण्यप्रवाहे हरिहरन
मिले निभ्रमुद्रस्फुवर्णे भान्त्र भामाढ्ढूलतलमलि मलि मलिदे माधवप्रीतिनादे ॥४॥ ह्रीं श्रीं धीं क्रीं स्वरूपे
दहदहदुरितं पुस्तकव्यग्रहस्ते संतुष्टाकारचित्ते स्मितमुखिस्फुरगेज्यंत्रे निस्तंत्रविचे ॥ मोहमुग्धः
प्रवाहे कुरु मम विमलिध्वांतविध्वंसमीड्ये ॥ गीर्गौर्वाग्भारती त्वं कविवृषरसना सिद्धिदा सिद्धि
विद्या ॥ ५ ॥ स्तौमि त्वां त्वां च वंदे च जमममरसनां मा कदाचित्त्यजेथाः ॥ मा मे बुद्धिर्विरुद्धा भवतु मन
च मनो देवि मे पातु पापं ॥ मा मे दुःखं कदाचित्त्वपदि समयेप्यस्तु मे माकुलत्वं शास्त्रे वादे कवित्वे प्रसर
तु मम धीर्मास्तु कुंठा कदाचित् ॥ ६ ॥ इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वा
णी वाचस्पतेरप्यमतिमतविभवो वाक्पटुर्मृष्टकंठः ॥ सस्यादिष्टार्थलाभी सुतमिव सततं पा
ति तं सा च देवी सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमस्तं प्रयाति ॥ ७ ॥ ब्रह्मचारी व्रती मौ
नी त्रयोदश्यां निरामिषः ॥ सारस्वतो नरः पाठात्स्यादिष्टलाभवान् ॥ पक्षद्वयापि यो मंत्र्यात्त्रयो
दश्यैकविंशतिं ॥ अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीं ॥ शुक्लांबरधरां देवीं शुक्लाभरणभू
षितां ॥ वांछितं फलमाप्नोति स लोके नात्र संशयः ॥ इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभं ॥ प्रय
त्नेन पठेन्नित्यं सोमृतत्वं च गच्छति ॥ इति सरस्वतीस्तोत्रं ॥ अथ गणेशस्तोत्रं ॥ ॐकारमाद्यं प्रव
दंति संतो वाचं श्रुतीनामपि यं गृणंति ॥ गजाननं देवगणानतांघ्रिं भजेहमर्द्धेन्दुकृतावतंसं ॥
पादारविंदार्चनतत्पराणां संसारदावानलभंगदक्षं ॥ निरंतरं निर्गतदानतोयैस्तन्नौमि विश्वे
श्वरमग्रपुत्रं ॥ सेनांगरागेनवकुंकुमेन मत्तालिमालां मदपंकलग्नां ॥ निवारयंतं निजकर्णतालैः
को विस्मरेत्पुत्रमनंगशत्रोः ॥ शंभोर्जटाजूटनिवासिगंगाजलं समानीय करांबुजेन ॥ लीला
भिराराच्छिरमर्पयंतं गजाननं भक्तियुता भजंति ॥ कुमारमुक्तौ पुनरात्महेतोः पयोधरौ पर्व
तराजपुत्र्याः ॥ प्रक्षालयंतं करशीकरेण मौग्ध्येन तं नागमुखं भजामि ॥ त्वयोसमुद्धृत्य गजास्य

हस्तं येषूरीकृताः पुष्करं धमुल्लाः ॥ व्योमांगणे लेखिन्चरंति तावाकाला लनां मौक्तिकतुल्यभासः ॥ क्रीडार
तो राशिभि धौगजास्ये नेलामलिकामलिराशिररे ॥ कृत्वा वसानं पथि चिंत्यदेवाः केलासनाथं श्रुतिभिस्त
वंति ॥ नागाननेनामहतो लरीये क्रीडावलो दारकुमारसंघैः ॥ हपिक्षेपणेन कृत गतिं विहाय तो प्राय
लुः कंदुकताभिवेंदुः ॥ मरोज्ज्वसल पंचमुखे रजस्त्रम व्याप्यते लं सकलागमार्थान् ॥ देवान् येषी नू नत्त
जनैकमित्रं हेरंब मर्हास्ण माश्रयामि ॥ पादांबुजाभ्यामतिवामनाभ्यां कृतार्थयंतं कृपया धरित्रीं ॥ अका
रणं कारणमाप्तवाचां तं नागवक्रं नजहाति चेतः ॥ येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणको
ट्या ॥ तं चंद्रमौलेस्तनयं तपोभिराराध्यमानंदघनं भजामि ॥ पदेस्तली नाम यदं स्तली नां लीलावतारं पर
मात्मनस्तं ॥ नागात्मको वा पुरुषात्मको वा त्यभेद्यमाद्यं भजविघ्नराजं ॥ पाशांकुशौ भग्नरदं त्वभीष्टं करैर्दधानं
कररंध्रमुक्तैर्मुक्ताफलाभैः पृथुशीकरौघैः ॥ सिंचंतमंगं शिवयोर्हितं जोभित्र नेरमे गजमेरुदंतं ॥ चै
तन्यरूपं जगदादिबीजं ब्रह्मेति यं ब्रह्मविदो वदंति ॥ तं शंभुसूनुं सततं भजामि स्वांगस्थितायो निज
वल्लभाया ॥ मुखांबुजालोकनलोलनेत्रं स्मेराननाब्जं मदवैभवं वा ॥ रदेन जे विश्वविमोहयंतं ये सर्वमा
राध्य गजाननत्वं ॥ सर्वाणि शास्त्राणि पदं मिलेयां ॥ तत्तोनेवान्यप्रतिपाद्यमस्ति तदस्तिचेत्सत्यमस
त्यकल्पं ॥ हिरण्यवर्णं जगदीशितारं कविं पुराणं रविमंडलस्थं ॥ गजाननं यं प्रवदंति संतस्तत्कालयो
गैस्तमहं प्रपद्ये ॥ वेदांतगीतं पुरुषं भजेहं आत्मानमानंदघनं हृदिस्थं ॥ गजाननं यन्महसा जनानां वि
घ्नांधकारो विलयं प्रयाति ॥ शंभोः समालोक्य जटाकलापे शशांकखंडं निजपुष्करेण ॥ स्वभग्नदंतं प्रति
चिंत्य मौग्ध्यात् दालुष्टः कामः प्रियमातनोतु ॥ विघ्नाकुलानां विनिपातनार्थं यं नारिकेलैः कदलीफलाद्यैः
प्रलोभयंतो मदवारणास्यं प्रभुं सदाभीष्टमहं भजेहं ॥ यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं ग
जवक्रतुंडं ॥ स्तवेन नित्यायेविघ्नि नास्तु वंति लिलेसर्वलक्ष्मीनिलया नवंति ॥ इति गणेशस्तवराजः ॥
अथ हरिद्रागणेशस्य कवचं ॥ ईश्वर उवाच ॥ शृणु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये ॥ पठित्वा धार
यित्वा वै मुच्यते सर्वसंकटात् ॥ अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत् ॥

सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि ॥ सम्मोदो भ्रूयुगे पातु
भ्रूमध्ये च गणाधिपः ॥ गणक्रीडश्चक्षुर्युग्मं नासायां गणनायकः ॥ गणक्रीडान्वितः पातु वदने सर्वसिद्धये ॥
जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा ॥ विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि ॥ गणानां नायकः
पातु बाहुयुग्मं सदा मम ॥ विघ्नकर्ता च उदरे विघ्नहर्ता च लिंगके ॥ गजवक्त्रः कटीदेशे एकदंतो नितंबके
लंबोदरः सदा पातु जानुजंघे गणाधिपः ॥ हरिद्रः सर्वदा पातु सर्वांगे गणनायकः ॥ य इदं प्रपठेन्नित्यं ग
णोय ५४ गुघंरेद्रो ममारुणः ॥ पालयज्ञोपवीती च पातु पादयुगे सदा ॥ जापकः सर्वदा पातु ४ ६ कृ ॥ णेशस्य
महेश्वरि ॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशकं ॥ सर्वसिद्धिकरं साक्षात्सर्वपापविमोचनं ॥ सर्वसंप
त्प्रदं साक्षात्सर्वशत्रुक्षयंकरं ॥ ग्रहपीडाज्वरा रोगा ये चान्ये गुह्यकादयः ॥ पठनाद्धारणादेव नाशमा
यांति तत्क्षणात् ॥ धनधान्यकरं देवि कवचं सुरपूजितं ॥ समो नास्ति महेशानि त्रैलोक्ये कवचस्य च ॥
हारिद्रस्य महेशानि कवचस्य फलं लभेत् ॥ किमन्यैरसदालापैर्यत्रायुर्व्ययतामियात् ॥ इति विश्वसारे
हरिद्रागणेशस्य कवचं ॥ अथ सूर्यकवचं ॥ श्रीसूर्य उवाच ॥ सांब सांब महाबाहो शृणु मे कवचं शु
भं ॥ त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं ॥ यज्ज्ञात्वा मंत्रवित्सम्यक् फलं प्राप्नोति निश्चितं ॥ यद्धृत्वा
च महादेवो गणानामधिपोऽभवत् ॥ पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा ॥ एवमिंद्रादयः सर्वे सर्वै
श्वर्यमवाप्नुयुः ॥ कवचस्य ऋषिर्ब्रह्मा छंदोनुष्टुप् उदाहृतम् ॥ श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः ॥
यश आरोग्यमोक्षेषु विनियोगः प्रकीर्तितः ॥ प्रणवो मे शिरः पातु घृणिर्मे पातु भालकं ॥ सूर्योऽव्यान्नयन
द्वंद्वमादित्यः कर्णयुग्मकं ॥ अष्टाक्षरो महामंत्रः सर्वाभीष्टप्रदायकः ॥ ह्रौं बीजं मे मुखं पातु हृदयं भुवनेश्व
री ॥ चंद्रबीजं विसर्गाढ्यं पातु मे गुह्यदेशकं ॥ अक्षरोसौ महामंत्रः सर्वतंत्रेषु गोपितः ॥ शिवो वह्निसमायुक्तो
वामाक्षिबिंदुभूषितः ॥ एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्तितः ॥ गुह्याद्गुह्यतरो मंत्रो वांछाचिंता
मणिर्मतः ॥ शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः ॥ इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभं ॥ श्रीप्र
दं कांतिदं नित्यं धनारोग्यविवर्धनं ॥ कुष्ठादिरोगशमनं महाव्याधिविनाशनम् ॥ त्रिसंध्यं यः पठेन्नि

समरोगी बलवान् भवेत्॥ बहुनाकिमिहोक्तेन यन्यन्मनसि वर्तते॥ तत्तत्सर्वं भवत्येव कवचस्यास्य च
धारणात्॥ भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः॥ ब्रह्मराक्षसवेताला नैवेद्द्रष्टुमपि क्षमाः
दूरादेव पलायंते तस्य संकीर्तनादपि॥ भूर्जपत्रे समालिख्य रोचनागरुकुंकुमैः॥ शनिवारे च संक्रां
त्यां सप्तम्यां च विशेषतः॥ धारयेत्सोधरं कंठे स लोक्यविजयी भवेत्॥ त्रैलोक्यमंगलस्य धा
रयेद्दक्षिणे भुजे॥ स्त्री वामायामथवा कंठे सोपि सर्पो न संशयः॥ इति ते कथितं सांब त्रैलोक्यमंगलं
निधिं॥ देवानां दुर्लभं लोके लब्ध्वा हास्य प्रसादतः॥ अज्ञात्वा कवचं दिव्यं जपेत्स्तवमनुत्तमं॥ सिद्धिर्न
जायते तस्य कल्पकोटिशतैरपि॥ इति ब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यकवचं॥ अथ विष्णुस्तो
त्रं॥ आदायवेदाः सकलाः समुद्रात् निहत्य शंखं रिपुमत्युदग्रं दत्ताः पुरा येन पितामहाय विष्णुं तमाद्यं
भज विश्वरूपं॥ दिव्यामृतार्थं मथिते महाब्धौ देवासुरैर्वासुकिमंदराद्यैः भ्रमेर्महावेग विघूर्णिताया
स्तं कूर्ममाधारगतं नमामि॥ समुद्रकांचीसरिदुत्तरीया वसुंधरामेरुकिरीटभारा॥ दंताग्रतो येन सम
द्धृता तं वराहमाद्यं शरणं प्रपद्ये॥ भक्तार्तिभंजनगुणामयाविराय स्तंभांतराद्दुदितो नृसिंहः॥
रिपुं सुराणां निशितैर्नखाग्रैर्विदारयंतं न च विस्मरामि॥ चतुःसमुद्राभरणा धरत्री न्यासाय नालं च
रणस्य यस्य॥ एकस्य नान्यस्य पदं सुराणां त्रिविक्रमं सर्वगतं नमामि॥ त्रिःसप्तवारं नृपतीन्निहत्य य
स्तर्पणं रक्तमयं पितृभ्यः॥ चकार दोर्दंडबलेन सम्यक् तमादिशूरं प्रणमामि विष्णुं॥ कुले रघूणां समु
द्भव जन्म विधाय सेतुं जलधे जलेन्तः॥ लंकेश्वरं यः शमयांचकार सीतापतिं तं प्रणमामि भक्त्या॥ हलेन
सर्वान्नसुरशान्निकृष्य चकार चूर्णं मुसलप्रहारैः॥ यः कृष्णमाधवे लंबलीयान् भक्त्या भजे तं बलभद्र
रामं॥ सुरासुराणामसुरान् विजेतुं संचारयन्नूचीवरचित्रवेदं॥ चकार यः शास्त्रममोघकल्पं तं
मूलभूतं प्रणतोस्मि बुद्धं॥ कलावसाने निजखड्गलैः स्तुरांगैः संघट्टयामास निमेषमात्रात्॥ यस्तेजसा नि
र्दहलाति जीतिर्विश्वात्मकं तं तुरगं भजामि॥ शारंग सचक्र सुगदासरोजं दोर्भिर्दधानं गरुडाधिरूढं

श्रीवत्सचिह्नं जगदादिमूलं तमालनीलं हृदि विष्णुमीडे ॥ क्षीराब्धौ शेषविशेषतल्पे शयानमंतः
स्मितलक्षोजितवैकुंठ ॥ उत्फुल्लनेत्रांबुजमंबुदाभं माद्यं श्रुलीनामसकलं स्मरामि ॥ प्रीलयेदेन यास्तु सा
जगन्नाथं जगन्मयं ॥ धर्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमं ॥ इति विष्णुस्तोत्रं ॥ अथ रामक
वचं ॥ ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनं ॥ जानकीलक्ष्मणोपेतं जटामुकुटमंडितं ॥ १ ॥ सासीतू
णधनुर्बाणपाणिं नक्तंचरांतकं ॥ स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुं ॥ २ ॥ रामरक्षां पठेत्प्रा
ज्ञः पापघ्नीं सर्वकामदां ॥ ॐ अस्य श्रीरामरक्षाकवचमंत्रस्य श्रीवेदव्यास बुधकौशिक ऋषिरनुष्टुप्
छंदः ॥ श्रीरामचंद्रो देवता श्रीरामचंद्रप्रीत्यर्थे जपे विनियोगः ॥ ॐ शिरो मे राघवः पातु भालं दशरथा
त्मजः ॥ ३ ॥ कौशल्येयो दृशौ पातु विश्वामित्रः प्रियश्रुती ॥ घ्राणं पातु मखत्राता मुखं सौमित्रवत्सलः ॥ ४ ॥
जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः ॥ स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ५ ॥ करौ सीता
पतिः पातु हृदयं जामदग्न्यजित् ॥ वक्षः पातु कबंधारिः स्तनौ गीर्वाणवंदितः ॥ ६ ॥ पार्श्वौ कुलपतिः पातु कु
क्षिमिक्ष्वाकुनंदनः ॥ मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः ॥ ७ ॥ गुह्यं जितेंद्रियः पातु पृष्ठं पातु रघूद्व
हः ॥ सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ॥ ८ ॥ ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥ जानुनी
सेतुकृत्पातु जंघे दशमुखांतकः ॥ ९ ॥ पादौ विभीषणः श्रीदः पातु रामोऽखिलं वपुः ॥ एतां रामबलोपेतां
रक्षां यः सुकृती पठेत् ॥ १० ॥ स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ पातालभूतलव्योमचारिण
श्छद्मचारिणः ॥ ११ ॥ न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥ रामेति रामचंद्रेति रामभद्रेति वा स्मरन्
॥ १२ ॥ नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति ॥ जगज्जैत्रैकमंत्रेण रामनाम्नैव रक्षितं ॥ १३ ॥ यः कंठे
धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥ भूर्जे पत्रे लिखित्वेमां विधिवद्गंधचंदनचर्चितां ॥ १४ ॥ कृत्वा वै धारये
द्यस्तु सोऽभीष्टफलमाप्नुयात् ॥ काकवंध्या च या नारी मृतापत्या च या भवेत् ॥ १५ ॥ वक्रपत्या जीववत्सा
सा भवेन्नात्र संशयः ॥ वज्रपंजरनामेदं यो रामकवचं पठेत् ॥ १६ ॥ अव्याहताज्ञः सर्वत्र लभते जयमं
गलं ॥

आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरिः ॥१७॥ तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥ रामो
दाशरथिः शूरो लक्ष्मणानुचरो बली ॥१८॥ काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥ धन्विनौ बद्ध
निस्त्रिंशौ काकपक्षधरौ शुभौ ॥ वीरौ मां पथि रक्षेतां तावुभौ रामलक्ष्मणौ ॥ तरुणौ रूपसंपन्नौ सुकु
मारौ महाबलौ ॥२०॥ पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ ॥ फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारि
णौ ॥२१॥ पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मतां ॥२२॥ रक्षः
कुलनिहंतारौ त्रायेतां नौ रघूत्तमौ ॥ आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ ॥२३॥
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छतां ॥ अग्रतस्तु न्टसिंहो मे पृष्ठतो गरुडध्वजः ॥२४॥
पार्श्वयोश्च धनुष्मंतौ सदा तौ रामलक्ष्मणौ ॥ रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ॥२५॥ काकुत्स्थः
पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥ वेदांतवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः ॥ जानकीवल्लभः श्रीमानप्रमे
यपराक्रमः ॥ दक्षिणे लक्ष्मणो धन्वी वामतो जानकी पुनः ॥२६॥ पुरतो मारुतिर्यस्य तं नमामि रघूत्तमं ॥
आपदामपहर्तारं दातारं सर्वसंपदां ॥२८॥ गुणाभिरामं श्रीरामं भूयो भूयो नमाम्यहं ॥ एतानि पुण्यनामा
नि मंत्रोक्तानि यः सदा पठेत् ॥२९॥ अश्वमेधायुतं पुण्यं संप्राप्नोति न संशयः ॥२९॥ इति श्रीपद्मपुराणे श्रीवेद
व्यासकृतौ भगवद्वसिष्ठ श्रीकौशिकप्रणीतं वज्रपंजराख्यं श्रीरामकवचं ॥ अथ मंत्रराजात्मकः स्तवः ॥
हनुमानुवाच ॥ तिरश्चामपि राजेति समवायं समीयुषां ॥ यथा सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहं ॥१॥
सकृदेव प्रपन्नाय विशिष्टामैरयत्श्रियं ॥ विभीषणायाब्धितटे यस्तं वीरं नमाम्यहं ॥२॥ यो महान्पूजि
तो व्यापी महाब्धेः करुणाम्टतं ॥ श्रुतमेतज्जटायोश्च महाविष्णुं नमाम्यहं ॥३॥ तेजसाप्यायितो यस्य ज्वलंति ज्व
लनादयः ॥ प्रकाशते स्वतंत्रो यः तं ज्वलंतं नमाम्यहं ॥ सर्वतोमुखता येन लीलया दर्शिता रणे ॥४॥ राक्ष
सेश्वरयोधानां तं वंदे सर्वतोमुखं ॥ न्टभावं प्रपन्नो योपि बिभर्ति च यथा न्टपः ॥५॥ सिंहः सत्वेष्विति प्रोक्तो यस्तं न्ट
सिंहं नमाम्यहं ॥ यस्माद्विभ्यति वाताग्निज्वलनेंद्राः समृत्यवः ॥६॥ भियं तनोति पापानां भीषणं तं नमा
म्यहं ॥ परस्य योग्यतापेक्षा रहितो नित्यमंगलं ॥ ददात्येव निजौदार्यात्स्वसंतं वीरं नमाम्यहं ॥ यो म्टत्युं निजदा

सा ना नाथाय सखिलेश्वरः ॥ अकूपार रसुतां वं योजितम् स्कंनमाम्यहं ॥ यत्पादपद्मप्रणतो भवेदुत्तमपूरु
षः ॥ तमीशं सर्वदेवानां नमनीयं नमाम्यहं ॥ आत्मभावं समुत्क्षिप्य दास्येनैव रघूत्तमं ॥ भजेहं प्रत्यहं रा
मं ससीतं सहलक्ष्मणं ॥ नित्यं श्रीराम भक्तस्य किंकरा यमकिंकराः ॥ शिवादयो दिक्पालास्सर्वसिद्धयस्तस्य दा
सिकाः ॥ इमं हनुमता प्रोक्तं मंत्रराजात्मकं स्तवं ॥ पठेदनुदिनं यस्तु स रामे भक्तिमान् भवेत् ॥ इति हनुमा
न् कृत मंत्रराजात्मकः स्तवः ॥ अथ तस्याष्टोत्तरशतनाम ॥ वेदव्यास उवाच ॥ शृणु गांगेय वक्ष्यामि रामस्या
द्भुतकर्मणः ॥ नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतं ॥ नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते ॥ कैलासशि
खरे रम्ये नानारत्नविचित्रिते ॥ एकाग्रमनसा देवं विष्णुमाराध्य भक्तितः ॥ उपविष्टस्ततो नोकपा
र्वती देवं शंकरं चीत ॥ पार्वत्ये हि मया साई लोकानुग्रह वंदिते ॥ तमाह पार्वती देवी जप्यनामशताष्टकं ॥ ततो भो
क्षाम्यहं देव भुज्यतां भवता प्रभो ॥ ततस्तां पार्वतीं प्राह प्रहसन् परमेश्वरः ॥ धन्यासि कृतपुण्यासि विष्णु
भक्तासि पार्वति ॥ दुर्लभा वैष्णवी भक्तिर्योगधर्मविनेश्वरि ॥ रकारादीनि नामानि शृण्वतो मम पार्वति ॥
मनः प्रसन्नतां याति रामनामाभिशंकया ॥ रमंते योगिनोनंते सत्यानंदे चिदात्मनि ॥ इति रामपदेनासौ प
रं ब्रह्माभिधीयते ॥ राम रामेति रामेति रमे रामे मनोरमे ॥ सहस्रनाम भिस्तुल्यं रामनाम वरानने ॥ राम
स्कृत्य महादेवी पतिनाम सहस्रश्च ता ॥ प्रपच्छ श्रीमहादेवीं प्रीतिप्रवणमानसा ॥ सहस्रनामभिस्तुल्यं राम
×ध्याय १२ विभुंक्ष साई मया धुना ॥ ततो रामेति नामोक्तं सहभुक्ता च पार्वती ॥ ततो भुक्त्वा महादेव ×ध्याय १२
नाम तथोदितं ॥ तस्यान्यान्यपि नामानि संति चेद्रावणद्विषः ॥ श्रूयतां मम देवेश तत्र मे प्रीतिरुत्तमं ॥ शंकर
उवाच ॥ लौकिका वैदिकाः शास्त्रीये केचित्संति पार्वति ॥ नामानि रामचंद्रस्य सहस्रं तेषु चाधिकं ॥ तेषु चाष्टो
त्तमुत्त्यं हि नाम्नामष्टोत्तरं शतं ॥ जपंतः सर्ववेदाश्च सर्वमंत्राश्च पार्वति ॥ तस्मात्कोटिगुणं पुण्यं रामनामो
स्तैव तत्प्यते ॥ अस्य श्रीरामाष्टोत्तरशतनाम्न अनंत ऋषिरनुष्टुप् छंदः ॥ श्रीरामचंद्रो देवता श्रीमद्रामचंद्र
प्रीत्यर्थे जपे विनियोगः ॥ श्रीरामो रामभद्रश्च रामचंद्रश्च शाश्वतः ॥ राजीवलोचनः श्रीमान् राजेंद्रो रघुपुं
गवः ॥ जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ॥ विश्वामित्रप्रियो दांतः शरणत्राणतत्परः ॥

वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ॥ सत्यव्रतो व्रतफलः सदा हनुमदाश्रयः ॥ कौशलेयः खर
ध्वंसी विराधवधपंडितः ॥ विभीषणपरित्राता दशग्रीवशिरोहरः ॥ सप्ततालप्रभेत्ता च हरकोदंडखंडनः
जामदग्न्यमहादर्पदलनस्ताडकांतकः ॥ वेदांतसारो मेधात्मा भवरोगैकभेषजः ॥ दूषणत्रिशिरोरिश्च
त्रिमूर्तिस्त्रिगुणस्त्रयी ॥ त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्र्यकीर्तनः ॥ त्रिलोकरक्षको धन्वी दंडका
रण्यपुण्यकृत् ॥ अहल्यापावनश्चैव पितृभक्तो वरप्रदः ॥ जितेंद्रियो जितक्रोधो जितलोभो जगद्गुरुः
ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ॥ जयंतत्राणवरदः सुमित्रापुत्रसेवितः ॥ सर्वदेवाधिदेवश्च
मृतवानरजीवनः ॥ मायामारीचहंता च महाभागो महाभुजः ॥ सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसं
स्तुतः ॥ महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥ सर्वपुण्याधिकफलस्मृतः सर्वाघनाशकः ॥ आ
दिपुरुषो महापुरुषः परमः पुरुषस्तथा ॥ पुण्योदयो दयासारः पुराणः पुरुषोत्तमः ॥ स्मेरवक्त्रो मितभाषी पु
ण्यभाषी च राघवः ॥ अनंतगुणगंभीरो धीरोदात्तगुणोद्भवः ॥ मायामानुषचारित्रो महादेवाभिपूजितः ॥
सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः ॥ श्यामांगः सुंदरः शूरः पीतवासा धनुर्धरः ॥ सर्वयज्ञाधिपो य
ज्वा जरामरणवर्जितः ॥ शिवलिंगप्रतिष्ठाता सर्वापगुणवर्जितः ॥ परमात्मा परं ब्रह्म सच्चिदानंदविग्रहः
परंज्योतिः परं धाम पराकाशः परात्परः ॥ परेशः पारगः पारः सर्वदेवात्मकः शिवः ॥ इति श्रीरामचंद्रस्य
नाम्नामष्टोत्तरं शतं ॥ गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्तितं ॥ यः पठेत् शृणुयाद्वापि भक्तियुक्तेन चेतसा
स सर्वैर्मुच्यते पापैः कल्पकोटिशतोद्भवैः ॥ जलानि स्थलतां यांति शत्रवो यांति मित्रतां ॥ राजानो दासतां यां
ति वह्नयो यांति शैत्यतां ॥ अनुकूलं च भूतानि स्थैर्यं यांति चलाः श्रियः ॥ अनुग्रहं ग्रहा यांति शांतिमा
यांत्युपद्रवाः ॥ पठतो भक्तिभावेन जनस्य गिरिसंभवे ॥ यः पठेच्छृण्वतो भक्त्या तस्य वश्यं जगत्त्रयं ॥ यष
स्त्रीमयत्वं च ततो लभते प्राप्नोति कीर्तनात् ॥ यः पठेद्रामचंद्रस्य नाम्नामष्टोत्तरं शतं ॥ ताने नापि च कुर्वाणो
न स पापैः स लिप्यते ॥ सर्ववेदेषु तीर्थेषु दाने च तपःसु च ॥ तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते ॥
तुल्यकाले तु सर्वे तु पठितानि समस्तके ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ वैकुंठे वासमाप्नो
ति दशास्य वैदेह्याश्वरैः ॥

रामंदूर्वादलश्यामंपद्माक्षंपीतवाससं॥स्तुवंतिनामभिर्दिव्यैर्नतेसंसारिणोनराः॥रामायरामचंद्रायराम
भद्रायवेधसे॥रघुनाथायनाथायसीतायाःपतयेनमः॥इमंमंत्रंमहादेवीजपस्वेवदिवानिशं॥सर्वपा
पविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात्॥इत्येतद्रामचंद्रस्यमाहात्म्यंवेदसंमितं॥कथितंतेनगांगेययतस्त्वं
वैष्णवोत्तमः॥वंदेरामंमहेशानंहरकोदंडखंडनं॥जानकीहृदयानंदवर्धनंरघुनंदनं॥इतिपद्मपुराणे
ईश्वरपार्वतीसंवादेश्रीरामचंद्रस्तोत्रंनामस्तवः॥अथश्रीकृष्णस्तोत्रं॥प्रसीदभगवन्मह्यमतिनाकुंठि
तात्मने॥तवांघ्रिपंकजरजोरागिणींभक्तिमुत्तमां॥अजप्रसीदभगवन्नमितद्युतिपंजरं॥अप्रमेयप
सीदास्मद्दुःखहन्पुरुषोत्तम॥स्वसंवेद्यप्रसीदात्मानंदात्मन्ननामय॥अचिंत्यसारविश्वात्मन्प्रसीदप
रमेश्वर॥प्रसीदतुंगतुंगानांप्रसीदशिवशोभन॥प्रसीदगुणगंभीरगंभीराणांमहाद्युते॥प्रसीदव्य
क्तविस्तीर्णविस्तीर्णानामगोचर॥प्रसीदार्द्रार्द्रजातीनांप्रसीदांतांतयामिनां॥गुरोगरीयानसर्वप्रसी
दानंतदेहिनां॥जयमाधवमायात्मन्जयशाश्वतशंखभृत्॥जयशंखधरश्रीमन्जयनंदनकंद
न॥जयचक्रगदापाणेजयदेवजनार्दन॥जयरत्नवराबद्धकिरीटाक्रांतमस्तक॥जयपक्षिपतिच्छाया
निरुद्धार्ककरारुण॥नमस्तेनरकारातेनमस्तेमधुसूदन॥नमस्तेललितापांगनमस्तेनरकांतक॥न
नमःपापहरेशाननमःसर्वभयापह॥नमःसंभूतसर्वात्मन्नमःसंभृतकौस्तुभ॥नमस्तेनयनाती
तनमस्तेभयहारक॥नमोविभिन्नदेहायनमःश्रुतिपथातिग॥नमस्त्रिमूर्तिभेदेनसर्गस्थित्यंत
हेतवे॥विष्णवेत्रिदशारातिजिष्णवेपरमात्मने॥चक्रभिन्नारिचक्रायचक्रिणेचक्ररूपिणे॥कृष्णानं
दवे॥विश्वायविश्वदेवायविश्वभूतात्मवर्तिने॥नमोस्तुयोगिध्येयात्मन्नमोस्त्वध्यात्मरूपिणे॥भक्तिप्रदा
यभक्तानांनमस्तेभक्तिदायिने॥स्तवनंहवनंचैवध्यानंपूजानमस्क्रिया॥देवेशसर्वकर्माणिभवेदाराधनं
तव॥इतिहवनजपार्चाभेदतोविष्णुपूजा॥नियतहृदयकर्मायस्यमंत्रीविराय॥स्वरवस्तुसक
लमात्माव्याप्यदुष्टांतरात्मा॥जगतनमस्तेतिविमुक्तोलुत्तमोभक्तिमेति॥गोगोपगोपिकाप्रीतंगोपालंगोपु
गोप्रदं॥गोभिरीड्यंगोसहस्रैर्नौमिगोकुलनायकं॥प्रीणयेदनयास्तुत्याजगन्नाथंजगन्मयं॥धर्मा
र्थकाममोक्षाणांप्राप्तयेपुरुषोत्तमं॥इतिश्रीकृष्णस्तवः॥

अथ गोपालस्तव ॥ नारद उवाच ॥ नवीननीरदश्यामं नीलेंदीवरलोचनं ॥ वल्लवीनंदनं वंदे कृष्णं गोपा
लरूपिणं ॥ स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्द्धजं ॥ कदंबकुसुमोद्बद्धवनमालाविभूषितं ॥ गंडमंड
लसंसर्गिचलत्कांचनकुंडलं ॥ स्थूलमुक्ताफलोदारहारोद्योतितवक्षसं ॥ हेमांगदतुलाकोटिकिरी
टोज्वलविग्रहं ॥ मंदमारुतसंक्षोभिवल्गितांबरसंचयं ॥ रुचिरौष्ठपुटन्यस्तवंशीमधुरनिस्व
नैः ॥ लसद्गोपालिकाचेतो मोहयंतं मुहुर्मुहुः ॥ वल्लवीवदनांभोजमधुपानमधुव्रतं ॥ क्षोभयंतं
मनस्तासां सस्मेरापांगवीक्षणैः ॥ यौवनोद्भिन्नदेहाभिः संसक्ताभिः परस्परं ॥ विचित्रांबरभूषा
भिर्गोपनारीभिरावृतं ॥ प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकं ॥ योधयंतं क्वचिद्गोपान्
व्याहरंतं गवां गणं ॥ कालिंदीजलसंसर्गशीतलानिलसेवितं ॥ कदंबपादपच्छायास्थितं वृंदावने
क्वचित् ॥ रत्नभूधरसंलग्नरत्नासनपरिग्रहं ॥ कल्पपादपमध्यस्थहेममंडपिकागतं ॥ वसंतकुसु
मामोदसुरभीकृतदिङ्मुखे ॥ गोवर्द्धनगिरौ रम्ये स्थितं रासरसोत्सुकं ॥ सव्यहस्ततलन्यस्तगिरि
वर्यातपत्रकं ॥ खंडिताखंडलोन्मुक्तमुक्तासारघनाघनं ॥ वेणुवाद्यमहोल्लाससकृतहुंकारनिःस्वनैः
सवत्सैरुन्मुखैः शश्वद्गोकुलैरभिवीक्षितं ॥ कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः ॥ दंडपाशो
द्यतकरैर्गोपालैरुपशोभितं ॥ नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदांगपारगैः ॥ प्रीतिसुस्निग्धया वाचा
स्तूयमानं परात्परं ॥ य एवं चिंतयेद्देवं भक्त्या संस्तौति मानवः ॥ त्रिसंध्यं तस्य तुष्टात्मा ददाति परमी
प्सितं ॥ राजवल्लभतामेति भवेत्सर्वजनप्रियः ॥ अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवं ॥ इति
श्रीगौतमीतंत्रे श्रीगोपालस्तोत्रं ॥ अथ श्रीकृष्णकवचं ॥ पुलस्त्य उवाच ॥ भगवन्सर्वधर्मज्ञ क
वचं यत्प्रकाशितं ॥ त्रैलोक्यमंगलं नाम कृपया कथय प्रभो ॥ सनत्कुमार उवाच ॥ शृणु विप्रेंद्र वक्ष्या
मि कवचं परमाद्भुतं ॥ नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥ ब्रह्मणा कथितं मह्यं परं स्नेहाद्वदामि
ते ॥ अतिगुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहं ॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं ॥ यद्धृत्वा प

हनाशाति महालक्ष्मीर्जगत्त्रयं ॥ पठनाद्धारणाच्छंभुः संहर्त्ता सर्वतत्त्ववित् ॥ त्रैलोक्यजननी दुर्गा महिषा
दिमहासुरान् ॥ वरदृप्तान्जघानैव पठनाद्धारणाद्यतः ॥ एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः
शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत् ॥ शठाय परशिष्याय दत्वा मृत्युमवाप्नुयात् ॥ त्रैलोक्यमंगलस्या
स्य कवचस्य प्रजापतिः ॥ ऋषिश्छंदश्च गायत्री देवो नारायणः स्वयं ॥ धर्मार्थकाममोक्षेषु विनियोगः
प्रकीर्त्तितः ॥ प्रणवो मे शिरः पातु नमो नारायणाय च ॥ भालं पायान्नेत्रयुग्ममष्टार्णो भुक्तिमुक्तिदः ॥
क्लीं पायाच्छ्रोत्रयुग्मं चैकाक्षरः सर्वमोहनः ॥ क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जिह्विकां ॥ गोपीजनपदवल्ल
भाय स्वाहाननं मम ॥ अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः ॥ गोपीजनपदवल्लभाय स्वाहा भुजद्वयं ॥ क्लीं
ग्लौं क्लीं श्यामलांगाय नमः स्कंधौ दशाक्षरः ॥ क्लीं कृष्णः क्लीं करौ पायात् क्लीं कृष्णायं भुजोवतु ॥ हृदयं श्रीभुवनेशा
नः कृष्णाय क्लीं स्तनौ मम ॥ गोपालायाग्निजायांतं कुक्षियुग्मं सदावतु ॥ क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्त
मः ॥ कृष्णगोविंदकौ पातु स्मराद्यौ ङेयुतौ मनु ॥ अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोवतु ॥ पृष्ठं क्लीं कृ
ष्णं कंकालं क्लीं कृष्णाय द्विठांतकः ॥ सक्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्णठद्वयं ॥ ऊरू सप्ताक्षरं पायात्त्र
योदशाक्षरोवतु ॥ श्रीं ह्रीं क्लीं पदतो गोपीजनवल्लभपदं ततः ॥ भाय स्वाहेति पायुं वै क्लीं ह्रीं श्रीं जानुनी च सदाव
तु ॥ कटिद्वयं तु मे पातु ह्रीं श्रीं क्लीं च दशाक्षरः ॥ त्रयोदशाक्षरः पातु जंघे चक्राद्युदायुधः ॥ अष्टादशाक्षरो ह्रीं
श्रीं पूर्वको विंशदर्णकः ॥ सर्वांगं मे सदा पातु द्वारकानायको बली ॥ नमो भगवते पश्चाद्वासुदेवाय तत्प
रं ॥ ताराद्यो द्वादशार्णोयं प्राच्यां मां सर्वदावतु ॥ श्रीं ह्रीं क्लीं दशार्णस्तु क्लीं ह्रीं श्रीं षोडशार्णकः ॥ गदाद्युदायुधो वि
ष्णुर्मामग्नेर्दिशि रक्षतु ॥ ह्रीं श्रीं दशाक्षरो मंत्रो दक्षिणे मां सदावतु ॥ तारो नमो भगवते रुक्मिणीवल्लभाय च ॥
स्वाहेति षोडशार्णोयं नैर्ऋत्यां दिशि रक्षतु ॥ क्लीं हृषीकेशपदं णाय नमो मां वारुणेवतु ॥ अष्टादशार्णः कामांतो वाय
व्ये मां सदावतु ॥ श्रीं माया काम कृष्णाय गोविंदाय द्विठो मनुः ॥ द्वादशार्णात्मको विष्णुरुत्तरे मां सदावतु ॥ वाग्भवं
काम कृष्णाय ह्रीं गोविंदाय ततः परं ॥ श्रीं गोपीजनवल्लभाय स्वाहा ॥ हस्तौ ततः परं ॥ द्वाविंशत्यक्षरो मंत्रो मा
मैशान्ये सदावतु ॥ कालीयस्य फणामध्ये दिव्यं नृत्यं करोति तं ॥

नमामि देवकीपुत्रं न्नसराजानमच्युतं ॥ द्वात्रिंशदक्षरो मंत्रोप्यघोमं सर्वदावतु ॥ कामदेवाय विद्महे पुष्पबाणा
य धीमहि ॥ तन्नो मंगः प्रचोदयात् ॥ देवाभ्यां पातु चोद्दितः ॥ इति ते कथितं विप्र ब्रह्ममंत्रौघविग्रहं ॥ त्रैलो
क्यमंगलं नाम कवचं ब्रह्मरूपकं ॥ ब्रह्मेत्रात्प्रमुखांधीश नारायणमुखाच्छ्रुतं ॥ तव स्नेहान्मयाख्यातं प्र
वक्तव्यं न कस्यचित् ॥ गुरुं प्रणम्य विधिवत्कवचं प्रपठेत्ततः ॥ सकृद्द्वित्रिर्यथाज्ञानं सोपि सर्वतपोमयः ॥
मंत्रेषु सकलेष्वेव देशिकोनात्र संशयः ॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥ हवनादीन्दशांशेन
कृत्वा तत्साधयेद्ध्रुवं ॥ यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयं ॥ मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधान
तः ॥ स्पर्धामुद्धूय सततं लक्ष्मीर्वाणी वसेत्ततः ॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्स
कृत् ॥ दशवर्षसहस्राणां पूजायाः फलमाप्नुयात् ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥ कंठे
वा दक्षिणे बाहौ सोपि विष्णुर्न संशयः ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ महादानानि यान्येव प्रा
दक्षिण्यं भुवस्तथा ॥ कलां नार्हंति तान्येव सकृदुच्चारणात्ततः ॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्न
रः ॥ त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत् ॥ इदं कवचमज्ञात्वा भजेद्यः पुरुषोत्तमं ॥ शतलक्षप्रज
प्तोपि न मंत्रः सिद्धिदायकः ॥ इति सनत्कुमारतंत्रे त्रैलोक्यमंगलं नाम कवचं ॥ अथ शिवस्तोत्रं ॥ परायोग्नि
मरुद्व्योमप्रथमेशोन्नहद्भूमिरूपिणे ॥ सर्वभूतांतरस्थाय शंकराय नमो नमः ॥ अनंतः कृतवासाय अक्षयायाक्षरात्म
मने ॥ अतींद्रियाय महसे शाश्वताय नमो नमः ॥ स्थूलसूक्ष्मविभागाद्यामनिर्देश्याय संभवे ॥ भवाय भ
वभक्ताय दुःखहंत्रे नमोस्तु ते ॥ तत्त्वमार्गाविभक्ताय तप्ततपसां फलदायिने ॥ चतुर्वर्गप्रदानाय सर्वेशाय
नमो नमः ॥ आदिमध्यांतशून्याय निरस्ताशेषभीतये ॥ योगिध्येयाय महते निर्गुणाय नमो नमः ॥ वि
श्वात्मने विचित्राय विचित्रसलिलेंदुमौलये ॥ कंदर्पदर्पनाशाय कालहंत्रे नमो नमः ॥ विषाशनाय विहर
वृषस्कंधमुपेयुषे ॥ सरिहामेश्च माद्यदू कपर्दाय नमो नमः ॥ शुद्धाय शुद्धभावाय शुद्धानामंतरात्म
ने ॥ पुरांतकाय पुण्याय पुण्यनाम्ने नमो नमः ॥ तुष्टाय निजभक्तानां भुक्तिमुक्तिप्रदायिने ॥ शिवसंसे

निवासायविश्वरूपस्त्रोनमोनमः॥त्रिमूर्त्तेमूलभूतायत्रिनेत्रायादिसंभवे॥त्रिधाम्नांधामरूपायज्जनू
मध्यायनमोनमः॥देवास्सरोह्निरोरत्नकिरणाहणितांघ्रये॥कंलायनिजकोलायेरन्नाढ्यायनमोनमः॥
स्तोत्रेनानेनप्रजांमाप्रीणयेज्जगतःपतिं॥भुक्तिमुक्तिप्रदंनत्स्यासर्वैश्वपरमेश्वरं॥इतिशिवस्तोत्रं
अथशिवकवचं॥भगवनूदेवदेवेशसर्वाम्नायप्रपूजितः॥सर्वंमेकथितंदेवकवचंनप्रकाशितं॥प्रा
सादाख्यस्यमंत्रस्यकवचंमेप्रकाशय॥सर्वरक्षाकरंदेवयदिस्नेहोस्तिमांप्रति॥श्रीभगवानुवाच॥
प्रासादमंत्रकवचस्यवामदेवऋषिः पंक्तिछंदः सदाशिवोदेवतासाधकाभीष्टसिद्धयेविनियोगः॥
शिरोमेसर्वदापातुप्रासादाख्यःसदाशिवः॥षडक्षरस्वरूपोमेवदनंतुमहेश्वरः॥पंचाक्षरात्माभग
वान्भुजौमेपरिरक्षतु॥मृत्युंजयस्त्रिबीजात्मआयुरक्षतुमेसदा॥वटमूलसमासीनोदक्षिणा
मूर्तिरव्ययः॥सदामांसर्वदापातुषट्त्रिंशार्णःस्वरूपधृक्॥द्वाविंशार्णात्मकोरुद्रःकुक्षिंमेपरिरक्ष
तु॥त्रिवर्णात्मानीलकंठःकंठंरक्षतुसर्वदा॥चिंतामणिर्बीजरूपोअर्द्धनारीश्वरोहरः॥सदारक्ष
तुमेगुह्येसर्वसंपत्प्रदायकः॥एकाक्षरस्वरूपात्माकूटरूपीमहेश्वरः॥मार्त्तंडभैरवोनित्यंपादौमे
परिरक्षतु॥तुंबराख्योमहाबीजस्वरूपस्त्रिपुरांतकः॥सदामांरणभूमौचरक्षतुत्रिदशाधिपः॥
ऊर्द्धमूर्द्धनिमीशानोममरक्षतुसर्वदा॥दक्षिणास्यंतत्पुरुषोव्यान्मेगिरिनायकः॥अघोराख्योमहा
देवःपूर्वास्यंपरिरक्षतु॥वामदेवःपश्चिमास्यंसदामेपरिरक्षतु॥उत्तरास्यंसदापातुसद्योजात
स्वरूपधृक्॥इत्थंरक्षाकरंदेविकवचंदेवदुर्लभं॥प्रातःकालेपठेद्यस्तुसोभीष्टफलमाप्नुयात्॥
पूजाकालेपठेद्यस्तुकवचंसाधकोत्तमः॥कीर्त्तिःश्रीकांतिमेधायुर्बुद्धिर्जीवलिभवं॥कंठेयोधा
रयेदेतत्कवचंमत्स्वरूपकं॥युद्धेजयमवाप्नोतिद्यूतेवादेचसाधकः॥कवचंधारयेद्यस्तुसा
धकोदक्षिणेभुजे॥देवमानुष्यगंधर्वानश्यास्तस्यनसंशयः॥कवचंशिरसायस्तुधारयेद्यतमा
नसः॥करस्थास्तस्यदेवेशित्रिणिमाद्यष्टसिद्धयः॥भूर्जपत्रेलिखित्वाविद्यांशुक्लपदेनवेष्टितां॥

राजतो द्वारसंनिविष्टं स्तवाच्च धारयेत्सुधीः ॥ संप्राप्य महतीं लक्ष्मीं मंते मदे हरूपधकं ॥ यस्मै कस्मै न दा
तव्यं न प्रशस्तं कदाचन ॥ शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥ अन्यथा सिद्धिहानिः स्यात्स
त्यमेतन्मनोरमे ॥ तव स्नेहात्मया देवि कथितं कवचं शुभं ॥ न देयं कस्यचिद्भद्रे यदीच्छेदात्मनो हितं
यो र्चयेत् गंधपुष्पाद्यैः कवचं मन्मुखोदितं ॥ तेनार्चिता महादेवि सर्वदेवा न संशयः ॥ इति भैरवतंत्रे
सदाशिवकृत कवचं ॥ अथ बटुकस्तोत्रं ॥ कैलासशिखरासीनं देवदेवं जगद्गुरुं ॥ शंकरं परिपप्रच्छ पा
र्वती परमेश्वरं ॥ श्रीपार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु ॥ आपदुद्धारणं मंत्रं स
र्वसिद्धिप्रदं नृणां ॥ सर्वेषां चैव भूतानां हितार्थं वांछितं मया ॥ विशेषतस्तु राज्ञां वै शांतिपुष्टिप्रसा
धनं ॥ अंगन्याससमायुक्तं बीजन्याससमन्वितं ॥ वक्तुमर्हसि देवेश मम हर्षविवर्द्धनं ॥ श्रीभगवा
नुवाच ॥ शृणु देवि महामंत्रमापदुद्धारहेतुकं ॥ सर्वदुःखप्रशमनं सर्वशत्रुनिबर्हणं ॥ अपस्मारा
दिरोगाणां ज्वरादीनां विशेषतः ॥ नाशनं स्मृतिमात्रेण मंत्रराजमिमं प्रिये ॥ ग्रहराजभयानां च नाश
नं सुखवर्द्धनं ॥ स्नेहाद्वक्ष्यामि ते मंत्रं सर्वसारमिमं प्रिये ॥ सर्वकामार्थदं मंत्रं राज्यभोगप्रदं नृणां ॥
आपदुद्धरणं मंत्रं वक्ष्यामीति विशेषतः ॥ प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् ॥ बटुकायेति वै पश्चादा
पदुद्धारणाय च ॥ कुरुद्वयं ततः पश्चाद्बटुकाय पुनः क्षिपेत् ॥ देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये ॥ मंत्रो
द्धारमिमं प्रिये ॥ मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभं ॥ अप्रकाश्यमिमं मंत्रं सर्वशक्तिसमन्वितं
॥ स्मरणादेव मंत्रस्य भूतप्रेतपिशाचकाः ॥ विद्रवंति भयार्ता वै कालरुद्रादिव प्रजाः ॥ पठेद्वा पाठये
द्वापि पूजयेद्वापि पुस्तकं ॥ नाग्निचौरभयं वापि ग्रहराजभयं तथा ॥ न च मारीभयं तस्य सर्वत्र सुखवा
न्भवेत् ॥ आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसंपदः ॥ भवंति सततं तस्य पुस्तकस्यापि पूजनात् ॥
पार्वत्युवाच ॥ य एष भैरवो नाम आपदुद्धारको मतः ॥ त्वया च कथितो देव भैरवः कल्प उत्तमः ॥ तस्य
नामसहस्राणि अयुतान्यर्बुदानि च ॥ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥ श्रीभगवानुवाच ॥

यस्तत्संकीर्त्तयेद्देव तत्सर्वं तंत्र निबर्हणं ॥ सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥ शृणु देवि प्रवक्ष्या
मि भैरवस्य महात्मनः ॥ आपदुद्धारकं स्तोत्रं नामाष्टशतमुत्तमं ॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारकं ॥ स
र्वकामार्थदं देवि साधकानां सुखावहं ॥ देहांगन्यासकं चैव पूर्वं कुर्यात्समाहितः ॥ भैरवं मूर्ध्नि विन्यस्य ललला
टे भीमदर्शनं ॥ अक्ष्णोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनं ॥ क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् ॥
क्षेत्राख्यं नाभिदेशे तु कट्यां सर्वाघनाशनं ॥ त्रिनेत्रमुर्वोर्विन्यस्य जंघयो रक्तपायिनं ॥ पादयोर्देवदेवेशं स
र्वांगे वटुकं न्यसेत् ॥ एवं न्यासविधिं कृत्वा तदनंतरमुत्तमं ॥ नामाष्टशतकस्यापि छंदोनुष्टुबुदाहृतं ॥
बृहदारण्यको नाम ऋषिश्च परिकीर्त्तितः ॥ देवता कथिता चेह सद्भिर्वटुकभैरवः ॥ भैरवो भूतनाथश्च भू
तात्मा भूतभावनः ॥ क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥ स्मशानवासी मांसाशी खर्परासीम
खांतकृत् ॥ रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः ॥ करालः कालशमनः कलाकाष्टातनुः कविः ॥
त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः ॥ अभिरुर्भैर
वीनाथो भूतपो योगिनीपतिः ॥ धनदो धनहारी च धर्मवान्प्रतिभानवान् ॥ नागहारो नागकेशो व्योमके
शः कपालभृत् ॥ कालः कपालमाली च कमनीयः कलानिधिः ॥ त्रिलोचनो ज्वलन्नेत्रः त्रिशिखी च त्रिलो
कपाल ॥ त्रिवृत्ततनयो डिंभः शांतः शांतजनप्रियः ॥ वटुको वटुवेशश्च खट्वांगवरधारकः ॥ भूताध्यक्षः
पशुपतिः भिक्षुकः परिचारकः ॥ धूर्तो दिगंबरः सौरी हरिणः पांडुलोचनः ॥ प्रशांतः शांतिदः शुद्धः शंकर
प्रियबांधवः ॥ अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तमोपहः ॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः ॥ भू
धरो भूधराधीशो भूपतिर्भूधरात्मजः ॥ कंकालधारी मुंडी च नागयज्ञोपवीतवान् ॥ जृंभनो मोहनः स्तंभी मार
णः क्षोभनस्तथा ॥ शुद्धनीलांजनप्रख्यो दैत्यहा मुंडभूषितः ॥ बलिभुक् बलिभूतात्मा कामी कामपराक्र
मः ॥ सर्वापत्तारको दुर्गो दुष्टभूतनिषेवितः ॥ कामी कलानिधिः कांतः कामिनीवशकृद्वशी ॥ सर्वसिद्धिप्रदो
वैद्यः प्रभविष्णुः प्रभाववान् ॥ अष्टोत्तरशतं नाम भैरवस्य महात्मनः ॥ मया ते कथितं देवि रहस्यं सर्व
कामिकं ॥ य इदं पठति स्तोत्रं नामाष्टशतमुत्तमं ॥ न तस्य दुरितं किंचिन्न रोगेभ्यो भयं तथा ॥

नश्यत्यभो भयं किंचित्प्राप्नोति मानवं स्वन्वित ॥ पालकानां भयं नैव पठेत्स्तोत्रमनन्यधीः ॥ मारीभये राजभये त
था चौराग्निजे भये ॥ औत्पातिके महाघोरे तथा दुःस्वप्नदर्शने ॥ बंधने च महाघोरे पठेत्स्तोत्रं समाहितः ॥
सर्वे प्रशमनं यांति भयाद्भैरवकीर्तनात् ॥ एकादशसहस्रं तु पुरश्चरणमुच्यते ॥ त्रिसंध्यं यः पठेद्देवि
संवत्सरमतंद्रितः ॥ स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषां ॥ षण्मासान्भूमिकामस्तु सजप्त्वा ल
भते महीं ॥ राजशत्रुविनाशाय जपेन्मासाष्टकं पुनः ॥ रात्रौ वारत्रयं चैव नाशाय सर्वशत्रुणां ॥ जपेन्मा
सत्रयं रात्रौ राजानं वशमानयेत् ॥ धनार्थी च सुतार्थी च दारार्थी यस्तु मानुषः ॥ पठेद्वारत्रयं यद्वा
वारमेकं तथा निशि ॥ धनं पुत्रांस्तथा दारान्प्राप्नुयान्नात्र संशयः ॥ रोगी रोगात्प्रमुच्येत देवि सत्यं न सं
शयः ॥ यान्यान्समीहते कामांस्तांस्तान्प्राप्नोति निश्चितं ॥ अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित् ॥
सत्कुलीनाय शांताय ऋजवे दंभवर्जिते ॥ दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदं ॥ ध्यानं वक्ष्यामि दे
वस्य यथा ध्यात्वा पठेन्नरः ॥ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसं ॥ अष्टबाहुं त्रिनयनं चतुर्बा
हुं द्विबाहुकं ॥ भुजंगमेखलं देवमग्निवर्णं शिरोरुहं ॥ दिगंबरं कुमारीशं बटुकाख्यं महाबलं ॥ खट्वां
गमसिपाशं च शूलं चैव ततः पुनः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ नीलजीमूतसंकाशं नीलांजन
चयप्रभं ॥ दंष्ट्राकरालवदनं नूपुरांघैरलंकृतं ॥ आत्मवर्णसमोपेतसारमेयसमन्वितं ॥ ध्यात्वा जपेत्सु
संहृष्टः सर्वान्कामानवाप्नुयात् ॥ एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमं ॥ भैरवाय प्रहृष्टाभूत्स्वयं चैव
महेश्वरी ॥ करकलितकपालः कुंडली दंडपाणिस्तरुणतिमिरनीलव्यालयज्ञोपवीती ॥ क्रतुसमयसप
र्याविघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानां ॥ इति विश्वसारोद्धारे आपदुद्धारकल्पे
भैरवस्तवराजः समाप्तः ॥ अथ भैरवीस्तोत्रं ॥ स्कलानपान्यात्रिपुरां स्तोष्ये भीष्टफलाप्तये ॥ यया व्रजंति
तां लक्ष्मीं मनुजाः सुरपूजितां ॥ प्रसादयति शूलेरपि लक्ष्मसपां जानेति ने वजगदादिमनादिमूर्तिं ॥
तस्मादहं कुचनतां कुचनन कुंकुमाभ्यां स्फुटां स्तुमः सकलवाङ्मयमातृभूतां ॥ १ ॥ सद्यः समुद्य
तसहस्रदिवाकरीभां विद्याक्षसूत्रवरदाभयचिह्नहस्तां ॥ नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां

सालारहाररुचिरां त्रिपुरे भजामि ॥२॥ सिंदूरप्रकररुचिरं कुचभारनम्रं जन्मांतरेषु कृतपुण्यफलैकगम्यं
अन्योन्यभेदकलहाकुलमानसास्ते जानंति किं जडधियस्तव रूपमंब ॥३॥ स्थूलां वदंति मुनयः श्रुत
यो गृणंति सूक्ष्मां वदंति वचसामधिवासमन्ये ॥ त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपा
ररूपां वुराज्ञीं ॥४॥ चंद्रावतंसकलितां शारदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि भावयामि ॥ त्वां पुस्तकं ज
पवटीममृताढ्यकुंभं व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्रां ॥५॥ शंभुस्त्वमद्रितनयाकलितार्धभागो
विष्णुस्त्वमंब कमलापरिबद्धदेहः ॥ पद्मोद्भवः त्वमसि वागधिवासभूमिस्तेषां क्रिया च जगति त्रिपुरे त्व
मेव ॥६॥ आश्रित्य वाग्भवबीश्चतुरः परादीन्भावान्पदेहितान्समुदीरयं ॥ नीमकुंठादिभिश्चरणोः
परदेवतां त्वां सच्चिन्मयीं हृदि कदापि न विस्मरामि ॥७॥ आकुंच्य वायुमवजित्य च वैरिषट्कं आलोकयंति
श्चलधिया निजनासिकाग्रम् ॥ ध्यायंति मूर्ध्नि कमलेंदुकलावतंसं तद्रूपमंब कृतिनस्तरुणार्कमित्रं ॥८॥
त्वां प्राप्य मन्मथरिपोर्वपुरर्धभागं सृष्टिं करोति जगतामिति वेदवादः ॥ सत्यं तदद्रितनये जगदेकमा
तर्नेचिरशेषजगतां स्थितिरेव न स्यात् ॥९॥ स्नानं विधाय कुसुमैः सुरपादपानां पीठे तवांबकन
काचगह्वरेषु ॥ गायंति सिद्धवनिताः सह किंनरीभिर्विवादियानकरसाजनेत्रपद्मा ॥१०॥ विद्युद्विलास
वपुषः श्रियमुद्वहंतीं यांतीं स्वनामलवनांकितराजधानीम् ॥ सौषुम्नवर्त्मकमलानि विकासयंतीं देवीं भजे
हृदि परामृतसिक्तगात्रीं ॥११॥ आनंदजन्मभवनं भवनं नवानां श्रुतीनां चैतन्यमात्रभुवि देवतयाश्रयामि ॥
ब्रह्मेशविष्णुनिरुपासितपादपद्मं सौभाग्यजन्मवसतिं त्रिपुरे यथावत् ॥१२॥ सर्वार्थभाविभवनंस्य
जतीं दुरभीमालद्धिजर्त्तिपुनरर्कतनुसकृतास्याः ॥ ब्रह्मास्मि कोहरति ललसेकलं युगांते तां शारदां मन
सि जातु न विस्मरामि ॥१३॥ नारायणीति नरकार्णवतारिणीति गौरीति खेदशमनीति सरस्वतीति ॥
ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये बहुधा भजंति ॥१४॥ ये स्तुवंति जगन्मातः श्लो
कैः द्वादशभिः क्रमात् ॥ त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिं ॥ इति श्रीनेरयीस्तवराजः समाप्तः ॥

अथश्रीभैरवतंत्रेउमामहेश्वरसंवादे भैरवीस्तवः॥ अथ महाभैरवीकवचं॥ देव्युवाच॥ भैरव्याः सकला
विद्याः श्रुताश्चाधिगता मया॥ सांप्रतं श्रोतुमिच्छामि कवचं यत्पुरोदितं॥ त्रैलोक्यविजयं नाम शास्त्रास्त्र
विनिवारणं॥ त्वत्तः परतरो नाथ कः कृपां कर्तुमर्हति॥ ईश्वर उवाच॥ शृणु पार्वति वक्ष्यामि सुंदरी प्राण
वल्लभे॥ त्रैलोक्यविजयं नाम कवचं मंत्रविग्रहं॥ पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत्॥ जघान स
कलान् दैत्यान् यद्धृत्वा मधुसूदनः॥ ब्रह्मा सृष्टिं वितनुते यद्धृत्वाभीष्टदायकः॥ धनाधिपः कुबेरोपि वास
वः स्त्रिदशेश्वरः॥ यस्य प्रसादादीशोहं त्रैलोक्यविजयी विभुः॥ न देयं परशिष्येभ्योऽसाधकेभ्यः कदाच
न॥ पुत्रेभ्यो किमुतान्येभ्यो दद्यान्मृत्युमवाप्नुयात्॥ भैरव्याः कवचस्यापि दक्षिणामूर्तिरेव च॥ विराट् छंदो
जगद्धात्री देवता बालभैरवी॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः॥ अधरो बिंदुमानाद्यः कामतो
क्लीं हा सौ युतः॥ भृगुः मनुः स्वरयुतः सर्गबीजत्रयात्मकः॥ बालैषा मे शिरः पातु बिंदुनादयुतापि सा॥ भालं
पातु कुमारीशा संगहीना कुमारिका॥ दृशौ मे पातु वाग्बीजं कर्णयुग्मं सदावतु॥ कामबीजं सदा पातु घ्राणयुग्मं
सदावतु॥ सरस्वती महावीला जिह्वां पातु शुचिप्रभा॥ हस्त्रैं कंठं हसकलरीं स्कंधौ पातु हसौं भुजौ॥ पंचमी भैरवी
पातु करौ हसौं सदावतु॥ हृदयं हसकलरीं वक्षः पातु हसौः स्तनौ॥ पातु मां भैरवीदेवी चैतन्यरूपिणी मम॥ ह
स्रैं पातु सदा पार्श्वयुग्मं हसकलरीं सदा॥ कुक्षिं पातु हसौं मध्ये भैरवी भुवि दुर्लभा॥ ऐं ईं ओं मे मध्यदेशं बीज
विद्या सदावतु॥ ह्स्रैं पृष्ठं सदा पातु नाभिं हसकलह्रीं सदा॥ पातु क्लीं कटिं पातु वह्निरूपा भैरवी मम॥ ह्सैं हसरैं
सक्थिनी पातु हसकलरीं सदावतु॥ गुह्यदेशं ह्सैं पातु जननी पातु हसकलरीं सदावतु॥ गुह्यदेशे ह्सैं पातु जन
नी भैरवी मम॥ संपत्प्रदा सदा पातु हैं जंघे हसकलीं पदे॥ पातु हसौः सर्वदेहं भैरवी सर्वदावतु॥ हसैं मामवतु
मान्यां हसकलीं पावके वतु॥ ह्सौः दक्षिणे पातु भैरवी चक्रसंस्थिता॥ ह्रीं क्लीं ह्रौं मां सदावतु नैरृत्यां चक्रभै
रवी॥ ह्सैं कल ह्रीं हसरौः पश्चिमे पातु भैरवी॥ ह्रीं ह्रीं ह्रौं पातु वायव्ये हं हं पातु सदोत्तरे॥ ह्रीं ह्रीं पातु सदैशा
न्यां दक्षिणे कालिकेवतु॥ ऊर्ध्वं प्रागुक्तबीजानि रक्षंतु मामधः स्थले॥ दिग्विदिक्षु स्वाहा पातु कालिका खड्ग
धारिणी॥

ॐ ह्रीं स्त्रीं हूं फट् स ताराः सर्वत्र मां सदावतु ॥ संग्रामे कानने दुर्गे तोये तरंगदुस्तरे ॥ खड्गं कर्त्री च रासा ग्रा
स ह्रीं मां परिरक्षतु ॥ इति ते कथितं देवि सारात्सारतरं महत् ॥ त्रैलोक्यविजयं नाम कवचं परमाद्भुतं ॥ यः
पठेत्प्रयतो भक्त्या पूजायाः फलमाप्नुयात् ॥ स्पर्धामुद्धूय भवने लक्ष्मीर्वाणी वसेत्ततः ॥ यः शत्रुभीतो रणका
तरो गाभीतो वने नागमहीनालये ॥ राजादेस्सभायां प्रतिवादिनो वा राक्षसः प्रकोपाद्द्रुतसंकुलाद्वा ॥ प्रचंडदंडाक्ष
मनाश्च भीतो गुरोः प्रकोपादपि कृच्छ्रसाध्यात् ॥ अभ्यर्च्य देवीं प्रपठेत्त्रिसंध्यं स स्यान्महेशप्रतिमो जयी
च ॥ त्रैलोक्यविजयं नाम कवचं मन्मुखोद्गतं ॥ विलिख्य भूर्जे गुटिकां स्वर्णस्थां धारयेद्यदि ॥ कंठे वा द
क्षिणे बाहौ त्रैलोक्यविजयी भवेत् ॥ तद्गात्रं प्राप्य शस्त्राणि भवंति कुसुमानि च ॥ लक्ष्मीः सरस्वती तस्य
निवसेद्भवने मुखे ॥ एतत्कवचमज्ञात्वा यो जपेद्भैरवीपरां ॥ बालां वा प्रजपेद्विद्यां दरिद्रो मृत्युमाप्नुयात् ॥
इति श्रीरुद्रयामले तंत्रे त्रैलोक्यविजयं नाम भैरवीकवचं समाप्तं ॥ अथ श्रीविद्यास्तोत्रं ॥ कल्याणवृष्टि
भिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमंगलदीपिकाभिः ॥ सेवाभिरंब तव पादसरोजमूले नाकारि किं
मनसि भाग्यवतां जनानां ॥१॥ एतावदेव जननि स्पृहणीयमेतत्त्वद्वंदनेषु सलिलस्थगिते च नेत्रे ॥ सान्निध्य
मुद्यदरुणायुतसोदरस्य त्वद्विग्रहस्य सुधया परयाप्लुतस्य ॥२॥ ईशत्वनामकलुषाः कति नाम संति
ब्रह्मादयः प्रतिदिनं प्रलयाभिभूताः ॥ एकः स एव जननि स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत्प्रणतिं क
रोति ॥३॥ लब्ध्वा सकृत्त्रिपुरसुंदरि तावकीनं कारुण्यकंदलितकांतिभरं कटाक्षं ॥ कंदर्पचापसुभगा
स्त्वयि भक्तिभाजः संमोहयंति तरुणीर्भुवनत्रयेपि ॥४॥ ह्रींकारमेव तव नाम गृणंति वेदा मातस्त्रि
कोणनिलये त्रिपुरे त्रिनेत्रे ॥ तत्संस्मृतौ यमभटाभिभवं विहाय दीव्यंति नंदनवने सह लोकपालैः ॥५॥
हंतुः पुरामधिगलं परिपीयमानः क्रूरः कथं न भविता गरलस्य वेगः ॥ आश्वासनाय यदि मातरिदं
तवार्धं देहस्य शश्वदमृतप्लुतशीतलस्य ॥६॥ सर्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रिसर
सिरुहयोः प्रणामः ॥ किंच स्फुरन्मुकुटमुज्वलमातपत्रं द्वे चामरे च महतीं वसुधां ददाति ॥७॥ कल्प

क्रमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरंब भवत्कटाक्षैः ॥ आलोकय त्रिपुरसुंदरि मामनाथं त्वय्येव
भक्तिभरितं त्वयि बद्धदृष्टिम् ॥ ८ ॥ हंतेतरेष्वपि निधाय मनांसि च्चान्ये भक्तिं वहंति किल पामरदैवतेषु ॥
त्वामेव देवि मनसा हनुस्मरामि त्वामेव नौमि शरणं जननित्वमेव ॥ ९ ॥ लक्ष्येषु सत्स्वपि तवाक्षिविलोकना
नामालोकय त्रिपुरसुंदरि मां कथंचित ॥ नूनं मया तु सदृशं करुणैकपात्रं जातो जनिष्यति जनो न च जा
यते वा ॥ १० ॥ ह्रीं ह्रीं मिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराधिवासे ॥ मालाकिरीटमदवा
रणमाननीया स्तान्सेवते मधुवले स्वयमेव लक्ष्मीः ॥ ११ ॥ सम्पत्कराणि सकलेंद्रियनंदनानि साम्राज्यदा
नकुशलानि सरोरुहाक्षि ॥ त्वद्वंदितानि दुरिताहरणोद्यतानि मामेव मातरनिशां कलयंति तुत्यं ॥ १२ ॥
कल्पोपसंहरणकल्पितलांडवस्य देवस्य खंडपरशोः परभैरवस्य ॥ पाशांकुशेक्षुशरपुष्पबाण
सा संक्षिणी विजयते तव मूर्तिरेका ॥ १३ ॥ लग्नं सदा भवतु मातरिदं तवार्यं तेजः परं बहलकुंकुमपंक
शोणं ॥ भास्वत्किरीटममृतांशुकलावतंसं मध्ये त्रिकोणमुदितं परमामृतार्कं ॥ १४ ॥ ह्रींकारत्रयसंपु
टेन महता मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित ॥ तस्य क्षोणिभुजो भवंति वशगा
लक्ष्मीः चिरस्थायिनी वाणी निर्मलसूक्तिभावभरिता जागर्ति दीर्घं वयः ॥ १५ ॥ इति श्री[illegible]विरचितंक
ल्याणीस्तोत्रं ॥ अथ किंकिणीस्तोत्रं ॥ अथ स्तवं प्रवक्ष्यामि त्रिपुरार्णवसंस्थितं ॥ शुद्धबिंदुः स्वलक्षजन
निष्क्रीयते न स्फुलतायां ॥ काकाकीर्तिः कुलकमलिनी प्राप्यते नार्चितायां किं किं सौख्यं लक्षरचरनुते प्राप्य
ते न लक्ष्यां ॥ कंकं योगं त्वयि न निरतं ते चित्तमालंबितायां ॥ १ ॥ सर्गसंसर्गसंरंजनस्फारितात्रोपवि
भ्रमे ॥ विश्वेंदुमंडलालेस्थे नमस्ते हरवल्लभे ॥ २ ॥ जगदाकारदनोद्योगभोगविन्यासयोगिनि ॥ स्थि
तिभावस्थिते देवि नमः स्थाणुप्रिये शिवे ॥ ३ ॥ भावाभावपथं भावस्वभावोदयकर्मणि ॥ चैतन्यपंच
के देवि नमस्तस्यै हरांगणे ॥ ४ ॥ स्पष्टतानवभयध्वंसी प्रजितोमिशुभंकरी ॥ स्फुतातंसांद्रिलं देवि द
दासि करुणाकरे ॥ ५ ॥ परमानंदवाचाब्धीलूपे तेजःस्वरूपिणी ॥ देवदंद्रशिरोरत्ननिर्घृष्टचरणां

वुजे ॥६॥ चिद्बिंबं जिमहासत्तामात्रे मात्रेण मोक्षफले ॥ स्थिति स्थितिरूपसंहारहेतुभूते सनातनि ॥७॥ गुणत्र
यातिमवाशिलं जगतः कूरणेच्छया ॥ अनुग्रहाय भक्तानां गृहीते दिव्यविग्रहे ॥८॥ नत्स्वस्य मे नियप्रजायु
रूस्य परमेश्वरि ॥ ऐहिकामुष्मिकीं सिद्धिं देहि त्रिंशद्वरे रिले ॥९॥ तापत्रयपरिम्लानभाजिनें नाहि मां
त्रिवे ॥ नान्यं वदामि न श्टेणोमि न चिंतयामि न चिंतयामि न भजामि न चाश्रयामि ॥ मत्त्वा त्वदीयचरणां
वुजमादरेण मां त्राहि देवि रूपया मयि देहि सिद्धिं ॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य च ॥ यन्नून
मतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि ॥ द्रव्यहीनं क्रियाहीनं श्रद्धामंत्रविवर्जितं ॥ तत्सर्वं रूपया देवि क्षमस्व
त्वं दयानिधे ॥ यन्मया क्रियते कर्म जन्म महत्स्वल्पमेव वा ॥ तत्सर्वं च जगद्धात्री क्षंतव्यमयमंजलिः ॥ इति
किंकिणीस्तोत्रं ॥ अथ प्रचंडचंडिकास्तोत्रं ॥ नाभौ शुद्धसरोजमध्यविलसद्बंधूकपुष्पारुणं भास्वद्भास्व
रमंडलं तदुदरे तद्योनिचक्रं महत् ॥ तन्मध्ये विपरीतमैथुनरतां प्रद्युम्नतत्कामिनी पृष्ठस्थां तरुणा
र्ककोटिविलसत्तेजःस्वरूपां शिवां ॥१॥ वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्तृकां प्रत्या
लीढपदां दिगंतवसनां मुन्मुक्तकेशाव्रजां ॥ छिन्नात्मीयशिरः समुल्लसदसृग्धारां पिबंतीं परां
बालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीं ॥२॥ वामादन्यत्र नालं बहुवहल– गलद्रक्तधा
राभिरुच्चैः पायंतीमस्थिभूषां करकमललसत्कर्तृकामुग्ररूपां ॥ रक्तामारक्तकेशीमुपगतनय
नां वर्णिनीमात्मशक्तिं प्रत्यालीढोरुपादामरुणितनयनां योगिनीं योगिमुद्रां ॥३॥ दिग्वस्त्रां मुक्तकेशीं
प्रलयघनघटाघोररूपां प्रचंडां दंष्ट्रादुष्प्रेक्षवक्त्रोदरविवरलसल्लोलजिह्वाग्रभासां ॥ विद्यु
ल्लोलाक्षियुग्मां हृदयतटलसद्भोगिभीमां सुमूर्तिं सद्यश्छिन्नात्मकंठप्रगलितरुधिरैर्डाकिनीव
र्धयंतीं ॥४॥ ब्रह्मेशानाच्युताद्यैः शिरसि विनिहितामंदपादारविंदैराप्तैर्योगिमुख्यैः प्रतिपदम
निशं चिंतितां चिंत्यरूपां ॥ संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तामिष्टां तामि
ष्टदात्रीं कलिकलुषहरां चेतसा चिंतयामि ॥५॥ उत्पत्तिस्थितिसंहतीर्घटयितुं धत्ते त्रिरूपां तनुं

त्रैगुण्या ऽजगतां यदीयविकृतिः ब्रह्माच्युतः शूलभृत् ॥ लाभाद्य प्रकृतिस्मराभिमनसा सर्वार्थ
संसिद्धये अस्याः सारपदारविंदयुगलं चालं भजे लेमराः ॥६॥ अलिपिद्विलपुरं श्रीयोगप्रजार
तो हं बहुविघ्नजनभावारंभसंभाविलो हम् ॥ पशुजनविरजो हं भैरवी संस्थितो हं गुरुचरणपरो हं भैर
वो हं शिवो हं ॥७॥ इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषितं पुरा ॥ सर्वसिद्धिप्रदं साक्षान्महापातकनाशनं ॥
यः पठेत्प्रातरुत्थाय देव्याः संनिहितो पुनः ॥ तस्य सिद्धिर्भवेद्देवि वांछितार्थप्रदायिनी ॥ धनं धान्यं सुतं
ऽजायां हयं हस्तिनमेव च ॥ वसुंधरां महाविद्यामष्टौ सिद्धीर्भवे ध्रुवं ॥ वैयाघ्राजिनरंजितस्वजघने
रम्ये प्रलंबोदरे खर्वानिर्वचनीयपर्वसुभगे मुंडावली मंडिते ॥ कत्रुं कुंदरुचिं विचित्ररचितां ज्ञाने
दधाने पदे मातर्भक्तजनानुकंपिनि महामायेस्तु तुभ्यं नमः ॥ इति प्रचंड चंडिकास्तोत्रं समाप्तं ॥
अथ कवचं ॥ देव्युवाच ॥ कथिता छिन्नमस्ताया या या या विद्याः सुगोपिताः ॥ त्वया नाथेन देवेश कृता
श्चाधिगता मया ॥ इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ त्रैलोक्यविजयं नाम कृपया कथय प्र
भो ॥ भैरव उवाच ॥ शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते ॥ त्रैलोक्यविजयं नाम कवचं सर्वमोहनं
सर्वविद्यामयं साक्षात्सुरासुरनमस्कृतम् ॥ धारणात्पठनादीशः त्रैलोक्यविजयी विभुः ॥ ब्रह्मा नारायण
णो रुद्रो धारणात्पठनाद्यतः ॥ कर्ता पाता च संहर्ता भुवनानां सुरेश्वरि ॥ न देयं परशिष्येभ्यो ऽभक्तेभ्यो
पि विशेषतः ॥ देयं शिष्याय भक्ताय प्राणेभ्योप्यधिकाय च ॥ देव्याश्छिन्नमस्तायाः कवचस्य च भैरवः ॥
ऋषिर्विराट् छंदः सुदेवता छिन्नमस्तका ॥ त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्तितः ॥ हुंकारो मे शि
रः पातु छिंनमस्ता न तु प्रभा ॥ ह्रीं क्लीं ऐं त्र्यक्षरी भालं पातु रक्तादिगंबरी ॥ श्रीं ह्रीं क्लीं ऐं दृशौ पातु मुं
डकर्त्रि धराधिपा ॥ सा विद्या प्रणवाद्यंता श्रुतियुग्मं सदावतु ॥ वज्रवैरोचनीये हुं फट् स्वाहा च
घ्राणदिका ॥ घ्राणं पातु छिन्नमस्ता समुंडकर्त्रिधारिणी ॥ श्रीं माया कूर्च वाग्बीजैर्वज्रवैरोचनीय
हुं ॥ फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी ॥ स्वपार्श्वे वर्णिनी पापा सृग्धारा पायिनी मुदा ॥

रदनं सर्वतः पातु छिन्नमस्ता च मूर्क्तिका ॥ मुंडकर्त्रि धरा रक्ता साधकाभीष्टदायिका ॥ वर्णिनी डाकिनी यु
क्ता सापि मामभितोवतु ॥ रमाद्या पातु जिह्वां च लज्जाद्या पातु कंठकम् ॥ कूर्चाद्या हृदयं पातु वागाद्या
स्तनयुग्मकं ॥ रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी ॥ मायया पुटिता पातु नाभिदेशे दिगं
बरी ॥ कूर्चेन पुटिता देवी पृष्ठदेशे सदावतु ॥ वाग्बीजपुटिता चैव मध्यं पातु सशक्तिका ॥ ईश्वरी कूर्चबी
जे वज्रवैरोचनीयकं ॥ फट् स्वाहेति मता विद्या कोटिसूर्यसमप्रभा ॥ छिन्नमस्ता सदा पातु ऊरुयु
ग्मे सशक्तिका ॥ ह्रीं हूं वर्णिनी जानुं श्रीं ह्रीं हूं डाकिनी पदं ॥ सर्वविद्यास्थिता नित्या सर्वांगं मे सदावतु ॥ प्रा
च्यां पायादेकलिंगा योगिनी पावकेवतु ॥ दक्षिणे डाकिनी पातु भीममहाभैरवी च मां ॥ नैरृत्यां सततं पातु
भैरवी पश्चिमेवतु ॥ इंद्राक्षी पातु वायव्ये असितांगी पातु चोत्तरे ॥ संहारिणी सदा पातु शिवकोणे सक
र्तृका ॥ इत्यष्टशक्तयः पातु दिग्विदिक्षु सकर्तृका ॥ क्रीं क्रीं क्रीं मां पातु पूर्वे हुं हुं मां पातु पावके ॥ ह्रीं ह्रीं
मां दक्षिणे पातु दक्षिणे कालिकेवतु ॥ क्रीं क्रीं क्रीं चैव नैरृत्यां हुं हुं मां पश्चिमेवतु ॥ ह्रीं ह्रीं पातु मरुत्कोणे स्वा
हा पातु सदोत्तरे ॥ महाकाली खड्गहस्ता शिवकोणे सदावतु ॥ तारो माया वधूः कूर्चं फट्कारोयं महाम
नुः ॥ खड्गकर्तृधरा तारा चोर्ध्वदेशे सदावतु ॥ ह्रीं स्त्रीं हुं फट् पाताले पातु नीलसरस्वती ॥ इति ते
कथितं देव्याः कवचं मंत्रविग्रहं ॥ यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः प्रभुः ॥ सुरासुरमुनींद्रा
णां कर्त्ता हर्त्ता भवेत्स्वयं ॥ यस्याज्ञया मधुमती याति सा साधकालिके ॥ भूतिन्याद्याश्च योगिन्यो
डाकिन्याद्याश्च भैरवीः ॥ आज्ञां गृह्णन्ति तास्तस्य कवचस्य प्रसादतः ॥ एतद्देवपरं ब्रह्म कवचं मन्मु
खोद्गतं ॥ देवीमभ्यर्च्य गंधाद्यैर्मूलेनैव पठेत्सकृत् ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ भू
र्जे विलिख्य चैतद्गुटिकां कांचनस्थितां ॥ धारयेद्दक्षिणे बाहौ कंठे वा यदि वान्यतः ॥ सर्वैश्वर्ययुतो
भूत्वा त्रैलोक्यं वशमानयेत् ॥ तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनांबुजे ॥ ब्रह्मास्त्रादीनि शस्त्राणि त
द्गात्रे यांति सौम्यतां ॥ इदं कवचमज्ञात्वा यो भजेच्छिन्नमस्तकां ॥ सोपि शस्त्रप्रहारेण मृत्युमा

घोलिस्तवरं ॥ इति भैरवीतंत्रे त्रैलोक्यविजयंनामछिन्नमस्ताकवचं ॥ अथकर्पूरस्तोत्रं ॥ कर्पूरं म
ध्यमांत्यस्वरपररहितं सेंदुवामाक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधू त्रिःकृतं ये पठंति ॥ तेषां गद्या
निपद्यानिच मुखकुहरादुल्लसंत्येव वाचः स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिंगतानाम्
॥१॥ ईशानः सेंदुवामः श्रवणपरिगतो बीजमन्यन्महेशी हूं हूं ते मंदचेता यदि जपति जनो वारमेकं क
दाचित् ॥ जित्वा वाचामधीशं धनदमपि चिरं मोहयत्यंबुजाक्षीवृंदं चंद्रार्धचूडे प्रभवति स म
होघोरबाणावतंसे ॥२॥ ईशो वैश्वानरस्थः शशिधरविलसद्वामनेत्रेण युक्तो बीजं ते द्वंद्वमन्य
द्विगलितचिकुरे कालिके ये जपंति ॥ द्वेष्टारं घ्नंति ते च त्रिभुवनमपि ते वश्यभावं नयंति सृक्क
द्वंद्वास्रधाराद्वयधरवदने दक्षिणे कालिकेति ॥३॥ ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुंडं तथा
धः सव्ये भीतिं वरंच त्रिजगदघहरे दक्षिणे कालिकेच ॥ जप्त्वैतन्नाममेवातवविमलतनुं भावयंत्येत
दंबे तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यंबकस्य ॥४॥ वर्गाद्यं वह्निसंस्थं विधुरतिललितं
तत्त्रयं कूर्चयुग्मं लज्जायुग्मं च पश्चात्स्मितमुखि तदधष्ठद्वयं योजयित्वा ॥ मातर्ये वै स्मरंति स्मरह
रमहिले भावयंतः स्वरूपं ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति ॥५॥ प्रत्येकं
वा द्वयं वा त्रयमपि च परं बीजमत्यंतगुह्यं त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयंतो जपंति ॥
तेषां नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे वाग्देवी देवि मुंडस्रगतिशयलसत्कंठपीन
स्तनाढ्ये ॥६॥ गतासूनां बाहुप्रकरकृतकांचीपरिलसन्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनय
नां ॥ श्मशानस्थे तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ॥७॥
शिवाभिः घोराभिः शवनिवहमुंडास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हरवधूं ॥ प्रवि

ऽंसं तुष्टा मुपरि स्फुरल्लेनालियुवत्वीं सदा त्वा ध्यायं तेलि स्फुच्चिरं पिनलेषां परिच्छिन्नः ॥८॥ वरामस्त्वे किंवज
ननिर्वयमुच्चैर्जडधियो न धाताना पीशो हरिरपि न ते वेत्ति परमं ॥ तथापि त्वं कृत्तिर्मुखरयति वास्मात्कृम
स्मि लेलरै तलक्ष्यं लब्धं न खलु पशुरोषः समुचितः ॥९॥ समंताद्दापीनस्तनजघनधृग्यौवनवती रता
सक्तो नक्तं यदि जपति नक्तस्तवमनुम् ॥ विधासारूपं ध्यायनालिलच्छिकुरस्तस्य वशगा समस्ताः सि
द्धौघा भुवि चिरं लरंजीवलिकृविः ॥१०॥ समास्वस्थीभूतां जपति विपरीतां यदि तदा विचिंत्य त्वां ध्या
यन्नतिशयमहाकालसुरतां ॥ तदा लस्यं क्षोणीतलविहरमाणस्य विदुषः करे नोजे नरूपाः स्मरहरव
धूसिद्धिविवहाः ॥११॥ प्रसूते संसारं जननि जगतीं पालयति वा समस्तं क्षित्यादि प्रलयसमये संहर
ति च ॥ अतस्त्वां धातापि त्रिभुवनपतिः श्रीपतिरपि महेशोपि प्रायः सकलमपि किं स्तौमि च वती ॥१२
अनेके सेवंते भवदधिकगीर्वाणनिवहा विमूढास्ते मातः किमपि नहि जानंति परमं ॥ समाराध्यामा
द्यां हरिहरविरिंच्यादिविबुधैः प्रपन्नोस्मि स्वैरं रतिरससमहानंदनिरतां ॥१३॥ धरित्री कीलालं शुचि
रपि समीरोपि गगनं त्वमेका कल्याणी गिरिरमणी कालि सकलं ॥ स्तुतिः का मे मातस्तव करुण
या मामगतिकं प्रसन्ना त्वं भूया भवमनुभवं न भूयान्मम जनुः ॥१४॥ श्मशानस्थः स्वस्थो गलितचि
कुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम् ॥ जपंस्त्वत्प्रत्येकं मनुमपि तव ध्याननिर
तो महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥१५॥ गृहे सम्मार्जन्या परिगलितवीर्यं हि चिकुरं समूलं म
ध्याह्ने वितरति चितायां कुजदिने ॥ समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं गजारूढो याति क्षिति
परिवृढः सत्कविवरः ॥१६॥ स्वपुष्पैराकीर्णं कुसुमधनुषो मंदिरमहो पुरो ध्यायं ध्यायं जपति यदि भ
क्तस्तव मनुम् ॥ स गंधर्वश्रेणीपतिरिव कवित्वामृतनदीनदीनः पर्यंते परमपदलीनः प्रभवति ॥१७॥
त्रिपंचारे पीठे शवशिवहृदि स्मेरवदनां महाकालेनोच्चैर्मदनरसलावण्यनिरतां ॥ समासक्तो नक्तं

स्वयमपि रतानंदं निरतो जनो यो ध्यायेत्वामपि जननि स स्यात्स्मरहरः ॥१८॥ सतो मांसं दैवे रंपललम
पिमार्जारमसितं परं चोष्ट्रं मेषं नरमहिषयोश्छागमपि वा ॥ बलिं ते पूजायामपि वितरतां मर्त्यवसतां न किं
सिद्धिः सर्वा प्रतिदिनमहो वा प्रभवति ॥१९॥ वशी लक्षं मंत्रं प्रजपति हविष्याशनरतो दिवा मातर्युष्म
च्चरणकमलध्याननिपुणः ॥ परं नक्तं नग्नो निधुवनविनोदेन च मनुं जपेल्लक्षं स स्यात्स्मरहरसमा
नः क्षितितले ॥२०॥ इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः स्वरूपाख्यं पादांबुजयुगलपूजाविधियु
तं ॥ निशार्धे वा पूजासमयमथ वा यस्तु पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥
कुरंगाक्षीवृंदं तमनुसरति प्रेमतरलं वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ॥ रिपुः कारागारं
कलयति च तं केलिकलया चिरं जीवन्मुक्तः स भवति सुभक्तः प्रतिजनुः ॥२२॥ इति लेकथितं स्तोत्रं
सर्वसिद्धिप्रवर्तकं ॥ एतत्कालाद्दक्षिणायास्तवं जानाति नान्यथा ॥२३॥ इति वीरतंत्रे हरविरचितं श्यामा
स्तोत्रं ॥ अथ श्यामाकवचं ॥ भैरव्युवाच ॥ कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो ॥ इदानीं श्रोतुमि
च्छामि कवचं पूर्वसूचितं ॥ त्वमेव शरणं नाथ पाहि मां दुःखसंकटात् ॥ भैरव उवाच ॥ रहस्यं शृणु वक्ष्या
मि भैरवि प्राणवल्लभे ॥ श्रीजगन्मंगलं नाम कवचं मंत्रविग्रहं ॥ पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्
क्षणात् ॥ नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरम् ॥ योगेशं क्षोभमनयद्यद्धृत्वा च रघूद्वहः ॥ वरदृ
प्तान् जघानैव रावणादि निशाचरान् ॥ यस्य प्रसादादीशोऽपि त्रैलोक्यविजयी विभुः ॥ एवं हि सकला देवाः
सर्वसिद्धीश्वराः प्रिये ॥ श्रीजगन्मंगलस्यास्य कवचस्य ऋषिः शिवः ॥ छंदोऽनुष्टुप् देवता च कालिका
दक्षिणेरिता ॥ जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु ॥ योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः ॥
शिरो मे कालिका पातु क्रींकारैकाक्षरी परा ॥ क्रीं क्रीं क्रीं मे ललाटं पातु कालिका खड्गधारिणी ॥ हूं हूं पातु नेत्रयु
ग्मं ह्रीं ह्रीं पातु श्रुती मम ॥ दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरि ॥ क्रीं क्रीं क्रीं रसनां पातु हूं हूं

पातु कपोलकं मम ॥ वदनं सकलं पातु ह्रीं ह्रीं स्वाहास्वरूपिणी ॥ द्वाविंशत्यक्षरी स्कंधौ महाविद्याखिलप्रदा ॥
खड्गमुंडधरा काली सर्वांगमभितोवतु ॥ ह्रीं ह्रीं ह्रीं त्र्यक्षरी पातु चामुंडा हृदयं मम ॥ ऐं हुं ॐ स्तनद्वंद्वं
ह्रीं फट् स्वाहा ककुत्स्थलं ॥ अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका ॥ क्रीं क्रीं हुं हुं ह्रीं ह्रीं करौ पातु षडं
क्षरी मम ॥ ह्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेवतु ॥ क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्षरी ॥
क्रीं ह्रीं दक्षिणे कालिके क्रीं ह्रीं पातु कटिद्वयं ॥ काली दशाक्षरी विद्या स्वाहा मामोरुयुग्मकं ॥ ॐ ह्रीं ह्रीं मे स्वा
हा पातु कालिका जानुनी सदा ॥ काली हृन्नामविद्येयं चतुर्वर्गफलप्रदा ॥ क्रीं क्रीं क्रीं ह्रीं पातु मे गुल्फे दक्षि
णे कालिकेवतु ॥ क्रीं ह्रूं ह्रीं स्वाहा पातु चतुर्दशाक्षरी मम ॥ खड्गमुंडधरा काली वरदा भयधारिणी
विद्याभिः सकलाभिः सा सर्वांगमभितोवतु ॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ॥ विप्रचित्ता
तथोग्रोग्रप्रभा दीप्ता घनत्विषः ॥ नीला घना बलाका च मात्रा मुद्रामिता च मां ॥ एताः सर्वाः खड्गध
रा मुंडमालाविभूषणाः ॥ रक्षंतु स्वायुधैर्दिक्षु मां विदिक्षु यथा तथा ॥ इति ते कथितं दिव्यं कवचं प
रमाद्भुतं ॥ श्रीजगन्मंगलं नाम महाविद्यौघविग्रहं ॥ त्रैलोक्याकर्षणं ब्रह्मन् कवचं मन्मुखोदितं ॥
गुरुपूजां विधायाथ विधिवत्प्रपठेत्ततः ॥ कवचं त्रिःसकृद्वापि यावज्जीवं च वा पुनः ॥ एतच्छतार्द्ध
मावृत्य त्रैलोक्यविजयी भवेत् ॥ त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः ॥ महाकविर्भवेन्मासा
त्सर्वसिद्धीश्वरो भवेत् ॥ पुष्पांजलिं कालिकायै मूलेनैव पठेत्सकृत् ॥ शतवर्षसहस्राणां पूजा
याः फलमाप्नुयात् ॥ भूर्जे विलिख्य तच्चैतत् स्वर्णस्थं धारयेद्यदि ॥ शिखायां दक्षिणे बाहौ कंठे वा
धारयेद्यदि ॥ त्रैलोक्यं मोहयेत्क्रुद्धः त्रैलोक्यं चूर्णयेत्क्षणात् ॥ पुत्रवान् धनवान् श्रीमान् नाना
विद्यानिधिर्भवेत् ॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः ॥ नाशमायांति हे देवि नात्र का
र्या विचारणा ॥ मृतवत्सा च या नारी वंध्या वा मृतपुत्रिणी ॥ कंठे वा वामबाहौ वा कवचस्यास्य

धारणात्॥ बद्धपद्मा जीवनत्सा मनवस्येव न संशयः॥ न देयं परशिष्येभ्यो भक्तेभ्योपि विशेषतः॥
शिष्येभ्यो भक्तियुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात्॥ स्पर्द्धामुद्धूय ध्रुमला वाग्देवी मंदिरे मुख
पौत्रालं स्थैर्यमास्याय निवसत्येव निश्चिलं॥ इदं तु नत्व महसालो यो भजेत्कालिदक्षिणां॥ ज्ञात
लक्ष्मप्रजप्तोपि लस्य न सिध्यति॥ स स्नास्त्रा घालेमाप्नोति सोचिरान्मृत्युमाप्नुयात्॥ इति भैर
वतंत्रे भैरवभैरवी संवादे कूपामाकूवचं॥ अथ तारास्तोत्रं॥ मातर्नीलसरस्वती प्रणम
तां सौभाग्यसंपत्प्रदे प्रत्यालीढपदास्थिते शवहृदि स्मेराननां भोरुहे॥ फुल्लेंदीवरलोचनत्रययुते कर्त्री
कपालोत्पले खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये॥१॥ वाचामीश्वरि भक्तकल्पलतिके सर्वा
र्थसिद्धीश्वरि गद्यप्राकृतपद्यजालरचनासर्वत्रसिद्धिप्रदे॥ नीलेंदीवरलोचनत्रययुते कारुण्यवा
रांनिधे सौभाग्यामृतवर्षणेन सततं संसिंच त्वमस्मादृशं॥२॥ खर्वे गर्वसमूहपूरिततनो सर्पादिवे
षोज्वले व्याघ्रत्वक्परिवीतसुंदरकटिव्याधूतघंटांकिते॥ सद्यः कृत्तगलद्रजःपरिमिलन्मुंडद्व
यीमूर्द्धजग्रंथिश्रेणिनृमुंडदामललिते भीमे भयं नाशय॥३॥ मायानंगविकाररूपललनाविं
दुर्द्धचंद्रात्मिके हुंफट्कारमयि त्वमेव शरणं मंत्रात्मिके मादृशां॥ मूर्तिस्ते जननि त्रिधामघटि
तास्थूलातिसूक्ष्मापरा वेदानां नहि गोचरा कथमपि प्राप्तानुतामाश्रये॥४॥ त्वत्पादांबुजसे
वया सुकृतिनो गच्छंति सायुज्यतां तस्य श्रीपरमेश्वरि त्रिनयनब्रह्मादिसाम्यात्मनः॥ संसारां
बुधिमज्जने पटुतनून्देवेंद्रमुख्यान्सुरान्मातस्त्वत्पदसेवने हि विमुखान्किं मंदधीः सेवते॥५॥
मातस्त्वत्पदपंकजद्वयरजोमुद्रांककोटीरिणस्ते देवा जयसंगरे विजयिनो निःशंकमंके गताः॥ दे
वोहं भुवने न मे सम इति स्पर्द्धा वहंतः परे तत्तुल्या नियतं यथा शशिरवी नाशं व्रजंति स्वयं॥६॥
त्वन्नामस्मरणात्पलायनपरान्द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागा

धिपाः ॥ दैत्या दानवपुंगवाश्च खचरा व्याघ्रादिका जंतवो डाकिन्यः प्रपितां नद्धाश्च मनुजं मालक्ष्य दूरं भ्रमं-
तले ॥ लक्ष्मीः सिद्धिगणाश्च पादुकमुखाः सिद्धास्तथा वैरिणां स्तंभश्चापि रणांगणे गजघटा स्तंभ-
स्तथा मोहनं मालस्त्वत्पदसेवया खलु नृणां सिध्यंति ते ते गुणाः ॥ कांतिकांतमनोभवस्य भवति क्षु-
द्रोपि वाचस्पतिः ॥ ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः ॥ प्रातर्मध्याह्नकाले च सायाह्ने
नियतः शुचिः ॥ लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत् ॥ लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भो-
गान्यथेप्सितान् ॥ कीर्तिं कांतिं च नैरुज्यं सर्वेषां प्रियतां व्रजेत् ॥ विख्यातिं चापि लोकेषु प्राप्यां-
ते मोक्षमाप्नुयात् ॥ इति नीलतंत्रे तारास्तोत्रं ॥ अथ ताराकवचं ॥ ईश्वर उवाच ॥ कोटितंत्रेषु गोप्या
हि विद्यातिभयमोचिनी ॥ दिव्यं हि कवचं तस्याः शृणुष्व सर्वकामदं ॥ ताराकवचस्य अक्षोभ्य ऋषिस्त्रिष्टुप्छं-
दो भगवती तारा देवता सर्वमंत्रसिद्धये विनियोगः ॥ प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी ॥ ह्रींका-
रः पातु ललाटे बीजरूपा महेश्वरी ॥ स्त्रींकारः पातु वदने लज्जारूपा महेश्वरी ॥ हुंकारः पातु हृदये भवानी
शक्तिरूपधृक् ॥ फट्कारः पातु सर्वांगे सर्वसिद्धिफलप्रदा ॥ खर्वा मां पातु देवेशी गंडयुग्मे भयापहा ॥ नि-
म्नोदरी सदा स्कंधयुग्मे पातु महेश्वरी ॥ व्याघ्रचर्मावृता कटिं पातु देवी शिवप्रिया ॥ पीनोन्नतस्तनी पातु पार्श्व-
युग्मे महेश्वरी ॥ रक्तवर्तुलनेत्रा च कटिदेशे सदावतु ॥ ललज्जिह्वा सदा पातु नाभौ मां भुवनेश्वरी ॥ करा-
लास्या सदा पातु लिंगोदरी हरप्रिया ॥ लिंगाग्रैकजटा पातु जंघायां विघ्ननाशिनी ॥ प्रेतखड्गधरा देवी जा-
नुचक्रे महेश्वरी ॥ नीलवर्णा सदा पातु जानुनी सर्वदा मम ॥ नागकुंडलधरा देवी पातु पादयुगे तथा ॥ ना-
गहारधरा देवी सर्वांगे पातु सर्वदा ॥ नागकंकणधरा देवी पातु मां विघ्ननाशिनी ॥ कर्त्रीहस्ता सदा पातु वि-
वादे शत्रुमध्यतः ॥ ब्रह्मरूपधरा देवी संग्रामे पातु मां सदा ॥ नागरूपधरा देवी पातु मां विघ्नसंकुले ॥ ना-
गाभिनंदकटी पातु देवी मां सर्वकर्मसु ॥ छिन्नमुंडधरा देवी ज्ञाने पातु मां सदा ॥ चितामध्यस्थिता दे-
वी मारणे पातु मां सदा ॥ द्वीपिचर्मधरा देवी पुत्रदाराधनादिषु ॥ अलंकारान्विता देवी पातु मां हर-

रक्तरूपा ॥ रक्ष रक्ष नदीकुंजे हुं हुं फट् फट् समन्विता ॥ बीजरूपा महादेवी पर्वते पातु मां सदा ॥ मणिधरि व
ज्रिणि देवि महाप्रलङ्घिवेलया ॥ रक्ष रक्ष सदा हूं हूं ॐ ह्रीं स्वाहा महेश्वरी ॥ पुष्पकेतुरजोर्हीति काननेपा
तु मां सदा ॥ ॐ ह्रीं वज्रपुष्पे हुं फट् प्रांतरे सर्वकामदा ॥ ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी
हूं स्वाहा शक्तिसंयुक्ता दारान्रक्षतु सर्वदा ॥ ॐ आं हूं फट् स्वाहा महेशानी पातु द्यूते हरप्रिया ॥
ॐ ह्रीं सर्वविद्यानुसारिणी देवी विघ्नान्मां सर्वदावतु ॥ ॐ पवित्रवज्रभूमे हुं फट् स्वाहा समन्विता ॥
त्वरिता पातु मां देवी सर्वविघ्नविनाशिनी ॥ ॐ आः खरे खे वज्ररे खे हुं फट् स्वाहा समन्विता ॥ पाताले
पातु मां देवी लाकिनी नामसंज्ञिता ॥ ह्रीं कारे पातु मां पूर्वे शक्तिरूपा महेश्वरी ॥ स्त्रीं कारे पातु देवे
शी वधूरूपा महेश्वरी ॥ हूं स्वरूपा महादेवी पातु मां क्रोधरूपिणी ॥ फूं स्वरूपा महादेवी उत्तरे पातु मां
सदा ॥ पश्चिमे पातु मां देवी हूं स्वरूपा हरप्रिया ॥ मध्ये मां पातु देवेशी हूं स्वरूपा नगात्मजा ॥ नीलवर्णा
सदा पातु सर्वत्र वाग्भवे सदा ॥ भवानी पातु भवने सर्वैश्वर्यप्रदायिनी ॥ विद्यादानरता देवी पातु व
क्त्रे सरस्वती ॥ शास्त्रे वादे च संग्रामे जले च विषमे गिरौ ॥ भीमरूपा सदा पातु श्मशाने भयनाशिनी ॥ भूते
प्रेतालये घोरे दुर्गा मां श्रीघनावतु ॥ पातु नित्यं महेशानी सर्वत्र शिवदूतिका ॥ कवचस्य तु माहा
त्म्यं नाहं वर्षशतैरपि ॥ शक्नोमि गदितुं देवि भवेत्तस्य फलं च यत् ॥ पुत्रदारेषु बंधूनां सर्वदेशे च
सर्वदा ॥ न विद्यते भयं तस्य नृपपूज्यो भवेच्च सः ॥ शुचिर्भूत्वाशुचिर्वापि कवचं सर्वकामदम् ॥
प्रपठन्वा स्मरन्मर्त्यो दुःखशोकविवर्जितः ॥ सर्वशास्त्रे महेशानि कविराड् भवति ध्रुवं ॥ सर्ववागी
श्वरो मर्त्यो लोकवश्यो धनेश्वरः ॥ रणे द्यूते विवादे च जयस्तस्य भवेद्ध्रुवं ॥ अष्टम्यां मंगल
दिने चतुर्दश्यामथापि वा ॥ संध्यायां देवदेवेशि लिखेद्यन्त्रं समाहितः ॥ मघायां श्रवणे वापि च रे
वत्यां वा विशेषतः ॥ सिंहराशौ गते चन्द्रे कर्कटस्थे दिवाकरे ॥ मीनराशौ गुरौ याते वृश्चिकस्थे शनौ

नैऋत्ये ॥ लिखित्वा धारयेद्यस्तु उत्तराभिमुखो वदन् ॥ स्मशाने प्रांतरे वापि शून्यागारे विशेषतः ॥ नि
शायां तु लिखेन्मंत्रं तस्य सिद्धिरखंडिता ॥ भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि ॥ आनधारण
योगेन धीरयेद्यस्तु मंत्रवित्तमः ॥ अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा ॥ इति श्रीरुद्रयाम
ले तंत्रे उग्रतारा कवचं ॥ अथ गुह्यषोढा ॥ शृणु देवि प्रवक्ष्यामि गुह्यषोढाह्वयं प्रिये ॥ न प्रकाश्यमिदं
व्यापि तारायाः कुलपूरक्षणे ॥ तारं तु मातृकावर्णपुटितं मातृकास्थले ॥ तेनैव पुटितं वर्णं न्यसे
दत्रैव पार्वति ॥ शक्तिबीजं तथा देवि विन्यस्तव्यं प्रयत्नतः ॥ वधूबीजं ततो देवि विन्यस्तव्यं समाहि
तैः ॥ वर्मबीजं महेशानि न्यसनीयं तदंतरं ॥ अस्त्रबीजं तथान्यस्य सकलं तदनंतरं ॥ गुह्यषोढाह्व
यं देवि न प्रकाश्यं कदाचन ॥ इदं च सिद्धिदा लोके तथा देवास्फुरे पुनः ॥ अन्यत्र प्रसितं कार्यं न प्रजानुज
पस्तथा ॥ इति ते कथितं किंचिद्रहस्यं सकरं सुंदरि ॥ न प्रकाश्यं तथा कस्य दद्यात् पुनः यथा तथा ॥ इति
श्रीरुद्रयामले गुह्यषोढा ॥ अथ वगलामुखीस्तोत्रं ॥ चलत्कनककुंडलोल्लसितचारुगंडस्थलीं
लसत्कनकचंपकद्युतिमदिंदुबिंबाननां ॥ गदाहतविपक्षकां कलितलोलजिह्वां चलां स्मरामि वगलामुखीं
विमुखवाङ्मनस्स्तंभिनीं ॥ १ ॥ पीयूषोदधिमध्यचारुविलसद्रक्तोत्पले मंडपे सिंहासनमौ
लिपातितरिपुंप्रेतासनाध्यासिनीं ॥ स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमामि
त्थं ध्यायति यांति तस्य सहसा सद्योथ सर्वापदः ॥ २ ॥ देवि त्वच्चरणांबुजार्चनकृते यः पी
तपुष्पांजलिं भक्त्या वामकरे निधाय च मनुं मंत्री मनोज्ञाक्षरं ॥ पीठध्यानपरोथ कुंभकवशा
द्बीजं स्मरेत् पार्थिवं तस्यामित्रमुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ॥ ३ ॥ वादी मूकति
रंकति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खंजति ॥ गर्वी खर्वति स
र्वविच्च जडति त्वन्मंत्रिणा यंत्रितः श्रीनित्ये वगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ॥ ४ ॥ मंत्र

स्तावरं लब्ध्वा विपक्षदलनं स्तोत्रं पवित्रं च लेयं त्वं वादिनियंत्रणं त्रिजगतां चैत्रं चरित्रं महत् ॥ मातः श्री
वगलेति नाम कलितं यस्यास्ति जंतोर्मुखे लभ्यो मन्त्र हलीव संसदि मुखस्तंभो भवेद्वादिनां ॥ ५ ॥
दुष्टस्तंभनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं भूभृत्संशमनं चलन्मृगदृशां चेतस्समाकर्षणं ॥ सौ
भाग्यैकनिकेतनं समदृशः कारुण्यपूर्णेक्षणं मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुः ॥ ६ ॥
मातर्भंजय मद्विपक्षवदनं जिह्वां च संकीलय ब्राह्मीं मुद्रय देवदैत्यधिषणामुग्रां गतिं स्तंभय ॥ शत्रूं
श्चूर्णय देवि तीक्ष्णगदया गौरांगि पीतांबरे विघ्नौघं बगले हर प्रणमतां कारुण्यपूर्णेक्षणे ॥ ७ ॥
मातर्भैरवि भद्रकालि विजये वाराहि विश्वाश्रये श्रीविद्ये समये महेशि बगले कामेशि वामे र
मे ॥ मातंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे दासोहं शरणागतः करुणया विश्वेश्वरि त्राहि
मां ॥ ८ ॥ संरंभे चौरसंघे प्रहरणसमये बंधने व्याधिमध्ये विद्यावादे विवादे प्रकुपितनृपतौ दि
व्यकाले निशायां ॥ वश्ये वा स्तंभने वा रिपुवधसमये निर्जने वा वने वा गच्छंस्तिष्ठंस्त्रिकालं यदि प
ठति शिवं प्राप्नुयादाशु धीरः ॥ ९ ॥ त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी योषाकर्षण
कारिणी पशुमनस्संमोहसंदायिनी ॥ जिह्वाकीलनभैरवी विजयते ब्रह्मादिमंत्रो यथा विद्याल
क्ष्मीं सर्वसौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिं ॥ १० ॥ मौनं ध्यानं च गौरवं च समतारोग्यसौख्यं प्रा
प्तं तत्कलिकाले स्मिन् नरेण ॥ यत्कृतं जपसन्नाहं गदितं परमेश्वरि ॥ दुष्टानां निग्रहार्थाय तद्गृहा
ण नमोस्तु ते ॥ ११ ॥ इति रुद्रयामले तंत्रे बगलामुखी स्तोत्रं ॥ लं त्रो हो च तुष्यष्टु पञ्चाराः ॥
सर्वोपचारमंत्राश्चिलारी हस्ताः कृत्यायामिन्नमः इत्यवधाः कार्यः ऐं क्लीं श्रीं पाद्यं कृत्यायामिन्नमः एवं अ
र्घ्यं कृत्यायामिन्नमः इति क्रमेण आसनारोपणं अरुणदुकूलोत्तरीयं आलेपनं मंडपवेदा
नं चंदनागरुकुंकुमकस्तूरीमदकर्पूरकस्तूरीगोरोचनादि लेपं गंधसर्वांगविलेपनं कुंदाभारस्य
कालागरुधूपं मल्लिकामालतीजालीचंपकाशोककमलपत्रसरगकुहरीपुन्नागकल्हारकुंभेसर्वर्तु

कुसुममालाभूषणमंडपप्रवेशनं ॥ भूषणमणिपीठोपवेशनं ॥ नवमणिमुकुटं चंद्रशकलं सी
मंतसिंदूरं ॥ तिलकरत्नं काळांजनं ॥ पालीयुगलं ॥ नासाभरणं ॥ अधरयावकं ॥ ग्रथनभूषणं ॥
कनकचित्रपदकं महापदकं ॥ मुक्तावलिं ॥ एकावलिं ॥ देवछंदकं ॥ केयूरयुगलचतुष्टयं वलयाव
लीं ॥ ऊर्मिकावलिं ॥ कांचीदाम ॥ कटिसूत्रं शोभाख्याभरणं ॥ पदकटकं ॥ रत्ननूपुरं ॥ पादांगुली
यकं ॥ एककरे पाशं ॥ अन्यकरे अंकुशं ॥ इतरकरे पौंड्रेक्षुचापं ॥ अपरे पुष्पबाणान् ॥ श्रीमाणिक्य
पादुकां ॥ समानवस्त्राभरणदेवताभिः ॥ सह महासिंहासनाधिरोहणं ॥ कामेश्वरांकोपवेशनं ॥ अ
मृतासवचषकं ॥ आचमनीयं कर्पूरवटिकां ॥ आनंदोल्लासविलासहासं ॥ मंगलारात्रिकं ॥ श्वेतछ
त्रं ॥ चामरयुगलं ॥ दर्पणं ॥ तालवृंतं ॥ गंधपुष्पं धूपदीपम् ॥ तांबूलं ॥ नैवेद्यं कल्पयेत् ॥ एतेषां मुच्चा
रणमभावे एतन्मंत्रैः जाप्यः ॥ तथा च नवरत्नेश्वरे ॥ चतुष्षष्ट्युपचारणमभावे तन्मंत्रं जपेत् ॥ त
त्रैव फलं विद्यात्साधकः स्थिरमानसः ॥ अष्टादशोपचाराः ॥ आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकं
स्नानं वासोपवीतं च भूषणानि च सर्वशः ॥ गंधं पुष्पं तथा धूपं दीपमन्नं च दर्पणं ॥ माल्यानुलेपनं चैव
नमस्कारविसर्जनं ॥ अष्टादशोपचारैस्तु मंत्री पूजां समाचरेत् ॥ अथ षोडशोपचाराः ॥ पाद्यार्घ्याच
मनीयं च स्नानं वसनभूषणे ॥ गंधपुष्पधूपदीपनैवेद्याचमनं तथा ॥ तांबूलमर्चनास्तोत्रं तर्पणं
च नमस्क्रिया ॥ प्रयोजयेत्प्रपूजायामुपचारांस्तु षोडश ॥ अथ दशोपचाराः ॥ पाद्यमर्घ्यं तथाचामं म
धुपर्कं चमनं तथा ॥ गंधादयो नैवेद्यांता उपचारा दश क्रमात् ॥ पंचोपचाराः ॥ गंधपुष्पं तथा धूपं दी
पं नैवेद्यमेव च ॥ अखंडफलमासाद्य कैवल्यं लभते ध्रुवं ॥ अथान्ये षोडशोपचारमंत्राः यथा ॥ उद्य
च्चंदनकुंकुमारुणपयोधाराभिराप्लावितं नानानर्घ्यमणिप्रवालघटितं दत्तं गृहाणांबिके ॥ आ
मृष्टं सुरसुंदरीभिरभितो हस्तांबुजैर्भक्तितो मातः सुंदरि भक्तकल्पलतिके श्रीपादुकामाद
रे ॥ १ ॥ देवेंद्रादिभिरर्चितं सुरगणैरादाय सिंहासनं चंचत्कांचनसंचयाभिरचितं चारुप्र

भा भास्वरं ॥९॥ सल्लच्चंपककेतकीपरिमलं तैलं महानिर्मलं गंधोद्वर्त्तनमादरेण तरुणीदक्षेण हस्तेन हाणं
विके ॥२॥ पश्चादेवि गृहाण शंभुगृहिणि श्रीसुंदरि प्रायशो गंधद्रव्यसमूहनिर्भरजलं धात्रीफलं
निर्मलं ॥ तत्केशान्परिशोध्य कंकतिकया मंदाकिनीस्रोतसि स्नात्वा प्रोज्वलगंधकं भवतु ते श्रीसुंद
रि त्वन्मुदे ॥३॥ सुराधिपतिकामिनीकरसरोजनालीधृतां सचंदनसकुंकुमागरुभरेण विभ्राजि
तां ॥ महापरिमलोज्वलां सरसशुद्धकस्तूरिकां गृहाण वरदायिनि त्रिपुरसुंदरि श्रीपदे ॥४॥ गंध
र्वामरकिंनरप्रियतमासंतानहस्तांबुजप्रस्तारैर्भ्रियमाणमुत्तमतरं काश्मीरजापिंजरं ॥ मातर्भा
स्वरभानुमंडललसत्कांतिप्रदानोज्वलं चैतन्निर्मलमातनोतु वसनं श्रीसुंदरि त्वन्मुदे ॥५॥ स्व
र्णाकल्पितकुंडले श्रुतियुगे हस्तांबुजे मुद्रिका मध्ये सारसना नितंबफलके मंजीरमंघ्रिद्वये ॥
हारो वक्षसि कंकणौ क्वणरणत्कारौ करद्वंद्वके विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोत्सवं स्तूयतां ॥६॥
ग्रीवायां धृतकांतिकांतपटलं ग्रैवेयकं सुंदरं सिंदूरं विलसल्ललाटफलके सौंदर्यमुद्राकरं ॥
राजत्कज्जलमुज्वलोत्पलदलश्रीमोचने लोचने तद्दिव्यौषधिनिर्मितं रचयतु श्रीशांभवि श्रीपदे ॥७॥
अमंदतरमंदरोन्मथितदुग्धसिंधूद्भवं निशाकरकरोपमं त्रिपुरसुंदरि श्रीपदे ॥ गृहाण मुखमीक्षि
तुं मुकुरबिंबमाविद्रुमैर्विनिर्मितमघच्छिदे रतिकरांबुजस्थायिनं ॥८॥ कस्तूरीद्रवचंदनाग
रुसुधाधाराभिराप्लाविलं चंचच्चंपकपाटलादिसुरभिद्रव्यैः सुगंधीकृतं ॥ देवस्त्रीगणमस्त
कस्थितमहारत्नादिकुंभव्रजैरंभः शांभवि संभ्रमेण विमलं दत्तं गृहाणांबिके ॥९॥ कल्हारोत्पल
नववैस्सुरभिणा नानारसस्रोतसा ताम्रांभोजनिवासिनी भगवति श्रीसुंदरीश्वज्जये ॥१०॥ मां
सीगुग्गुलुचंदनागरुवचः कर्पूरशैलेयजैर्माध्वीकैः सहकुंकुमैः सुरभिलैः सर्पिर्भिरामिश्रि
तैः ॥ सौभाग्यस्थितिमंदिरे मणिमये पात्रे भवत्प्रीतये धूपोयं सुरकामिनीविरचितः श्रीसुं
दरि त्वन्मुदे ॥११॥

घृतद्रवपरिस्फुरद्रुचिररत्नयष्ट्यान्वितो मया कल्पितः सचनसारवर्त्यान्वितो मया कल्पितः सचनसा
रवर्त्यान्वितस्तव त्रिपुरसुंदरि स्फुरतु देवि दीपो मुदे ॥१२॥ जातीसौरभनिर्भरं रुचिकरं शाल्योदनं
निर्मलं युक्तं हिंगुमरीचिजीरसुरभिद्रव्यान्वितैर्व्यंजनैः ॥ पक्वान्नेन सपायसेन मधुना दध्याज्यसं
मिश्रितं नैवेद्यं सुरकामिनीविरचितं श्रीसुंदरि त्वन्मुदे ॥१३॥ लवंगकलिकोज्वलं बहलनागवल्ली
दलं सजातिफलकोमलं सघनसारपूगीफलं ॥ सुधामधुरिमाकुलं रचितरत्नपात्रे स्थितं गृहाण
मुखपंकजे स्फुरितमंब ताम्बूलकं ॥१४॥ शरत्प्रभवचंद्रमःस्फुरितचंद्रिकासुंदरं लसत्सुरतरंगि
णीललितमौक्तिकाडंबरं ॥ गृहाण नवकांचनप्रभवदंडखंडोज्वलं महात्रिपुरसुंदरि प्रकटमातप
त्रं महत्तरं ॥१५॥ मालस्तनभुरमालनोलुसुभगस्त्रीभिः समीदोलितैश्शुभ्रैश्चामरबिंदुकुंदसदृशैः प्रस्वेद
दुःखापहं ॥ सद्योगस्सवसिष्ठनारदशुकव्यासादिवाल्मीकिभिः स्वचित्ते क्रियमाणएव कुरुतां श
र्मोलिवेदध्वनिः ॥१६॥ स्वर्गांगने मंगलवेणुवीणास्वनेरीनिनादेरुपगीयमाणं ॥ कोलाहलैराकुलितेल
वास्तु विद्याधरीनृत्यकलासुखाय ॥१७॥ देवि भक्तरसभावितवृत्ते प्रीयतां यदि कुतोपि लभ्यते ॥
तत्र लौल्यमिति सत्कुलमेकं जन्मकोटिभिरपीह लभ्यते ॥१८॥ एतैः षोडशभिः श्लोकैः रूपचारोपक
ल्पितैः ॥ यः परां देवतां स्तौति स तेषां फलमाप्नुयात् ॥ अथ द्रव्याणां निर्माल्यकालनिर्णयः ॥ तत्र यो
गिनीतंत्रे ॥ मणिमुक्तासुवर्णानि देवदत्तानि यानि च ॥ न निर्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च ॥ पटीशा
टी च षण्मासं नैवेद्यं दलमात्रतः ॥ मोदकं सूत्ररंध्रं चैव यामार्धेन महेश्वरि ॥ पट्टसूत्रं त्रिमासाश्च यज्ञ
सूत्रं त्वहःस्मृतं ॥ यावत्कुंकुमगंधे दत्तं परे मात्रं तथैव च ॥ जपाकुसुममाल्यं च निर्माल्यं सार्धयामतः ॥
माल्यं वै नूतनीरस्य पर्युषितत्वकस्य च ॥ यामार्धेन मते शानितां बरं दलमात्रतः ॥ न निर्माल्यं दा
मं च तथा बिल्वफलं प्रिये ॥ सौगंधिकं कदलीं च प्रयत्नेन निवेदयेत् ॥ कदलीबीजपूरं चैव दुग्धं पक्वं नि
वेदयेत् ॥ इति द्रव्याणां निर्माल्यकालनिर्णयः ॥ अथ रुद्राक्षमहात्म्यं ॥ क्षिरनायांच तस्य मोकूटेकुर्ली

यः चापि येन नरः ॥ रुद्राक्षं धारयेद्भक्त्या सत्योवं लोकमाप्नुयात् ॥ नववक्त्रं तु रुद्राक्षं धारयेद्वामबाहु
ना ॥ चतुर्दशमुखं चैव शिखायां धारयेद्बुधः ॥ एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ॥ अवध्यत्वं
प्रतिस्तोतो वह्निस्तंभं करोति च ॥ द्विवक्त्रो हरगौरीस्यात् गोवधाद्यघनीशकेत् ॥ त्रिवक्त्रोग्निस्त्रिज
न्मोत्थपापराशिं प्रनाशयेत् ॥ चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति ॥ पंचवक्त्रस्तु कं स्यात्तरगम्यान्न
स्य पापनुत् ॥ षड्वक्त्रस्तु गुहः साक्षाद्भ्रूणहत्यां व्यपोहति ॥ सप्तवक्त्रः स्वनंतः स्यात् स्वर्णस्तेया
घनुत्सदा ॥ विनायकोष्टवक्त्रः स्यात् सर्वानृतविनाशकेत् ॥ भैरवो नववक्त्रस्तु शिवसायुज्यका
रकः ॥ दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतपिशाचहा ॥ एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥ द्वा
दशास्यो भवेदर्कः सर्वकल्मषफलप्रदः ॥ त्रयोदशमुखः कामः सर्वकामफलप्रदः ॥ चतुर्दशास्यो
श्रीकंठो वंशोद्धारकरः परं ॥ निश्छिद्रोश्वस्वपक्षोश्वरुद्राक्षा धारणे स्मृताः ॥ पंचामृतं पंचगव्यं स्ना
नकाले प्रयोजयेत् ॥ रुद्राक्षस्य प्रतिष्ठायां मंत्रं पंचाक्षरं तथा ॥ ॐ त्र्यंबकादिमंत्रं स्तु ॥ ॐ त्र्यंबकं
यजामहे सुगंधिं पुष्टिवर्धनं ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ यथा ॐ ह्रीं अघो
रे ह्रीं कघोरतरे घोरे विना मंत्रेण यो दत्ते रुद्राक्षं भुवि मानवः ॥ स याति नरकं घोरं यावदिंद्राश्चतुर्दश ॥
ॐ ह्रूं ह्रूं सर्वतः सर्वसर्वांगेनमस्ते रुद्ररूपे ह्रूं ॥ अनेनापि च मंत्रेण रुद्राक्षस्य द्विजोत्तमः ॥ प्रतिष्ठां वि
धिवत्कुर्यात्ततो विधिवत्फलं लभेत् ॥ ततो यथा स्वमंत्रेण धारयेद्भक्तिसंयुतः ॥ तत्र क्रमेण मंत्राः ॥ ॐ
ॐ ह्रीं नमः ॥ ॐ ॐ नमः ॥ ॐ ॐ नमः ॥ ॐ ह्रीं नमः ॥ ॐ हूं नमः ॥ ॐ ॐ हूं नमः ॥ ॐ क्षौं क्षौं नमः ॥
ॐ नमो नमः ॥ रुद्राक्षदेहसंस्थेन कुकुर्यो म्रियते यदि ॥ सोपि रुद्रपदं याति किं पुनः मानवादयः ॥ सम्मतं वि
राति रुद्राक्षमालया देहसंस्थया ॥ यः करोति नरः पुण्यं सर्वं कोटिगुणो भवेत् ॥ यद्ददाति द्विजातिभ्यो रु
द्राक्षं भुवि षण्मुख ॥ तस्य प्रीतो भवेद्रुद्रः स्वपदं च प्रयच्छति ॥ इति पद्मपुराणे रुद्राक्षमाहात्म्यं ॥ स्कं
दपुराणे ॥

गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः ॥ अष्टवक्त्रो महासेन साक्षाद्देवो विनायकः ॥ एष्टोदं रुद्रकरे
णापि संस्पृष्टो ह्यगुरुस्त्रियं ॥ एवमादीनि पापानि अतिपापानि सर्वशः ॥ विघ्नास्तस्य च नश्यंति मुक्तो
याति परां गतिं ॥ गुह्येण ह्येतेषु सर्वेषु अष्टवक्त्रस्य धारणात् ॥ नववक्त्रो भैरवः स्याद्धारयेद्वाम
के भुजे ॥ कपिलं मुक्तिदं प्रोक्तं मम तुल्यमलो भवेत् ॥ लक्षकोटिसहस्राणि ब्रह्महत्यां करोति यः ॥
तत्सर्वं दहते शीघ्रं नववक्त्रस्य धारणात् ॥ दशवक्त्रो महासेन साक्षाद्देवो जनार्दनः ॥ ग्रहाश्चैव पि
शाचाश्चोरवेताला ब्रह्मराक्षसाः ॥ पन्नगाश्चैव नश्यंति दशवक्त्रस्य धारणात् ॥ वक्त्रैरेकादशै रुद्राक्षो
रुद्रा एकादश स्मृताः ॥ शिखायां धारयेन्नित्यं तस्य पुण्यफलं शृणु ॥ अश्वमेधसहस्रस्य वाजपे
यशतस्य च ॥ हेमशृंगश्च लक्षस्य सम्यग्दत्तस्य यत्फलं ॥ तत्फलं समवाप्नोति रुद्रैकादशधारणा
त् ॥ रुद्राक्षो द्वादशैर्वक्त्रैः कंठदेशे च धारयेत् ॥ आदित्यस्तुष्यते नित्यं द्वादशण्यव्यवस्थितः ॥ त्रयोद
शमुखः कामः सर्वकामफलप्रदः ॥ चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः ॥ इति रुद्राक्षसंस्कारः ॥ अथ
नैमित्तिकादिकर्मांगं प्रायश्चित्तमाह ॥ गौतमीये ॥ मध्ये कर्मणि वैगुण्ये नित्ये नैमित्तिके तथा ॥ सह
स्रं प्रजपेन्मंत्रं मूलं वा मुलमेव वा ॥ नित्ये सहस्रं प्रजपेन्नैमित्तिके तथा मुलं ॥ इति विष्णुविषयं ॥ अथा
न्यतंत्रराजे ॥ नित्यादिकर्मदोषाणां शांत्यै विधानातं जपेत् ॥ नैमित्तिके तु कर्मलोपे सहस्रं प्रजपेन्मनुं
पापसंकरे तु सर्वेषामेव पापानां शंकरे समुपस्थिते ॥ प्रायश्चित्तं तु तत्कर्म युतं मंत्रजापतः ॥ अ
थ विष्णुराधनमंत्राः ॥ गौतमीये ॥ यस्य दर्शनमिच्छंति देवा ब्रह्महरादयः ॥ कृपया देवदेवेश मम गे
सन्निधौ भव ॥ तस्य ते परमेशान स्वागतं स्वागतं च मे ॥ कृतार्थोनिग्रहीतोस्मि सफलं जीवितं
तु मे ॥ स्वागतोसि देवेश चिदानंदमयाच्युत ॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य च ॥ यद
पूर्णं भवेत्कृत्यं तदप्यभिमुखो भव ॥ इत्यावाहनमंत्रः ॥ मदुक्तिं लेशसंपर्कापरमानंदसंप्लुतः
तस्य ते परमेशान पाद्यं शुद्धाय कल्पये ॥ इति पाद्यं ॥ देवानामपि देवाय देवानां देवतात्मने ॥

आचामं कल्पयाम्येष स्वधयाकलितेऽनघे ॥ इत्याचमनं ॥ तापत्रयहरं दिव्यं परमानंदलक्षणं ॥ ताप
त्रयविनिर्मोक्षाय तवार्घ्यं कल्पयाम्यहं ॥ इत्यर्घ्यं ॥ सर्वकालुष्यहीनाय परिपूर्णस्वधात्मकं ॥ मधुप
र्कमिमं देव कल्पयामि प्रसीद मे ॥ इति मधुपर्कं ॥ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धि
माप्नोति तस्मै ते पुनराचमनीयकं ॥ आचमनं ॥ परमानंदबोधाब्धिनिमग्ननिजमूर्तये ॥ सांगोपां
गमिदं स्नानं कल्पयाम्यहमीशिते ॥ इति स्नानं ॥ मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे ॥ निरावर
णविज्ञानवासस्ते कल्पयाम्यहं ॥ इति वासः ॥ यमाश्रित्य महामाया जगत्संमोहिनी सदा ॥ तस्मै
ते परमेशाय कल्पयाम्युत्तरीयकं ॥ इत्युत्तरीयं ॥ यस्य शक्तित्रयेणेदं संप्रोतमखिलं जगत् ॥ यज्ञ
सूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये ॥ इति यज्ञसूत्रं ॥ स्वभावसुंदरांगाय सत्यासत्याश्रयाय ते ॥ भू
षणानि विचित्राणि कल्पयामि सुरार्चित ॥ इति भूषणं ॥ समस्तदेवदेवेश सर्वतृप्तिकरं परं ॥ अखं
डानंदसंपूर्णं गृहाण जलमुत्तमं ॥ इति जलं ॥ परमानंदसौरभ्यपरिपूर्णदिगंतरं ॥ अखंडानंद
संपूर्णं गृहाण जलमुत्तमं ॥ इति जलं ॥ परमानंदसौरभ्यपरिपूर्णदिगंतरं ॥ गृहाण परमं गंधं
कृपया परमेश्वर ॥ इति गंधं ॥ तुरीयगुणसंपन्नं नानागुणमनोहरं ॥ आनंदसौरभं पुष्पं गृह्यता
मिदमुत्तमं ॥ इति पुष्पं ॥ वनस्पतिरसोत्पन्नो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं
प्रतिगृह्यतां ॥ इति धूपः ॥ सुप्रकाशो महातेजः सर्वतस्तिमिरापहः ॥ सबाह्याभ्यंतरं ज्योतिर्दीपो
यं प्रतिगृह्यतां ॥ इति दीपः ॥ तथा च गौतमीये ॥ पूजा च विविधा प्रोक्ता तासां भेदं शृणुष्व मे ॥ अभि
गमनुपादानं योगः स्वाध्यायमेव च ॥ इत्या पंचप्रकारार्चा क्रमेण कथयामि ते ॥ तत्राभिगमनं ना
म देवतानां स्थानमार्जनं ॥ उपलेपनं निर्माल्यहरीकरणमेव च ॥ उपादानं नाम गंधपुष्पादिचय
नं तथा ॥ योगो नाम स्वदेवस्य स्वात्मत्वेनैव भावना ॥ स्वाध्यायो नाम मंत्रार्थसंधानपूर्वको जपः ॥
उक्तस्तोत्रादिपाठश्च हरेः संकीर्तनं तथा ॥ तत्त्वादिशास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः ॥

इज्या नाम स्वेष्टदेवपूजनं च यथार्थतः॥ इति पंचप्रकाराचीर्थिता तत्त्ववृत॥ सामीप्यसालोक्यसायुज्यसालेप्यप्रदा क्रमात्॥ अथ द्वारशुद्धिश्च वेणुवादनामिहोच्यते॥ घटोपसर्पणं चैव तथानुगमनं हरेः॥ तत्स्याप्रदक्षिणं चैव पादयोः स्थापनं तथा॥ पूज्यार्थं पत्रपुष्पाणां तत्त्वैव तुलनं हरेः॥ करयोः सर्वशुद्धीनामियं शुद्धिर्निगद्यते॥ तन्नामकीर्तनं चैव गुणानामपि कीर्तनम्॥ भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते॥ तत्कथाश्रवणं चैव तत्स्योत्सवनिरीक्षणं॥ श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते॥ पादोदकस्य निर्माल्यमालानामपि धारणं॥ उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुनः॥ आघ्राणं गंधपुष्पादिनिर्माल्यस्य तपोधन॥ विशुद्धिः स्यात्तनस्य घ्राणस्यापि विधीयते॥ पत्रपुष्पादिकं यच्च कृष्णपादयुगार्चने॥ तदेकं पावनं लोके तद्धि सर्वं विशोधयेत्॥ ललाटे च गदा मूर्ध्नि मुद्रिता चापशरास्तथा॥ नंदकं चैव हृन्मध्ये शंखं चक्रं भुजद्वये॥ शंखचक्रान्वितो विप्रः श्मशाने म्रियते यदि॥ प्रयाणे या गतिः प्रोक्ता सा गतिस्तस्य गोतम॥ तत्रापराधाः॥ यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे॥ देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥ उच्छिष्टे चैवाशौचे च भगवद्वंदनादिकं॥ एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणं॥ पादप्रसारणं चाग्रे तथा पर्यंकबंधनं॥ शयनं भक्षणं चापि मिथ्याभाषणमेव च॥ उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः॥ निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणं॥ कंबलावरणं चैव परनिंदा परस्तुतिः॥ अश्लीलभाषणं चैव अधोवायुविमोक्षणं॥ शक्तौ गौणोपचारश्च अनिवेदितभोजनं॥ तत्कालोद्भवानां च फलादीनामनर्पणं॥ विनियुक्तावशिष्टस्य प्रदानं व्यंजनस्य च॥ पृष्ठीकृत्यासनं चैव परनिंदा परस्तुतिः॥ गुरौ मौनं निजस्तोत्रं देवतानिंदनं तथा॥ अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः॥ वाराहे॥ केशवाग्रे नियुक्तं यन्न करोति हरेर्दिने॥ वा कृती किं न दग्धोऽसौ गतः किं न रसातलं॥ नारदीये॥ स्मरणं कीर्तनं चिह्नैः कृष्णमंत्रजपादिकम्॥

शानं तु प्रीतये तस्य नान्यथा निष्फलं भवेत् ॥ गोल भीत्ये ॥ शालिग्रामशिलालोयम प्रीताय स्त
मेस्तु ॥ प्रक्षेप लं प्रकुर्वन्ति ब्रह्महा स निगद्यते ॥ विहङ्गः पारदं च पीतं कुटिजश्चाघना
शनं ॥ लरेचाष्टगुणं पापं भ्रमो विंदुर्विभालनं ॥ अगस्त्ये ॥ हत्यां हलिपरं छत्ता चिलुलसी
स्त्रियं च तोयं पदेश्वैवेद्यं च वदुमधपानं च कलितं गुर्वंगनासंगजं ॥ श्वासाधीनमतिः स्थि
तिर्हरिजनैस्तत्संगमे त्विषः स्याल ग्राममहिलान्तासं ह माहिमा कोप्येश्शालो क्रोत्तरः ॥
स्वप्नप्रबोधकालोथ मंत्राणामभिधीयते ॥ मंत्रविद्याविभागेन तु द्विविधा मंत्रजातयः ॥
मंत्रायुर्देवताः प्रोक्ता विद्यास्त्रीदेवताः स्मृताः ॥ पुंमंत्राः हुंफडंतास्युर्द्विठांताः स्युः स्त्रियो
मताः ॥ नपुंसकानमोंताः स्युरित्युक्ता मंत्रवस्त्रिधा ॥ एवं सम्या नवं द्विधा महाघ्न्यं नगी
यते ॥ एवं मंत्रेपि ॥ अग्निषोमात्मका मंत्रा विशेषाः क्रूरसौम्ययोः ॥ क्रूर्मणो वह्नि तारां यवि
यत्स्थायः समीरितः ॥ आग्नेया मानवाः सौम्याः प्रायिशेन्दु मता स्वराः ॥ आग्नेयाः संप्रबुद्धाते
प्राणे चरति दक्षिणे ॥ भागे परस्मिन् स्थिते प्राणे सौम्या बोधं प्रयांति च ॥ नाडी द्वयगते प्राणे
सर्वे बोधं प्रयांति ते ॥ प्रयच्छंति फलं सर्वे प्रबुद्धा मंत्रिणां सदा ॥ यद्वा ॥ प्राणपानसमायोगा
च्छिवयुक्तो कुलं मीलनं ॥ प्रबोधकालो विज्ञेयाः स्वापकालस्ततः परं ॥ तथा ॥ वामवाहो यदा वा
युर्हस्वानां योजने तदा ॥ दक्षिणस्या यदा वायुस्तदा दीर्घा नियोजिता ॥ उभयस्थो यदा युस्तदा
स्यादुभयमात्मका ॥ संपुटीकृतमंत्रेण आदि लोतोन्तविंदुमान् ॥ पुनंतु सविसर्गं तु मान्तस्ये
माद्रे वनलं जपेत् ॥ एवं जपोपदिष्टश्च तत्कुर्द्धः शीघ्रसिद्धिदः ॥ इति स्वप्नबोधकालः ॥
भेभयोगासनानि ॥ पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा ॥ वीरासनमिति प्रोक्तं क्र
मादासनपंचकं ॥ ऊर्वोरुपरि विन्यस्य समं पादतले उभे ॥ अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्र

मातलः॥ पद्मासनमिति प्रोक्तं योगिनां हृदयंगमं॥ जान्वोरंतरे सम्यक् कृत्वा पादतले उभे॥ ऋ
जुकायो वसेद्योगी स्वस्तिकं तत्प्रचक्षते॥ सीमन्यां पार्श्वयोः न्यस्य गुल्फयुग्मं सुनिश्चितम्॥ वृष
णाधः पार्श्व पादौ पाणिभ्यां परिवर्धयेत्॥ भद्रासनं समुद्दिष्टं योगिभिः परिकीर्तितं॥ ऊर्वोः
पादौ क्रमान्यस्य जान्वोः प्रत्यङ्मुखांगुली॥ करौ निदध्यादाख्यातं वज्रासनमनुत्तमं॥ एकं पा
दमधः कृत्वा विन्यस्योरौ तथेतरं॥ ऋजुकायो वसेद्योगी वीरासनमिति स्मृतं॥ अथ मुद्रा
प्रकरणं॥ अथ मुद्राः प्रवक्ष्यामि सर्वतंत्रेषु गोपिताः॥ याभिर्विरचिताभिश्च मोदंते मंत्रदे
वताः॥ अर्चने जपकाले च ध्याने काम्ये च कर्मणि॥ स्नाने चावाहने शंखे प्रतिष्ठायां च र
क्षणे॥ नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते॥ स्थले मुद्राः परिज्ञेयाः स्वस्वलक्षण
लक्षिताः॥ आवाहनादिका मुद्रा नव साधारणा मताः॥ तथा षडंगमुद्राश्च सर्वत्र
प्रयोजयेत्॥ एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः॥ शंखचक्रगदापद्मवेणुश्रीवत्सकौस्तु
भाः॥ नवमुद्रा शान मुद्र्या तथा॥ गरुडाख्या ततो मुद्रा विष्णोः संतोषवर्धिनी॥ नारसिंही च वारा
ही हयग्रीवी धनुस्तथा॥ बाणमुद्रा च परशुर्जगन्मोहनिका तथा॥ काममुद्रा पराख्याता शिवस्य
दशमुद्रिकाः॥ लिंगं योनिस्त्रिशूलाक्षमाले ष्टाभीमृगाह्वयाः॥ खट्वांगा च कपालाख्या डमरुः शिव
तोषदाः॥ सूर्यस्यैकैव पद्माख्या सप्तमुद्रा गणेशितुः॥ दंतपाशांकुशविघ्नपरशुलड्डुसंज्ञकाः॥ बी
जमुद्रा बद्धमुद्रा विज्ञेया विघ्नपूजने॥ पाशांकुशावराभीतिकुचर्मधनुश्शराः॥ मौसली मुद्रिकाश्चो
गरुडमुद्रा क्रौंकु प्रियंकराः॥ लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्यास्तु पूजने॥ अक्षमाला तथा वी
णाव्याख्या पुस्तकसंज्ञिकाः॥ सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने॥ मत्स्यमुद्रा च कूर्माख्या
लेलिहा मुंडसंज्ञिका॥ महायोनिरिति ख्याता सर्वसिद्धिसमृद्धिदा॥ शक्त्याश्चार्चने महायोनिः
श्यामादौ मुंडमुद्रिका॥ मत्स्यमुद्रा लेलिहा च सर्वसाधारणी मता॥ दशमा मुद्रिकाः श्रेयाः

त्रिपुरायाः प्रपूजने ॥ संक्षोभद्रावणाकर्षवश्योन्मादमहांकुशाः ॥ खेचरी बीजयोन्याख्या त्रिखंडा परिकी
र्त्तिता ॥ कुंभमुद्राभिषेके स्यात्पद्ममुद्रासने तथा ॥ कालनी च प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ॥ पालिनी च
प्रयोक्तव्या जलशोधनकर्म्मणि ॥ श्रीगोपालार्च्चने वेणुर्नारसिंहे नारसिंहिका ॥ वाराहस्य च पूजायां वाराहा
ख्यां प्रदर्शयेत् ॥ रामार्च्चने धनुर्वाणमुद्रे परशुस्तथार्च्चने ॥ परशुरामस्य विशेया जगन्मोहनसंज्ञिका ॥
वीस्कंदे वा द्वयाध्याने कुंभमुद्रा तु रक्षणे ॥ सर्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥ मुद्रालक्षणमा
हयामले ॥ मोदनात्सर्वदेवानां द्रावणात्पापसंततेः ॥ तस्मान्मुद्रेयमाख्याता सर्वकामार्थसाधने ॥ तदृशानु
क्रमादासामुच्यते लक्षणान्यथ ॥ हस्ताभ्यामंजलिं बध्वानामिकामूलपर्वणोः ॥ अंगुष्ठौ निक्षिपेत्से
यं मुद्रा त्वावाहने स्मृता ॥ १ ॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मुद्रिका स्मृता ॥ २ ॥ उच्छ्रितांगुष्ठमु
ष्ट्योस्तु संयोगात्सन्निधापनी ॥ ३ ॥ अंतःप्रवेशितांगुष्ठा सैव संरोधिनी मता ॥ ४ ॥ उत्तानमुष्टियुग
ला सम्मुखीकरणं मता ॥ ५ ॥ देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः ॥ ६ ॥ सव्यहस्तकृता मुष्टिर्दीर्घा
धोमुखतर्ज्जनी ॥ अवगुंठनमुद्रेयं कथिता भाषिता सती ॥ ७ ॥ अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामि
का पुनः ॥ तथैव तर्ज्जनीमध्या धेनुमुद्रा समीरिता ॥ अमृतीकरणं कुर्यात्तया साधकसत्तमः ॥ ८ ॥ अन्यो
न्यग्रथितांगुष्ठा प्रसारितपरांगुली ॥ महामुद्रेयमाख्याता परमीकरणे बुधैः ॥ ९ ॥ प्रयोजयेदिमां मुद्रां
देवताह्वानकर्म्मणि ॥ ॐ गन्यासस्य मुद्रायाः तासां लक्षणं सर्वमुक्तं ॥ पेलवीनां तु मुद्राणां कथ्यते लक्ष
णं यथा ॥ वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना ॥ कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारये
त् ॥ वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः ॥ दक्षिणांगुष्ठसंस्पृष्टा मुद्रैषा शंखमुद्रि
का ॥ १ ॥ हस्तौ तु संमुखौ कृत्वा संभग्नौ सुप्रसारितौ ॥ कनिष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञि
का ॥ २ ॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुली ॥ अंगुष्ठौ मध्यमे भूयः संलग्नौ सुप्रसा
रितौ ॥ गदामुद्रेयमुदिता विष्णोः संतोषवर्द्धिनी ॥ ३ ॥ हस्तौ तु संमुखौ कृत्वा सन्नतप्रोन्नतांगु

ली॥ तलौ लग्निलितांगुष्ठौ रुलैषा पद्ममुद्रिका॥४॥ ऊर्ध्वो वामकरांगुष्ठो लग्नस्तत्कनिष्ठिका॥ दक्षिणा-
गुष्ठसंयोगात्तु निष्ठा सा प्रसारिता॥ तर्जनी मध्यमानामाः किंचिद्गुष्ठाप्रीयसी हरे॥५॥ अन्योन्यपृ-
ष्ठकरयोर्मध्यमानामिकांगुली॥ अंगुष्ठेन तु बध्नीयात्कनिष्ठाग्रे तु संस्थिते॥ तर्जन्यौ कारयेद्देषा मु-
द्रा श्रीवत्ससंज्ञका॥६॥ अनामापृष्ठसंलग्नां दक्षिणस्य कनिष्ठिकां॥ कनिष्ठयान्यथा बध्वा तर्जन्या द-
क्षया स्पृशेत्॥ वामानामां च बध्नीयाद्दक्षिणांगुष्ठमूलके॥ अंगुष्ठमध्यमावामे संयोज्य सरलाः पराः॥ च-
तस्रोप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञका॥७॥ स्पृष्टौ कंठादिपादांतं तर्जन्यंगुष्ठया तथा॥ करद्वयेन मा-
लवन्मुद्रेयं वनमालिका॥८॥ तर्जन्यंगुष्ठकौ सक्तौ अग्रतो हृदि विन्यसेत्॥ वामहस्तांबुजे वामजानु-
मूर्ध्नि प्रविन्यसेत्॥ इयं नमुद्रा भवेद्देषा रामचंद्रस्य प्रेयसी॥९॥ अंगुष्ठं वामसमुद्दंडीताभिलदरांगु-
ष्ठके नाथ बद्ध्वा तस्यांगं पीडयित्वांगुलिचिरपंचिता वामहस्तांगुलीभिः॥ बद्ध्वा गाढं हृदि स्थापयलु नि-
मल्चीर्पा हरेर्वारचीजं विल्वा रव्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया विधिज्ञैः॥१०॥ हस्तौ तु विमु-
खौ कृत्वा ग्रथयित्वा कनिष्ठके॥ मिथस्तर्जनिके श्लिष्टे तथाश्लिष्टावंगुष्ठकौ॥ मध्यमानामिके द्वे तु द्वौ प-
क्षाविव चालयेत्॥ एषा गरुडमुद्राख्या विष्णोः संतोषवर्धिनी॥११॥ जानुमध्ये करौ कृत्वा चिबुकोष्ठौ
समावृतौ॥ हस्तौ च भूमिसंलग्नौ कंप्यमानः पुनः पुनः॥ मुखं विवृतं कुर्याल्लेलिहानश्च जिह्विकां॥
नारसिंही भवेद्देषा मुद्रा तत्प्रीतिवर्धनी॥१२॥ अंगुष्ठाभ्यां च करयोरथ कमध्यकनिष्ठिके॥ अधोमुखी-
भिः सर्वाभिर्मुद्रेयं च हरेर्मता॥१३॥ देहोपरि करं वामं कृत्वा तानमधः स्थितः॥ वामयेद्दितिसंप्रोक्ता मुद्रा
वाराहसंज्ञिका॥१४॥ दक्षहस्तं चोर्ध्वमुखं वामहस्तमधोमुखं॥ अंगुल्यग्रे तु संयुक्ते मुद्रा वाराहसंज्ञि-
का॥१५॥ वामहस्ततले न्यस्य अंगुलीस्तास्त्वधोमुखीः॥ संरोप्य मध्यमां तासां मध्यस्यां चोन्मुखयेत्॥१६
हयग्रीवप्रिया मुद्रा लक्ष्मीरनुकारिणी॥१६॥ वामस्य मध्यमाग्रे तु तर्जन्यग्रेण योजयेत्॥ अनामि-
का कनिष्ठां च तस्याग्रेगुष्ठेन पीडयेत्॥ दक्षिये द्वामकं स्कंधे धेनुमुद्रेयमीरिता॥१७॥ दक्षमुष्टिस्थतर्ज-
न्या दीर्घा यावा मुद्रिका॥

२०४

यद्वा शानाणीवे ॥ यथा हस्तगतं चापं तथा हस्तं कुरु प्रिये ॥ बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥ १६ ॥
तलेन तलं तु कूरयोस्तिर्यक् संयोज्य चांगुली ॥ सहस्ताः प्रसृताः कुर्यान्मुद्रा परशुसंज्ञका ॥ ऊर्ध्वस्वांगुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी ॥ २० ॥ हस्तौ तु संपुटौ कृत्वा प्रसृतांगुलिकौ तथा ॥ तर्जन्यौ मध्यमापृष्ठे अंगुष्ठौ मध्यमाश्रितौ ॥ वाममुद्रे कुमुदिता सर्वदेवप्रियंकरी ॥ २१ ॥ महादेवप्रियाणां च कृत्यं ते लक्षणान्यथ ॥ उच्छ्रिते दक्षिणांगुष्ठे वामांगुष्ठेन वेष्टयेत् ॥ वामांगुली दक्षिणाभिरंगुलीभिश्च वेष्टयेत् ॥ लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥ १ ॥ मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके ॥ अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ॥ अंगुष्ठाग्रद्वयं न्यसेद्योनिमुद्रा समीरिता ॥ २ ॥ अंगुष्ठेन कनिष्ठां तु बद्ध्वा श्लिष्टांगुलित्रयं ॥ प्रसारयेत्त्रिशूलाख्या मुद्रेषा परिकीर्तिता ॥ ३ ॥ अंगुष्ठतर्जन्यग्रे तु ग्रथयित्वांगुलित्रयं ॥ प्रसारयेदक्षमाला मुद्रेयं परिकीर्तिता ॥ ४ ॥ अथ स्थितो रक्षहस्तः प्रसृतो वरमुद्रिका ॥ ५ ॥ ऊर्ध्वीकृतो वामहस्तः प्रसृतोऽभयमुद्रिका ॥ ६ ॥ मिलितानामिकांगुष्ठमध्यमाग्रे नियोजयेत् ॥ श्लिष्टांगुल्यश्चिते कुर्यान्मृगमुद्रेयमीरिता ॥ ७ ॥ पंचांगुल्यो दक्षिणास्तु मिलिता यद्यधो मुन्नताः ॥ खट्वांगमुद्रा व्याख्याता शिवस्यातिप्रिया मता ॥ ८ ॥ पात्रवद्वामहस्तं च कृत्वा तं कृत्वा वामके तथा ॥ निधायोपरि तेन तु कुर्यान्मुद्रा कपालिकी मता ॥ ९ ॥ मुष्टिं च द्विभिर्लोके बद्ध्वा दक्षिणे तलमध्यमां ॥ दक्षिणामुर्ध्वमुन्नम्य कूर्परे कृत्वा प्रचालयेत् ॥ एषा डमरुविख्याता सर्वविघ्नविनाशिनी ॥ १० ॥ तलौ गणनामुद्रा लग्नमुच्यते लक्षणान्यथ ॥ उत्तानोर्ध्वमुखी मध्या सरला वद्धमुष्टिका ॥ दंडमुद्रा समाख्याता सर्वाभिमतिकारदेः ॥ १ ॥ वाममुष्टिस्थलतर्जन्या दक्षमुष्टिस्थतर्जनी ॥ संयोज्यांगुष्ठयोरग्रे तु तर्जन्यग्रेण कं क्षिपेत् ॥ एषा पाशमुद्रा मुद्राविद्भिः परिकीर्तिता ॥ २ ॥ अंगुष्ठमध्यमा स्तन्यतर्जनी मध्यपर्वणि ॥ संयोज्याकुंचयेत्तां चिन्मुद्रेयां कुशसंज्ञिका ॥ ४ ॥ परशुमुद्रा निगदिता प्रसिद्धा लडुमुद्रिका ॥ नीजमप्रराहूया मुद्रा प्रसिला तु पक्षिता ॥ शान्ते यीनां तु मुद्राणाम्

२०४

कथ्यंते लक्षणान्यथ॥ पाशांकुशवराभीतिधनुर्बाणाः समीरिताः॥ कनिष्ठानामिके बद्धा
स्वांगुष्ठेनैव दक्षतः॥ जिष्टांगुलिस्तु प्रसृते संश्लिष्टे खड्गमुद्रिका॥१॥ वामहस्ते तथा ति
र्यक् कृत्वा चैव प्रसार्य च॥ आकुंचितांगुलिं कुर्याच्चर्ममुद्रेयमीरिता॥२॥ मुष्टिं कृत्वा तु
हस्ताभ्यां वामस्योपरि दक्षिणं॥ कुर्यान्मुसलमुद्रेयं सर्वविघ्नविनाशिनी॥३॥ मुष्टिं कृ
त्वा कराभ्यां च वामस्योपरि दक्षिणम्॥ कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता॥४॥ च
क्रमुद्रां तथा बद्ध्वा मध्यमे द्वे प्रसार्य च॥ कनिष्ठिके तथानीय तलदग्रे गुष्ठके क्षिपेत्॥५॥
लक्ष्मीमुद्रा पराह्येषा सर्वसंपत्प्रदायिनी॥ वीणावादनवद्धस्तौ कृत्वा संचालयेच्छिरः॥
वीणामुद्रेयमाख्याता सा सरस्वत्याः प्रियंकरी॥१॥ वाममुष्टिं स्वाभिमुखीं कृत्वा पुरतः कमु
द्रिका॥ दक्षिणांगुष्ठतर्जन्यामंतरे प्रलग्नापरांगुली॥२॥ प्रसार्य शां हस्तोत्तान एषा व्याख्या
न मुद्रिका॥ श्रीरामस्य सरस्वत्या अत्यंतप्रियकरी मता॥३॥ मणिबंधस्थितौ कृत्वा प्रसृ
तांगुलिकौ करौ॥ कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरं॥४॥ तर्जनीमध्यमानामाः संह
ता भुग्नवर्जिता॥ मुद्रैषा गालिनीनाम द्वारस्योपरि चालिता॥१॥ दक्षांगुष्ठं परांगुष्ठे क्षि
प्त्वा हस्तद्वयेन तु॥ सावकाशां तमेकां मुष्टिं कुर्यात्सा कुंभमुद्रिका॥२॥ मुष्ट्योरूर्ध्वं कृतांगु
ष्ठौ तर्जन्यग्रे तु विन्यसेत्॥ सर्वरक्षाकरी ह्येषा कुंभमुद्रेयमीरिता॥३॥ प्रसृतांगुलि
कौ हस्तौ मिथः श्लिष्टौ तु संमुखौ॥ कुर्यात्स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका॥४॥ अं
जल्यंजलमुद्रा मां हास्कदे वाभिधा च सा॥५॥ अंगुष्ठांगुलितौ कृत्वा मुष्ट्योः संलग्नयोः द्व
योः॥ तावेवाभिमुखौ कुर्यान्मुद्रा सा कालकर्णिका॥६॥ दक्षिणानिबिडा मुष्टिर्नामिकार्पि
ततर्जनी॥ मुद्रा विस्मयसंज्ञा स्याल्लविस्मयावेशकारिणी॥ मुष्टिं कृत्वा तु तांगुष्ठा दक्षि

एता नाराचमुद्रिका ॥८॥ तर्जन्यंगुष्ठसंयोगादग्रतो बिंदुमुद्रिका ॥ अधोमुखे वामहस्ते ऊर्ध्वा
स्यं वामहस्तकं ॥९॥ क्षिप्त्वांगुलीरंगुलिभिः संगृह्य परिवर्तयेत् ॥ एषा संहारमुद्रा स्या
द्विसर्जने विधौ स्मृता ॥१०॥ दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् ॥ अंगुष्ठौ चालयेत्
सम्यक् मुद्रेयं मत्स्यरूपिणी ॥११॥ वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठकं ॥ तथा दक्षि
णतर्जन्यां वामांगुष्ठं नियोजयेत् ॥१२॥ उन्नतं दक्षिणांगुष्ठं वामस्य दक्षिणादिभिः ॥ अंगु
लीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥१३॥ वामस्य पितृतीर्थेन मध्यमेनामिके तथा ॥
अधोमुखे च ते कुर्याद् दक्षिणस्य करस्य च ॥१४॥ कूर्मपृष्ठसमं कुर्याद्दक्षपाणिं च सर्वतः ॥
कूर्ममुद्रेयमाख्याता देवताध्याने कर्मणि ॥१५॥ पृष्ठे क्रोडे ॥ अंतरांगुलिमुष्टिं तु कृत्वा वा
मे करस्य च ॥ मध्यमाग्रे तु दक्षस्य तथा लंब्य प्रयत्नतः ॥१६॥ मध्यमेनाथ तर्जन्या अंगुष्ठा
ग्रे तु योजयेत् ॥ दक्षिणं योजयेत्पाणिं वाममुष्ट्यं तु साधकः ॥१७॥ द्वितीये दक्षिणे भागे मुंड
मुद्रेयमुच्यते ॥ तर्जनीमध्यमानामाः समं कुर्यादधोमुखं ॥१८॥ अनामायां क्षिपेद्वृद्धा
मूर्ध्वीकृत्वा कनिष्ठिकां ॥ लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्तिता ॥१९॥ तर्जन्यनामि
कामध्ये कनिष्ठाक्रमयोगतः ॥ करयोर्योजयेत्येव कनिष्ठामस्तदेशतः ॥२०॥ अंगुष्ठाग्रे
तु निक्षिप्य महायोनिः प्रकीर्तिता ॥ वामकेश्वरतंत्रोक्ताः ॥ प्रकाश्यंतेऽत्र मुद्रिकाः ॥ शृ
णु देवि प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः ॥ याभिर्विरचिताभिस्तु सान्निध्यं त्रैपुरं भवेत् ॥ परि
वर्त्य करौ स्पष्टावंगुष्ठौ कारयेत्समौ ॥ अनामांतर्गते कृत्वा तर्जन्यौ कुटिलाकृती ॥२॥ कनि
ष्ठिके नियुंजीत निजस्थाने महेश्वरी ॥ त्रिखंडेयं समाख्याता त्रिपुराध्यानकर्मणि ॥३॥
मध्यमां मध्यमे कृत्वा कनिष्ठांगुष्ठरोधिते ॥ तर्जन्यौ दंडवत्कृत्वा मध्यमोपर्यनामिके ॥४॥

एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी ॥२॥ एतस्या एव मुद्राया मध्यमे सरले यदा ॥ क्रि-
यते परमेशानि सर्वविद्राविणी तदा ॥३॥ मध्यमातर्जनीभ्यां च कनिष्ठानामिके समे ॥ अं-
कुशाकाररूपाभ्यां मध्यमे परमेश्वरि ॥४॥ अंगुष्टं तु नियुंजीत कनिष्ठानामकोपरि ॥ इय-
माकर्षिणी मुद्रा त्रैलोक्याकर्षिणी परा ॥५॥ पुटाकारौ करौ कृत्वा तर्जन्यावंकुशाकृति ॥ प-
रिवर्त्तक्रमेणैव मध्यमे तदधोगते ॥६॥ क्रमेण देवि तेनैव कनिष्ठानामिकादयः ॥ संयोज्य
निबिडाः सर्वा अंगुष्ठावग्रदेशतः ॥७॥ मुद्रेयं परमेशानि सर्ववश्यकरी मता ॥ संमुखौ तु क-
रौ कृत्वा मध्यमा मध्यगं त्यजे ॥८॥ अनामिके तु सरले तद्बहिस्तर्जनीद्वयं ॥ दंडाकारौ ततों-
गुष्ठौ मध्यमानखदेशगौ ॥९॥ मुद्रैषोन्मादिनी नाम क्लेदिनी सर्वयोषितां ॥ अस्यास्त्वनामिका-
युग्ममधः कृत्वांकुशाकृती ॥१०॥ तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ॥ इयं महांकु-
शा मुद्रा सर्वकामार्थसाधनी ॥११॥ सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणं ॥ बाहुं कृत्वा महे-
शानि हस्तौ संपरिवर्त्य च ॥१२॥ कनिष्ठानामिके देवि युक्त्वा तेन क्रमेण च ॥ तर्जनीभ्यां स-
माक्रांते सर्वोर्ध्वमपि मध्यमे ॥१३॥ अंगुष्ठौ च महेशानि सरलावपि कारयेत् ॥ इयं सा खे-
चरी नाम पार्थिवस्थाने नियोजिता ॥१४॥ परिवर्त्य करौ स्पष्टावर्धचंद्राकृती प्रिये ॥ तर्जन्यं-
गुष्ठयुगलं युगपत्कारयेत्ततः ॥१५॥ अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ॥ तथैव
कुटिले योज्य सर्वाधस्तादनामिके ॥१६॥ बीजमुद्रेयमचिरात्सर्वसिद्धिप्रवर्धिनी ॥ म-
ध्यमे कुटिले कृत्वा तर्जन्युपरि संस्थिते ॥१७॥ अनामिके मध्यगते तथैव हि कनिष्ठके ॥
सर्वा एकत्र संयोज्य अंगुष्ठोपरि संस्थिते ॥१८॥ अनामिके मध्यगते योनिमुद्रेति संज्ञिता ॥
एषा मुद्रा महेशानि त्रिपुरायामयोदिता ॥१९॥ पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥

6

बद्ध्वा तु योनिनी मुद्रा वै मध्यमे कुटिले कुरु ॥ अंगुष्ठेन तदग्रे तु मुद्रेयं भू विनिर्मिता ॥ वामहस्तेन
मुष्टिं तु बद्ध्वा कुर्यात्प्रदेशकं ॥ तर्जनी सरली कृत्य नाम्नेयं मनुचित्तमः ॥ सौभाग्यदंडिनीमु
द्रा न्यासकाले प्रदर्शिता ॥ अंतरंगुष्ठमुष्ट्या तु निरुद्ध्वा तर्जनीमिमां ॥ रिपुजिह्वाग्रहा मुद्रा
न्यासकाले तु दर्शिता ॥ इति मुद्राप्रकारः ॥ अथ धारणयंत्राणि भुवनेश्वर्याः ॥ आलिख्या
ष्टदिगर्गलान् पुरद्वयं पाशादिकं त्र्यक्षरं कोष्ठेष्वंग मनून् परेषु विलिखेदष्टार्णमंत्रद्वयं ॥ अ
र्णा परपंकजे ग्रजेय रवान्योमा सनाद्गर्गले षाल्लिखेद्द्वज लोधिपादि गुणदाः पंक्तिद्वयं
तत्परम् ॥ १ ॥ कोष्ठेष्वष्टसु मातृवर्णमालासहितां युग्मस्वरांतर्गतां मायां केसरगां दलेषु विलि
खेन्मूलं त्रिपंक्तिक्रमात् ॥ त्रिः पाशांकुशवेष्टितं च लिपिभिर्वीतं क्रमाद्व्युत्क्रमात् पत्रस्थेन
घटेन पंकजमुखेनावेष्टितं तद्बहिः ॥ २ ॥ घटार्गलमिदं यंत्रं मंत्रिणां प्राप्तेतमं मतं ॥ पाशा
श्रीशक्ति कं दर्प कामशक्तीर्हि शांकुशा ॥ ३ ॥ प्रथमो षोडशाक्षरो मंत्रः ततः कामिनी रंजनि
स्वाहांतो ष्टाक्षरः सप्तद्विरपरः क्लीं नित्यमनुः ह्रीं गौरी रुद्रदयिते योगेश्वरि सर्व में पूरय ॥ हुं
ठंठः षोडशार्णोयं मंत्रः सप्तद्विरदीरितः ॥ इति भुवनेश्वरि धारणं ॥ अथ त्वरितायाः
तारे क्रूं विलिखेत् सरोजकुहरे साध्याभिधानान्वितं मंत्रार्णान्वसुसंख्यकान्वसुदले
ध्वालिख्य तद्बाह्यतः शांत्यांत्रिः परिवेष्टितं घटगते पद्मस्थमज्ञाननं यंत्रं वश्यकरं
ग्रहादिभयहृल्लक्ष्मीप्रदं कीर्तिदं ॥ ३ ॥ इति त्वरितायाः ॥ पद्मं जानु दलान्वितं प्रवि
लिखेत् कर्णिकायां पुनस्तारं शक्तिगवीजसाध्यसहितं तत्केसरेषु क्रमात् ॥ मर्दित्वा
मनुसंज्ञवान्युगलशो वर्णान् पुनः पुन्नागान्मंत्राणान्गुणशो विधाय विलिखेद्दलं तरदंले

दूले ॥ मंत्रस्तकठलिष्टपुरश्चिकं स्वाविषिभयं मम पस्थितं ॥ यदि शत्रुस्य मशत्रूस्यं वा लम्भे भगव
ति शमय स्वाहा ॥ मालक्षाव लो संवीतं त्रपुरद्वय मध्यगं ॥ यंत्रे विंध्यनिवासिन्याः प्रोक्तं
सर्व समृद्धिदं ॥ रक्षाकरं विशेषण क्षुद्रभूतादिनाशने ॥ राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमि
च्छतां ॥ फलार्थिनीनां फलदं रोगिनां रोगनाशनं ॥ बहुना किमिहोक्तेन यंत्र लक्ष्मी महोम
णिः ॥ इति मरदुर्गायाः ॥ वेदादिस्थितसाध्यनाम पुगशीः श्रीशक्तिमोरान्वितं किंजल्के पुरदने
